Samskrit for Specific Purpose Series - 3

गीतायाः भाषा

संस्कृतं पठ्यताम्

चतुर्थः भागः - ४

Learn Samskrit

THE LANGUAGE OF GITA

Part - 4.4

संस्कृतसंवर्धनप्रतिष्ठानम्

Samskrit for Specific Purpose Series - 3

गीतायाः भाषा

संस्कृतं पठ्यताम्

चतुर्थः भागः - ४

Learn Samskrit

THE LANGUAGE OF GITA

PART - 4.4

ONGC-CSR Supported Project of

Samskrit Promotion Foundation

संस्कृतसंवर्धनप्रतिष्ठानम्

देहली

प्रकाशनम्
संस्कृतसंवर्धनप्रतिष्ठानम्
११२०४/५, वेदभवनम्, गोशालामार्गः
देहली - ११०००६

© प्रकाशकस्य एव

प्रथममुद्रणम् - २०१७
द्वितीयमुद्रणम् - २०२१

मुद्रणम्
प्रिन्टैक इन्टरनेशनल
ए-६/डी, झिलमिल इंडस्ट्रियल एरिया,
दिल्ली - ११००९५

परामर्शसमितिः

डॉ. चान्दकिरणसलूजा
चमूकृष्णशास्त्री (पद्मश्रीः)
डॉ. विश्वासः

लेखकाः

आचार्य अनूप शर्मा
अश्विनी राजेश लङ्के
सौ. श्रद्धा उपाध्ये
श्रीदेव झा

ISBN -978-81-944709-5-3

Learn Samskrit - THE LANGUAGE OF GITA (PART - 4.4)
Fourth level text book to learn Samskrit through Gita.

Publisher - Samskrit Promotion Foundation
11204/5, Vedabhavanam, Gaushala Marg, Delhi-110006
Email: info@samskritpromotion.in

Pages - 6+346
Second Print - 2021
Printed at : Printech International
A-6/D, Jhilmil Industrial Area, Delhi-110095

Preface

The richness and vibrance of the Samskrit language is a fact acknowledged by scholars and intellectuals across the world. Over millennia, Samskrit has been the principal vehicle of the knowledge traditions and practices of Bharat, or India. This continuum of the language not only helped create innumerable branches of knowledge, but also resulted in an unmatched corpus of classical texts in every conceivable domain of human endeavor, thus laying the very foundations for the development and spectacular rise of the Bharatiya civilization.

However, in recent centuries, Samskrit became tagged as just a 'religious language', an impression that remains in the minds of many people throughout the world even to this day. This situation is due to several reasons: (१) while our day-to-day affairs were in our individual 'mother tongue', Samskrit remained restricted to the conduct of our religious ceremonies and programs; (२) over the last two centuries or so, there were concerted efforts to alienate Samskrit from our mainstream education; and (३) for a long time, there has been a deliberate campaign of disinformation regarding Samskrit, either because of ignorance or because of ulterior motives.

The truth is simple: Samskrit is the unparalled medium, the original language that has articulated all knowledge and wisdom in our region since eternity. The language of science and medicine has been Samskrit. The language of literature has been Samskrit. The language of philosophy and religion has been Samskrit. The language of the arts and music has been Samskrit. It is no wonder that mankind's first astronomical observations were recorded in Samskrit. Again, Samskrit is the only language that truly reveals the secrets of Yoga or Ayurveda.

Yet, we are confronted today with a peculiar situation. While there are countless works in Samskrit on a wide range of subjects, innumerable original works still remain unpublished. To make matters worse, even the published Samskrit literature is seen and studied only through the lens of religion. In order to bridge the disconnect between Samskrit and modern times, the need of the hour is the editing and publishing of ancient Samskrit texts, knowledge retrieval and dissemination, and research and re-interpretation. All this in Samskrit itself --- not in translation, as the essence can easily be lost. The challenges for Bharat are major, but shouldering the responsibilites would not only be life-fulfilling, but also offer our younger generation bright career opportunities and a great future in Samskrit studies.

Today, adult beginners of Samskrit are learning the language for specific purposes: e.g., to access the original texts on Yoga, Ayurveda, Vedanta, as well as the eternal repositories of wisdom such as the Arthashastra, the Vedas, the Upanishads, the Bhagavad-Gita. The vocabulary, verbal repertoire, syntax, semantics, etc., of every discipline differ from one to the other.

With such specific requirements, many modern-day learners find that the conventional language-centered approach is a roundabout route to accessing their information needs. This new Samskrit for Specific Purpose (SSP) series is uniquely tailored for them, offering a more focused methodology. Unlike the traditionally available Samskrit learning materials or courses, this SSP series is uniquely designed to facilitate the study of the target language through the target subject, and the study of the target subject through the target language.

The SSP series can be useful for all irrespective of age groups and occupations for both self-learning and classroom teaching. The SSP series course books herald a new era in Samskrit learning/education, and are supplemented with audio, video and e-learning modules. The approach of 'Samskrit through Samskrit' is extremely crucial. You can, and will, easily learn Samskrit directly, without the crutch of, say, English. Thus, in the broader context, Samskrit through Samskrit (STS) and Samskrit for Specific Purpose (SSP) will together provide a highly effective learning platform for even first-time learners.

In conclusion, a brief word of advice: although learners may feel, at the outset, that their intention to learn Samskrit is only to read and understand the target subject, they must keep in mind that sound/speech (listening and speaking) is the primary medium of a language. The practice of listening and speaking should precede the practice of the reading and writing.

The SSP series is designed to introduce Samskrit through simple conversations, to make learning both interesting and meaningful, followed with graded lessons. The series will not only make learners function adequately in Samskrit, but will also enable them eventually to read, comprehend and undertake studies in Samskrit in their specific interest area at a higher level.

SPF acknowledges and thanks Dr. H R Vishwasa, Mangalore for his guidance and advice in preparation of books of Bhagavad Gita Series.

अनुक्रमणिका

क्र०	अध्यायः	अध्यायनाम	पृष्ठसंख्या
१.	अथ चतुर्दशोऽध्यायः	गुणत्रयविभागयोगः	१
२.	अथ पञ्चदशोऽध्यायः	पुरुषोत्तमयोगः	५८
३.	अथ षोडशोऽध्यायः	दैवासुरसम्पद्विभागयोगः	८९
४.	अथ सप्तदशोऽध्यायः	श्रद्धात्रयविभागयोगः	१३४
५.	अथ अष्टादशोऽध्यायः	मोक्षसंन्यासयोगः	१८५
६.	सम्पूर्ण-श्रीमद्भगवद्गीतायाः अकारादिक्रमेण पादानुक्रमणिका		३२२

सङ्केताक्षरसूची

अ.	अकारान्तः	र.	रेफान्तः
आ.	आकारान्तः	म.	मकारान्तः
इ.	इकारान्तः	न.	नकारान्तः
ई.	ईकारान्तः	ध.	धकारान्तः
उ.	उकारान्तः	ज.	जकारान्तः
ऊ.	ऊकारान्तः	द.	दकारान्तः
ऋ.	ऋकारान्तः	चका.	चकारान्तः
ओ.	ओकारान्तः	त.	तकारान्तः
पुं.	पुंलिङ्गः	प.	पकारान्तः
नपुं.	नपुंसकलिङ्गः	श.	शकारान्तः
स्त्री.	स्त्रीलिङ्गः	सका.	सकारान्तः
प्र.	प्रथमा विभक्तिः	आत्म.	आत्मनेपदम्
द्वि.	द्वितीया विभक्तिः	पर.	परस्मैपदम्
तृ.	तृतीया विभक्तिः	लट्.	लट् लकारः
च.	चतुर्थी विभक्तिः	लिट्.	लिट् लकारः
पं.	पञ्चमी विभक्तिः	लोट्.	लोट् लकारः
ष.	षष्ठी विभक्तिः	लङ्.	लङ् लकारः
स.	सप्तमी विभक्तिः	विधिलिङ्.	विधिलिङ् लकारः

सम्बो.	सम्बोधनम्	लुङ्.	लुङ् लकारः
एक.	एकवचनम्	लृङ्.	लृङ् लकारः
द्विव.	द्विवचनम्	प्रपु.	प्रथमपुरुषः
बहु.	बहुवचनम्	मपु.	मध्यमपुरुषः
सर्व.	सर्वनामपदम्	उपु.	उत्तमपुरुषः
ह.	हकारान्तः	क्रियावि.	क्रियाविशेषणम्
व.	वकारान्तः		
ऽ	एतस्य नाम अवग्रहचिह्नम्, अकारं दर्शयितुम् एतत् चिह्नं स्थापितम् अस्ति ।		

उपसर्गाः

प्र	परा	अप	सम्	अनु	अव
निस्	निर्	दुस्	दुर्	वि	आङ्
नि	अधि	अपि	अति	सु	उद्
अभि	प्रति	परि	उप		

एते उपसर्गाः सन्ति । एतेषां प्रयोगः सर्वदा धातोः आदौ भवति ।
पदपरिचये व्याकरणांशे वा 'प्र' इत्यादयः ये शब्दाः लिखिताः सन्ति ते उपसर्गाः इति ज्ञातव्यम् ।

अस्मिन् ग्रन्थे क्रियापदं यस्मिन् पदे प्रयुक्तम् अस्ति तस्मिन् एव पदिनि धातोः निर्देशः कृतः अस्ति । अर्थात् प्रयोगं दृष्ट्वा पदनिर्देशः अस्ति ।

अथ चतुर्दशोऽध्यायः

गुणत्रयविभागयोगः

१४

श्रीभगवानुवाच - **परं भूयः प्रवक्ष्यामि ज्ञानानां ज्ञानमुत्तमम्।**
यज्ज्ञात्वा मुनयः सर्वे परां सिद्धिमितो गताः ॥१४.१॥

पदच्छेदः -

श्रीभगवान्, उवाच - परम्, भूयः, प्रवक्ष्यामि, ज्ञानानाम्, ज्ञानम्, उत्तमम्।
यत्, ज्ञात्वा, मुनयः, सर्वे, पराम्, सिद्धिम्, इतः, गताः ॥

अन्वयः - भूयः परं ज्ञानानाम् उत्तमं ज्ञानं प्रवक्ष्यामि। सर्वे मुनयः यत् ज्ञात्वा इतः परां सिद्धिं गताः।

पदार्थः - भूयः = पुनः पुनः, परम् = अन्यत्, ज्ञानानाम् = ज्ञानेषु, उत्तमम् = प्रकृष्टम्, ज्ञानम् = ज्ञानम्, प्रवक्ष्यामि = कथयिष्यामि, सर्वे मुनयः = सर्वे ऋषयः, यत् ज्ञात्वा = यत् अवगत्य, इतः = इतः परम्, परां सिद्धिम् = मोक्षम्, गताः = प्राप्तवन्तः।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
भूयः	अव्ययम्	परम्	अव्ययम्
ज्ञानानाम्	अ. नपुं. ष. बहु.	उत्तमम्	अ. नपुं. द्वि. एक. (विशेषणम्)
ज्ञानम्	अ. नपुं. द्वि. एक. (विशेष्यम्)	प्रवक्ष्यामि	प्र + वच् (वच-परिभाषणे) पर. कर्तरि लृट्. उपु. एक.
सर्वे	अ. सर्व. पुं. प्र. बहु. (विशेषणम्)	मुनयः	इ. पुं. प्र. बहु. (विशेष्यम्)
यत्	अव्ययम्	ज्ञात्वा	क्त्वान्तम् अव्ययम्
इतः	अव्ययम्	पराम्	आ. सर्व. स्त्री. द्वि. एक. (विशेषणम्)
सिद्धिम्	इ. स्त्री. द्वि. एक. (विशेष्यम्)	गताः	अ. पुं. प्र. बहु. (विशेषणम्)

व्याकरणम् -

(क) सन्धिः	यज्ज्ञात्वा	यत् + ज्ञात्वा	जश्त्वसन्धिः।
	इतो गताः	इतः + गताः	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः।
(ख) कृदन्तः	ज्ञानम्	ज्ञा (ज्ञा - अवबोधने) + ल्युट् (करणे)।	
	ज्ञात्वा	ज्ञा (ज्ञा अवबोधने) + क्त्वा।	
	सिद्धिम्	सिध् (षिधु - संराद्धौ) + क्तिन्, ताम्।	
	गताः	गम् (गम्लृ - गतौ) + क्त (कर्तरि)।	

(ग) तद्धितान्तः उत्तमम् — उद् + तमप्, अतिशये तमप् ।
इतः — इदम् + तसिल् (पञ्चम्यर्थे) ।

भावस्पष्टीकरणम् -

प्रवक्ष्यामि ।	
किं प्रवक्ष्यामि ?	**ज्ञानं** प्रवक्ष्यामि ।
कीदृशं ज्ञानं प्रवक्ष्यामि ?	**उत्तमं** ज्ञानं प्रवक्ष्यामि ।
केषाम् उत्तमं ज्ञानं प्रवक्ष्यामि ?	**ज्ञानानाम्** उत्तमं ज्ञानं प्रवक्ष्यामि ।
कीदृशं ज्ञानानाम् उत्तमं ज्ञानं प्रवक्ष्यामि ?	**परं** ज्ञानानाम् उत्तमं ज्ञानं प्रवक्ष्यामि ।
कदा परं ज्ञानानाम् उत्तमं ज्ञानं प्रवक्ष्यामि ?	**भूयः** परं ज्ञानानाम् उत्तमं ज्ञानं प्रवक्ष्यामि ।
भूयः परं ज्ञानानाम् उत्तमं ज्ञानं प्रवक्ष्यामि । **किमर्थम् ?**	**(यतः) सिद्धिं गताः ।**
कीदृशीं सिद्धिं गताः ?	**परां** सिद्धिं गताः ।
कुतः परां सिद्धिं गताः ?	**इतः** परां सिद्धिं गताः ।
किं कृत्वा इतः परां सिद्धिं गताः ?	**ज्ञात्वा** इतः परां सिद्धिं गताः ।
किं ज्ञात्वा इतः परां सिद्धिं गताः ?	**यत्** ज्ञात्वा इतः परां सिद्धिं गताः ।
के यत् ज्ञात्वा इतः परां सिद्धिं गताः ?	**मुनयः** यत् ज्ञात्वा इतः परां सिद्धिं गताः ।
कति मुनयः यत् ज्ञात्वा इतः परां सिद्धिं गताः ?	**सर्वे** मुनयः यत् ज्ञात्वा इतः परां सिद्धिं गताः ।

तात्पर्यम् - अन्यदपि पुनः ज्ञानेषु ज्ञानं ते कथयामि, यत् ज्ञात्वा सर्वे मुनयः अस्मात् संसारात् मोक्षं प्राप्तवन्तः ।

इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः ।
सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च ॥१४.२॥

पदच्छेदः - इदम्, ज्ञानम्, उपाश्रित्य, मम, साधर्म्यम्, आगताः ।
सर्गे, अपि, न, उपजायन्ते, प्रलये, न, व्यथन्ति, च ॥

अन्वयः - इदं ज्ञानम् उपाश्रित्य मम साधर्म्यम् आगताः सर्गे अपि न उपजायन्ते प्रलये च न व्यथन्ति ।

पदार्थः - इदं ज्ञानम् = एतत् ब्रह्मज्ञानम्, उपाश्रित्य = अवलम्ब्य, मम = परमात्मनः, साधर्म्यम् = स्वरूपम्, आगताः = प्राप्ताः, सर्गे अपि = सृष्टिकाले अपि, न उपजायन्ते = न उत्पद्यन्ते, प्रलये च = सृष्टिप्रलयसमये च, न व्यथन्ति = बाधां न प्राप्नुवन्ति ।

पदपरिचयः -

पदम्	**विवरणम्**	**पदम्**	**विवरणम्**
इदम्	इदम्- म. सर्व. नपुं. द्वि. एक. (विशेषणम्)	ज्ञानम्	अ. नपुं. द्वि. एक. (विशेष्यम्)
उपाश्रित्य	ल्यबन्तम् अव्ययम्	मम	अस्मद्- द. सर्व. ष. एक.
साधर्म्यम्	अ. नपुं. द्वि. एक.	आगताः	अ. पुं. प्र. बहु. (विशेषणम्)
सर्गे	अ. पुं. स. एक.	अपि	अव्ययम्
न	अव्ययम्	उपजायन्ते	उप + जन् (जनी - प्रादुर्भावे) आत्म. कर्तरि. लट्. प्रपु. बहु.
प्रलये	अ. पुं. स. एक.	च	अव्ययम्
व्यथन्ति (व्यथन्ते)	व्यथ् (व्यथ - भयसञ्चलनयोः)[1] आत्म. कर्तरि लट्. प्रपु. बहु.		

व्याकरणम् -

(क) सन्धिः	सर्गेऽपि	सर्गे + अपि	पूर्वरूपसन्धिः ।
	नोपजायन्ते	न + उपजायन्ते	गुणसन्धिः ।
(ख) कृदन्तः	ज्ञानम्	ज्ञा (ज्ञा - अवबोधने) + ल्युट् (करणे) ।	
	उपाश्रित्य	उप + आ + श्रि (श्रिञ् - सेवायाम्) + ल्यप् ।	
	आगताः	आ + गम् (गम्लृ - गतौ) + क्त (कर्तरि) ।	
	प्रलये	प्र + ली (लीङ् - श्लेषणे) + अच्, तस्मिन् ।	
	सर्गे	सृज् (सृज - विसर्गे) + घञ्, तस्मिन् ।	
(ग) तद्धितान्तः	साधर्म्यम्	सधर्म + ष्यञ् (भावार्थे) ।	

भावस्पष्टीकरणम् -

न उपजायन्ते ।	
कदा न उपजायन्ते ?	**सर्गे अपि** न उपजायन्ते ।
न व्यथन्ति ।	
कदा न व्यथन्ति ?	**प्रलये** न व्यथन्ति ।

---

1. अत्र 'व्यथन्ति' इति परस्मैपदित्वेन आर्षप्रयोगः ।

किम् आगताः सर्गे अपि न उपजायन्ते प्रलये च न व्यथन्ति ?	**साधर्म्यम्** **आगताः** सर्गे अपि न उपजायन्ते प्रलये च न व्यथन्ति ।
कस्य साधर्म्यम् आगताः सर्गे अपि न उपजायन्ते प्रलये च न व्यथन्ति ?	**मम** साधर्म्यम् आगताः सर्गे अपि न उपजायन्ते प्रलये च न व्यथन्ति ।
किं कृत्वा मम साधर्म्यम् आगताः सर्गे अपि न उपजायन्ते प्रलये च न व्यथन्ति ?	**इदं ज्ञानम्** उपाश्रित्य मम साधर्म्यम् आगताः सर्गे अपि न उपजायन्ते प्रलये च न व्यथन्ति ।

तात्पर्यम् - एतत् ब्रह्मज्ञानम् अवलम्ब्य मम स्वरूपं प्राप्तवन्तः जनाः (भक्ताः) सृष्टिकाले अपि न उत्पद्यन्ते प्रलयसमये च बाधां न प्राप्नुवन्ति ।

मम योनिर्महद्ब्रह्म तस्मिन्गर्भं दधाम्यहम् ।
सम्भवः सर्वभूतानां ततो भवति भारत ॥१४.३॥

पदच्छेदः - मम, योनिः, महत्, ब्रह्म, तस्मिन्, गर्भम्, दधामि, अहम् ।
सम्भवः, सर्वभूतानाम्, ततः, भवति, भारत ॥

अन्वयः - भारत ! मम योनिः महत् ब्रह्म । अहं तस्मिन् गर्भं दधामि । ततः सर्वभूतानां सम्भवः भवति ।

पदार्थः - भारत = अर्जुन ! मम = भगवतः, योनिः = गर्भाधानस्थानम्, महत् = विस्तृतम्, ब्रह्म = प्रकृतिः, अहम् = भगवान्, तस्मिन् = तत्र, गर्भम् = सङ्कल्परूपं बीजम्, दधामि = निक्षिपामि, ततः = तस्मात्, सर्वभूतानाम् = सकलजन्तूनाम्, सम्भवः = उत्पत्तिः, भवति = जायते ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
भारत	अ. पुं. सम्बो. एक.	मम	अस्मद्- द. सर्व. ष. एक.
योनिः	इ. स्त्री. प्र. एक.	महत्	महत्- त. नपुं. प्र. एक. (विशेषणम्)
ब्रह्म	ब्रह्मन्- न. नपुं. प्र. एक. (विशेष्यम्)	अहम्	अस्मद्- द. सर्व. प्र. एक.
तस्मिन्	तद्- द. सर्व. पुं. स. एक.	गर्भम्	अ. पुं. द्वि. एक.
दधामि	धा (डुधाञ् - धारणपोषणयोः) पर. कर्तरि लट्. उपु. एक.	ततः	अव्ययम्
सर्वभूतानाम्	अ. नपुं. ष. बहु.	सम्भवः	अ. पुं. प्र. एक.

भवति	भू (भू - सत्तायाम्) पर. कर्तरि लट्. प्रपु. एक.		

व्याकरणम् -

(क) सन्धिः	योनिर्महद्	योनिः + महद्	विसर्गसन्धिः (रेफः)।
	महद्ब्रह्म	महत् + ब्रह्म	जश्त्वसन्धिः।
	दधाम्यहम्	दधामि + अहम्	यण्सन्धिः।
	ततो भवति	ततः + भवति	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः।
(ख) समासः	सर्वभूतानाम्	सर्वाणि भूतानि सर्वभूतानि, तेषाम् - कर्मधारयः।	
(ग) कृदन्तः	सम्भवः	सम् + भू (भू - सत्तायाम्) + अप्।	
(घ) तद्धितान्तः	भारत	भरत + अण् (अपत्यार्थे), भरतस्य अपत्यं पुमान् इत्यर्थः।	

भावस्पष्टीकरणम् -

योनिः अस्ति।	
कस्य योनिः अस्ति ?	**मम** योनिः अस्ति।
मम योनिः **किम्** अस्ति ?	मम योनिः **महत् ब्रह्म** अस्ति।
दधामि।	
कं दधामि ?	**गर्भं** दधामि।
कुत्र गर्भं दधामि ?	**तस्मिन्** गर्भं दधामि।
कः तस्मिन् गर्भं दधाति ?	**अहं** तस्मिन् गर्भं दधामि।
अहं तस्मिन् गर्भं दधामि। **ततः किम् ?**	**ततः भवति।**
ततः **कः** भवति ?	ततः **सम्भवः** भवति।
ततः **केषां** सम्भवः भवति ?	ततः **सर्वभूतानां** सम्भवः भवति।

तात्पर्यम् - भारत ! या इयम् अत्यन्तं महती प्रकृतिः वर्तते सा वृद्धिहेतुत्वात् ब्रह्म इत्युच्यते। सा प्रकृतिः मम गर्भाधानस्थानम्। तत्र 'अहं बहु स्याम्' इत्येवंरूपं सङ्कल्पं निक्षिपामि। तेन सर्वेषामपि भूतानाम् उत्पत्तिः भवति।

सर्वयोनिषु कौन्तेय मूर्तयः सम्भवन्ति याः ।
तासां ब्रह्म महद्योनिरहं बीजप्रदः पिता ॥१४.४॥

पदच्छेदः - सर्वयोनिषु, कौन्तेय, मूर्तयः, सम्भवन्ति, याः ।
तासाम्, ब्रह्म, महत्, योनिः, अहम्, बीजप्रदः, पिता ॥

अन्वयः - कौन्तेय ! सर्वयोनिषु याः मूर्तयः सम्भवन्ति तासां योनिः महत् ब्रह्म अहं बीजप्रदः पिता ।

पदार्थः - कौन्तेय = अर्जुन ! सर्वयोनिषु = सकलयोनिषु, याः मूर्तयः = यानि शरीराणि, सम्भवन्ति = जायन्ते, तासाम् = शरीराणाम्, योनिः = कारणम्, महत् ब्रह्म = प्रकृतिः, अहं बीजप्रदः = अहं गर्भाधायकः, पिता = तातः ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
कौन्तेय	अ. पुं. सम्बो. एक.	सर्वयोनिषु	इ. स्त्री. स. बहु.
याः	यद्- द. सर्व. स्त्री. प्र. बहु. (विशेषणम्)	मूर्तयः	इ. स्त्री. प्र. बहु. (विशेष्यम्)
सम्भवन्ति	सम् + भू (भू - सत्तायाम्) पर. कर्तरि लट्. प्रपु. बहु.	तासाम्	तद्- द. सर्व. स्त्री. ष. बहु. (विशेषणम्)
योनिः	इ. स्त्री. प्र. एक.	महत्	महत्- त. नपुं. प्र. एक. (विशेषणम्)
ब्रह्म	ब्रह्मन्- न. नपुं. प्र. एक. (विशेष्यम्)	अहम्	अस्मद्- द. सर्व. प्र. एक.
बीजप्रदः	अ. पुं. प्र. एक.	पिता	ऋ. पुं. प्र. एक.

व्याकरणम् -

(क) सन्धिः	महद्योनिः	महत् + योनिः	जश्त्वसन्धिः ।
	महद्योनिरहम्	महद्योनिः + अहम्	विसर्गसन्धिः (रेफः) ।
(ख) समासः	सर्वयोनिषु	सर्वाः योनयः सर्वयोनयः, तासु - कर्मधारयः ।	
	बीजप्रदः	बीजं प्रददाति इति बीजप्रदः - उपपदतत्पुरुषः ।	
(ग) कृदन्तः	मूर्तयः	मुर्च्छ् (मुर्छा - मोहसमुच्छ्राययोः) + क्तिन् ।	
(घ) तद्धितान्तः	कौन्तेय	कुन्ती + ढक् (अपत्यार्थे) तत्सम्बुद्धौ, कुन्त्याः अपत्यं पुमान् ।	

भावस्पष्टीकरणम् -

सम्भवन्ति।	
केषु सम्भवन्ति ?	**सर्वयोनिषु** सम्भवन्ति।
सर्वयोनिषु **काः** सम्भवन्ति ?	सर्वयोनिषु **याः मूर्तयः** सम्भवन्ति।
सर्वयोनिषु याः मूर्तयः सम्भवन्ति। तासां **किम् ?**	सर्वयोनिषु याः मूर्तयः सम्भवन्ति। तासाम् **अस्ति।**
सर्वयोनिषु याः मूर्तयः सम्भवन्ति। तासां **का** अस्ति ?	सर्वयोनिषु याः मूर्तयः सम्भवन्ति। तासां **योनिः** अस्ति।
सर्वयोनिषु याः मूर्तयः सम्भवन्ति। तासां **किं** योनिः अस्ति ?	सर्वयोनिषु याः मूर्तयः सम्भवन्ति। तासां **महत् ब्रह्म** योनिः अस्ति।
पिता अस्मि।	
कः पिता अस्ति ?	**अहं** पिता अस्मि।
अहं **कीदृशः** पिता अस्मि ?	अहं **बीजप्रदः** पिता अस्मि।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**कौन्तेय !**

तात्पर्यम् - अर्जुन ! नानायोनिषु यानि शरीराणि सम्भवन्ति तेषां माता प्रकृतिः। अहं तु परमात्मा गर्भाधायकः इति पिता।

सत्त्वं रजस्तम इति गुणाः प्रकृतिसम्भवाः।
निबध्नन्ति महाबाहो देहे देहिनमव्ययम्॥१४.५॥

पदच्छेदः - सत्त्वम्, रजः, तमः, इति, गुणाः, प्रकृतिसम्भवाः।
निबध्नन्ति, महाबाहो, देहे, देहिनम्, अव्ययम्॥

अन्वयः - महाबाहो ! सत्त्वं रजः तमः इति प्रकृतिसम्भवाः गुणाः। देहे अव्ययं देहिनं निबध्नन्ति।

पदार्थः - महाबाहो = अर्जुन ! सत्त्वम् = सत्त्वगुणः, रजः = रजोगुणः, तमः = तमोगुणः, इति = इत्येते, प्रकृतिसम्भवाः = मायास्वरूपभूताः अपि जन्याः इव स्थिताः, गुणाः = सत्त्वादयः, देहे = शरीरे, अव्ययम् = अक्षयम्, देहिनम् = आत्मानम्, निबध्नन्ति = बध्नन्ति।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
महाबाहो	उ. पुं. सम्बो. एक.	सत्त्वम्	अ. नपुं. प्र. एक.
रजः	रजस्- स. नपुं. प्र. एक.	तमः	तमस्- स. नपुं. प्र. एक.
इति	अव्ययम्	प्रकृतिसम्भवाः	अ. पुं. प्र. बहु. (विशेष्यम्)
गुणाः	अ. पुं. प्र. बहु. (विशेषणम्)	देहे	अ. पुं. स. एक.
अव्ययम्	अ. नपुं. द्वि. एक. (विशेषणम्)	देहिनम्	देहिन्- न. पुं. द्वि. एक. (विशेष्यम्)
निबध्नन्ति	नि + बध् (बन्ध - बन्धने) पर. कर्तरि लट्. प्रपु. बहु.		

व्याकरणम् -

(क) सन्धिः	रजस्तमः	रजः + तमः	विसर्गसन्धिः (सकारः)।
	तम इति	तमः + इति	विसर्गसन्धिः (लोपः)।
(ख) समासः	प्रकृतिसम्भवाः	प्रकृतेः सम्भवाः प्रकृतिसम्भवाः - पञ्चमीतत्पुरुषः।	
	अव्ययम्	न विद्यते व्ययः यस्य सः अव्ययः, तम् - बहुव्रीहिः।	
	महाबाहो	महान्तौ बाहू यस्य सः महाबाहुः, तत्सम्बुद्धौ - बहुव्रीहिः।	
(ग) कृदन्तः	प्रकृतिः	प्र + कृ (डुकृञ् - करणे) + क्तिन्।	
	सम्भवाः	सम् + भू (भू - सत्तायाम्) + अप्, ।	
	देहे	दिह् (दिह - उपचये) + घञ्, तस्मिन्।	
(घ) तद्धितान्तः	सत्त्वम्	सत् + त्व (भावार्थे)।	
	देहिनम्	देह + इनि (मतुबर्थे), तम्, देहः अस्य अस्मिन् वा अस्ति इति।	

भावस्पष्टीकरणम् -

गुणाः सन्ति।	
कीदृशाः गुणाः सन्ति ?	**प्रकृतिसम्भवाः** गुणाः सन्ति।
के च ते प्रकृतिसम्भवाः गुणाः सन्ति ?	**सत्त्वं रजः तमः** इति प्रकृतिसम्भवाः गुणाः सन्ति।
सत्त्वं रजः तमः इति प्रकृतिसम्भवाः गुणाः सन्ति। ते **किं कुर्वन्ति ?**	सत्त्वं रजः तमः इति प्रकृतिसम्भवाः गुणाः सन्ति। ते **निबध्नन्ति।**

सत्त्वं रजः तमः इति प्रकृतिसम्भवाः गुणाः सन्ति। ते **कं** निबध्नन्ति ?	सत्त्वं रजः तमः इति प्रकृतिसम्भवाः गुणाः सन्ति। ते **देहिनं** निबध्नन्ति।
सत्त्वं रजः तमः इति प्रकृतिसम्भवाः गुणाः सन्ति। ते **कीदृशं** देहिनं निबध्नन्ति ?	सत्त्वं रजः तमः इति प्रकृतिसम्भवाः गुणाः सन्ति। ते **अव्ययं** देहिनं निबध्नन्ति।
सत्त्वं रजः तमः इति प्रकृतिसम्भवाः गुणाः सन्ति। ते **कुत्र** अव्ययं देहिनं निबध्नन्ति ?	सत्त्वं रजः तमः इति प्रकृतिसम्भवाः गुणाः सन्ति। ते **देहे** अव्ययं देहिनं निबध्नन्ति।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**महाबाहो !**

तात्पर्यम् - अर्जुन ! सत्त्वं रजः तमः इति प्रकृतेः स्वरूपभूताः गुणाः। ते च प्रकृतितः जाताः इव भासमानाः शरीरे आत्मानं बध्नन्ति।

तत्र सत्त्वं निर्मलत्वात्प्रकाशकमनामयम्।
सुखसङ्गेन बध्नाति ज्ञानसङ्गेन चानघ॥१४.६॥

पदच्छेदः - तत्र, सत्त्वम्, निर्मलत्वात्, प्रकाशकम्, अनामयम्।
सुखसङ्गेन, बध्नाति, ज्ञानसङ्गेन, च, अनघ॥

अन्वयः - अनघ ! तत्र निर्मलत्वात् प्रकाशकम् अनामयं सत्त्वं सुखसङ्गेन ज्ञानसङ्गेन च बध्नाति।

पदार्थः - अनघ = पापरहित (अर्जुन) ! तत्र निर्मलत्वात् = स्वच्छत्वात्, प्रकाशकम् = भासकम्, अनामयम् = निरूपद्रवम्, सत्त्वम् = सत्त्वगुणः, सुखसङ्गेन = सुखयोगेन, ज्ञानसङ्गेन = ज्ञानयोगेन च, बध्नाति = पुरुषं कर्मसु बध्नाति।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
अनघ	अ. पुं. सम्बो. एक.	तत्र	अव्ययम्
निर्मलत्वात्	अ. नपुं. पं. एक.	प्रकाशकम्	अ. नपुं. प्र. एक. (विशेषणम्)
अनामयम्	अ. नपुं. प्र. एक. (विशेषणम्)	सत्त्वम्	अ. नपुं. प्र. एक. (विशेष्यम्)
सुखसङ्गेन	अ. पुं. तृ. एक.	ज्ञानसङ्गेन	अ. पुं. तृ. एक.
च	अव्ययम्	बध्नाति	बन्ध् (बन्ध - बन्धने) पर. कर्तरि लट्. प्रपु. एक.

व्याकरणम् -

(क) सन्धिः	चानघ	च + अनघ	सवर्णदीर्घसन्धिः ।
(ख) समासः	निर्मलम्	निर्गतं मलं यस्मात् तत् निर्मलम् - बहुव्रीहिः ।	
	अनामयम्	न विद्यते आमयं यस्मिन् तत् - बहुव्रीहिः ।	
	सुखसङ्गेन	सुखे सङ्गः सुखसङ्गः, तेन - सप्तमीतत्पुरुषः ।	
	ज्ञानसङ्गेन	ज्ञाने सङ्गः ज्ञानसङ्गः, तेन - सप्तमीतत्पुरुषः ।	
	अनघ	न विद्यते अघः यस्मिन् सः अनघः, तत्सम्बुद्धौ - बहुव्रीहिः ।	
(ग) कृदन्तः	प्रकाशकम्	प्र + काश् (काशृ - दीप्तौ) + णिच् + ण्वुल् (कर्त्रर्थे) ।	
	सङ्गः	सञ्ज् (षञ्ज - सङ्गे) + घञ् (भावे) ।	
	ज्ञानम्	ज्ञा (ज्ञा - अवबोधने) - ल्युट् (भावे) ।	
(घ) तद्धितान्तः	तत्र	तद् + त्रल् (सप्तम्यर्थे) ।	
	सत्त्वम्	सत् + त्व (भावार्थे) ।	
	निर्मलत्वात्	निर्मल + त्व (भावार्थे), तस्मात् ।	

भावस्पष्टीकरणम् -

बध्नाति ।	
किं बध्नाति ?	**सत्त्वं** बध्नाति ।
कीदृशं सत्त्वं बध्नाति ?	**प्रकाशकं** सत्त्वं बध्नाति ।
कस्मात् प्रकाशकं सत्त्वं बध्नाति ?	**निर्मलत्वात्** प्रकाशकं सत्त्वं बध्नाति ।
निर्मलत्वात् प्रकाशकं **कीदृशं** सत्त्वं बध्नाति ?	निर्मलत्वात् प्रकाशकम् **अनामयं** सत्त्वं बध्नाति ।
कुत्र निर्मलत्वात् प्रकाशकम् अनामयं सत्त्वं बध्नाति ?	**तत्र** निर्मलत्वात् प्रकाशकम् अनामयं सत्त्वं बध्नाति ।
तत्र निर्मलत्वात् प्रकाशकम् अनामयं सत्त्वं **केन केन** बध्नाति ?	तत्र निर्मलत्वात् प्रकाशकम् अनामयं सत्त्वं **सुखसङ्गेन ज्ञानसङ्गेन** च बध्नाति ।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**अनघ !**

तात्पर्यम् - हे पापरहित (अर्जुन) ! तेषु त्रिषु गुणेषु स्वच्छत्वात् भासकं निरूपद्रवं सत्त्वं सुखं ज्ञानं च जनयति ।

रजो रागात्मकं विद्धि तृष्णासङ्गसमुद्भवम् ।
तन्निबध्नाति कौन्तेय कर्मसङ्गेन देहिनम् ॥१४.७॥

पदच्छेदः - रजो, रागात्मकम्, विद्धि, तृष्णासङ्गसमुद्भवम् ।
तत्, निबध्नाति, कौन्तेय, कर्मसङ्गेन, देहिनम् ॥

अन्वयः - कौन्तेय ! तृष्णासङ्गसमुद्भवं रजः रागात्मकं विद्धि । तत् कर्मसङ्गेन देहिनं निबध्नाति ।

पदार्थः - कौन्तेय = अर्जुन ! तृष्णासङ्गसमुद्भवम् = अभिलाषासक्तिसमुद्भवम्, रजः = रजोगुणम्, रागात्मकम् = कामस्वरूपम्, विद्धि = जानीहि । तत् = सः रजोगुणः, कर्मसङ्गेन = कर्मसम्बन्धेन, देहिनम् = आत्मानम्, निबध्नाति = बध्नाति ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
कौन्तेय	अ. पुं. सम्बो. एक.	तृष्णासङ्गसमुद्भवम्	अ. नपुं. द्वि. एक. (विशेषणम्)
रजः	रजस्- सका. नपुं. द्वि. एक. (विशेष्यम्)	रागात्मकम्	अ. नपुं. द्वि. एक. (विशेषणम्)
विद्धि	विद् (विद ज्ञाने) पर. कर्तरि लोट्. मपु. एक.	तत्	तद्- द. सर्व. नपुं. प्र. एक. (विशेषणम्)
कर्मसङ्गेन	अ. पुं. तृ. एक.	देहिनम्	देहिन्- न. पुं. द्वि. एक.
निबध्नाति	नि + बन्ध् (बन्ध बन्धने) पर. कर्तरि लट्. प्रपु. एक.		

व्याकरणम् -

(क) सन्धिः रजो रागात्मकम् — रजः + रागात्मकम् — विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः ।
तन्निबध्नाति — तत् + निबध्नाति — अनुनासिकसन्धिः ।

(ख) समासः रागात्मकम् — रागः आत्मा यस्य तत् रागात्मकम् - बहुव्रीहिः ।
तृष्णासङ्गसमुद्भवम् — तृष्णा च सङ्गश्च तृष्णासङ्गौ - द्वन्द्वः ।
तृष्णासङ्गयोः समुद्भवं तत् तृष्णासङ्गसमुद्भवम् - षष्ठीतत्पुरुषः ।
कर्मसङ्गेन — कर्मसु सङ्गः कर्मसङ्गः, तेन - सप्तमीतत्पुरुषः ।

(ग) कृदन्तः रागः — रञ्ज् (रञ्ज - रागे) + घञ् (भावार्थे) ।
सङ्गः — सञ्ज् (षञ्ज - सङ्गे) + घञ् (भावे) ।
समुद्भवम् — सम् + उद् + भू (भू - सत्तायाम्) + अप्, तत् ।

(घ) तद्धितान्तः कौन्तेय — कुन्ती + ढक् (अपत्यार्थे) तत्सम्बुद्धौ, कुन्त्याः अपत्यं पुमान्।
देहिनम् — देहः + इनि (मतुबर्थे) तम्, देहः अस्य अस्मिन् वा अस्ति इति।

भावस्पष्टीकरणम् -

विद्धि।	
किं विद्धि ?	**रजः** विद्धि।
रजः **कीदृशं** विद्धि ?	रजः **रागात्मकं** विद्धि।
कीदृशं रजः रागात्मकं विद्धि ?	**तृष्णासङ्गसमुद्भवं** रजः रागात्मकं विद्धि।
तृष्णासङ्गसमुद्भवं रजः रागात्मकं विद्धि। **तस्य किम्** ?	तृष्णासङ्गसमुद्भवं रजः रागात्मकं विद्धि। **तत् निबध्नाति।**
तृष्णासङ्गसमुद्भवं रजः रागात्मकं विद्धि। तत् **कं** निबध्नाति ?	तृष्णासङ्गसमुद्भवं रजः रागात्मकं विद्धि। तत् **देहिनं** निबध्नाति।
तृष्णासङ्गसमुद्भवं रजः रागात्मकं विद्धि। तत् **केन** देहिनं निबध्नाति ?	तृष्णासङ्गसमुद्भवं रजः रागात्मकं विद्धि। तत् **कर्मसङ्गेन** देहिनं निबध्नाति।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**कौन्तेय !**

तात्पर्यम् - अर्जुन ! अप्राप्ते वस्तुनि अभिलाषः तृष्णा, प्राप्ते वस्तुनि अभिलाषः सङ्गः। आभ्यां यो रागः सम्भवति तदात्मकः अयं रजोगुणः। अयं च आत्मानं कर्मसु प्रवर्तयति। प्रवृत्तश्च सः तत्र बद्धो भवति।

तमस्त्वज्ञानजं विद्धि मोहनं सर्वदेहिनाम्।
प्रमादालस्यनिद्राभिस्तन्निबध्नाति भारत ॥१४.८॥

पदच्छेदः - तमः, तु, अज्ञानजम्, विद्धि, मोहनम्, सर्वदेहिनाम्।
प्रमादालस्यनिद्राभिः, तत्, निबध्नाति, भारत ॥

अन्वयः - भारत ! सर्वदेहिनां मोहनं तमः तु अज्ञानजं विद्धि। तत् प्रमादालस्यनिद्राभिः निबध्नाति।

पदार्थः - भारत = अर्जुन ! सर्वदेहिनाम् = सकलशरीरभृताम्, मोहनम् = अविवेककरम्, तमः = तमोगुणः, तु = हि, अज्ञानजम् = अविवेकजनितम्, विद्धि = जानीहि, तत् = सः तमोगुणः, प्रमादालस्यनिद्राभिः = दोषालस्यनिद्राकारणैः, निबध्नाति = बध्नाति।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
भारत	अ. पुं. सम्बो. एक.	सर्वदेहिनाम्	सर्वदेहिन्- न. पुं. ष. बहु.
मोहनम्	अ. नपुं. द्वि. एक. (विशेषणम्)	तमः	तमस्- सका. नपुं. द्वि. एक. (विशेष्यम्)
तु	अव्ययम्	अज्ञानजम्	अ. नपुं. द्वि. एक. (विशेषणम्)
विद्धि	विद् (विद - ज्ञाने) पर. कर्तरि लोट्. मपु. एक.	तत्	तद्- द. सर्व. नपुं. प्र. एक. (विशेषणम्)
प्रमादालस्यनिद्राभिः	आ. स्त्री. तृ. बहु.	निबध्नाति	नि + बन्ध् (बन्ध - बन्धने) पर. कर्तरि लट्. प्रपु. एक.

व्याकरणम् -

(क) सन्धिः तमस्तु — तमः + तु — विसर्गसन्धिः (सकारः)।

त्वज्ञानजम् — तु + अज्ञानजम् — यण्सन्धिः।

प्रमादालस्यनिद्राभिस्तत् — प्रमादालस्यनिद्राभिः + तत् — विसर्गसन्धिः (सकारः)।

तन्निबध्नाति — तत् + निबध्नाति — अनुनासिकसन्धिः।

(ख) समासः अज्ञानजम् — ज्ञानात् जायते इति ज्ञानजम् - कर्तरि डप्रत्ययः उपपदसमासः।

न ज्ञानजम् अज्ञानजम् - नञ्तत्पुरुषः।

सर्वदेहिनाम् — सर्वे देहिनः सर्वदेहिनः, तेषाम् - कर्मधारयः।

प्रमादालस्यनिद्राभिः — प्रमादः च आलस्यं च निद्रा च प्रमादालस्यनिद्राः, ताभिः - द्वन्द्वः।

(ग) कृदन्तः मोहनम् — मुह् (मुह - वैचित्ये) + ल्युट्।

प्रमादः — प्र + मद् (मदी - हर्षग्लेपनयोः) + घञ् (भावार्थे)।

(घ) तद्धितान्तः आलस्यम् — अलस + ष्यञ् (भावार्थे)।

भारत — भरत + अण् (अपत्यार्थे), तत्सम्बुद्धौ, भरतस्य अपत्यं पुमान्।

भावस्पष्टीकरणम् -

विद्धि।	
किं विद्धि ?	**तमः** विद्धि।
तमः **कीदृशं** विद्धि ?	तमः **अज्ञानजं** विद्धि।
कीदृशं तमः अज्ञानजं विद्धि ?	**मोहनं** तमः अज्ञानजं विद्धि।
केषां मोहनं तमः अज्ञानजं विद्धि ?	**सर्वदेहिनां** मोहनं तमः अज्ञानजं विद्धि।
सर्वदेहिनां मोहनं तमः अज्ञानजं विद्धि। तत् **किं** करोति ?	सर्वदेहिनां मोहनं तमः अज्ञानजं विद्धि। तत् **निबध्नाति।**
सर्वदेहिनां मोहनं तमः अज्ञानजं विद्धि। तत् **काभिः** निबध्नाति ?	सर्वदेहिनां मोहनं तमः तु अज्ञानजं विद्धि। तत् **प्रमादालस्यनिद्राभिः** निबध्नाति।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**भारत !**

तात्पर्यम् - अर्जुन ! गुणेषु यत् तृतीयं तमः तु अज्ञानजं विद्धि। इदं च तमः सर्वेषां प्राणिनां भ्रान्तिं जनयति। अनेन गुणेन सर्वेषाम् अनवधानं जाड्यं निद्रा च सम्भवति। एवमिदं तमः पुरुषं संसारे बध्नाति।

सत्त्वं सुखे सञ्जयति रजः कर्मणि भारत।
ज्ञानमावृत्य तु तमः प्रमादे सञ्जयत्युत ॥१४.९॥

पदच्छेदः - सत्त्वम्, सुखे, सञ्जयति, रजः, कर्मणि, भारत।
ज्ञानम्, आवृत्य, तु, तमः, प्रमादे, सञ्जयति, उत ॥

अन्वयः - भारत ! सत्त्वं सुखे सञ्जयति। रजः कर्मणि। तमः तु ज्ञानम् आवृत्य उत प्रमादे सञ्जयति।

पदार्थः - भारत = अर्जुन ! सत्त्वम् = सत्त्वगुणः, सुखे = सुखकार्ये, सञ्जयति = संयोजयति। रजः = रजोगुणः, कर्मणि = व्यापारे, तमः तु = तमोगुणः तु, ज्ञानम् आवृत्य = ज्ञानम् आच्छाद्य, उत = एवम्, प्रमादे = अनवधाने अपि, सञ्जयति = संयोजयति।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
भारत	अ. पुं. सम्बो. एक.	सत्त्वम्	अ. नपुं. प्र. एक.

सुखे	अ. नपुं. स. एक.	सञ्जयति	सम् + जि (जि - जये) पर. कर्तरि लट्. प्रपु. एक.
रजः	रजस्- स. नपुं. प्र. एक.	कर्मणि	कर्मन्- न. नपुं. स. एक.
तमः	तमस्- स. नपुं. प्र. एक.	तु	अव्ययम्
ज्ञानम्	अ. नपुं. द्वि. एक.	आवृत्य	ल्यबन्तम् अव्ययम्
प्रमादे	अ. पुं. स. एक.	उत	अव्ययम्

व्याकरणम् -

(क) सन्धिः	सञ्जयत्युत	सञ्जयति + उत	यण्सन्धिः।
(ख) कृदन्तः	ज्ञानम्	ज्ञा (ज्ञा - अवबोधने) + ल्युट्।	
	आवृत्य	आ + वृत् (वृतु - वर्तने) + ल्यप्।	
	प्रमादे	प्र + मद् (मदी - हर्षग्लेपनयोः) + घञ् (भावे), तस्मिन्।	
(ग) तद्धितान्तः	सत्त्वम्	सत् + त्व (भावार्थे)।	
	भारत	भरत + अण् (अपत्यार्थे) तत्सम्बुद्धौ, भरतस्य अपत्यं पुमान्।	

भावस्पष्टीकरणम् -

सञ्जयति।	
किं सञ्जयति ?	**सत्त्वं** सञ्जयति।
सत्त्वं **कस्मिन्** सञ्जयति ?	सत्त्वं **सुखे** सञ्जयति।
सञ्जयति।	
किं सञ्जयति ?	**रजः** सञ्जयति।
रजः **कस्मिन्** सञ्जयति ?	रजः **कर्मणि** सञ्जयति।
सञ्जयति।	
पुनश्च किं सञ्जयति ?	**तमः** सञ्जयति।
तमः **कस्मिन्** सञ्जयति ?	तमः **तु प्रमादे** सञ्जयति।
तमः तु **किं कृत्वा** प्रमादे सञ्जयति ?	तमः तु **आवृत्य** प्रमादे सञ्जयति।
तमः तु **किम्** आवृत्य प्रमादे सञ्जयति ?	तमः तु **ज्ञानम्** आवृत्य प्रमादे सञ्जयति उत।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**भारत !**

तात्पर्यम् - भारत ! एतेषु त्रिषु गुणेषु सत्त्वं दुःखकारणे सत्यपि आत्मनः सुखं जनयति । रजः सुखकारणे सत्यपि दुःखं जनयति । तमः तु ज्ञानम् आच्छाद्य अनवधान-आलस्य-निद्रादिकं जनयति ।

रजस्तमश्चाभिभूय सत्त्वं भवति भारत ।
रजः सत्त्वं तमश्चैव तमः सत्त्वं रजस्तथा ॥१४.१०॥

पदच्छेदः - रजः, तमः, च, अभिभूय, सत्त्वम्, भवति, भारत ।
रजः, सत्त्वम्, तमः, च, एव, तमः, सत्त्वम्, रजः, तथा ॥

अन्वयः - भारत ! रजः तमः च अभिभूय सत्त्वं भवति । रजः सत्त्वं च अभिभूय तमः एव भवति । तथा तमः सत्त्वम् अभिभूय रजः भवति ।

पदार्थः - भारत = अर्जुन ! रजः = रजोगुणम्, तमः च = तमोगुणं च, अभिभूय = अतिक्रम्य, सत्त्वम् = सत्त्वगुणः, भवति = वर्तते । रजः = रजोगुणम्, सत्त्वं च = सत्त्वगुणं च, अभिभूय = अतिक्रम्य, तमः एव भवति = तमोगुणः एव भवति । तथा तमः = तमोगुणम्, सत्त्वम् = सत्त्वगुणं च, अभिभूय = अतिक्रम्य, रजः = रजोगुणः भवति ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
भारत	अ. पुं. सम्बो. एक.	रजः	रजस्- सका. नपुं. द्वि. एक.
तमः	तमस्- सका. नपुं. द्वि. एक.	च	अव्ययम्
अभिभूय	ल्यबन्तम् अव्ययम्	एव	अव्ययम्
सत्त्वम्	अ. नपुं. प्र. एक.	भवति	भू (भू - सत्तायाम्) पर. कर्तरि लट्. प्रपु. एक.

व्याकरणम् -

(क) सन्धिः	रजस्तमः	रजः+ तमः	विसर्गसन्धिः (सकारः) ।
	तमश्च	तमः + च	विसर्गसन्धिः (सकारः) श्चुत्वम् ।
	चाभिभूय	च + अभिभूय	सवर्णदीर्घसन्धिः ।
	तमश्च	तमः + च	विसर्गसन्धिः (सकारः) श्चुत्वम् ।
	चैव	च + एव	वृद्धिसन्धिः ।
(ख) कृदन्तः	अभिभूय	अभि + भू (भू - सत्तायाम्) + ल्यप् ।	

(ग) तद्धितान्तः	सत्त्वम्	सत् + त्व (भावार्थे) ।
	भारत	भरत + अण् (अपत्यार्थे) भरतस्य अपत्यं पुमान् ।

भावस्पष्टीकरणम् -

भवति ।	
किं भवति ?	**सत्त्वं** भवति ।
किं कृत्वा सत्त्वं भवति ?	**अभिभूय** सत्त्वं भवति ।
किं किं च अभिभूय सत्त्वं भवति ?	**रजः तमः च** अभिभूय सत्त्वं भवति ।
भवति ।	
किं भवति ?	**तमः** एव भवति ।
किं कृत्वा तमः एव भवति ?	**अभिभूय** तमः एव भवति ।
किं किं च अभिभूय तमः भवति ?	**रजः सत्त्वं** च अभिभूय तमः एव भवति ।
तथा भवति ।	
किं भवति ?	**रजः** भवति ।
किं कृत्वा रजः भवति ?	**अभिभूय** रजः भवति ।
किं किं च अभिभूय रजः भवति ?	तथा **तमः सत्त्वं च** अभिभूय रजः भवति ।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**भारत !**

तात्पर्यम् - अर्जुन ! यद्यपि एतेषां त्रयाणां गुणानां बुद्धौ समानत्वं भवति तथापि कदाचित् सत्त्वगुणः अन्यत् गुणद्वयम् (रजोगुणतमोगुणौ) अधःकृत्य स्वकार्यं सुखं जनयति । क्वचित् रजः अन्यत् गुणद्वयम् (सत्वगुणतमोगुणौ) अधःकृत्य स्वकार्यं दुःखं जनयति । क्वचित् च तमः अन्यत् गुणद्वयम् (सत्वगुणरजोगुणौ) अधःकृत्य स्वकार्यम् अविवेकं जनयति । अत एवेदं प्राणिषु तारतम्यम् ।

सर्वद्वारेषु देहेऽस्मिन्प्रकाश उपजायते ।
ज्ञानं यदा तदा विद्याद्विवृद्धं सत्त्वमित्युत ॥१४.११॥

पदच्छेदः - सर्वद्वारेषु, देहे, अस्मिन्, प्रकाशः, उपजायते ।
ज्ञानम्, यदा, तदा, विद्यात्, विवृद्धम्, सत्त्वम्, इति, उत ॥

अन्वयः - अस्मिन् देहे सर्वद्वारेषु यदा प्रकाशः उत ज्ञानम् उपजायते तदा सत्त्वं विवृद्धम् इति विद्यात् ।

पदार्थः - अस्मिन् देहे = एतस्मिन् शरीरे, सर्वद्वारेषु = सकलेन्द्रियेषु, यदा प्रकाशः = यदा ज्योतिः, उत = एवम्, ज्ञानम् = विवेकः, उपजायते = उद्भवति , तदा सत्त्वम् = सत्त्वगुणः, विवृद्धम् = प्रवृद्धः, इति विद्यात् = इति जानीयात् ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
अस्मिन्	इदम्- म. सर्व. पुं. स. एक. (विशेषणम्)	देहे	अ. पुं. स. एक. (विशेष्यम्)
सर्वद्वारेषु	अ. नपुं. स. बहु.	यदा	अव्ययम्
प्रकाशः	अ. पुं. प्र. एक.	उत	अव्ययम्
ज्ञानम्	अ. नपुं. प्र. एक.	उपजायते	उप + जन् (जनी प्रादुर्भावे) आत्म. कर्तरि लट्. प्रपु. एक.
तदा	अव्ययम्	सत्त्वम्	अ. नपुं. प्र. एक. (विशेष्यम्)
विवृद्धम्	अ. नपुं. प्र. एक. (विशेषणम्)	इति	अव्ययम्
विद्यात्	विद् (विद - ज्ञाने) पर. कर्तरि विधिलिङ्. प्रपु. एक.		

व्याकरणम् -

(क) सन्धिः	देहेऽस्मिन्	देहे + अस्मिन्	पूर्वरूपसन्धिः ।
	विद्याद्विवृद्धम्	विद्यात् + विवृद्धम्	जश्त्वसन्धिः ।
	इत्युत	इति + उत	यण्सन्धिः ।
(ख) समासः	सर्वद्वारेषु	सर्वाणि द्वाराणि सर्वद्वाराणि तेषु - कर्मधारयः ।	
(ग) कृदन्तः	देहे	दिह् (दिह - उपचये) + घञ्, तस्मिन् ।	
	प्रकाशः	प्र + (काशृ - दीप्तौ) + अच् ।	
	ज्ञानम्	ज्ञा (ज्ञा - अवबोधने) + ल्युट् ।	
	विवृद्धम्	वि + वृध् (वृधु - वर्धने) + क्त (कर्तरि) ।	
(घ) तद्धितान्तः	सत्त्वम्	सत् + त्व (भावार्थे) ।	

भावस्पष्टीकरणम् -

यदा उपजायते ।	
यदा **कः** उपजायते ?	यदा **प्रकाशः** उपजायते ।
यदा **किं** प्रकाशः उपजायते ?	यदा **ज्ञानं (विवेकः) उत प्रकाशः** उपजायते ।
यदा ज्ञानं (विवेकः) प्रकाशः **कुत्र** उपजायते ?	यदा ज्ञानं (विवेकः) प्रकाशः **देहे** उपजायते ।
यदा ज्ञानं (विवेकः) प्रकाशः **कस्मिन्** देहे उपजायते ?	यदा ज्ञानं (विवेकः) प्रकाशः **अस्मिन्** देहे उपजायते ।
यदा ज्ञानं (विवेकः) प्रकाशः अस्मिन् देहे **केषु** उपजायते ?	यदा ज्ञानं (विवेकः) प्रकाशः अस्मिन् देहे **सर्वद्वारेषु** उपजायते ।
यदा ज्ञानं (विवेकः) प्रकाशः अस्मिन् देहे सर्वद्वारेषु उपजायते, तदा **किम्** इति विद्यात् ?	यदा ज्ञानं (विवेकः) प्रकाशः अस्मिन् देहे सर्वद्वारेषु उपजायते, तदा **सत्त्वम्** इति विद्यात् ।
यदा ज्ञानं (विवेकः) प्रकाशः अस्मिन् देहे सर्वद्वारेषु उपजायते, तदा सत्त्वं **कीदृशम्** इति विद्यात् ?	यदा ज्ञानं (विवेकः) प्रकाशः अस्मिन् देहे सर्वद्वारेषु उपजायते, तदा सत्त्वं **विवृद्धम्** इति विद्यात् ।

तात्पर्यम् - पुरुषस्य यदा श्रोत्रचक्षुःप्रभृतिभिः इन्द्रियैः पदार्थस्य यथावत् ज्ञानं भवति तदा तस्मिन् सत्त्वगुणः वृद्धिं गतः इति ज्ञातव्यम् ।

लोभः प्रवृत्तिरारम्भः कर्मणामशमः स्पृहा ।
रजस्येतानि जायन्ते विवृद्धे भरतर्षभ ॥१४.१२॥

पदच्छेदः - लोभः, प्रवृत्तिः, आरम्भः, कर्मणाम्, अशमः, स्पृहा ।
रजसि, एतानि, जायन्ते, विवृद्धे, भरतर्षभ ॥

अन्वयः - भरतर्षभ ! रजसि विवृद्धे लोभः प्रवृत्तिः कर्मणाम् आरम्भः अशमः स्पृहा एतानि जायन्ते ।

पदार्थः - भरतर्षभ = अर्जुन ! रजसि = रजोगुणे, विवृद्धे = बृंहते, लोभः = परद्रव्यप्राप्तीच्छा, प्रवृत्तिः = प्रवर्तनम्, कर्मणाम् = कार्याणाम्, आरम्भः = प्रारम्भः, अशमः = अशान्तिः, स्पृहा = तृष्णा, एतानि = लोभादीनि, जायन्ते = भवन्ति ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
भरतर्षभ	अ. पुं. सम्बो. एक.	रजसि	रजस्- सका. नपुं. स. एक. (विशेष्यम्)
विवृद्धे	अ. पुं. स. एक. (विशेषणम्)	लोभः	अ. पुं. प्र. एक.
प्रवृत्तिः	इ. स्त्री. प्र. एक.	कर्मणाम्	कर्मन्- न. नपुं. ष. बहु.
आरम्भः	अ. पुं. प्र. एक.	अशमः	अ. पुं. प्र. एक.
स्पृहा	आ. स्त्री. प्र. एक.	एतानि	एतद्- द. नपुं. प्र. बहु. (विशेषणम्)
जायन्ते	जन् (जनी - प्रादुर्भावे) आत्म. कर्तरि लट्. प्रपु. बहु.		

व्याकरणम् -

(क) सन्धिः
- प्रवृत्तिरारम्भः — प्रवृत्तिः + आरम्भः — विसर्गसन्धिः (रेफः)।
- रजस्येतानि — रजसि + एतानि — यण्सन्धिः।

(ख) समासः
- अशमः — न शमः अशमः - नञ्तत्पुरुषः।
- भरतर्षभ — भरतानाम् ऋषभः भरतर्षभः, तत्सम्बुद्धौ - षष्ठीतत्पुरुषः।

(ग) कृदन्तः
- लोभः — लुभ् (लुभ् - विमोहने) + घञ्।
- प्रवृत्तिः — प्र + वृत् (वृतु - वर्तने) + क्तिन्।
- आरम्भः — आ + रभ् (रभ - राभस्ये) + घञ्।
- शमः — शम् (शमु - उपशमने) + घञ्।
- स्पृहा — स्पृह् (स्पृह - ईप्सायाम्) + घञ् + स्त्रीत्वे टाप्।
- विवृद्धे — वि + वृध् (वृधु - वर्धने) + क्त, तस्मिन्।

भावस्पष्टीकरणम् -

जायन्ते।	
कस्मिन् जायन्ते ?	रजसि जायन्ते।
रजसि **कदा** जायन्ते ?	रजसि **विवृद्धे** जायन्ते।
कानि रजसि विवृद्धे जायन्ते ?	**एतानि** रजसि विवृद्धे जायन्ते।

कानि च एतानि रजसि विवृद्धे जायन्ते ?	**लोभः प्रवृत्तिः आरम्भः कर्मणाम् अशमः स्पृहा** एतानि रजसि विवृद्धे जायन्ते।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**भरतर्षभ !**

तात्पर्यम् - अर्जुन ! पुरुषस्य यदा लोलुपत्वम्, निरन्तरप्रयत्नः, काम्येषु निषिद्धेषु च कर्मसु प्रवृत्तिः, अविश्रान्तिः, दृष्टमात्रेषु अपि वस्तुषु परमा आसक्तिः च भवति तदा तस्मिन् रजोगुणः वृद्धिं गतः इति ज्ञातव्यम्।

अप्रकाशोऽप्रवृत्तिश्च प्रमादो मोह एव च।
तमस्येतानि जायन्ते विवृद्धे कुरुनन्दन ॥१४.१३॥

पदच्छेदः - अप्रकाशः, अप्रवृत्तिः, च, प्रमादः, मोहः, एव, च।
तमसि, एतानि, जायन्ते, विवृद्धे, कुरुनन्दन ॥

अन्वयः - कुरुनन्दन ! तमसि विवृद्धे अप्रकाशः अप्रवृत्तिः च प्रमादः मोहः एव च एतानि जायन्ते।

पदार्थः - कुरुनन्दन = अर्जुन ! अप्रकाशः = अविवेकः, अप्रवृत्तिः च = प्रवृत्त्यभावः च, प्रमादः = अनवधानम्, मोहः एव च = मन्दत्वम् एव च, एतानि तमसि = तमोगुणे, विवृद्धे = प्रवृद्धे, जायन्ते = प्रकटीभवन्ति।

पदपरिचयः -

पदम्	**विवरणम्**	**पदम्**	**विवरणम्**
कुरुनन्दन	अ. पुं. सम्बो. एक.	अप्रकाशः	अ. पुं. प्र. एक.
अप्रवृत्तिः	इ. स्त्री. प्र. एक.	च	अव्ययम्
प्रमादः	अ. पुं. प्र. एक.	मोहः	अ. पुं. प्र. एक.
एव	अव्ययम्	एतानि	एतद्- द. सर्व. नपुं. प्र. बहु.
तमसि	तमस्- सका. नपुं. स. एक. (विशेष्यम्)	विवृद्धे	अ. नपुं. स. एक. (विशेषणम्)
जायन्ते	जन् (जनी प्रादुर्भावे) आत्म. कर्तरि लट्. प्रपु. बहु.		

व्याकरणम् -

(क) सन्धिः	अप्रकाशोऽप्रवृत्तिः	अप्रकाशः + अप्रवृत्तिः	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः पूर्वरूपं च।
	अप्रवृत्तिश्च	अप्रवृत्तिः + च	विसर्गसन्धिः, (सकारः) श्चुत्वम्।

	प्रमादो मोहः	प्रमादः + मोहः	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः ।
	मोह एव	मोहः + एव	विसर्गसन्धिः (लोपः) ।
	तमस्येतानि	तमसि + एतानि	यण्सन्धिः ।
(ख) समासः	अप्रकाशः	न प्रकाशः अप्रकाशः - नञ्तत्पुरुषः ।	
	कुरुनन्दन	कुरूणां नन्दनः कुरुनन्दनः, तत्सम्बुद्धौ - षष्ठीतत्पुरुषः ।	
(ग) कृदन्तः	प्रकाशः	प्र + काश् (काशृ - दीप्तौ) घञ् ।	
	प्रवृत्तिः	प्र + वृत् (वृतु - वर्तने) + क्तिन् ।	
	प्रमादः	प्र + मद् (मदी - हर्षग्लेपनयोः) घञ् (भावे) ।	
	मोहः	मुह् (मुह - वैचित्त्ये) + घञ् (भावार्थे) ।	
	विवृद्धे	वि + वृध् (वृधु - वर्धने) + क्त, तस्मिन् ।	

भावस्पष्टीकरणम् -

जायन्ते ।	
कदा जायन्ते ?	**विवृद्धे जायन्ते ।**
कस्मिन् विवृद्धे जायन्ते ?	**तमसि विवृद्धे जायन्ते ।**
कानि तमसि विवृद्धे जायन्ते ?	**एतानि तमसि विवृद्धे जायन्ते ।**
कानि एतानि तमसि विवृद्धे जायन्ते ?	**अप्रकाशः अप्रवृत्तिः च प्रमादः मोहः एव च एतानि तमसि विवृद्धे जायन्ते ।**
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**कुरुनन्दन !**

तात्पर्यम् - अर्जुन ! पुरुषस्य यदा विवेकभ्रंशः, शास्त्रविहितकर्मसु अप्रवृत्तिः, कार्ये अनवधानम्, भ्रान्तिः निद्रा इत्यादयः भवन्ति तदा तमोगुणः वृद्धिं गतः इति ज्ञातव्यम् ।

यदा सत्त्वे प्रवृद्धे तु प्रलयं याति देहभृत् ।
तदोत्तमविदां लोकानमलान्प्रतिपद्यते ॥१४.१४॥

पदच्छेदः - यदा, सत्त्वे, प्रवृद्धे, तु, प्रलयम्, याति, देहभृत् ।
तदा, उत्तमविदाम्, लोकान्, अमलान्, प्रतिपद्यते ॥

अन्वयः - सत्त्वे प्रवृद्धे तु यदा देहभृत् प्रलयं याति तदा उत्तमविदाम् अमलान् लोकान् प्रतिपद्यते ।

पदार्थः - सत्त्वे = सत्त्वगुणे, प्रवृद्धे = विवृद्धे, तु = हि, यदा = यस्मिन् समये, देहभृत् = शरीरधारी, प्रलयम् = मरणम्, याति = प्राप्नोति, तदा = तस्मिन् समये, उत्तमविदाम् = तत्त्वज्ञानिनाम्, अमलान् = शुद्धान्, लोकान् = प्रदेशान्, प्रतिपद्यते = अधिगच्छति ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
सत्त्वे	अ. नपुं. स. एक. (विशेष्यम्)	प्रवृद्धे	अ. नपुं. स. एक. (विशेषणम्)
तु	अव्ययम्	यदा	अव्ययम्
देहभृत्	देहभृत्- त. पुं. प्र. एक. (विशेषणम्)	प्रलयम्	अ. पुं. द्वि. एक.
याति	या (या प्रापणे) पर. कर्तरि लट्. प्रपु. एक.	तदा	अव्ययम्
उत्तमविदाम्	उत्तमविद्- द. पुं. ष. बहु.	अमलान्	अ. पुं. द्वि. बहु.
लोकान्	अ. पुं. द्वि. बहु.	प्रतिपद्यते	प्रति + पद् (पद - गतौ) आत्म. कर्तरि लट्. प्रपु. एक

व्याकरणम् -

(क) सन्धिः तदोत्तमविदाम् — तदा + उत्तमविदाम् — गुणसन्धिः ।

(ख) समासः उत्तमविदाम् — उत्तमान् (हिरण्यगर्भादीन्) विदन्ति इति उत्तमविदः, तेषाम् - कर्तरि क्विप् उपपदसमासः ।

अमलान् — न विद्यते मलं येषु ते अमलाः, तान् - बहुव्रीहिः ।

देहभृत् — देहं बिभर्ति इति देहभृत् - कर्तरि क्विप् उपपदसमासः ।

(ग) कृदन्तः प्रवृद्धे — प्र + वृधु (वृधु - वर्धने) + क्त (कर्मणि), तस्मिन् ।

प्रलयम् — प्र + ली (लीङ् - श्लेषणे) + अच् ।

(घ) तद्धितान्तः सत्त्वे — सत् + त्व (भावार्थे), तस्मिन् ।

उत्तमः — उत् + तमप् ।

भावस्पष्टीकरणम् -

याति ।	
कदा याति ?	**प्रवृद्धे** तु याति ।
कस्मिन् प्रवृद्धे तु याति ?	**सत्त्वे** प्रवृद्धे तु याति ।
सत्त्वे प्रवृद्धे तु **कदा** याति ?	सत्त्वे प्रवृद्धे तु **यदा** याति ।

यदा **कं** याति ?	यदा **प्रलयं** याति ।
यदा **कः** प्रलयं याति ?	यदा **देहभृत्** प्रलयं याति ।
यदा देहभृत् प्रलयं याति, **तदा किम्** ?	यदा देहभृत् प्रलयं याति, **तदा प्रतिपद्यते** ।
यदा देहभृत् प्रलयं याति, तदा **कान्** प्रतिपद्यते ?	यदा देहभृत् प्रलयं याति, तदा **लोकान्** प्रतिपद्यते ।
यदा देहभृत् प्रलयं याति, तदा **कीदृशान्** लोकान् प्रतिपद्यते ?	यदा देहभृत् प्रलयं याति, तदा **अमलान्** लोकान् प्रतिपद्यते ।
यदा देहभृत् प्रलयं याति, तदा **कीदृशानाम्** अमलान् लोकान् प्रतिपद्यते ?	यदा देहभृत् प्रलयं याति, तदा **उत्तमविदाम्** अमलान् लोकान् प्रतिपद्यते ।

तात्पर्यम् - सत्त्वगुणे प्रवृद्धे म्रियमाणः पुरुषः निर्मलान् तत्त्वज्ञानिनां लोकान् प्राप्नोति ।

रजसि प्रलयं गत्वा कर्मसङ्गिषु जायते ।
तथा प्रलीनस्तमसि मूढयोनिषु जायते ॥१४.१५॥

पदच्छेदः - रजसि, प्रलयम्, गत्वा, कर्मसङ्गिषु, जायते ।
तथा, प्रलीनः, तमसि, मूढयोनिषु, जायते ॥

अन्वयः - रजसि प्रलयं गत्वा कर्मसङ्गिषु जायते तथा तमसि प्रलीनः मूढयोनिषु जायते ।

पदार्थः - रजसि = रजोगुणे, प्रलयम् = मृत्युम्, गत्वा = प्राप्य, कर्मसङ्गिषु = कर्मासक्तेषु, जायते = उद्भवति, तथा = तेन प्रकारेण, तमसि = तमोगुणे, प्रलीनः = मृतः, मूढयोनिषु = निकृष्टयोनिषु, जायते = उद्भवति ।

पदरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
रजसि	रजस्- सका. नपुं. स. एक.	प्रलयम्	अ. पुं. द्वि. एक.
गत्वा	क्त्वान्तम् अव्ययम्	कर्मसङ्गिषु	कर्मसङ्गिन्- न. पुं. स. बहु.
जायते	जन् (जनी - प्रादुर्भावे) आत्म. कर्तरि लट्. प्रपु. एक.	तथा	अव्ययम्
तमसि	तमस्- सका. नपुं. स. एक.	प्रलीनः	अ. पुं. प्र. एक.
मूढयोनिषु	इ. पुं. स. बहु.		

व्याकरणम् -

(क) सन्धिः	प्रलीनस्तमसि	प्रलीनः + तमसि	विसर्गसन्धिः (सकारः)।
(ख) समासः	कर्मसङ्गिषु	कर्मसु सज्जन्ते तच्छीलाः कर्मसङ्गिनः, तेषु - ताच्छीलिके कर्तरि णिनि उपपदसमासः।	
	मूढयोनिषु	मूढा योनिः येषां ते मूढयोनयः, तेषु - बहुव्रीहिः। योनौ मूढत्वं तद्युक्तानां मूढत्वेन इति बोध्यम्।	
(ग) कृदन्तः	प्रलयम्	प्र + ली (लीङ् - श्लेषणे) + अच्।	
	गत्वा	गम् (गम्लृ - गतौ) + क्त्वा।	
	प्रलीनः	प्र + ली (ली - द्रवीकरणे) + क्त (कर्तरि)।	
	मूढः	मुह् (मुह - वैचित्त्ये) + क्त (कर्तरि)।	
(घ) तद्धितान्तः	सङ्गिषु	सङ्ग + इनि (मतुबर्थे), तेषु, सङ्गः एषाम् एषु वा अस्ति इति।	

भावस्पष्टीकरणम् -

जायते।	
केषु जायते ?	**कर्मसङ्गिषु** जायते।
किं कृत्वा कर्मसङ्गिषु जायते ?	**गत्वा** कर्मसङ्गिषु जायते।
कं गत्वा कर्मसङ्गिषु जायते ?	**प्रलयं** गत्वा कर्मसङ्गिषु जायते।
कस्मिन् प्रलयं गत्वा कर्मसङ्गिषु जायते ?	**रजसि** प्रलयं गत्वा कर्मसङ्गिषु जायते।
रजसि प्रलयं गत्वा कर्मसङ्गिषु जायते ? **तथा किम्** ?	रजसि प्रलयं गत्वा कर्मसङ्गिषु जायते। **तथा जायते**।
रजसि प्रलयं गत्वा कर्मसङ्गिषु जायते। तथा **केषु** जायते ?	रजसि प्रलयं गत्वा कर्मसङ्गिषु जायते। तथा **मूढयोनिषु** जायते।
रजसि प्रलयं गत्वा कर्मसङ्गिषु जायते। तथा **कः** मूढयोनिषु जायते ?	रजसि प्रलयं गत्वा कर्मसङ्गिषु जायते। तथा **प्रलीनः** मूढयोनिषु जायते।
रजसि प्रलयं गत्वा कर्मसङ्गिषु जायते। तथा **कस्मिन्** प्रलीनः मूढयोनिषु जायते ?	रजसि प्रलयं गत्वा कर्मसङ्गिषु जायते तथा **तमसि** प्रलीनः मूढयोनिषु जायते।

तात्पर्यम् - रजोगुणे प्रवृद्धे म्रियमाणः पुरुषः कर्मासक्तेषु मनुष्येषु जायते। तमोगुणे प्रवृद्धे म्रियमाणः तु विवेकरहितेषु पशुप्रभृतिषु जन्म प्राप्नोति।

कर्मणः सुकृतस्याहुः सात्त्विकं निर्मलं फलम् ।
रजसस्तु फलं दुःखमज्ञानं तमसः फलम् ॥१४.१६॥

पदच्छेदः - कर्मणः, सुकृतस्य, आहुः, सात्त्विकम्, निर्मलम्, फलम् ।
रजसः, तु, फलम्, दुःखम्, अज्ञानम्, तमसः, फलम् ॥

अन्वयः - सुकृतस्य कर्मणः सात्त्विकं निर्मलं फलम् आहुः । रजसः फलं तु दुःखम् । तमसः फलम् अज्ञानम् ।

पदार्थः - सुकृतस्य कर्मणः = साधु विहितस्य कर्मणः, सात्त्विकम् = सत्त्वसम्पन्नम्, निर्मलम् = स्वच्छम्, फलम् = परिणामः, आहुः = ब्रुवन्ति । रजसः = रजोगुणस्य, फलम् = परिणामः, तु = हि, दुःखम् = कष्टम् । तमसः = तमोगुणस्य, फलम् = परिणामः, अज्ञानम् = अज्ञानम् ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
सुकृतस्य	अ. नपुं. ष. एक. (विशेषणम्)	कर्मणः	कर्मन्- न. नपुं. ष. एक. (विशेष्यम्)
सात्त्विकम्	अ. नपुं. प्र. एक. (विशेषणम्)	निर्मलम्	अ. नपुं. प्र. एक. (विशेषणम्)
फलम्	अ. नपुं. प्र. एक. (विशेष्यम्)	आहुः	ब्रू (ब्रूञ् व्यक्तायां वाचि) आत्म. कर्तरि लट्. प्रपु. बहु.
रजसः	रजस्- स. नपुं. ष. एक.	तु	अव्ययम्
दुःखम्	अ. नपुं. प्र. एक.	तमसः	तमस्- स. नपुं. ष. एक.
अज्ञानम्	अ. नपुं. प्र. एक.		

व्याकरणम् -

(क) सन्धिः सुकृतस्याहुः — सुकृतस्य + आहुः — सवर्णदीर्घसन्धिः ।
रजसस्तु — रजसः + तु — विसर्गसन्धिः (सकारः) ।

(ख) समासः सुकृतस्य — सुष्ठु कृतं सुकृतम्, तस्य - प्रादितत्पुरुषः ।
निर्मलम् — निर्गतं मलं यस्मात् तत्, निर्मलम् - पञ्चमीतत्पुरुषः ।
अज्ञानम् — न ज्ञानम् अज्ञानम् - नञ्तत्पुरुषः ।

(ग) तद्धितान्तः सात्त्विकम् — सत्त्व + ठन् (सत्त्वात् आगतः इत्यर्थः ।)

भावस्पष्टीकरणम् -

आहुः ।	
किम् आहुः ?	**फलम्** आहुः ।
कीदृशं फलम् आहुः ?	**निर्मलं** फलम् आहुः ।
पुनश्च कीदृशं निर्मलं फलम् आहुः ?	**सात्त्विकं** निर्मलं फलम् आहुः ।
कस्य सात्त्विकं निर्मलं फलम् आहुः ?	**कर्मणः** सात्त्विकं निर्मलं फलम् आहुः ।
कीदृशस्य कर्मणः सात्त्विकं निर्मलं फलम् आहुः ?	**सुकृतस्य** कर्मणः सात्त्विकं निर्मलं फलम् आहुः ।
फलम् आहुः ।	
किं फलम् आहुः ?	**दुःखं** फलम् आहुः ।
कस्य दुःखं फलम् आहुः ?	**रजसः** दुःखं फलम् आहुः ।
फलम् आहुः ।	
कस्य फलम् आहुः ?	**तमसः** फलम् आहुः ।
तमसः फलं **किम्** आहुः ?	तमसः फलम् **अज्ञानम्** आहुः ।

तात्पर्यम् - साधुविहितस्य कर्मणः सत्त्वप्रधानं स्वच्छं शुद्धं फलं कथयन्ति। रजोगुणात् तृष्णा। तमोगुणात् अज्ञानप्रयुक्तौ मोहप्रमादौ सम्भवतः ।

सत्त्वात्सञ्जायते ज्ञानं रजसो लोभ एव च।
प्रमादमोहौ तमसो भवतोऽज्ञानमेव च ॥१४.१७॥

पदच्छेदः - सत्त्वात्, सञ्जायते, ज्ञानम्, रजसः, लोभः, एव, च ।
प्रमादमोहौ, तमसः, भवतः, अज्ञानम्, एव, च ॥

अन्वयः - सत्त्वात् ज्ञानं सञ्जायते रजसः लोभः एव च । तमसः प्रमादमोहौ भवतः अज्ञानम् एव च ।

पदार्थः - सत्त्वात् = सत्त्वगुणात्, ज्ञानम् = विवेकः, सञ्जायते = भवति, रजसः = रजोगुणात्, लोभः = परद्रव्यप्राप्तीच्छा एव च, तमसः = तमोगुणात्, प्रमादमोहौ = अनवधानं मोहश्च, भवतः = सम्भवतः, अज्ञानम् एव च = अज्ञानम् अपि च ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
सत्त्वात्	अ. नपुं. पं. एक.	ज्ञानम्	अ. नपुं. प्र. एक.
सञ्जायते	सम् + जन् (जनी - प्रादुर्भावे) आत्म. कर्तरि लट्. प्रपु. एक.	रजसः	रजस्- स. नपुं. पं. एक.
लोभः	अ. पुं. प्र. एक.	एव	अव्ययम्
च	अव्ययम्	तमसः	तमस्- स. नपुं. पं. एक.
प्रमादमोहौ	अ. पुं. द्वि. द्विव.	भवतः	भू (भू - सत्तायम्) पर. कर्तरि लट्. प्रपु. द्विव.
अज्ञानम्	अ. नपुं. प्र. एक.		

व्याकरणम् -

(क) सन्धिः

रजसो लोभः	रजसः + लोभः	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः ।
लोभ एव	लोभः + एव	विसर्गसन्धिः (लोपः) ।
तमसो भवतः	तमसः + भवतः	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः ।
भवतोऽज्ञानम्	भवतः + अज्ञानम्	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः पूर्वरूपं च ।

(ख) समासः

प्रमादमोहौ	प्रमादश्च मोहश्च इति द्वयोः समाहारः प्रमादमोहौ - द्वन्द्वः ।
अज्ञानम्	न ज्ञानम् अज्ञानम् - नञ्तत्पुरुषः ।

(ग) कृदन्तः

ज्ञानम्	ज्ञा (ज्ञा - अवबोधने) + ल्युट् ।
लोभः	लुभ् (लुभ - विमोहने) + घञ् ।
प्रमादः	प्र + मद् (मदी - हर्षग्लेपनयोः) + घञ् ।
मोहः	मुह् (मुह - वैचित्त्ये) + घञ् ।

(घ) तद्धितान्तः

सत्त्वात्	सत् + त्व (भावार्थे), तस्मात् ।

भावस्पष्टीकरणम् -

सञ्जायते ।	
किं सञ्जायते ?	**ज्ञानं सञ्जायते ।**
कस्मात् ज्ञानं सञ्जायते ?	**सत्त्वात् ज्ञानं सञ्जायते ।**

सञ्जायते ।	
कः सञ्जायते ?	**लोभः** सञ्जायते ।
कस्मात् लोभः एव च सञ्जायते ?	**रजसः** लोभः एव च सञ्जायते ।
भवतः ।	
कौ भवतः ?	**प्रमादमोहौ** भवतः ।
कस्मात् प्रमादमोहौ भवतः ?	**तमसः** प्रमादमोहौ भवतः ।
तमसः प्रमादमोहौ भवतः । **पुनश्च किं भवति ?**	तमसः प्रमादमोहौ भवतः । **अज्ञानम् एव च ।**

तात्पर्यम् - सत्त्वगुणात् विवेकः सम्भवति । रजोगुणात् तृष्णा । तमोगुणात् अज्ञानप्रयुक्तौ प्रमादमोहौ सम्भवतः ।

ऊर्ध्वं गच्छन्ति सत्त्वस्था मध्ये तिष्ठन्ति राजसाः ।
जघन्यगुणवृत्तिस्था अधो गच्छन्ति तामसाः ॥१४.१८॥

पदच्छेदः - ऊर्ध्वम्, गच्छन्ति, सत्त्वस्थाः, मध्ये, तिष्ठन्ति, राजसाः ।
जघन्यगुणवृत्तिस्थाः, अधः, गच्छन्ति, तामसाः ॥

अन्वयः - सत्त्वस्थाः ऊर्ध्वं गच्छन्ति राजसाः मध्ये तिष्ठन्ति । जघन्यगुणवृत्तिस्थाः तामसाः अधः गच्छन्ति ।

पदार्थः - सत्त्वस्थाः = सात्त्विकाः, ऊर्ध्वम् = ऊर्ध्वलोकम्, गच्छन्ति = प्राप्नुवन्ति । राजसाः = रजोगुणप्रधानाः, मध्ये = मनुष्यलोके, तिष्ठन्ति = भवन्ति । जघन्यगुणवृत्तिस्थाः = नीचगुणवृत्तिस्थाः, तामसाः = तमोगुणप्रधानाः, अधः = नीचलोकम्, गच्छन्ति = प्राप्नुवन्ति ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
सत्त्वस्थाः	अ. पुं. प्र. बहु. (विशेषणम्)	ऊर्ध्वम्	अव्ययम्
गच्छन्ति	गम् (गम्लृ गतौ) पर. कर्तरि लट्. प्रपु. बहु.	राजसाः	अ. पुं. प्र. बहु. (विशेषणम्)
मध्ये	अव्ययम्	तिष्ठन्ति	स्था (ष्ठा - गतिनिवृत्तौ) पर. कर्तरि लट्. प्रपु. बहु.
जघन्यगुणवृत्तिस्थाः	अ. पुं. प्र. बहु. (विशेषणम्)	तामसाः	अ. पुं. प्र. बहु. (विशेषणम्)
अधः	अव्ययम्		

व्याकरणम् -

(क) सन्धिः	सत्त्वस्था मध्ये	सत्त्वस्थाः + मध्ये	विसर्गसन्धिः (लोपः)।
	जघन्यगुणवृत्तिस्था अधः	जघन्यगुणवृत्तिस्थाः + अधः	विसर्गसन्धिः (लोपः)।
	अधो गच्छन्ति	अधः + गच्छन्ति	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः।
(ख) समासः	सत्त्वस्थाः	सत्त्वे तिष्ठन्ति इति सत्त्वस्थाः - कर्तरि क उपपदसमासश्च।	
	जघन्यगुणवृत्तिस्थाः	जघन्यः गुणः जघन्यगुणः - कर्मधारयः। जघन्यगुणस्य वृत्तिः जघन्यगुणवृत्तिः - षष्ठीतत्पुरुषः। जघन्यगुणवृत्तौ तिष्ठन्ति इति जघन्यगुणवृत्तिस्थाः - कर्तरि क उपपदसमासश्च।	
(ग) तद्धितान्तः	राजसाः	रजस् + अण् (मतुबर्थे), रजः एषाम् एषु वा अस्तीति।	
	तामसाः	तमस् + अण् (मतुबर्थे) तमः एषाम् एषु वा अस्तीति।	

भावस्पष्टीकरणम् -

गच्छन्ति।	
के गच्छन्ति ?	**सत्त्वस्थाः** गच्छन्ति।
सत्त्वस्थाः **कुत्र** गच्छन्ति ?	सत्त्वस्थाः **ऊर्ध्वं** गच्छन्ति।
तिष्ठन्ति।	
के तिष्ठन्ति ?	**राजसाः** तिष्ठन्ति।
राजसाः **कुत्र** तिष्ठन्ति ?	राजसाः **मध्ये** तिष्ठन्ति।
गच्छन्ति।	
के गच्छन्ति ?	**तामसाः** गच्छन्ति।
कीदृशाः तामसाः गच्छन्ति ?	**जघन्यगुणवृत्तिस्थाः** तामसाः गच्छन्ति।
जघन्यगुणवृत्तिस्थाः तामसाः **कुत्र** गच्छन्ति ?	जघन्यगुणवृत्तिस्थाः तामसाः **अधः** गच्छन्ति।

तात्पर्यम् - सात्त्विकाः ऊर्ध्वलोकं प्राप्नुवन्ति। राजसाः मध्ये मनुष्यलोके तिष्ठन्ति। नीचगुणप्रवृत्तौ वर्तमानाः तमोगुणप्रधानाः तु नीचलोकं यान्ति।

नान्यं गुणेभ्यः कर्तारं यदा द्रष्टानुपश्यति।
गुणेभ्यश्च परं वेत्ति मद्भावं सोऽधिगच्छति॥१४.१९॥

पदच्छेदः - न, अन्यम्, गुणेभ्यः, कर्तारम्, यदा, द्रष्टा, अनुपश्यति।
गुणेभ्यः, च, परम्, वेत्ति, मद्भावम्, सः, अधिगच्छति॥

अन्वयः - द्रष्टा यदा गुणेभ्यः अन्यं कर्तारं न अनुपश्यति (आत्मानम्) गुणेभ्यः च परं वेत्ति सः मद्भावम् अधिगच्छति।

पदार्थः - द्रष्टा = समीक्षकः, यदा = यस्मिन् समये, गुणेभ्यः = सत्त्वादिभ्यः, अन्यम् = इतरम्, कर्तारम् = कार्यकर्तारम्, न अनुपश्यति = न अवलोकते, (आत्मानम्) गुणेभ्यः च = सत्त्वादिभ्यः च, परम् = व्यतिरिक्तम्, वेत्ति = जानाति, सः = सः जनः, मद्भावम् = मत्स्वरूपम्, अधिगच्छति = लभते।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
द्रष्टा	ऋ. पुं. प्र. एक.	यदा	अव्ययम्
गुणेभ्यः	अ. पुं. पं. बहु.	अन्यम्	अ. सर्व. पुं. द्वि. एक. (विशेषणम्)
कर्तारम्	ऋ. पुं. द्वि. एक. (विशेष्यम्)	न	अव्ययम्
अनुपश्यति	अनु + पश्य (दृशिर् - प्रेक्षणे) पर. कर्तरि लट्. प्रपु. एक.	च	अव्ययम्
परम्	अ. सर्व. पुं. द्वि. एक.	वेत्ति	विद् (विद - ज्ञाने) पर. कर्तरि लट्. प्रपु. एक.
सः	तद्- द. सर्व. पुं. प्र. एक. (विशेषणम्)	मद्भावम्	अ. पुं. द्वि. एक.
अधिगच्छति	अधि + गम् (गम्लृ - गतौ) पर. कर्तरि लट्. प्रपु. एक.		

व्याकरणम् -

(क) सन्धिः

नान्यम्	न + अन्यम्	सवर्णदीर्घसन्धिः।
द्रष्टानुपश्यति	द्रष्टा + अनुपश्यति	सवर्णदीर्घसन्धिः।
गुणेभ्यश्च	गुणेभ्यः + च	विसर्गसन्धिः (सकारः) श्चुत्वम्।
सोऽधिगच्छति	सः + अधिगच्छति	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः पूर्वरूपं च।

(ख) समासः मद्भावम् मम भावः मद्भावः, तम् - षष्ठीतत्पुरुषः ।
(ग) कृदन्तः कर्तारम् कृ (डुकृञ् - करणे) + तृच्, तम् ।
द्रष्टा दृश् (दृशिर् - प्रेक्षणे) + तृच् ।

भावस्पष्टीकरणम् -

न अनुपश्यति ।	
कः न अनुपश्यति ?	**द्रष्टा** न अनुपश्यति ।
द्रष्टा **कं** न अनुपश्यति ?	द्रष्टा **कर्तारं** न अनुपश्यति ।
द्रष्टा **कं** कर्तारं न अनुपश्यति ?	द्रष्टा **अन्यं** कर्तारं न अनुपश्यति ।
द्रष्टा **केभ्यः** अन्यं कर्तारं न अनुपश्यति ?	द्रष्टा **गुणेभ्यः** अन्यं कर्तारं न अनुपश्यति ।
द्रष्टा **कदा** गुणेभ्यः अन्यं कर्तारं न अनुपश्यति ?	द्रष्टा **यदा** गुणेभ्यः अन्यं कर्तारं न अनुपश्यति ।
वेत्ति ।	
कथं वेत्ति ?	**परं** वेत्ति ।
केभ्यः च परं वेत्ति ?	**गुणेभ्यः च** परं वेत्ति ।
कं गुणेभ्यः च परं वेत्ति ?	**(आत्मानम्)** गुणेभ्यः च परं वेत्ति ।
(आत्मानम्) गुणेभ्यः च परं वेत्ति । **सः किं करोति ?**	(आत्मानम्) गुणेभ्यः च परं वेत्ति । **सः अधिगच्छति ।**
(आत्मानम्) गुणेभ्यः च परं वेत्ति। सः **कम्** अधिगच्छति ?	(आत्मानम्) गुणेभ्यः च परं वेत्ति। सः **मद्भावम्** अधिगच्छति ।

तात्पर्यम् - अत्र यावन्ति कर्माणि भवन्ति तानि सर्वाणि गुणाः एव कुर्वन्ति, न तु आत्मा । स च गुणेभ्यो व्यतिरिक्तः केवलं कर्मणां साक्षीभूतः इति पुरुषः यदा जानाति तदा मोक्षं प्राप्नोति ।

गुणानेतानतीत्य त्रीन्देही देहसमुद्भवान् ।
जन्ममृत्युजरादुःखैर्विमुक्तोऽमृतमश्नुते ॥१४.२०॥

पदच्छेदः - गुणान्, एतान्, अतीत्य, त्रीन्, देही, देहसमुद्भवान् ।
जन्ममृत्युजरादुःखैः, विमुक्तः, अमृतम्, अश्नुते ॥

अन्वयः - देही देहसमुद्भवान् एतान् त्रीन् गुणान् अतीत्य जन्ममृत्युजरादुःखैः विमुक्तः अमृतम् अश्नुते।

पदार्थः - देही = आत्मा, देहसमुद्भवान् = शरीरकारणभूतान्, एतान् = इमान्, त्रीन् गुणान् = गुणत्रयम्, अतीत्य = अतिक्रम्य, जन्ममृत्युजरादुःखैः = जननमरणजराक्लेशैः, विमुक्तः = त्यक्तः, अमृतम् = मोक्षम्, अश्नुते = अनुभवति।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
देही	देहिन्- न. पुं. प्र. एक.	देहसमुद्भवान्	अ. पुं. द्वि. बहु. (विशेषणम्)
एतान्	एतद्- द. सर्व. पुं. द्वि. बहु. (विशेषणम्)	त्रीन्	इ. पुं. द्वि. बहु. (विशेषणम्)
गुणान्	अ. पुं. द्वि. बहु. (विशेष्यम्)	अतीत्य	ल्यबन्तम् अव्ययम्
जन्ममृत्यु-जरादुःखैः	अ. नपुं. तृ. बहु.	विमुक्तः	अ. पुं. प्र. एक. (विशेषणम्)
अमृतम्	अ. नपुं. द्वि. एक.	अश्नुते	अश् (अश - भोजने) आत्म. कर्तरि लट्. प्रपु. एक.

व्याकरणम् -

(क) सन्धिः जन्ममृत्युजरादुःखैर्विमुक्तः
जन्ममृत्युजरादुःखैः + विमुक्तः विसर्गसन्धिः (रेफः)।
विमुक्तोऽमृतम् विमुक्तः + अमृतम् विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः पूर्वरूपं च।

(ख) समासः देहसमुद्भवान् देहस्य समुद्भवाः देहसमुद्भवाः, तान् - षष्ठीतत्पुरुषः।
जन्ममृत्युजरादुःखैः जन्म च मृत्युः च जरा च जन्ममृत्युजराः - द्वन्द्वः।
जन्ममृत्युजराः एव दुःखानि जन्ममृत्युजरादुःखानि, तैः - कर्मधारयः।
अमृतम् न मृतम् अमृतम् - नञ्तत्पुरुषः।

(ग) कृदन्तः अतीत्य अति + इ (इण् - गतौ) + ल्यप्।
देहः दिह् (दिह - उपचये) + घञ्।
समुद्भवाः सम् + उद् + भू (भू - सत्तायाम्) + अप् (अपादाने) समुद्भवन्ति एभ्यः इति समुद्भवाः अप्, समुत्पत्तिहेतवः इत्यर्थः।
विमुक्तः वि + मुच् (मुच्लृ - मोक्षणे) + क्त (कर्तरि)।

(घ) तद्धितान्तः देही देह + इन् (मतुबर्थे), देहः अस्य अस्मिन् वा अस्तीति।

भावस्पष्टीकरणम् -

अश्नुते ।	
किम् अश्नुते ?	**अमृतम्** अश्नुते ।
कः अमृतम् अश्नुते ?	**देही** अमृतम् अश्नुते ।
देही **कीदृशः** सन् अमृतम् अश्नुते ?	देही **विमुक्तः** अमृतम् अश्नुते ।
देही **कैः** विमुक्तः अमृतम् अश्नुते ?	देही **जन्ममृत्युजरादुःखैः** विमुक्तः अमृतम् अश्नुते ।
देही **किं कृत्वा** जन्ममृत्युजरादुःखैः विमुक्तः अमृतम् अश्नुते ?	देही **अतीत्य** जन्ममृत्युजरादुःखैः विमुक्तः अमृतम् अश्नुते ।
देही **कान्** अतीत्य जन्ममृत्युजरादुःखैः विमुक्तः अमृतम् अश्नुते ?	देही **त्रीन्** गुणान् अतीत्य जन्ममृत्युजरादुःखैः विमुक्तः अमृतम् अश्नुते ।
देही **कान्** त्रीन् गुणान् अतीत्य जन्ममृत्युजरादुःखैः विमुक्तः अमृतम् अश्नुते ?	देही **एतान्** त्रीन् गुणान् अतीत्य जन्ममृत्युजरादुःखैः विमुक्तः अमृतम् अश्नुते ।
देही **कीदृशान्** एतान् त्रीन् गुणान् अतीत्य जन्ममृत्युजरादुःखैः विमुक्तः अमृतम् अश्नुते ?	देही **देहसमुद्भवान्** एतान् त्रीन् गुणान् अतीत्य जन्ममृत्युजरादुःखैः विमुक्तः अमृतम् अश्नुते ।

तात्पर्यम् - सत्त्वादयः त्रयो गुणाः बुद्धौ वर्तमानाः देहस्य प्राप्तौ कारणीभूताः । तादृशान् एतान् गुणान् यः अतिवर्तते सः जन्ममृत्युजरायुक्तात् संसारात् मुक्तिं प्राप्नोति ।

अर्जुन उवाच - **कैर्लिङ्गैस्त्रीन्गुणानेतानतीतो भवति प्रभो ।**
किमाचारः कथं चैतांस्त्रीन्गुणानतिवर्तते ॥१४.२१॥

पदच्छेदः -

अर्जुनः, उवाच - कैः, लिङ्गैः, त्रीन्, गुणान्, एतान्, अतीतः, भवति, प्रभो ।
किमाचारः, कथम्, च, एतान्, त्रीन्, गुणान्, अतिवर्तते ॥

अन्वयः - प्रभो ! कैः लिङ्गैः एतान् त्रीन् गुणान् अतीतः भवति । किमाचारः कथं च एतान् त्रीन् गुणान् अतिवर्तते ।

पदार्थः - प्रभो = कृष्ण ! कैः लिङ्गैः = कैः चिह्नैः, एतान् त्रीन् गुणान् = एतत् गुणत्रयम्, अतीतः भवति = अतिक्रान्तः भवति । किमाचारः = कीदृशाचारः, कथं च एतान् त्रीन् गुणान् = कथं च एतत् गुणत्रयम्, अतिवर्तते = अतिक्राम्यति ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
प्रभो	उ. पुं. सम्बो. एक.	कैः	किम्- म. सर्व. नपुं. तृ. बहु. (विशेषणम्)
लिङ्गैः	अ. नपुं. तृ. बहु. (विशेष्यम्)	एतान्	एतद्- द. सर्व. पुं. द्वि. बहु. (विशेषणम्)
त्रीन्	इ. पुं. द्वि. बहु. (विशेषणम्)	गुणान्	अ. पुं. द्वि. बहु. (विशेष्यम्)
अतीतः	अ. पुं. प्र. एक.	किमाचारः	अ. पुं. प्र. एक. (विशेषणम्)
कथम्	अव्ययम्	च	अव्ययम्
अतिवर्तते	अति + वृत् (वृतु - वर्तने) आत्म. कर्तरि लट्. प्रपु. एक.		

व्याकरणम् -

(क) सन्धिः	कैर्लिङ्गैः	कैः + लिङ्गैः	विसर्गसन्धिः (रेफः)।
	लिङ्गैस्त्रीन्	लिङ्गैः + त्रीन्	विसर्गसन्धिः (सकारः)।
	चैतान्	च + एतान्	वृद्धिसन्धिः।
	एतांस्त्रीन्	एतान् + त्रीन्	सत्वसन्धिः (रुत्वम्, अनुस्वारागमः, विसर्गः, सत्त्वम्)।
(ख) समासः	किमाचारः	कः आचारः यस्य सः किमाचारः - बहुव्रीहिः।	
(ग) कृदन्तः	लिङ्गैः	लिङ्ग् (लिगि - गतौ) + घञ्, तैः।	
	अतीतः	अति + इ (इण् - गतौ) + क्त (कर्तरि)।	
	आचारः	आ + चर् (चर - गतिभक्षणयोः) + घञ्।	

भावस्पष्टीकरणम् -

भवति।	
कीदृशः भवति ?	**अतीतः** भवति।
कान् अतीतः भवति ?	**गुणान्** अतीतः भवति।
कति गुणान् अतीतः भवति ?	**त्रीन्** गुणान् अतीतः भवति।
कान् त्रीन् गुणान् अतीतः भवति ?	**एतान्** त्रीन् गुणान् अतीतः भवति।
कैः लिङ्गैः एतान् त्रीन् गुणान् अतीतः भवति ?	**लिङ्गैः** एतान् त्रीन् गुणान् अतीतः भवति।

अतिवर्तते ।	
कान् अतिवर्तते ?	गुणान् अतिवर्तते ।
कति गुणान् अतिवर्तते ?	त्रीन् गुणान् अतिवर्तते ।
कान् त्रीन् गुणान् अतिवर्तते ?	एतान् त्रीन् गुणान् अतिवर्तते ।
किमाचारः कथं च एतान् त्रीन् गुणान् अतिवर्तते ?	
अस्मिन् श्लोके सम्बोधनपदं किम् ?	प्रभो !

तात्पर्यम् - कृष्ण ! कश्चित् पुरुषः एतान् त्रीन् गुणान् अतीतः इति कथं ज्ञायते ? यदि चिह्नैः इत्युच्यते तर्हि तानि चिह्नानि कानि ? तस्य पुरुषस्य आचारोऽपि कीदृशः वर्तते ?

श्रीभगवानुवाच -

प्रकाशं च प्रवृत्तिं च मोहमेव च पाण्डव।
न द्वेष्टि संप्रवृत्तानि न निवृत्तानि काङ्क्षति ॥१४.२२॥
उदासीनवदासीनो गुणैर्यो न विचाल्यते।
गुणा वर्तन्त इत्येव योऽवतिष्ठति नेङ्गते ॥१४.२३॥
समदुःखसुखः स्वस्थः समलोष्टाश्मकाञ्चनः ।
तुल्यप्रियाप्रियो धीरस्तुल्यनिन्दात्मसंस्तुतिः ॥१४.२४॥
मानापमानयोस्तुल्यस्तुल्यो मित्रारिपक्षयोः ।
सर्वारम्भपरित्यागी गुणातीतः स उच्यते ॥१४.२५॥

पदच्छेदः -

श्रीभगवान्, उवाच -

प्रकाशम्, च, प्रवृत्तिम्, च, मोहम्, एव, च, पाण्डव ।
न, द्वेष्टि, संप्रवृत्तानि, न, निवृत्तानि, काङ्क्षति ॥
उदासीनवत्, आसीनः, गुणैः, यः, न, विचाल्यते ।
गुणाः, वर्तन्ते, इति, एव, यः, अवतिष्ठति, न, इङ्गते ॥
समदुःखसुखः, स्वस्थः, समलोष्टाश्मकाञ्चनः ।
तुल्यप्रियाप्रियः, धीरः, तुल्यनिन्दात्मसंस्तुतिः ॥
मानापमानयोः, तुल्यः, तुल्यः, मित्रारिपक्षयोः ।

अन्वयः - पाण्डव ! प्रकाशं च प्रवृत्तिं च मोहम् एव च संप्रवृत्तानि न द्वेष्टि, निवृत्तानि न काङ्क्षति । यः उदासीनवत् आसीनः गुणैः न विचाल्यते, यः गुणाः वर्तन्ते इति एव अवतिष्ठति न इङ्गते। समदुःखसुखः, स्वस्थः, समलोष्टाश्मकाञ्चनः, तुल्यप्रियाप्रियः, धीरः, तुल्यनिन्दात्मसंस्तुतिः, मानापमानयोः तुल्यः, मित्रारिपक्षयोः तुल्यः, सर्वारम्भपरित्यागी सः गुणातीतः उच्यते ।

पदार्थः - पाण्डव = अर्जुन ! प्रकाशं च = सत्त्वकार्यम्, प्रवृत्तिं च = रजःकार्यम्, मोहम् एव च = तमःकार्यम्, सम्प्रवृत्तानि = सम्प्राप्तानि, न द्वेष्टि = न द्वेषं करोति, निवृत्तानि = अतीतानि, न काङ्क्षति = न इच्छति, यः = यः जनः, उदासीनवत् = तटस्थवत्, आसीनः = तिष्ठन्, गुणैः = सत्त्वादिभिः गुणैः, न विचाल्यते = न विचलितः क्रियते । यः = यः पुरुषः, गुणाः = गुणाः, वर्तन्ते इति एव = भवन्ति इति एव, अवतिष्ठति = तिष्ठति, न इङ्गते = न चरति, समदुःखसुखः = क्लेशानन्दयोः समानः, स्वस्थः = प्रसन्नः, समलोष्टाश्मकाञ्चनः = मृत्पाषाणसुवर्णेषु समानः, तुल्यप्रियाप्रियः = प्रियस्य अप्रियस्य च विषययोः समानः, धीरः = संयमी, तुल्यनिन्दात्मसंस्तुतिः = दूषणप्रशंसयोः समानः, मानापमानयोः = मानपराभवयोः, तुल्यः = समानः, मित्रारिपक्षयोः = सुहृत्-शत्रुपक्षयोः, तुल्यः = समानः, सर्वारम्भपरित्यागी = सर्वकर्मसंन्यासी, सः गुणातीतः = गुणेभ्यः पारङ्गतः, उच्यते = कथ्यते ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
पाण्डव	अ. पुं. सम्बो. एक.	प्रकाशम्	अ. पुं. द्वि. एक.
च	अव्ययम्	प्रवृत्तिम्	इ. स्त्री. द्वि. एक.
मोहम्	अ. पुं. द्वि. एक.	संप्रवृत्तानि	अ. नपुं. द्वि. बहु.
न	अव्ययम्	द्वेष्टि	द्विष् (द्विष - अप्रीतौ) पर. कर्तरि लट्. प्रपु. एक.
निवृत्तानि	अ. नपुं. द्वि. बहु.	काङ्क्षति	काङ्क्ष् (काक्षि - काङ्क्षायाम्) पर. कर्तरि लट्. प्रपु. एक.
यः	यद्- द. सर्व. पुं. प्र. एक. (विशेषणम्)	उदासीनवत्	अव्ययम्
आसीनः	अ. पुं. प्र. एक. (विशेषणम्)	गुणैः	अ. पुं. तृ. बहु.
विचाल्यते	वि + चल् (चल - कम्पने) णिच्. आत्म. कर्मणि लट्. प्रपु. एक.	गुणाः	अ. पुं. प्र. बहु.

1. अत्र 'अवतिष्ठति' इति परस्मैपदित्वेन आर्षप्रयोगः ।

वर्तन्ते	वृत् (वृतु - वर्तने) आत्म. कर्तरि लट्. प्रपु. बहु.	इति	अव्ययम्
एव	अव्ययम्	अवतिष्ठति (अवतिष्ठते)	अव + (स्था - ष्ठा गतिनिवृत्तौ)[1] आत्म. कर्तरि लट्. प्रपु. एक.
इङ्गते	इग् (इगि - गतौ) आत्म. कर्तरि लट्. प्रपु. एक.	समदुःखसुखः	अ. पुं. प्र. एक. (विशेषणम्)
स्वस्थः	अ. पुं. प्र. एक. (विशेषणम्)	समलोष्टा-श्मकाञ्चनः	अ. पुं. प्र. एक. (विशेषणम्)
तुल्यप्रियाप्रियः	अ. पुं. प्र. एक. (विशेषणम्)	धीरः	अ. पुं. प्र. एक. (विशेषणम्)
तुल्यनिन्दात्म-संस्तुतिः	इ. पुं. प्र. एक. (विशेषणम्)	मानापमानयोः	अ. पुं. ष. द्विव.
तुल्यः	अ. पुं. प्र. एक. (विशेषणम्)	मित्रारिपक्षयोः	अ. पुं. ष. द्विव.
सर्वारम्भ-परित्यागी	सर्वारम्भपरित्यागिन्- न. पुं. प्र. एक. (विशेषणम्)	सः	तद्- द. सर्व. पुं. प्र. एक. (विशेषणम्)
गुणातीतः	अ. पुं. प्र. एक. (विशेषणम्)	उच्यते	वच् (वच - परिभाषणे) आत्म. कर्मणि लट्. प्रपु. एक.

व्याकरणम् -

(क) सन्धिः	उदासीनवदासीनः	उदासीनवत् + आसीनः	जश्त्वसन्धिः ।
	गुणैर्यः	गुणैः + यः	विसर्गसन्धिः (रेफः) ।
	यो न	यः + न	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः ।
	गुणा वर्तन्ते	गुणाः + वर्तन्ते	विसर्गसन्धिः (लोपः) ।
	इत्येव	इति + एव	यण्सन्धिः ।
	योऽवतिष्ठति	यः + अवतिष्ठति	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः पूर्वरूपं च ।
	नेङ्गते	न + इङ्गते	गुणसन्धिः ।
	तुल्यप्रियाप्रियो धीरः	तुल्यप्रियाप्रियः + धीरः	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः ।

	धीरस्तुल्यनिन्दात्मसंस्तुतिः	धीरः + तुल्यनिन्दात्मसंस्तुतिः विसर्गसन्धिः (सकारः)।
	मानापमानयोस्तुल्यः	मानापमानयोः + तुल्यः विसर्गसन्धिः (सकारः)।
(ख) समासः	समदुःखसुखः	दुःखं च सुखं च दुःखसुखे - द्वन्द्वः।
		समे दुःखसुखे यस्य सः समदुःखसुखः - बहुव्रीहिः।
	समलोष्टाश्मकाञ्चनः	लोष्टश्च अश्मा च काञ्चनञ्च - लोष्टाश्मकाञ्चनानि - द्वन्द्वः।
		समानि लोष्टाश्मकाञ्चनानि यस्य सः समलोष्टाश्मकाञ्चनः - बहुव्रीहिः।
	तुल्यप्रियाप्रियः	प्रियश्च अप्रियश्च प्रियाप्रियौ - द्वन्द्वः
		तुल्यौ प्रियाप्रियौ यस्य सः तुल्यप्रियाप्रियः - बहुव्रीहिः।
	तुल्यनिन्दात्मसंस्तुतिः	आत्मनः संस्तुतिः - आत्मसंस्तुतिः - षष्ठीतत्पुरुषः।
		निन्दा च आत्मसंस्तुतिश्च निन्दात्मसंस्तुती - द्वन्द्वः।
		तुल्ये निन्दात्मसंस्तुती यस्य सः तुल्यनिन्दात्मसंस्तुतिः - बहुव्रीहिः।
	मानापमानयोः	मानश्च अपमानश्च मानापमानौ, तयोः - द्वन्द्वः।
	मित्रारिपक्षयोः	मित्रं च अरिश्च मित्रारी - द्वन्द्वः।
		मित्रार्योः पक्षौ मित्रारिपक्षौ, तयोः - षष्ठीतत्पुरुषः।
	सर्वारम्भपरित्यागी	सर्वे आरम्भाः सर्वारम्भाः - कर्मधारयः।
		सर्वारम्भाणां परित्यागी सर्वारम्भपरित्यागी - षष्ठीतत्पुरुषः।
	गुणातीतः	गुणान् अतीतः गुणातीतः - द्वितीयातत्पुरुषः।
(ग) कृदन्तः	प्रकाशम्	प्र + काश् (काशृ - दीप्तौ) + घञ् (भावे)।
	प्रवृत्तिम्	प्र + वृत् (वृतु - वर्तने) + क्तिन् (भावे), ताम्।
	मोहम्	मुह् (मुह - वैचित्त्ये) + घञ्, तम्।
	संप्रवृत्तानि	सम् + प्र + वृत् (वृतु - वर्तने) + क्तिन् (भावे)।
	निवृत्तानि	नि + वृत् (वृतु - वर्तने) + क्तिन् (भावे)।
	उदासीनः	उद् + आस् (आस - उपवेशने) + शानच्।
	आसीनः	आस् (आस - उपवेशने) + शानच्।
(घ) तद्धितान्तः	पाण्डव	पाण्डु + अण् (अपत्यार्थे), तत्सम्बुद्धौ, पाण्डोः अपत्यं पुमान्।
	उदासीनवत्	उदासीनेन तुल्यः उदासीनवत् - तुल्यार्थे वति प्रत्ययः।

भावस्पष्टीकरणम् -

न द्वेष्टि ।	
कं न द्वेष्टि ?	**प्रकाशं** न द्वेष्टि ।
प्रकाशं **पुनश्च कं** न द्वेष्टि ?	प्रकाशं च **प्रवृत्तिं च** न द्वेष्टि ।
प्रकाशं च प्रवृत्तिं च **पुनश्च कं** न द्वेष्टि ?	प्रकाशं च प्रवृत्तिं च **मोहम् एव च** न द्वेष्टि ।
प्रकाशं च प्रवृत्तिं च मोहम् एव च **कदा** न द्वेष्टि ?	प्रकाशं च प्रवृत्तिं च मोहम् एव च **(यदा प्रकाशादीनि) संप्रवृत्तानि (भवन्ति तदा)** न द्वेष्टि ।
न काङ्क्षति ।	
कदा न काङ्क्षति ?	**(यदा प्रकाशादीनि) निवृत्तानि (भवन्ति तदा)** न काङ्क्षति ।
न विचाल्यते ।	
कैः न विचाल्यते ?	**गुणैः** न विचाल्यते ।
कीदृशः गुणैः न विचाल्यते ?	**आसीनः** गुणैः न विचाल्यते ।
कथम्भूतः आसीनः गुणैः न विचाल्यते ?	**यः उदासीनवद्** आसीनः (सः) गुणैः न विचाल्यते ।
अवतिष्ठति ।	
कः अवतिष्ठति ?	**यः** अवतिष्ठति ।
यः **किम्** अस्तीति अवतिष्ठति ?	यः **वर्तन्ते इति** एव अवतिष्ठति ।
यः **के** वर्तन्ते इति एव अवतिष्ठति ?	यः **गुणाः** वर्तन्ते इति एव अवतिष्ठति ।
यः गुणाः वर्तन्ते इति एव अवतिष्ठति। **पुनश्च किं करोति ?**	यः गुणाः वर्तन्ते इति एव अवतिष्ठति । **न इङ्गते ।**
उच्यते ।	
कः उच्यते ?	**सः** उच्यते ।
सः **कीदृशः** उच्यते ?	सः **गुणातीतः** उच्यते ।
कीदृशः सः गुणातीतः उच्यते ?	**समदुःखसुखः** सः गुणातीतः उच्यते ।
समदुःखसुखः **पुनश्च कीदृशः** सः उच्यते ?	समदुःखसुखः **स्वस्थः** सः गुणातीतः उच्यते ।

समदुःखसुखः स्वस्थः **पुनश्च कीदृशः** सः गुणातीतः उच्यते ?	समदुःखसुखः स्वस्थः **समलोष्टाश्मकाञ्चनः** च सः गुणातीतः उच्यते ।
समदुःखसुखः स्वस्थः समलोष्टाश्मकाञ्चनः **पुनश्च कीदृशः** च सः गुणातीतः उच्यते ?	समदुःखसुखः स्वस्थः समलोष्टाश्मकाञ्चनः **तुल्यप्रियाप्रियः** च सः गुणातीतः उच्यते ।
समदुःखसुखः स्वस्थः समलोष्टाश्मकाञ्चनः तुल्यप्रियाप्रियः **पुनश्च कीदृशः** च सः गुणातीतः उच्यते ?	समदुःखसुखः स्वस्थः समलोष्टाश्मकाञ्चनः तुल्यप्रियाप्रियः **धीरः** च सः गुणातीतः उच्यते ।
समदुःखसुखः स्वस्थः समलोष्टाश्मकाञ्चनः तुल्यप्रियाप्रियः धीरः **पुनश्च कीदृशः** च सः गुणातीतः उच्यते ?	समदुःखसुखः स्वस्थः समलोष्टाश्मकाञ्चनः तुल्यप्रियाप्रियः धीरः **तुल्यनिन्दात्मसंस्तुतिः** च सः गुणातीतः उच्यते ।
समदुःखसुखः स्वस्थः समलोशमकाञ्चनः तुल्यप्रियाप्रियः धीरः तुल्यनिन्दात्मसंस्तुतिः **पुनश्च कीदृशः** च सः गुणातीतः उच्यते ?	समदुःखसुखः स्वस्थः समलोष्टाश्मकाञ्चनः तुल्यप्रियाप्रियः धीरः तुल्यनिन्दात्मसंस्तुतिः **मानापमानयोः तुल्यः च** सः गुणातीतः उच्यते ।
समदुःखसुखः स्वस्थः समलोष्टाश्मकाञ्चनः तुल्यप्रियाप्रियः धीरः तुल्यनिन्दात्मसंस्तुतिः मानापमानयोः तुल्यः **पुनश्च कः तुल्यः** च सः गुणातीतः उच्यते ?	समदुःखसुखः स्वस्थः समलोष्टाश्मकाञ्चनः तुल्यप्रियाप्रियः धीरः तुल्यनिन्दात्मसंस्तुतिः मानापमानयोः तुल्यः **मित्रारिपक्षयोः तुल्यः** च सः गुणातीतः उच्यते ।
समदुःखसुखः स्वस्थः समलोष्टाश्मकाञ्चनः तुल्यप्रियाप्रियः धीरः तुल्यनिन्दात्मसंस्तुतिः मानापमानयोः तुल्यः मित्रारिपक्षयोः तुल्यः **पुनश्च कीदृशः** च सः गुणातीतः उच्यते ?	समदुःखसुखः स्वस्थः समलोष्टाश्मकाञ्चनः तुल्यप्रियाप्रियः धीरः तुल्यनिन्दात्मसंस्तुतिः मानापमानयोः तुल्यः मित्रारिपक्षयोः तुल्यः **सर्वारम्भपरित्यागी** च सः गुणातीतः उच्यते ।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**पाण्डव !**

तात्पर्यम् - अर्जुन ! सत्त्वादीनां त्रयाणां यानि कार्याणि सुखप्रवृत्तिमोहादीनि तेषु प्राप्तेषु सत्सु यः प्रातिकूल्यबुद्ध्या न द्वेषं याति, निवृत्तेषु आनुकूल्यबुद्ध्या पुनः न आकाङ्क्षां करोति, यः उदासीनवत् तिष्ठन् गुणकार्यैः सुखदुःखमोहैः विचालयितुं न शक्यते, गुणाः स्वकार्येषु एव वर्तन्ते, न तैः मम कोऽपि सम्बन्धः इति यः न प्रतिकर्तुम् इच्छति, यः सुखदुःखयोः मृत्पिण्डपाषाणसुवर्णेषु हिताहितयोः श्लाघनप्रशंसयोः मानापमानयोः मित्रशत्रुपक्षयोश्च समानः वर्तते, यश्च निष्कामबुद्ध्या कर्म करोति सः गुणत्रयम् अतीतः इति जानीहि ।

मां च योऽव्यभिचारेण भक्तियोगेन सेवते ।
स गुणान्समतीत्यैतान्ब्रह्मभूयाय कल्पते ॥१४.२६॥

पदच्छेदः - माम्, च, यः, अव्यभिचारेण, भक्तियोगेन, सेवते ।
सः, गुणान्, समतीत्य, एतान्, ब्रह्मभूयाय, कल्पते ॥

अन्वयः - यः च अव्यभिचारेण भक्तियोगेन मां सेवते सः एतान् गुणान् समतीत्य ब्रह्मभूयाय कल्पते ।

पदार्थः - यः च = यः च जनः, अव्यभिचारेण = व्यभिचाररहितेन, भक्तियोगेन = भक्तिसाधनेन, मां सेवते = मां भजते, सः = सः जनः, एतान् गुणान् = एतान् गुणान्, समतीत्य = समतिक्रम्य, ब्रह्मभूयाय = मोक्षाय, कल्पते = अर्हति ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
यः	यद्- द. सर्व. पुं. प्र. एक.	च	अव्ययम्
अव्यभिचारेण	अ. पुं. तृ. एक. (विशेषणम्)	भक्तियोगेन	अ. पुं. तृ. एक. (विशेष्यम्)
माम्	अस्मद्- द. सर्व. द्वि. एक.	सेवते	सेव् (सेवृ सेवने) आत्म. कर्तरि लट्. प्रपु. एक.
सः	तद्- द. सर्व. पुं. प्र. एक. (विशेषणम्)	एतान्	एतद्- द. सर्व. पुं. द्वि. बहु. (विशेषणम्)
गुणान्	अ. पुं. द्वि. बहु. (विशेष्यम्)	समतीत्य	ल्यबन्तम् अव्ययम्

व्याकरणम् -

(क) सन्धिः योऽव्यभिचारेण — यः + अव्यभिचारेण — विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः पूर्वरूपं च ।
समतीत्यैतान् — समतीत्य + एतान् — वृद्धिसन्धिः ।

(ख) समासः अव्यभिचारेण — न विद्यते व्यभिचारः यस्य सः अव्यभिचारः, तेन - नञ्बहुव्रीहिः ।
भक्तियोगेन — भक्तेः योगः भक्तियोगः, तेन - षष्ठीतत्पुरुषः ।

(ग) कृदन्तः व्यभिचारेण — वि + अभि + चर् (चर - गतिभक्षणयोः) + घञ् (भावार्थे) ।
भक्तिः — भज् (भज - सेवायाम्) + क्तिन् ।
योगः — युज् (युजिर् - योगे) + घञ् ।

समतीत्य	सम् + अति + इ (इण् - गतौ) + ल्यप्।
ब्रह्मभूयाय	ब्रह्मन् + ङस् + भू + क्यप् (भावार्थे) ब्रह्मणो भावः ब्रह्मभूयम्। ब्रह्मत्वम् इत्यर्थः।

भावस्पष्टीकरणम् -

सेवते।	
कः सेवते ?	**यः** सेवते।
यः **कां** सेवते ?	यः **मां** सेवते।
यः **केन** मां सेवते ?	यः **भक्तियोगेन** मां सेवते।
यः **कीदृशेन** भक्तियोगेन मां सेवते ?	यः **अव्यभिचारेण** भक्तियोगेन मां सेवते।
यः अव्यभिचारेण भक्तियोगेन मां सेवते **तस्य किम् ?**	यः अव्यभिचारेण भक्तियोगेन मां सेवते **सः कल्पते।**
यः अव्यभिचारेण भक्तियोगेन मां सेवते सः **कस्मै** कल्पते ?	यः अव्यभिचारेण भक्तियोगेन मां सेवते सः **ब्रह्मभूयाय** कल्पते।
यः अव्यभिचारेण भक्तियोगेन मां सेवते सः **किं कृत्वा** ब्रह्मभूयाय कल्पते ?	यः अव्यभिचारेण भक्तियोगेन मां सेवते सः **समतीत्य** ब्रह्मभूयाय कल्पते।
यः अव्यभिचारेण भक्तियोगेन मां सेवते सः **कान्** समतीत्य ब्रह्मभूयाय कल्पते ?	यः अव्यभिचारेण भक्तियोगेन मां सेवते सः **एतान् गुणान्** समतीत्य ब्रह्मभूयाय कल्पते।

तात्पर्यम् - यः मानवः व्यभिचाररहितेन भक्तिसाधनेन मां भजते सः मानवः एतान् गुणान् समतिक्रम्य मोक्षे समर्थो भवति।

ब्रह्मणो हि प्रतिष्ठाहममृतस्याव्ययस्य च।
शाश्वतस्य च धर्मस्य सुखस्यैकान्तिकस्य च॥१४.२७॥

पदच्छेदः - ब्रह्मणः, हि, प्रतिष्ठा, अहम्, अमृतस्य, अव्ययस्य, च।
शाश्वतस्य, च, धर्मस्य, सुखस्य, ऐकान्तिकस्य, च॥

अन्वयः - अहं हि ब्रह्मणः अमृतस्य अव्ययस्य च शाश्वतस्य धर्मस्य च ऐकान्तिकस्य सुखस्य च प्रतिष्ठा (अस्मि)।

पदार्थः - अहं हि ब्रह्मणः = परमात्मनः, अमृतस्य = मृत्युरहितस्य, अव्ययस्य च = अक्षरस्य, शाश्वतस्य = नित्यस्य, धर्मस्य च = धर्मस्य च, ऐकान्तिकस्य = अव्यभिचारिणः, सुखस्य च = परमानन्दस्य च, प्रतिष्ठा = स्थानम् (अस्मि)।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
अहम्	अस्मद्- द. सर्व. प्र. एक.	हि	अव्ययम्
ब्रह्मणः	ब्रह्मन्- न. नपुं. ष. एक.	अमृतस्य	अ. पुं. ष. एक. (विशेष्यम्)
अव्ययस्य	अ. पुं. ष. एक. (विशेषणम्)	च	अव्ययम्
शाश्वतस्य	अ. पुं. ष. एक. (विशेषणम्)	धर्मस्य	अ. पुं. ष. एक. (विशेष्यम्)
ऐकान्तिकस्य	अ. नपुं. ष. एक. (विशेषणम्)	सुखस्य	अ. नपुं. ष. एक. (विशेष्यम्)
प्रतिष्ठा	आ. स्त्री. प्र. एक.		

व्याकरणम् -

(क) सन्धिः	ब्रह्मणो हि	ब्रह्मणः + हि	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः।
	प्रतिष्ठाहम्	प्रतिष्ठा + अहम्	सवर्णदीर्घसन्धिः।
	अमृतस्याव्ययस्य	अमृतस्य + अव्ययस्य	सवर्णदीर्घसन्धिः।
	सुखस्यैकान्तिकस्य	सुखस्य + ऐकान्तिकस्य	वृद्धिसन्धिः।
(ख) समासः	अमृतस्य	न मृतः अमृतः, तस्य - नञ्तत्पुरुषः।	
	अव्ययस्य	न व्ययः अव्ययः, तस्य - नञ्तत्पुरुषः।	
(ग) कृदन्तः	मृतः	मृ (मृङ् - प्राणत्यागे) + क्त (कर्मणि)।	
	व्ययः	वि + इ (इण् - गतौ) + अच्।	
(घ) तद्धितान्तः	शाश्वतस्य	शश्वत् + अण्, (भावार्थे) तस्य, शश्वतः भावः शाश्वतः।	
	ऐकान्तिकस्य	एकान्त + ठञ्, (भावे) तस्य।	

भावस्पष्टीकरणम् -

अहं प्रतिष्ठा अस्मि।	
अहं **कस्य** प्रतिष्ठा अस्मि ?	अहं **ब्रह्मणः** प्रतिष्ठा अस्मि।
अहं पुनश्च **कस्य** प्रतिष्ठा अस्मि ?	अहम् **अमृतस्य** प्रतिष्ठा अस्मि।

अहं **कीदृशस्य** अमृतस्य प्रतिष्ठा अस्मि ?	अहम् **अव्ययस्य** अमृतस्य प्रतिष्ठा अस्मि।
अहं **पुनश्च कस्य** प्रतिष्ठा अस्मि ?	अहम् **धर्मस्य** प्रतिष्ठा अस्मि।
अहं **कीदृशस्य** धर्मस्य प्रतिष्ठा अस्मि ?	अहं **शास्वतस्य** धर्मस्य प्रतिष्ठा अस्मि।
अहं **पुनश्च कस्य** प्रतिष्ठा अस्मि ?	अहम् **सुखस्य** प्रतिष्ठा अस्मि।
अहं **कीदृशस्य** सुखस्य प्रतिष्ठा अस्मि ?	अहम् **ऐकान्तिकतस्य** सुखस्य च प्रतिष्ठा अस्मि।

तात्पर्यम् - अहं ब्रह्मणः नाशरहितस्य मोक्षस्य, शाश्वतस्य च धर्मस्य, दुःखरहितस्य सुखस्य च प्रतिष्ठा अस्मि। तस्मात् हेतोः तादृशः पुरुषः ब्रह्मभूयाय कल्पते इति यन्मया पूर्वमुक्तं तत् युक्तमेव। नाहं कदापि असत्यं ब्रवीमि इति विज्ञेयम्।

ॐ तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे गुणत्रयविभागयोगो नाम चतुर्दशोऽध्यायः ॥१४॥

चतुर्दशाध्यायस्य सारः

आत्मा एकः अस्ति चेदपि प्रकृतेः गुणवैचित्र्यात् जगति वैचित्र्यं दृश्यते इति पूर्वतने अध्याये कथितम्। साङ्ख्यदर्शनस्य मतानुसारेण प्रकृतिपुरुषौ सृष्टेः मूलतत्त्वे स्तः। अस्माकं शरीरे सत्त्वगुणः, रजोगुणः तमोगुणश्चेति त्रयः गुणाः भवन्ति। तत्र प्रकृतेः कारणेन सृष्टिनिर्माणं भवति। ज्ञानं सत्त्वगुणस्य लक्षणम्। क्रियाशीलत्वं रजसः लक्षणम्। निद्रालस्यं च तमसः लक्षणम्। यद्यपि एते त्रयः अपि गुणाः प्रकृतौ समानतया विना क्षोभं तिष्ठन्ति, तथापि एतेषु एकस्य गुणस्य आधिक्येन अस्माकं शरीरं तत्तत्स्वभावजं मन्यते। कस्मिंश्चिदपि मनुष्ये यदा सत्त्वगुणस्य प्राबल्यं जायते तदा सः प्रसन्नः भवति। प्रसन्नचित्तस्य तस्य शीघ्रमेव परमतत्त्वस्य ज्ञानं भवति। तेन च सः संसारात् मुक्तिं प्राप्नोति। यः प्रकृतेः एतान् गुणविकारान् ज्ञात्वा - 'अहं कर्ता नास्मि' इति मन्यते सः मुक्तिं प्राप्नोति इति अस्मिन् अध्याये प्रतिपादितमस्ति। अतः अस्य अध्यायस्य नाम 'गुणत्रयविभागयोगः' इति।

यत् ज्ञात्वा सर्वे मुनयः अस्मात् संसारात् मोक्षं प्राप्तवन्तः तत् विशिष्टं ज्ञानं कथयति भगवान्। आदौ सः प्रकृतिपुरुषयोः कार्यं कथयति। एतस्य ब्रह्मज्ञानस्य कारणेन ये भक्ताः भगवत्स्वरूपं प्राप्तवन्तः ते सृष्टिकाले अपि न उत्पद्यन्ते। प्रलयसमये च बाधां न प्राप्नुवन्ति। प्रकृतिः वृद्धेः हेतुः भवति इति कारणेन 'ब्रह्म' इत्युच्यते। सा पुरुषस्य गर्भाधानस्थानम् अस्ति। तत्र 'अहं बहु स्याम्' इत्येवंरूपं सङ्कल्पं सः निक्षिपति। तेन सर्वेषामपि भूतानाम् उत्पत्तिः भवति। नानायोनिषु यानि शरीराणि सम्भवन्ति तेषां माता प्रकृतिः, पिता भगवान् इति मन्तव्यम्।

तदनन्तरं भगवान् गुणानां स्वरूपं कार्याणि च निरूपयति। सत्त्वं, रजः, तमः इति प्रकृतेः स्वरूपभूताः गुणाः सन्ति। ते च प्रकृतितः जाताः इव भासमानाः शरीरे आत्मानं बध्नन्ति। तेषु सत्त्वं स्वच्छत्वात्, भासकं निरुपद्रवं सुखं ज्ञानं च जनयति। अप्राप्ते वस्तुनि अभिलाषः तृष्णा, प्राप्ते वस्तुनि अभिलाषः सङ्गः इति उच्यते। आभ्यां या आसक्तिः सम्भवति तया रजोगुणः युक्तः भवति। सः आत्मानं कर्मसु प्रवर्तयति। प्रवृत्तश्च सः तत्र बद्धो भवति। तमः तु अज्ञानजं भवति। तत् च सर्वेषां प्राणिनां भ्रान्तिं जनयति। तेन कारणेन सर्वेषाम् अनवधानं, जाड्यं निद्रा च सम्भवति। तमः पुरुषं संसारे बध्नाति। एतेषु त्रिषु गुणेषु सत्त्वम् आत्मनः सुखं जनयति। रजः दुःखं जनयति। तमः तु ज्ञानम् आच्छाद्य अनवधान-आलस्य-निद्रादिकं जनयति।

अत्र गुणानां पृथक् लक्षणानि उक्तानि। परम् एते त्रयः कदापि पृथक् न तिष्ठन्ति। कदाचित् सत्त्वगुणः अन्यत् गुणद्वयम् अधःकृत्य स्वकार्यं सुखं जनयति। क्वचित् रजः अन्यत् गुणद्वयम् अधःकृत्य स्वकार्यं दुःखं जनयति। क्वचित् च तमः अन्यत् गुणद्वयम् अधःकृत्य स्वकार्यम् अविवेकं जनयति। अतः एव इदं प्राणिषु तारतम्यम्।

अस्माकं शरीरे एतेषां त्रयाणां गुणानां प्राबल्यं कथं परिशीलनीयम् इति कथितम् अत्र विस्तरेण। पुरुषस्य यदा लोलुपत्वम्, काम्येषु निषिद्धेषु च कर्मसु प्रवृत्तिः, अविश्रान्तिः, दृष्टमात्रेषु अपि वस्तुषु परमा आसक्तिः च भवति तदा तस्मिन् रजोगुणः वृद्धिं गतः इति ज्ञातव्यम्। पुरुषस्य यदा विवेकभ्रंशः शास्त्रविहितकर्मसु अप्रवृत्तिः, कार्ये अनवधानम्, भ्रान्तिः निद्रा इत्यादयः भवन्ति तदा तमोगुणः वृद्धिं गतः इति ज्ञातव्यम्।

सत्त्वगुणे प्रवृद्धे म्रियमाणः पुरुषः निर्मलान् तत्त्वज्ञानिनां लोकान् प्राप्नोति। रजोगुणे प्रवृद्धे म्रियमाणः कर्मासक्तेषु मनुष्येषु जायते। तमोगुणे प्रवृद्धे म्रियमाणः तु विवेकरहितेषु पशुप्रभृतिषु जन्म प्राप्नोति। साधु विहितस्य कर्मणः सत्त्वप्रधानं शुद्धं फलं कथयति। रजोगुणात् तृष्णा सम्भवति। तमोगुणात् अज्ञानप्रयुक्तौ मोहप्रमादौ सम्भवतः।

सत्त्वगुणात् विवेकः सम्भवति। सात्त्विकाः ऊर्ध्वलोकं प्राप्नुवन्ति। राजसाः मध्ये मनुष्यलोके तिष्ठन्ति। तमोगुणप्रधानाः तु नीचलोकं यान्ति।

प्रकृतिपुरुषयोः परमपि किमपि तत्त्वं विद्यते। तत् ब्रह्मतत्त्वं यः जानाति सः मुक्तः भवति इति अग्रे उपदिश्यते। यावन्ति कर्माणि भवन्ति तानि सर्वाणि गुणाः एव कुर्वन्ति, न तु आत्मा। पुरुषः गुणेभ्यो व्यतिरिक्तः केवलं कर्मणां साक्षीभूतः इति यदा कोऽपि जानाति तदा मोक्षं प्राप्नोति। सत्त्वादयः त्रयः गुणाः बुद्धौ वर्तमानाः देहस्य प्राप्तौ कारणीभूताः भवन्ति। तादृशान् एतान् गुणान् यः अतिवर्तते सः जन्ममृत्युजरायुक्तात् संसारात् मुक्तिं प्राप्नोति।

"पुरुषः कश्चित् एतान् त्रीन् गुणान् अतीतः इति कथं ज्ञायते ? तस्य चिह्नानि कानि ? तस्य आचारः कीदृशः ?" - इति अर्जुनः पृच्छति। तदा कृष्णः उत्तरति - "सत्त्वादीनां त्रयाणां यानि कार्याणि सुखप्रवृत्तिमोहादीनि, तेषु प्राप्तेषु सत्सु यः प्रातिकूल्यबुद्ध्या न द्वेषं याति, निवृत्तेषु आनुकूल्यबुद्ध्या पुनः न आकाङ्क्षां करोति, यः उदासीवत् तिष्ठन् गुणकार्यैः सुखदुःखमोहैः विचालयितुं न शक्यते, गुणाः स्वकार्येषु एव वर्तन्ते, न तैः मम कोऽपि सम्बन्धः इति न प्रतिकर्तुम् इच्छति, यः सुखदुःखयोः मृत्पिण्डपाषाणसुवर्णेषु हिताहितयोः निन्दाप्रशंसयोः मानापमानयोः मित्रशत्रुपक्षयोश्च समानः वर्तते, यश्च निष्कामबुद्ध्या कर्म करोति सः गुणत्रयम् अतीतः इति जानीहि। यः मानवः व्यभिचाररहितेन भक्तिसाधनेन मां भजते सः एतान् गुणान् समतिक्रम्य मोक्षे समर्थो भवति" इति। यः मोक्षः अत्र विवृतः सः भगवान् एव इति प्रतिपादयितुं कथयति यत् - "अहं ब्रह्मणः नाशरहितस्य मोक्षस्य, शाश्वतस्य च धर्मस्य, दुःखरहितस्य सुखस्य च प्रतिष्ठा अस्मि" इति।

****

अथ पञ्चदशोऽध्यायः

पुरुषोत्तमयोगः

श्रीभगवानुवाच - **ऊर्ध्वमूलमधः शाखमश्वत्थं प्राहुरव्ययम्।**
छन्दांसि यस्य पर्णानि यस्तं वेद स वेदवित्॥१५.१॥

पदच्छेदः -

श्रीभगवान्, उवाच, ऊर्ध्वमूलम्, अधःशाखम्, अश्वत्थम्, प्राहुः, अव्ययम्।
छन्दांसि, यस्य, पर्णानि, यः, तम्, वेद, सः, वेदवित्॥

अन्वयः - ऊर्ध्वमूलम् अधःशाखम् अश्वत्थम् अव्ययं प्राहुः, यस्य छन्दांसि पर्णानि तं यः वेद सः वेदवित् (भवति)।

पदार्थः - ऊर्ध्वमूलम् = यस्य मूलम् (ऊर्ध्वम्) उपरि वर्तते, अधःशाखम् = यस्य शाखाः अधः सन्ति, अश्वत्थम्=अश्वत्थवृक्षम्, अव्ययम्=अविनाशिनम्, प्राहुः=वदन्ति, यस्य=अश्वत्थस्य, छन्दांसि=वेदाः, पर्णानि = पत्राणि, तम् = अव्ययम्, यः = पुरुषः, वेद = जानाति, सः = पुरुषः, वेदवित् = वेदानां ज्ञाता।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
ऊर्ध्वमूलम्	अ. पुं. द्वि. एक. (विशेषणम्)	अधःशाखम्	अ. पुं. द्वि. एक. (विशेषणम्)
अश्वत्थम्	अ. पुं. द्वि. एक. (विशेष्यम्)	अव्ययम्	अ. पुं. द्वि. एक. (विशेषणम्)
प्राहुः	प्र + ब्रू (ब्रूञ् व्यक्तायां वाचि) कर्तरि लट् प्रपु. बहु. (वैकल्पिकं रूपम्)	यस्य	यद् - द. सर्व. पुं. ष. एक. (विशेषणम्)
छन्दांसि	छन्दस् - सका. नपुं. प्र. बहु.	पर्णानि	अ. नपुं. प्र. बहु.
तम्	तद् - द. सर्व. पुं. द्वि. एक. (विशेषणम्)	यः	यद् - द. सर्व. पुं. प्र. एक. (विशेषणम्)
वेद	विद् (विद ज्ञाने) कर्तरि लट् प्रपु. एक. (वैकल्पिकं रूपम्)	सः	तद् - द. सर्व. पुं. प्र. एक. (विशेषणम्)
वेदवित्	वेदविद् - द. पुं. प्र. एक. (विशेषणम्)		

व्याकरणम् -

(क) सन्धिः प्राहुरव्ययम् प्राहु + अव्ययम् विसर्गसन्धिः (रेफः)।
यस्तम् यः + तम् विसर्गसन्धिः (सकारः)।

(ख) समासः ऊर्ध्वमूलम् ऊर्ध्वं (दिशि) मूलं यस्य सः ऊर्ध्वमूलः, तम् - बहुव्रीहिः।
अधःशाखम् अधोः (दिशि) शाखाः यस्य सः अधःशाखः, तम् - बहुव्रीहिः।

	अव्ययम्	अविद्यमानः व्ययः यस्य सः अव्ययः, तम् - नञ्बहुव्रीहिः।
	वेदवित्	वेदं वेत्ति इति वेदवित् - कर्तरि क्विप् उपपदतत्पुरुषः।
(ग) कृदन्तः	छन्दांसि	छन्द् (छदि संवरणे) + असुन्, तानि।
	पर्णानि	पर्ण् (पर्ण हरितभावे) + अच्, तानि।

भावस्पष्टीकरणम् -

प्राहुः।	
कं प्राहुः ?	**अश्वत्थं** प्राहुः।
कीदृशम् अश्वत्थं प्राहुः ?	**अव्ययम्** अश्वत्थं प्राहुः।
कीदृशम् अव्ययम् अश्वत्थं प्राहुः ?	**ऊर्ध्वमूलम्** अव्ययम् अश्वत्थं प्राहुः।
ऊर्ध्वमूलं **पुनश्च कीदृशम्** अव्ययम् अश्वत्थं प्राहुः ?	ऊर्ध्वमूलम् **अधःशाखम्** अव्ययम् अश्वत्थं प्राहुः।
ऊर्ध्व मूलम् अधःशाखम् अव्ययम् अश्वत्थं प्राहुः, यस्य **कानि** ?	ऊर्ध्वमूलम् अधःशाखम् अव्ययम् अश्वत्थं प्राहुः, **यस्य पर्णानि**।
ऊर्ध्व मूलम् अधःशाखम् अव्ययम् अश्वत्थं प्राहुः, यस्य **कानि** पर्णानि ?	ऊर्ध्वमूलम् अधःशाखम् अव्ययम् अश्वत्थं प्राहुः, यस्य **छन्दांसि** पर्णानि।
ऊर्ध्व मूलम् अधःशाखम् अव्ययम् अश्वत्थं प्राहुः, यस्य छन्दांसि पर्णानि, तं **किं करोतु** ?	ऊर्ध्वमूलम् अधःशाखम् अव्ययम् अश्वत्थं प्राहुः, यस्य छन्दांसि पर्णानि **तं वेद**।
ऊर्ध्व मूलम् अधःशाखम् अव्ययम् अश्वत्थं प्राहुः, यस्य छन्दांसि पर्णानि तं **कः** वेद ?	ऊर्ध्वमूलम् अधःशाखम् अव्ययम् अश्वत्थं प्राहुः, यस्य छन्दांसि पर्णानि तं **यः** वेद।
ऊर्ध्व मूलम् अधःशाखम् अव्ययम् अश्वत्थं प्राहुः, यस्य छन्दांसि पर्णानि तं यः वेद, **सः कः** ?	ऊर्ध्वमूलम् अधःशाखम् अव्ययम् अश्वत्थं प्राहुः, यस्य छन्दांसि पर्णानि तं यः वेद, **सः वेदवित्**।

तात्पर्यम् - अयं संसारः कश्चित् अश्वत्थवृक्षः अस्ति। अस्य मूलं तु भगवान् पुरुषोत्तमः एव। सः उपरि वर्तते। सृष्टिकर्ता ब्रह्मा इत्यादयः तस्य कार्योपाधिरूपाः शाखाः। ते तु ततः अधः भवन्ति। (अतः अस्य अश्वत्थवृक्षस्य मूलम् उपरि, शाखाः अधः इति उक्तम्।) वेदाः एव तस्य वृक्षस्य पर्णानि। तं संसाररूपं वृक्षं यः जानाति, सः समस्तवेदानां ज्ञाता अस्ति।

अधश्चोर्ध्वं प्रसृतास्तस्य शाखा गुणप्रवृद्धा विषयप्रवालाः।
अधश्च मूलान्यनुसन्ततानि कर्मानुबन्धीनि मनुष्यलोके॥१५.२॥

पदच्छेदः - अधः, च, ऊर्ध्वम्, प्रसृताः, तस्य, शाखाः, गुणप्रवृद्धाः, विषयप्रवालाः।
अधः, च, मूलानि, अनुसन्ततानि, कर्मानुबन्धीनि, मनुष्यलोके॥

अन्वयः - तस्य गुणप्रवृद्धाः विषयप्रवालाः शाखाः अधः ऊर्ध्वं च प्रसृताः कर्मानुबन्धीनि मूलानि मनुष्यलोके अधः च अनुसन्ततानि।

पदार्थः - तस्य = संसाररूपवृक्षस्य, गुणप्रवृद्धाः = गुणैः वृद्धिं गताः, विषयप्रवालाः = शब्दादिविषयरूपाङ्कुरयुताः, शाखाः = विटपाः, अधः = अधो लोके, ऊर्ध्वम् = ऊर्ध्वलोके, च = अपि च, प्रसृताः = व्याप्ताः, कर्मानुबन्धीनि = कर्मसम्बद्धानि, मूलानि = वृक्षमूलानि, मनुष्यलोके = पृथिव्याम्, अधः = अधो लोके, च = अपि च, अनुसन्ततानि = प्रसृतानि।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
तस्य	तद् - द. सर्व. पुं. ष. एक. (विशेषणम्)	गुणप्रवृद्धाः	आ. स्त्री. प्र. बहु. (विशेषणम्)
विषयप्रवालाः	आ. स्त्री. प्र. बहु. (विशेषणम्)	शाखाः	आ. स्त्री. प्र. बहु. (विशेष्यम्)
अधः	अव्ययम्	ऊर्ध्वम्	अव्ययम्
च	अव्ययम्	प्रसृताः	आ. स्त्री. प्र. बहु.
कर्मानुबन्धीनि	कर्मानुबन्धिन् - न. नपुं. प्र. बहु. (विशेषणम्)	मूलानि	अ. नपुं. प्र. बहु. (विशेष्यम्)
मनुष्यलोके	अ. पुं. स. एक.	अनुसन्ततानि	अ. नपुं. प्र. बहु. (विशेषणम्)

व्याकरणम् -

(क) सन्धिः

अधश्च	अधः + च	विसर्गसन्धिः (सकारः) श्चुत्वम्।
चोर्ध्वम्	च + ऊर्ध्वम्	गुणसन्धिः।
प्रसृतास्तस्य	प्रसृताः + तस्य	विसर्गसन्धिः (सकारः)।
शाखा गुणप्रवृद्धाः	शाखाः + गुणप्रवृद्धाः	विसर्गसन्धिः (लोपः)।
गुणप्रवृद्धा विषयप्रवालाः	गुणप्रवृद्धाः + विषयप्रवालाः	विसर्गसन्धिः (लोपः)।
मूलान्यनुसन्ततानि	मूलानि + अनुसन्ततानि	यण्सन्धिः।

(ख) समासः गुणप्रवृद्धाः — गुणैः प्रवृद्धा गुणप्रवृद्धाः - तृतीयातत्पुरुषः।

	विषयप्रवालाः	विषयाः एव प्रवालाः यासां ताः विषयप्रवालाः - बहुव्रीहिः।
	कर्मानुबन्धीनि	कर्माणि अनुबध्यन्ते तच्छीलानि कर्मानुबन्धीनि - ताच्छीलिके कर्तरि णिनिप्रत्ययः उपपदसमासश्च।
	मनुष्यलोके	मनुष्याणां लोकः मनुष्यलोकः, तस्मिन् - षष्ठीतत्पुरुषः।
(ग) कृदन्तः	प्रसृताः	प्र + सृ (सृ गतौ) + क्त (कर्तरि)।
	प्रवृद्धाः	प्र + वृध् (वृधु वृद्धौ) + क्त (कर्तरि)।
	प्रवालाः	प्र + वल् (वल संवरणे संचरणे च) + णिच् + अच्।
	अनुसन्ततानि	अनु + सम् + तन् (तनु विस्तारे) + क्त (कर्तरि)।
	अनुबन्धीनि	अनु + बन्ध् (बन्ध बन्धने) + णिनि।
	लोके	लोक् (लोकृ दर्शने) + घञ् (भावे), तस्मिन्।

भावस्पष्टीकरणम् -

प्रसृताः।	
काः प्रसृताः ?	**शाखाः** प्रसृताः।
कीदृश्यः शाखाः प्रसृताः ?	**विषयप्रवालाः** शाखाः प्रसृताः।
विषयप्रवालाः **पुनश्च कीदृश्यः** शाखाः प्रसृताः ?	विषयप्रवालाः **गुणप्रवृद्धाः** शाखाः प्रसृताः।
विषयप्रवालाः गुणप्रवृद्धाः **कस्य** शाखाः प्रसृताः ?	विषयप्रवालाः गुणप्रवृद्धाः **तस्य** शाखाः प्रसृताः।
विषयप्रवालाः गुणप्रवृद्धाः तस्य शाखाः **कुत्र** प्रसृताः ?	विषयप्रवालाः गुणप्रवृद्धाः तस्य शाखाः **अधः** प्रसृताः।
विषयप्रवालाः गुणप्रवृद्धाः तस्य शाखाः अधः **पुनश्च कुत्र** प्रसृताः ?	विषयप्रवालाः गुणप्रवृद्धाः तस्य शाखाः अधः **ऊर्ध्वं** च प्रसृताः।
अनुसन्ततानि।	
कानि अनुसन्ततानि ?	**मूलानि** अनुसन्ततानि।
कीदृशानि मूलानि अनुसन्ततानि ?	**कर्मानुबन्धीनि** मूलानि अनुसन्ततानि।
कर्मानुबन्धीनि मूलानि **कुत्र** अनुसन्ततानि ?	कर्मानुबन्धीनि मूलानि **मनुष्यलोके** अनुसन्ततानि।
कर्मानुबन्धीनि मूलानि मनुष्यलोके **पुनश्च कुत्र** अनुसन्ततानि ?	कर्मानुबन्धीनि मूलानि मनुष्यलोके **अधः च** अनुसन्ततानि।

तात्पर्यम् - तस्य अश्वत्थवृक्षस्य हिरण्यगर्भादयः शाखाः याः ऊर्ध्वम् अधश्च प्रसृताः सन्ति। अधश्च कर्मानुसारिणः जीवाः। अवान्तरमूलानि यानि वृक्षस्य अधः ऊर्ध्वं च विमुखं प्ररूढानि सन्ति।

न रूपमस्येह तथोपलभ्यते नान्तो न चादिर्न च सम्प्रतिष्ठा।
अश्वत्थमेनं सुविरूढमूलमसङ्गशस्त्रेण दृढेन छित्त्वा ॥१५.३॥
ततः पदं तत्परिमार्गितव्यं यस्मिन्गता न निवर्तन्ति भूयः।
तमेव चाद्यं पुरुषं प्रपद्ये यतः प्रवृत्तिः प्रसृता पुराणी ॥१५.४॥

पदच्छेदः - न, रूपम्, अस्य, इह, तथा, उपलभ्यते, न, अन्तः, न, च, आदिः, न, च, सम्प्रतिष्ठा।
अश्वत्थम्, एनम्, सुविरूढमूलम्, असङ्गशस्त्रेण, दृढेन, छित्त्वा ॥
ततः, पदम्, तत्, परिमार्गितव्यम्, यस्मिन्, गताः, न, निवर्तन्ति, भूयः।
तम्, एव, च, आद्यम्, पुरुषम्, प्रपद्ये, यतः, प्रवृत्तिः, प्रसृता, पुराणी ॥

अन्वयः - अस्य रूपम् तथा इह न उपलभ्यते न अन्तः, न च आदिः, न च सम्प्रतिष्ठा। एनं सुविरूढमूलम् अश्वत्थं दृढेन असङ्गशस्त्रेण छित्त्वा ततः यस्मिन् गताः भूयः न निवर्तन्ति तत् पदं परिमार्गितव्यम्, यतः पुराणी प्रवृत्तिः प्रसृता तमेव आद्यं पुरुषं च प्रपद्ये।

पदार्थः - अस्य = एतस्य, रूपम् = आकारः, तथा = तेन प्रकारेण, इह = अत्र, न उपलभ्यते = न प्राप्यते, अन्तः = आभ्यन्तरे, आदिः = प्रारम्भः, सम्प्रतिष्ठा = स्थितिः, एनम् = इमम्, सुविरूढमूलम् = दृढमूलम्, अश्वत्थम् = अश्वत्थवृक्षम्, दृढेन = सबलेन, असङ्गशस्त्रेण = वैराग्यायुधेन, छित्त्वा = कर्तयित्वा, ततः = तदनन्तरम्, तत् पदम् = परमं पदम्, परिमार्गितव्यम् = अन्वेषणीयम्, यस्मिन् गताः = यत् परमपदं प्राप्ताः, भूयः = पुनः, न निवर्तन्ति = न प्रत्यागच्छन्ति, यतः = यस्मात् पुरुषात्, पुराणी = सनातनी, प्रवृत्तिः = सृष्टिः, प्रसृता = विस्तारं गता, तमेव आद्यं पुरुषम् = तमेव परमात्मानम्, प्रपद्ये = शरणं गच्छामि।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
अस्य	इदम्- म. सर्व. पुं. ष. एक. (विशेषणम्)	रूपम्	अ. नपुं. प्र. एक.
तथा	अव्ययम्	इह	अव्ययम्
न	अव्ययम्	उपलभ्यते	उप + लभ् (डुलभष् प्राप्तौ) आत्म. कर्मणि लट्. प्रपु. एक.
अन्तः	अ. पुं. प्र. एक.	आदिः	इ. पुं. प्र. एक.

सम्प्रतिष्ठा	आ. स्त्री. प्र. एक.	एनम्	एतद् - द. सर्व. पुं. द्वि. एक. (विशेषणम्)
सुविरूढमूलम्	अ. पुं. द्वि. एक. (विशेषणम्)	अश्वत्थम्	अ. पुं. द्वि. एक. (विशेष्यम्)
दृढेन	अ. नपुं. तृ. एक. (विशेषणम्)	असङ्गशस्त्रेण	अ. पुं. तृ. एक. (विशेष्यम्)
छित्त्वा	क्त्वान्तम् अव्ययम्	ततः	अव्ययम्
तत्	तद् - द. सर्व. नपुं. प्र. एक. (विशेषणम्)	पदम्	अ. नपुं. प्र. एक.
परिमार्गितव्यम्	अ. नपुं. प्र. एक.	यस्मिन्	यद् - द. सर्व. नपुं. स. एक. (विशेषणम्)
गताः	अ. पुं. प्र. बहु. (विशेषणम्)	भूयः	अव्ययम्
निवर्तन्ति (निवर्तन्ते)	नि + वृत् (वृतु वर्तने)[1] आत्म. कर्तरि लट्. प्रपु. बहु.	यतः	अव्ययम्
पुराणी	ई. स्त्री. प्र. एक.	प्रवृत्तिः	इ. स्त्री. प्र. एक. (विशेष्यम्)
प्रसृता	आ. स्त्री. प्र. एक. (विशेषणम्)	तम्	तद् - द. सर्व. पुं. द्वि. एक. (विशेषणम्)
एव	अव्ययम्	आद्यम्	अ. पुं. द्वि. एक. (विशेषणम्)
पुरुषम्	अ. पुं. द्वि. एक. (विशेष्यम्)	प्रपद्ये	प्र + पद् (पद गतौ) आत्म. कर्तरि लट्. उपु. एक.
च	अव्ययम्		

व्याकरणम् -

(क) सन्धिः	अस्येह	अस्य + इह - गुणसन्धिः ।
	तथोपलभ्यते	तथा + उपलभ्यते - गुणसन्धिः ।
	नान्तः	न + अन्तः - सवर्णदीर्घसन्धिः ।
	अन्तो न	अन्तः + न - विसर्गसन्धिः (सकारः) रेफः उकारः गुणः ।
	चादिः	च + आदिः - सवर्णदीर्घसन्धिः ।
	आदिर्न	आदिः + न - विसर्गसन्धिः (रेफः) ।
	चाद्यम्	च + आद्यम् - सवर्णदीर्घसन्धिः ।
(ख) समासः	सुविरूढमूलम्	सुविरूढं मूलं यस्य सः सुविरूढमूलः, तम् - बहुव्रीहिः ।
	असङ्गशस्त्रेण	न सङ्गः असङ्गः - नञ्तत्पुरुषः ।

1. अत्र 'निवर्तन्ति' इति परस्मैपदित्वेन आर्षप्रयोगः ।

		असङ्गः एव शस्त्रम् असङ्गशस्त्रम्, तेन - कर्मधारयः ।
(ग) कृदन्तः	**सम्प्रतिष्ठा**	**सम् + प्र + स्था (ष्ठा गतिनिवृत्तौ) + अङ् + टाप् ।**
	सुविरूढम्	**सु + वि + रुह् (रुह बीजजन्मनि प्रादुर्भावे च) + क्त (कर्तरि) ।**
	छित्वा	**छिद् (छिदिर् द्वैधीकरणे) + क्त्वा ।**
	परिमार्गितव्यम्	**परि + मार्ग् (मृग अन्वेषणे) + तव्यत् (कर्मणि) ।**
	गताः	**गम् (गम्लृ गतौ) + क्त (कर्मणि) ।**
	प्रवृत्तिः	**प्र + वृत् (वृतु वर्तने) + क्तिन् ।**
	प्रसृता	**प्र + सृ (सृ गतौ) + क्त (कर्तरि) ।**
(घ) तद्धितान्तः	**आद्यम्**	**आदि + यत् ।**
	पुराणी	**पुराण + ङीप् (स्त्रियाम्) ।**

भावस्पष्टीकरणम् -

न उपलभ्यते ।	
किं न उपलभ्यते ?	**रूपं** न उपलभ्यते ।
कस्य रूपं न उपलभ्यते ?	**अस्य** रूपं न उपलभ्यते ।
अस्य रूपं **कीदृशं** न उपलभ्यते ?	अस्य रूपं **तथा** न उपलभ्यते ।
अस्य रूपं तथा **कुत्र** न उपलभ्यते ?	अस्य रूपं **तथा** इह न उपलभ्यते ।
अस्य रूपं तथा इह न उपलभ्यते **तथा कः न** ?	अस्य रूपं तथा इह नउपलभ्यते **तथा अन्तः न** ।
अस्य रूपं तथा इह न उपलभ्यते तथा अन्तः न **पुनश्च कः** न ?	अस्य रूपं तथा इह न उपलभ्यते तथा अन्तः न **आदिः** न ।
अस्य रूपं तथा इह न उपलभ्यते तथा अन्तः न आदिः न **पुनश्च का** न ?	अस्य रूपं तथा इह न उपलभ्यते तथा अन्तः न आदिः न **सम्प्रतिष्ठा** च न ।
तत् परिमार्गितव्यम् ।	
तत् **किं** परिमार्गितव्यम् ?	तत् **पदं** परिमार्गितव्यम् ।
किं कृत्वा तत् पदं परिमार्गितव्यम् ?	**छित्त्वा** तत् पदं परिमार्गितव्यम् ।
किं छित्त्वा तत् पदं परिमार्गितव्यम् ?	**एनं** छित्त्वा तत् पदं परिमार्गितव्यम् ।
एनं **कं** छित्त्वा तत् पदं परिमार्गितव्यम् ?	एनम् **अश्वत्थं** छित्त्वा तत् पदं परिमार्गितव्यम् ।

कीदृशम् एनम् अश्वत्थं छित्त्वा तत् पदं परिमार्गितव्यम् ?	**सुविरूढमूलम्** एनम् अश्वत्थं छित्त्वा तत् पदं परिमार्गितव्यम् ।
सुविरूढमूलम् एनम् अश्वत्थं **केन** छित्त्वा तत् पदं परिमार्गितव्यम् ?	सुविरूढमूलम् एनम् अश्वत्थम् **असङ्गशस्त्रेण** छित्त्वा तत् पदं परिमार्गितव्यम् ।
सुविरूढमूलम् एनम् अश्वत्थं **कीदृशेन** असङ्गशस्त्रेण छित्त्वा तत् पदं परिमार्गितव्यम् ?	सुविरूढमूलम् एनम् अश्वत्थं **दृढेन** असङ्गशस्त्रेण छित्त्वा तत् पदं परिमार्गितव्यम् ।
सुविरूढमूलम् एनम् अश्वत्थं दृढेन असङ्गशस्त्रेण छित्त्वा तत् पदं परिमार्गितव्यम्, **ततः किं न कुर्वन्ति** ?	सुविरूढमूलम् एनम् अश्वत्थं दृढेन असङ्गशस्त्रेण छित्त्वा तत् पदं परिमार्गितव्यम्, **ततः न निवर्तन्ति** ।
सुविरूढमूलम् एनम् अश्वत्थं दृढेन असङ्गशस्त्रेण छित्त्वा तत् पदं परिमार्गितव्यम्, ततः **के** न निवर्तन्ति ?	सुविरूढमूलम् एनम् अश्वत्थं दृढेन असङ्गशस्त्रेण छित्त्वा तत् पदं परिमार्गितव्यम्, ततः **गताः** न निवर्तन्ति ।
सुविरूढमूलम् एनम् अश्वत्थं दृढेन असङ्गशस्त्रेण छित्त्वा तत् पदं परिमार्गितव्यम्, ततः **कुत्र** गताः न निवर्तन्ति ?	सुविरूढमूलम् एनम् अश्वत्थं दृढेन असङ्गशस्त्रेण छित्त्वा तत् पदं परिमार्गितव्यम्, ततः **यस्मिन्** गताः न निवर्तन्ति ।
सुविरूढमूलम् एनम् अश्वत्थं दृढेन असङ्गशस्त्रेण छित्त्वा तत् पदं परिमार्गितव्यम्, ततः यस्मिन् गताः **कदा** न निवर्तन्ति ?	सुविरूढमूलम् एनम् अश्वत्थं दृढेन असङ्गशस्त्रेण छित्त्वा तत् पदं परिमार्गितव्यम्, ततः यस्मिन् गताः **भूयः** न निवर्तन्ति ।
तमेव प्रपद्ये ।	
तमेव **कं** प्रपद्ये ?	तमेव **पुरुषं** प्रपद्ये ।
तमेव **कीदृशं** पुरुषं प्रपद्ये ?	तमेव **आद्यं** पुरुषं प्रपद्ये ।
तमेव आद्यं पुरुषं प्रपद्ये **यतः किम्** ?	तमेव आद्यं पुरुषं प्रपद्ये **यतः प्रसृता** ।
तमेव आद्यं पुरुषं प्रपद्ये यतः **का** प्रसृता ?	तमेव आद्यं पुरुषं प्रपद्ये यतः **प्रवृत्तिः** प्रसृता ।
तमेव आद्यं पुरुषं प्रपद्ये यतः **कीदृशी** प्रवृत्तिः प्रसृता ?	तमेव आद्यं पुरुषं प्रपद्ये यतः **पुराणी** प्रवृत्तिः प्रसृता ।

तात्पर्यम् - अस्य अश्वत्थवृक्षस्य ऊर्ध्वमूलत्वादिकं यत्स्वरूपं पूर्वमुक्तं तत् केनापि ज्ञातुं न शक्यते तथा अस्य आदिः मध्यः अन्तश्च ज्ञातुं न शक्यते। तादृशम् एनम् अनिष्टफलजनकम् अश्वत्थवृक्षं वैराग्यशस्त्रेण विनाश्य सर्वेऽपि पुरुषाः तं महापुरुषं ध्यायन्तः तादृशं स्थानं शोधयेयुः यत् स्थानं प्राप्ताः पुनः न संसारं प्राप्नुवन्ति, यस्मादेव च अयम् अनादिः संसारः सम्पन्नो वर्तते।

निर्मानमोहा जितसङ्गदोषा अध्यात्मनित्या विनिवृत्तकामाः।
द्वन्द्वैर्विमुक्ताः सुखदुःखसञ्ज्ञैर्गच्छन्त्यमूढाः पदमव्ययं तत् ॥१५.५॥

पदच्छेदः - निर्मानमोहाः, जितसङ्गदोषाः, अध्यात्मनित्याः, विनिवृत्तकामाः।
द्वन्द्वैः, विमुक्ताः, सुखदुःखसञ्ज्ञैः, गच्छन्ति, अमूढाः पदम्, अव्ययम्, तत्॥

अन्वयः - निर्मानमोहाः जितसङ्गदोषाः अध्यात्मनित्याः विनिवृत्तकामाः सुखदुःखसञ्ज्ञैः द्वन्द्वैः विमुक्ताः अमूढाः तत् अव्ययं पदं गच्छन्ति।

पदार्थः - निर्मानमोहाः = मोहाभिमानवर्जिताः, जितसङ्गदोषाः = विगतासक्तिकल्मषाः, अध्यात्मनित्याः = आत्मध्यानपरायणाः, विनिवृत्तकामाः = अपगतवाञ्छाः, सुखदुःखसञ्ज्ञैः = सुखदुःखनामकैः, द्वन्द्वैः विमुक्ताः = शीतोष्णादिभिः द्वन्द्वैः रहिताः, अमूढाः = विवेकिनः, तत् = तत्, अव्ययम् = अविनाशी, पदम् = स्थानम्, गच्छन्ति = प्राप्नुवन्ति।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
निर्मानमोहाः	अ. पुं. प्र. बहु. (विशेषणम्)	जितसङ्गदोषाः	अ. पुं. प्र. बहु. (विशेषणम्)
अध्यात्मनित्याः	अ. पुं. प्र. बहु. (विशेषणम्)	विनिवृत्तकामाः	अ. पुं. प्र. बहु. (विशेषणम्)
सुखदुःखसञ्ज्ञैः	अ. नपुं. तृ. बहु. (विशेष्यम्)	द्वन्द्वैः	अ. नपुं. तृ. बहु. (विशेषणम्)
विमुक्ताः	अ. पुं. प्र. बहु. (विशेषणम्)	अमूढाः	अ. पुं. प्र. बहु. (विशेष्यम्)
तत्	तद् - द. सर्व. नपुं. द्वि. एक. (विशेषणम्)	अव्ययम्	अ. नपुं. द्वि. एक. (विशेषणम्)
पदम्	अ. नपुं. द्वि. एक. (विशेष्यम्)	गच्छन्ति	गम् (गम्लृ गतौ) पर. कर्तरि लट्. प्रपु. बहु.

व्याकरणम् -

(क) सन्धिः निर्मानमोहा जितसङ्गदोषा

निर्मानमोहाः + जितसङ्गदोषाः

विसर्गसन्धिः (लोपः)।

जितसङ्गदोषा अध्यात्मनित्याः

जितसङ्गदोषाः + अध्यात्मनित्याः

विसर्गसन्धिः (लोपः)।

अध्यात्मनित्या विनिवृत्तकामाः

अध्यात्मनित्याः + विनिवृत्तकामाः

विसर्गसन्धिः (लोपः)।

द्वन्द्वैर्विमुक्ताः — द्वन्द्वैः + विमुक्ताः — विसर्गसन्धिः रेफः।

सुखदुःखसञ्ज्ञैर्गच्छन्ति

सुखदुःखसञ्ज्ञैः + गच्छन्ति

विसर्गसन्धिः रेफः।

गच्छन्त्यमूढाः — गच्छन्ति + अमूढाः — यण्सन्धिः।

(ख) समासः

निर्मानमोहाः — मानश्च मोहश्च मानमोहौ - द्वन्द्वः।
निर्गतौ मानमोहौ येभ्यः ते निर्मानमोहाः - बहुव्रीहिः।

जितसङ्गदोषाः — सङ्गः इति दोषः सङ्गदोषः - कर्मधारयः।
जितः सङ्गदोषः यैः ते जितसङ्गदोषाः - बहुव्रीहिः।

अध्यात्मनित्याः — आत्मनि इति अध्यात्मम् - अव्ययीभावः।
अध्यात्मं नित्याः अध्यात्मनित्याः - सुप्सुपासमासः।

विनिवृत्तकामाः — विनिवृत्तः कामः येभ्यः ते विनिवृत्तकामाः - बहुव्रीहिः।

सुखदुःखसञ्ज्ञैः — सुखदुःखे संज्ञे येषां तानि सुखदुःखसंज्ञानि, तैः - बहुव्रीहिः।

अमूढाः — न मूढाः अमूढाः - नञ्तत्पुरुषः।

अव्ययम् — न विद्यते व्ययः यस्य तत् अव्ययम् - बहुव्रीहिः।

(ग) कृदन्तः

निर्मानः — निर् + मान् (मान पूजायाम्) + घञ्।

जितः — जि (जि जये) + क्त (कर्मणि)।

दोषाः — दुष् (दुष वैकृत्ये) + घञ्।

विमुक्ताः — वि + मुच् (मुच्लृ मोक्षणे) + क्त (कर्मणि)।

मूढाः — मुह् (मुह वैचित्ये) + क्त (कर्तरि)।

भावस्पष्टीकरणम् -

गच्छन्ति ।	
कुत्र गच्छन्ति ?	**तत् पदं** गच्छन्ति ।
कीदृशं तत् पदं गच्छन्ति ?	**अव्ययं** तत् पदं गच्छन्ति ।
के अव्ययं तत् पदं गच्छन्ति ?	**अमूढाः** अव्ययं तत् पदं गच्छन्ति ।
कीदृशाः अमूढाः अव्ययं तत् पदं गच्छन्ति ?	**निर्मानमोहाः** अमूढाः अव्ययं तत् पदं गच्छन्ति ।
निर्मानमोहाः **पुनश्च कीदृशाः** अमूढाः अव्ययं तत् पदं गच्छन्ति ?	निर्मानमोहाः **जितसङ्गदोषाः** अमूढाः अव्ययं तत् पदं गच्छन्ति ।
निर्मानमोहाः जितसङ्गदोषाः **पुनश्च कीदृशाः** अमूढाः अव्ययं तत् पदं गच्छन्ति ?	निर्मानमोहाः जितसङ्गदोषाः **अध्यात्मनित्याः** अमूढाः अव्ययं तत् पदं गच्छन्ति ।
निर्मानमोहाः जितसङ्गदोषाः अध्यात्मनित्याः **पुनश्च कीदृशाः** अमूढाः अव्ययं तत् पदं गच्छन्ति ?	निर्मानमोहाः जितसङ्गदोषाः अध्यात्मनित्याः **विनिवृत्तकामाः** अमूढाः अव्ययं तत् पदं गच्छन्ति ।
निर्मानमोहाः जितसङ्गदोषाः अध्यात्मनित्याः विनिवृत्तकामाः **पुनश्च कीदृशाः** अमूढाः अव्ययं तत् पदं गच्छन्ति ?	निर्मानमोहाः जितसङ्गदोषाः अध्यात्मनित्याः विनिवृत्तकामाः **विमुक्ताः** अमूढाः अव्ययं तत् पदं गच्छन्ति ।
निर्मानमोहाः जितसङ्गदोषाः अध्यात्मनित्याः विनिवृत्तकामाः **कैः** विमुक्ताः अमूढाः अव्ययं तत् पदं गच्छन्ति ?	निर्मानमोहाः जितसङ्गदोषाः अध्यात्मनित्याः विनिवृत्तकामाः **द्वन्द्वैः** विमुक्ताः अमूढाः अव्ययं तत् पदं गच्छन्ति ।
निर्मानमोहाः जितसङ्गदोषाः अध्यात्मनित्याः विनिवृत्तकामाः **कीदृशैः** द्वन्द्वैः विमुक्ताः अमूढाः अव्ययं तत् पदं गच्छन्ति ?	निर्मानमोहाः जितसङ्गदोषाः अध्यात्मनित्याः विनिवृत्तकामाः **सुखदुःखसञ्ज्ञैः** द्वन्द्वैः विमुक्ताः अमूढाः अव्ययं तत् पदं गच्छन्ति ।

तात्पर्यम् - ये जनाः अभिमानेन मोहेन च विहीनाः, आसक्तेः दोषाणां जेतारः, सर्वदा परमात्मनि रताः समस्तकामनाभिः रहिताः सुखदुःखनामकैः अनेकैः द्वन्द्वैः च रहिताः (साधकाः) सन्ति ते एव तत् अविनाशि परमपदं प्राप्नुवन्ति ।

न तद्भासयते सूर्यो न शशाङ्को न पावकः।
यद्गत्वा न निवर्तन्ते तद्धाम परमं मम ॥१५.६॥

पदच्छेदः - न, तद्, भासयते, सूर्यः, न, शशाङ्कः, न, पावकः।
यद्, गत्वा, न, निवर्तन्ते, तद्, धाम, परमम्, मम ॥

अन्वयः - सूर्यः तद् न भासयते, न शशाङ्कः, न पावकः यद् गत्वा न निवर्तन्ते तत् मम परमं धाम (अस्ति) ।

पदार्थः - सूर्यः = रविः, न भासयते = न प्रकाशयति, न शशाङ्कः = न चन्द्रः, न पावकः = न अग्निः, यद् = यद् पदम्, गत्वा = अवाप्य, न निवर्तन्ते = न पुनः आगच्छन्ति, तद् = तद्, तद् = तद् पदम्, मम = मदीयम्, परमम् = उत्तमम्, धाम = स्थानम्।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
सूर्यः	अ. पुं. प्र. एक.	तद्	तद्- द. सर्व. नपुं. प्र. एक. (विशेषणम्)
न	अव्ययम्	भासयते	भास्- आत्म. कर्तरि णिच्. लट्. प्रपु. एक.
शशाङ्कः	अ. पुं. प्र. एक.	पावकः	अ. पुं. प्र. एक.
यद्	यद्- द. सर्व. नपुं. प्र. एक. (विशेषणम्)	गत्वा	क्त्वान्तम् अव्ययम्
निवर्तन्ते	नि + वृत् (वृतु वर्तने) आत्म. कर्तरि लट्. प्रपु. एक.	तद्	तद् - द. सर्व. नपुं. प्र. एक. (विशेषणम्)
मम	अस्मद् - द. सर्व. ष. एक.	परमम्	अ. नपुं. प्र. एक. (विशेषणम्)
धाम	धामन् - न. नपुं. प्र. एक. (विशेष्यम्)		

व्याकरणम् -

(क) सन्धिः	तद्भासयते	तत् + भासयते	जश्त्वसन्धिः।
	सूर्यो न	सूर्यः + न	विसर्गसन्धिः (सकारः) रेफः उकारः गुणः।
	शशाङ्को न	शशाङ्कः + न	विसर्गसन्धिः (सकारः) रेफः उकारः गुणः।
	यद्गत्वा	यत् + गत्वा	जश्त्वसन्धिः।
	तद्धाम	तत् +धाम	जश्त्वसन्धिः।
(ख) कृदन्तः	पावकः	पू (पूञ् पवने) + ण्वुल्।	
	गत्वा	गम् (गम्लृ गतौ) + क्त्वा।	

भावस्पष्टीकरणम् -

न निवर्तन्ते ।	
किं कृत्वा न निवर्तन्ते ?	**गत्वा** न निवर्तन्ते ।
गत्वा न निवर्तन्ते **तत् किम्** ?	गत्वा न निवर्तन्ते **तत् धाम** ।
गत्वा न निवर्तन्ते तद् **कीदृशं** धाम ?	गत्वा न निवर्तन्ते तद् **परमं** धाम ।
गत्वा न निवर्तन्ते तद् परमं धाम **कस्य** ?	गत्वा न निवर्तन्ते तद् परमं धाम **मम** ।
कुत्र गत्वा न निवर्तन्ते तद् परमं धाम मम ?	**यद्** गत्वा न निवर्तन्ते तद् परमं धाम मम ।
तत् किं न भवति यद् गत्वा न निवर्तन्ते तद् परमं धाम मम ?	**तद् न भासयते**, यद् गत्वा न निवर्तन्ते तद् परमं धाम मम ।
कः तद् न भासयते, यद् गत्वा न निवर्तन्ते तद् परमं धाम मम ?	**सूर्यः** तद् न भासयते, यद् गत्वा न निवर्तन्ते तद् परमं धाम मम ।
सूर्यः तद् न भासयते, **पुनः कः** न, यद् गत्वा न निवर्तन्ते तद् परमं धाम मम ?	सूर्यः तद् न भासयते, **शशाङ्कः** न, यद् गत्वा न निवर्तन्ते तद् परमं धाम मम ।
सूर्यः तद् न भासयते, शशाङ्कः न, **पुनः कः** न, यद् गत्वा न निवर्तन्ते तद् परमं धाम मम ?	सूर्यः तद् न भासयते, शशाङ्कः न, **पावकः** न, यद् गत्वा न निवर्तन्ते तद् परमं धाम मम ।

तात्पर्यम् - यत् पदं न सूर्यः प्रकाशयितुं शक्नोति, न चन्द्रः नापि अग्निः यत् प्राप्य च पुरुषः पुनः न संसारक्लेशम् अनुभवति तदेव मम श्रेष्ठं स्थानम् ।

ममैवांशो जीवलोके जीवभूतः सनातनः ।
मनःषष्ठानीन्द्रियाणि प्रकृतिस्थानि कर्षति ॥१५.७॥

पदच्छेदः - मम, एव, अंशः, जीवलोके, जीवभूतः, सनातनः ।
मनःषष्ठानि, इन्द्रियाणि, प्रकृतिस्थानि, कर्षति ॥

अन्वयः - जीवलोके मम सनातनः अंशः एव जीवभूतः । प्रकृतिस्थानि मनःषष्ठानि इन्द्रियाणि कर्षति ।

पदार्थः - जीवलोके = संसारे, मम = मदीयः, सनातनः = चिरन्तनः, अंशः = अवयवः, एव = एव, जीवभूतः = जीवत्वं प्राप्तः, प्रकृतिस्थानि = प्रकृतौ विद्यमानानि, मनःषष्ठानि = चित्तषष्ठानि, इन्द्रियाणि = नेत्रादीनि इन्द्रियाणि, कर्षति = आकर्षति ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
जीवलोके	अ. पुं. स. एक.	मम	अस्मद् - द. सर्व. ष. एक.
सनातनः	अ. पुं. प्र. एक. (विशेषणम्)	अंशः	अ. पुं. प्र. एक. (विशेष्यम्)
एव	अव्ययम्	जीवभूतः	अ. पुं. प्र. एक. (विशेषणम्)
प्रकृतिस्थानि	अ. नपुं. द्वि. बहु. (विशेषणम्)	मनःषष्ठानि	अ. नपुं. द्वि. बहु. (विशेषणम्)
इन्द्रियाणि	अ. नपुं. द्वि. बहु. (विशेष्यम्)	कर्षति	कृष् (कृष विलेखने) पर. कर्तरि लट्. प्रपु. एक.

व्याकरणम् -

(क) सन्धिः	ममैव	मम + एव	वृद्धिसन्धिः ।
	एवांशः	एव + अंश	सवर्णदीर्घसन्धिः ।
	अंशो जीवलोके	अंशः + जीवलोके	विसर्गसन्धिः (सकारः) रेफः उकारः गुणः ।
	मनःषष्ठानीन्द्रियाणि	मनःषष्ठानि + इन्द्रियाणि	सवर्णदीर्घसन्धिः ।
(ख) समासः	जीवलोकः	जीवानां लोकः जीवलोकः, तस्मिन् - षष्ठीतत्पुरुषः ।	
	जीवभूतः	जीवं भूतः जीवभूतः - केवलसमासः ।	
	मनःषष्ठानि	मनः षष्ठं येषु तानि, मनःषष्ठानि - बहुव्रीहिः ।	
	प्रकृतिस्थानि	प्रकृतौ तिष्ठन्तीति प्रकृतिस्थानि - कर्तरि कप्रत्ययः उपपदसमासश्च ।	
(ग) कृदन्तः	भूतः	भू (भू सत्तायाम्) + क्त (कर्तरि) ।	
	प्रकृतिः	प्र + कृ (डुकृञ् करणे) + क्तिन् ।	
(घ) तद्धितान्तः	सनातनः	सना + ट्युल् (भव इत्यर्थे) (सदा भवः इत्यर्थः) ।	

भावस्पष्टीकरणम् -

कर्षति ।	
कानि कर्षति ?	**इन्द्रियाणि** कर्षति ।
कानि इन्द्रियाणि कर्षति ?	**मनःषष्ठानि** इन्द्रियाणि कर्षति ।
कीदृशानि मनः षष्ठानि इन्द्रियाणि कर्षति ?	**प्रकृतिस्थानि** मनःषष्ठानि इन्द्रियाणि कर्षति ।
कः प्रकृतिस्थानि मनःषष्ठानि इन्द्रियाणि कर्षति ?	**अंशः** प्रकृतिस्थानि मनःषष्ठानि इन्द्रियाणि कर्षति ।

कीदृशः अंशः प्रकृतिस्थानि मनःषष्ठानि इन्द्रियाणि कर्षति ?	**सनातनः** अंशः प्रकृतिस्थानि मनःषष्ठानि इन्द्रियाणि कर्षति।
कथम्भूतः सनातनः अंशः प्रकृतिस्थानि मनःषष्ठानि इन्द्रियाणि कर्षति ?	**जीवभूतः** सनातनः अंशः प्रकृतिस्थानि मनःषष्ठानि इन्द्रियाणि कर्षति।
कुत्र जीवभूतः सनातनः अंशः प्रकृतिस्थानि मनःषष्ठानि इन्द्रियाणि कर्षति ?	**जीवलोके** जीवभूतः सनातनः अंशः प्रकृतिस्थानि मनःषष्ठानि इन्द्रियाणि कर्षति।
जीवलोके जीवभूतः **कस्य** सनातनः अंशः प्रकृतिस्थानि मनःषष्ठानि इन्द्रियाणि कर्षति ?	जीवलोके जीवभूतः **मम** एव सनातनः अंशः प्रकृतिस्थानि मनःषष्ठानि इन्द्रियाणि कर्षति।

तात्पर्यम् - योऽयं संसारः तत्र जीवः ममैव चिरन्तनः कश्चित् अवयवः। यद्यपि सुप्तौ प्रलये च तस्य मयि लयो वर्तते तथापि मायाशालित्वात् सगुणे एव मयि लयः, न तु मायासम्बन्ध-राहित्यात् निर्विशेषे ब्रह्मणि। ततश्च सुषुप्तौ प्रलये वा समाप्ते पुनः संसाराय निर्गच्छन् सः कर्मवशात् शरीरं प्राप्नुवन् भोगार्थं मनःप्रधानानि सर्वाण्यपि इन्द्रियाणि प्राप्नोति।

शरीरं यदवाप्नोति यच्चाप्युत्क्रामतीश्वरः।
गृहीत्वैतानि संयाति वायुर्गन्धानिवाशयात्॥१५.८॥

पदच्छेदः - शरीरम्, यत्, अवाप्नोति, यत्, च, अपि, उत्क्रामति, ईश्वरः।
गृहीत्वा, एतानि, संयाति, वायुः, गन्धान्, इव, आशयात्॥

अन्वयः - ईश्वरः यत् शरीरम् अवाप्नोति, यत् च अपि उत्क्रामति वायुः आशयात् गन्धान् इव एतानि गृहीत्वा संयाति।

पदार्थः - ईश्वरः = जीवात्मा, यद् = यदा, शरीरम् = देहम्, अवाप्नोति = प्राप्नोति, यद् = यदा, च अपि = च अपि, उत्क्रामति = निर्गच्छति, वायुः = मरुत्, आशयात् = कोशात्, गन्धान् इव = परिमलान् इव, एतानि = एतानि (इन्द्रियाणि), गृहीत्वा = स्वीकृत्य, संयाति = गच्छति।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
ईश्वरः	अ. पुं. प्र. एक.	यत्	यद् - द. सर्व. नपुं. द्वि. एक. (विशेषणम्)
शरीरम्	अ. नपुं. द्वि. एक. (विशेष्यम्)	अवाप्नोति	अव + आप् (आप्लृ व्याप्तौ) पर. कर्तरि लट्. प्रपु. एक.

च	अव्ययम्	अपि	अव्ययम्
उत्क्रामति	उत् + क्रम् (क्रमु पादविक्षेपे) पर. कर्तरि लट्. प्रपु. एक.	वायुः	उ. पुं. प्र. एक.
आशयात्	अ. पुं. पं. एक.	गन्धान्	अ. पुं. द्वि. बहु.
इव	अव्ययम्	एतानि	एतद् - द. सर्व. नपुं. द्वि. बहु. (विशेषणम्)
गृहीत्वा	क्त्वान्तम् अव्ययम्	संयाति	सम् + या (या प्रापणे) पर. कर्तरि लट्. प्रपु. एक.

व्याकरणम् -

(क) सन्धिः	यच्च	यत् + च	श्चुत्वसन्धिः ।
	चापि	च + अपि	सवर्णदीर्घसन्धिः ।
	अप्युत्क्रामति	अपि + उत्क्रामति	यण्सन्धिः ।
	उत्क्रामतीश्वरः	उत्क्रामति + ईश्वरः	सवर्णदीर्घसन्धिः ।
	गृहीत्वैतानि	गृहीत्वा + एतानि	वृद्धिसन्धिः ।
	वायुर्गन्धान्	वायुः + गन्धान्	विसर्गसन्धिः (रेफः) ।
	इवाशयात्	इव + आशयात्	सवर्णदीर्घसन्धिः ।
(ख) कृदन्तः	गृहीत्वा	ग्रह् (ग्रह उपादाने) + क्त्वा ।	

भावस्पष्टीकरणम् -

संयाति ।	
कः संयाति ?	**ईश्वरः** संयाति ।
ईश्वरः **कानि** संयाति ?	ईश्वरः **एतानि** संयाति ।
ईश्वरः एतानि **किं कृत्वा** संयाति ?	ईश्वरः एतानि **गृहीत्वा** संयाति ।
ईश्वरः **पुनः किं करोति** एतानि गृहीत्वा संयाति ?	ईश्वरः **अवाप्नोति** एतानि गृहीत्वा संयाति ।
ईश्वरः **किम्** अवाप्नोति एतानि गृहीत्वा संयाति ?	ईश्वरः **यद् शरीरम्** अवाप्नोति एतानि गृहीत्वा संयाति ।
ईश्वरः यद् शरीरम् अवाप्नोति **पुनः कदा** एतानि गृहीत्वा संयाति ?	ईश्वरः यद् शरीरम् अवाप्नोति **यत् च अपि उत्क्रामति** एतानि गृहीत्वा संयाति ।

ईश्वरः यद् शरीरम् अवाप्नोति यत् च अपि उत्क्रामति **कः** इव एतानि गृहीत्वा संयाति ?	ईश्वरः यद् शरीरम् अवाप्नोति यत् च अपि उत्क्रामति **वायुः** इव एतानि गृहीत्वा संयाति ।
ईश्वरः यद् शरीरम् अवाप्नोति यत् च अपि उत्क्रामति वायुः **कान्** इव एतानि गृहीत्वा संयाति ?	ईश्वरः यद् शरीरम् अवाप्नोति यत् च अपि उत्क्रामति वायुः **गन्धान्** इव एतानि गृहीत्वा संयाति ।
ईश्वरः यद् शरीरम् अवाप्नोति यत् च अपि उत्क्रामति वायुः **कुतः** गन्धान् इव एतानि गृहीत्वा संयाति ?	ईश्वरः यद् शरीरम् अवाप्नोति यत् च अपि उत्क्रामति वायुः **आशयात्** गन्धान् इव एतानि गृहीत्वा संयाति ।

तात्पर्यम् - सुषुप्तौ प्रलये वा समाप्ते सविशेषे ब्रह्मणि लीनः जीवः पूर्वस्मात् शरीरात् निर्गत्य स्वकर्मवशात् शरीरान्तरं यदा प्राप्नोति तदा वायुः पुष्पात् गन्धमिव पूर्वस्मात् शरीरात् सर्वाण्यपि नेत्रादीनि इन्द्रियाणि गृहीत्वैव शरीरान्तरं प्रविशति । ततश्च सविशेषे ब्रह्मणि लीनस्यैव संसारं प्रति पुनरागमनम्, न पुनः उपाधिभूतस्य शरीरस्य अनाशात् निर्विशेषे ब्रह्मणि लीनस्य इति मन्तव्यम् ।

श्रोत्रं चक्षुः स्पर्शनं च रसनं घ्राणमेव च ।
अधिष्ठाय मनश्चायं विषयानुपसेवते ॥१५.९॥

पदच्छेदः - श्रोत्रम्, चक्षुः, स्पर्शनम्, च, रसनम्, घ्राणम्, एव, च ।
अधिष्ठाय, मनः, च, अयम्, विषयान्, उपसेवते ॥

अन्वयः - श्रोत्रं चक्षुः स्पर्शनं च रसनं घ्राणं च मनः च अधिष्ठाय अयम् एव विषयान् उपसेवते ।

पदार्थः - श्रोत्रम् = श्रवणम्, चक्षुः = नेत्रम्, स्पर्शनम् च = त्वचं च, रसनम् = जिह्वाम्, घ्राणं च = नासिकाम् च, मनः च = चित्तम् च, अधिष्ठाय = आश्रित्य, अयम् = एषः, एव = एव, विषयान् = शब्दादीन् विषयान्, उपसेवते = अनुभवति ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
श्रोत्रम्	अ. पुं. द्वि. एक.	चक्षुः	चक्षुस्- सका. नपुं. द्वि. एक.
स्पर्शनम्	अ. पुं. द्वि. एक.	च	अव्ययम्
रसनम्	अ. पुं. द्वि. एक.	घ्राणम्	अ. पुं. द्वि. एक.
मनः	मनस् - स. नपुं. द्वि. एक.	अधिष्ठाय	ल्यबन्तम् अव्ययम्

अयम्	इदम् - म. सर्व. पुं. प्र. एक. (विशेषणम्)	एव	अव्ययम्
विषयान्	अ. पुं. द्वि. बहु.	उपसेवते	उप + सेव् (षेवृ सेवने) आत्म. कर्तरि लट्. प्रपु. एक.

व्याकरणम् -

(क) सन्धिः	मनश्च	मनः + च	विसर्गसन्धिः (सकारः) श्चुत्वम्।
	चायम्	च + अयम्	सवर्णदीर्घसन्धिः।
(ख) कृदन्तः	श्रोत्रम्	श्रु (श्रु श्रवणे) + ष्ट्रन्।	
	स्पर्शनम्	स्पृश् (स्पृश संस्पर्शने) + ल्युट्।	
	रसनम्	रस् (रस आस्वादनस्नेहनयोः) + ल्युट्।	
	घ्राणम्	घ्रा (घ्रा गन्धोपादाने) + ल्युट्।	
	अधिष्ठाय	अधि + स्था (ष्ठा गतिनिवृत्तौ) + ल्यप्।	

भावस्पष्टीकरणम् -

उपसेवते।	
कः उपसेवते ?	**अयम्** उपसेवते।
अयं **कान्** उपसेवते ?	अयं **विषयान्** एव उपसेवते।
अयं **किं कृत्वा** विषयान् एव उपसेवते ?	अयम् **अधिष्ठाय** विषयान् एव उपसेवते।
अयं **किम्** अधिष्ठाय विषयान् एव उपसेवते ?	अयं **श्रोत्रम्** अधिष्ठाय विषयान् एव उपसेवते।
अयं श्रोत्रं **पुनश्च किम्** अधिष्ठाय विषयान् एव उपसेवते ?	अयं श्रोत्रं **चक्षुः** अधिष्ठाय विषयान् एव उपसेवते।
अयं श्रोत्रं चक्षुः **पुनश्च किम्** अधिष्ठाय विषयान् एव उपसेवते ?	अयं श्रोत्रं चक्षुः **स्पर्शनम्** अधिष्ठाय विषयान् एव उपसेवते।
अयं श्रोत्रं चक्षुः स्पर्शनं **पुनश्च किम्** अधिष्ठाय विषयान् एव उपसेवते ?	अयं श्रोत्रं चक्षुः स्पर्शनं **रसनम्** अधिष्ठाय विषयान् एव उपसेवते।
अयं श्रोत्रं चक्षुः स्पर्शनं रसनं **पुनश्च किम्** अधिष्ठाय विषयान् एव उपसेवते ?	अयं श्रोत्रं चक्षुः स्पर्शनं रसनं **घ्राणम्** अधिष्ठाय विषयान् एव उपसेवते।

अयं श्रोत्रं चक्षुः स्पर्शनं रसनं घ्राणं **पुनश्च किम्** अधिष्ठाय विषयान् एव उपसेवते ?	अयं श्रोत्रं चक्षुः स्पर्शनं रसनं घ्राणं **मनः च** अधिष्ठाय विषयान् एव उपसेवते।

तात्पर्यम् - शरीरान्तरं प्रविष्टोऽयं जीवः श्रवणं नेत्रं त्वचं जिह्वां नासिकां चित्तं कर्मेन्द्रियाणि च आश्रित्यैव शब्दादीन् अनुभवति।

उत्क्रामन्तं स्थितं वापि भुञ्जानं वा गुणान्वितम्।
विमूढा नानुपश्यन्ति पश्यन्ति ज्ञानचक्षुषः ॥१५.१०॥

पदच्छेदः - उत्क्रामन्तम्, स्थितम्, वा, अपि, भुञ्जानम्, वा, गुणान्वितम्।
विमूढाः, न, अनुपश्यन्ति, पश्यन्ति, ज्ञानचक्षुषः ॥

अन्वयः - विमूढाः उत्क्रामन्तं स्थितं वा अपि भुञ्जानं गुणान्वितं वा न अनुपश्यन्ति ज्ञानचक्षुषः पश्यन्ति।

पदार्थः - विमूढाः = अविवेकिनः, उत्क्रामन्तम् = ऊर्ध्वं गच्छन्तम् (परित्यजन्तम्), स्थितम् = तिष्ठन्तम्, वा = अथवा, अपि = अपि, भुञ्जानम् = अनुभवन्तम्, गुणान्वितम् = गुणसहितम्, वा = अथवा, न अनुपश्यन्ति = न अवलोकन्ते, ज्ञानचक्षुषः = ज्ञाननेत्राः, पश्यन्ति = वीक्षन्ते।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
विमूढाः	अ. पुं. प्र. बहु. (विशेषणम्)	उत्क्रामन्तम्	अ. पुं. द्वि. एक. (विशेषणम्)
स्थितम्	अ. पुं. द्वि. एक. (विशेषणम्)	वा	अव्ययम्
अपि	अव्ययम्	भुञ्जानम्	अ. पुं. द्वि. एक. (विशेषणम्)
गुणान्वितम्	अ. पुं. द्वि. एक. (विशेषणम्)	न	अव्ययम्
अनुपश्यन्ति	अनु + पश्य (दृशिर् प्रेक्षणे) पर. कर्तरि लट्. प्रपु. बहु.	ज्ञानचक्षुषः	ज्ञानचक्षुस् - सका. पुं. प्र. बहु.
पश्यन्ति	पश्य (दृशिर् प्रेक्षणे) पर. कर्तरि लट्. प्रपु. बहु.		

व्याकरणम् -

(क) सन्धिः	वापि	वा + अपि	सवर्णदीर्घसन्धिः।
	विमूढा न	विमूढाः + न	विसर्गसन्धिः (लोपः)।

	नानुपश्यन्ति	न + अनुपश्यन्ति	सवर्णदीर्घसन्धिः ।
(ख) समासः	गुणान्वितम्	गुणैः अन्वितः गुणान्वितः, तम् - तृतीयातत्पुरुषः ।	
	ज्ञानचक्षुषः	ज्ञानम् एव चक्षुः येषां ते ज्ञानचक्षुषः - बहुव्रीहिः ।	
(ग) कृदन्तः	उत्क्रामन्तः	उद् + क्रम् (क्रमु पादविक्षेपे) + शतृ (कर्तरि) ।	
	स्थितम्	स्था (ष्ठा गतिनिवृत्तौ) + क्त (कर्तरि) ।	
	भुञ्जानः	भुज् (भुज पालनाभ्यवहारयोः) + शानच् (कर्तरि) ।	
	अन्वितम्	अनु + इण् (इण् गतौ) + क्त (कर्तरि) ।	
	विमूढाः	वि + मुह् (मुह वैचित्ये) + क्त (कर्तरि) ।	

भावस्पष्टीकरणम् -

न अनुपश्यन्ति ।	
के न अनुपश्यन्ति ?	**विमूढाः** न अनुपश्यन्ति ।
विमूढाः **कं** न अनुपश्यन्ति ?	विमूढाः **उत्क्रामन्तं** न अनुपश्यन्ति ।
विमूढाः उत्क्रामन्तं **पुनश्च कं वा अपि** न अनुपश्यन्ति ?	विमूढाः उत्क्रामन्तं **स्थितं वा अपि** न अनुपश्यन्ति ।
विमूढाः उत्क्रामन्तं स्थितं वा अपि **पुनश्च कं** न अनुपश्यन्ति ?	विमूढाः उत्क्रामन्तं स्थितं वा अपि **भुञ्जानं** न अनुपश्यन्ति ।
विमूढाः उत्क्रामन्तं स्थितं वा अपि भुञ्जानं **पुनश्च कं** वा न अनुपश्यन्ति ?	विमूढाः उत्क्रामन्तं स्थितं वा अपि भुञ्जानं **गुणान्वितं** वा न अनुपश्यन्ति ।
विमूढाः उत्क्रामन्तं स्थितं वा अपि भुञ्जानं गुणान्वितं वा न अनुपश्यन्ति (तर्हि) **के** पश्यन्ति ?	विमूढाः उत्क्रामन्तं स्थितं वा अपि भुञ्जानं गुणान्वितं वा न अनुपश्यन्ति **ज्ञानचक्षुषः** पश्यन्ति ।

तात्पर्यम् - पुरातनं शरीरं विहाय शरीरान्तरं गच्छन्तं, तच्छरीरे तिष्ठन्तम् इन्द्रियैः विषयान् अनुभवन्तं वा एनं जीवं मूढाः न कदापि ज्ञातुं शक्नुवन्ति । परन्तु ज्ञाननेत्राः अवश्यं तं ज्ञातुं शक्नुवन्ति ।

यतन्तो योगिनश्चैनं पश्यन्त्यात्मन्यवस्थितम् ।
यतन्तोऽप्यकृतात्मानो नैनं पश्यन्त्यचेतसः ॥१५.११॥

पदच्छेदः - यतन्तः, योगिनः, च, एनम्, पश्यन्ति, आत्मनि, अवस्थितम् ।
यतन्तः, अपि, अकृतात्मानः, न, एनम्, पश्यन्ति, अचेतसः ॥

अन्वयः - यतन्तः योगिनः च एनम् आत्मनि अवस्थितं पश्यन्ति। यतन्तः अपि अकृतात्मानः अचेतसः एनं न पश्यन्ति।

पदार्थः - यतन्तः = प्रयत्नवन्तः, योगिनः = समाहितचित्ताः, च = च, एनम् = एतम्, आत्मनि = स्वस्मिन्, अवस्थितम् = विद्यमानम्, पश्यन्ति = अवलोकन्ते, यतन्तः अपि = प्रयत्नवन्तः अपि, अकृतात्मानः = असंस्कृतात्मानः, अचेतसः = अविवेकिनः, एनम् = एतम्, न पश्यन्ति = न वीक्षन्ते।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
यतन्तः (यतमानाः)	यतत् - त. पुं. प्र. बहु.[1] (विशेषणम्)	योगिनः	योगिन् - न. पुं. प्र. बहु. (विशेष्यम्)
च	अव्ययम्	एनम्	एतद् - द. पुं. द्वि. एक. (विशेषणम्)
आत्मनि	आत्मन् - न. पुं. स. एक.	अवस्थितम्	अ. पुं. द्वि. एक. (विशेषणम्)
पश्यन्ति	दृश्य (दृशिर् प्रेक्षणे) पर. कर्तरि लट्. प्रपु. बहु.	अपि	अव्ययम्
अकृतात्मानः	अ. पुं. प्र. बहु. (विशेषणम्)	अचेतसः	अचेतस् - सका. पुं. प्र. बहु. (विशेष्यम्)
न	अव्ययम्	पश्यन्ति	पश्य (दृशिर् प्रेक्षणे) पर. कर्तरि लट्. प्रपु. बहु.

व्याकरणम् -

(क) सन्धिः

यतन्तो योगिनः	यतन्तः + योगिनः	विसर्गसन्धिः (सकारः) रेफः उकारः गुणः।
योगिनश्च	योगिनः + च	विसर्गसन्धिः (सकारः) श्चुत्वम्।
चैनम्	च + एनम्	वृद्धिसन्धिः।
पश्यन्त्यात्मनि	पश्यन्ति + आत्मनि	यण्सन्धिः।
आत्मन्यवस्थितम्	आत्मनि + अवस्थितम्	यण्सन्धिः।
यतन्तोऽपि	यतन्तः + अपि	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः पूर्वरूपं च।
अप्यकृतात्मानः	अपि + अकृतात्मानः	यण्सन्धिः।
अकृतात्मानो न	अकृतात्मानः + न	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः।
नैनम्	न + एनम्	वृद्धिसन्धिः।

1. अत्र शतृप्रत्ययत्वेन आर्षः प्रयोगः।

	पश्यन्त्यचेतसः	पश्यन्ति + अचेतसः	यण्सन्धिः ।
(ख) समासः	अकृतात्मानः	न कृतः अकृतः - नञ्तत्पुरुषः ।	
		अकृतः आत्मा येषां ते अकृतात्मानः - बहुव्रीहिः ।	
	अचेतसः	न विद्यते चेतः येषां ते अचेतसः - नञ्बहुव्रीहिः ।	
(ग) कृदन्तः	यतन्तः	यत् (यती प्रयत्ने) + शतृ, ते (कर्तरि) ।	
	योगिनः	योग + इनि, ते (योगः अस्य अस्मिन् वा अस्ति इति योगी) ।	
	अवस्थितम्	अव + स्था (ष्ठा गतिनिवृत्तौ) + क्त (कर्तरि) ।	

भावस्पष्टीकरणम् -

पश्यन्ति ।	
के पश्यन्ति ?	**योगिनः** पश्यन्ति ।
कीदृशाः योगिनः पश्यन्ति ?	**यतन्तः** योगिनः पश्यन्ति ।
यतन्तः योगिनः **कं** पश्यन्ति ?	यतन्तः योगिनः **एनं** पश्यन्ति ।
यतन्तः योगिनः **कीदृशम्** एनं पश्यन्ति ?	यतन्तः योगिनः **अवस्थितम्** एनं पश्यन्ति ।
यतन्तः योगिनः **कुत्र** अवस्थितम् एनं पश्यन्ति ?	यतन्तः योगिनः **आत्मनि** अवस्थितम् एनं पश्यन्ति ।
यतन्तः योगिनः आत्मनि अवस्थितम् एनं पश्यन्ति। **पुनः के न पश्यन्ति** ?	यतन्तः योगिनः आत्मनि अवस्थितम् एनं पश्यन्ति। **अचेतसः न पश्यन्ति** ।
यतन्तः योगिनः आत्मनि अवस्थितम् एनं पश्यन्ति। **कीदृशाः** अचेतसः न पश्यन्ति ?	यतन्तः योगिनः आत्मनि अवस्थितम् एनं पश्यन्ति। **अकृतात्मानः** अचेतसः न पश्यन्ति ।
यतन्तः योगिनः आत्मनि अवस्थितम् एनं पश्यन्ति । **किं कुर्वन्तः अपि** अकृतात्मानः अचेतसः न पश्यन्ति ।	यतन्तः योगिनः आत्मनि अवस्थितम् एनं पश्यन्ति। **यतन्तः अपि** अकृतात्मानः अचेतसः न पश्यन्ति ।
यतन्तः योगिनः आत्मनि अवस्थितम् एनं पश्यन्ति। यतन्तः अपि अकृतात्मानः अचेतसः **कं** न पश्यन्ति ?	यतन्तः योगिनः आत्मनि अवस्थितम् एनं पश्यन्ति। यतन्तः अपि अकृतात्मानः अचेतसः **एनं** न पश्यन्ति ।

तात्पर्यम् - ध्यानादिभिः सततं प्रयतमाना एव ज्ञानिनः देहे वर्तमानमिमं द्रष्टुं शक्नुवन्ति। किन्तु शास्त्रादिभिः प्रयतमानाः अपि कश्मलचित्ताः देहे वर्तमानमपि इमं द्रष्टुं न शक्नुवन्ति ।

यदादित्यगतं तेजो जगद्भासयतेऽखिलम् ।
यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकम् ॥१५.१२॥

पदच्छेदः - यद्, आदित्यगतम्, तेजः, जगद्, भासयते, अखिलम् ।
यद्, चन्द्रमसि, यद्, च, अग्नौ, तद्, तेजः, विद्धि, मामकम् ॥

अन्वयः - यद् आदित्यगतं तेजः, यद् चन्द्रमसि, यत् च अग्नौ अखिलं जगद् भासयते तत् तेजः मामकं विद्धि ।

पदार्थः - यद् = इदम्, आदित्यगतम् = सूर्याश्रितम्, तेजः = दीप्तिः, यद् = यत् तेजः, चन्द्रमसि = चन्द्रे, यद् = यत् तेजः, च = च, अग्नौ = वह्नौ, अखिलम् = सम्पूर्णम्, जगद् = लोकम्, भासयते = प्रकाशयति, तत् तेजः = सा दीप्तिः, मामकम् = मदीयम्, विद्धि = जानीहि ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
यत्	यद् - द. सर्व. नपुं. प्र. एक. (विशेषणम्)	आदित्यगतम्	अ. नपुं. प्र. एक. (विशेषणम्)
तेजः	तेजस् - सका. नपुं. प्र. एक. (विशेष्यम्)	चन्द्रमसि	चन्द्रमस् - सका. पुं. स. एक.
च	अव्ययम्	अग्नौ	इ. पुं. स. एक.
अखिलम्	अ. नपुं. प्र. एक.	जगद्	जगत् - त. नपुं. प्र. एक. (विशेष्यम्)
भासयते	भास् (भासृ दीप्तौ) आत्म. कर्तरि णिच्. लट्. प्रपु. एक.	तद्	तद् - द. सर्व. नपुं. द्वि. एक. (विशेषणम्)
तेजः	तेजस् - स. नपुं. द्वि. एक. (विशेष्यम्)	मामकम्	अ. नपुं. द्वि. एक. (विशेषणम्)
विद्धि	विद् (विद ज्ञाने) पर. कर्तरि लोट्. मपु. एक.		

व्याकरणम् -

(क) सन्धिः	तेजो जगद्	तेजः + जगद्	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः ।
	भासयतेऽखिलम्	भासयते + अखिलम्	पूर्वरूपसन्धिः ।
	यच्चन्द्रमसि	यत् + चन्द्रमसि	श्चुत्वसन्धिः ।
	यच्च	यत् + च	श्चुत्वसन्धिः ।
	चाग्नौ	च + अग्नौ	सवर्णदीर्घसन्धिः ।
	तेजो विद्धि	तेजः + विद्धि	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः ।

(ख) समासः आदित्यगतम् आदित्यं गतम् आदित्यगतम् - द्वितीयातत्पुरुषः ।
अखिलम् न खिलम् अखिलम् - नञ्तत्पुरुषः ।
(ग) कृदन्तः गतम् गम् (गम्लृ गतौ) + क्त (कर्तरि) ।
(घ) तद्धितान्तः मामकम् अस्मद् + अण्, मम इदं मामकम् - इदमर्थे अण् प्रकृतेः च अस्मद् इति शब्दस्य 'ममक' इति आदेशः । मत्सम्बन्धि इत्यर्थः ।

भावस्पष्टीकरणम् -

विद्धि ।	
किं विद्धि ?	**तद्** विद्धि ।
किं तद् विद्धि ?	**तद्** तेजः विद्धि ।
तद् तेजः **कस्य** विद्धि ?	तद् तेजः **मामकं** विद्धि ।
कीदृशं तद् तेजः मामकं विद्धि ?	**यद् आदित्यगतं तेजः** तद् तेजः मामकं विद्धि ।
यद् आदित्यगतं तेजः **पुनः यद् कुत्र** तद् तेजः मामकं विद्धि ?	यद् आदित्यगतं तेजः **यद् चन्द्रमसि** तद् तेजः मामकं विद्धि ।
यद् आदित्यगतं तेजः यद् चन्द्रमसि **पुनश्च यद् कुत्र** तद् तेजः मामकं विद्धि ?	यद् आदित्यगतं तेजः यद् चन्द्रमसि **यद् च अग्नौ** तद् तेजः मामकं विद्धि ।
यद् आदित्यगतं तेजः यद् चन्द्रमसि यद् च अग्नौ **किं करोति**, तद् तेजः मामकं विद्धि ?	यद् आदित्यगतं तेजः यद् चन्द्रमसि यद् च अग्नौ **भासयते** तद् तेजः मामकं विद्धि ।
यद् आदित्यगतं तेजः यद् चन्द्रमसि यद् च अग्नौ **किं** भासयते तद् तेजः मामकं विद्धि ?	यद् आदित्यगतं तेजः यद् चन्द्रमसि यद् च अग्नौ **जगद्** भासयते तद् तेजः मामकं विद्धि ।
यद् आदित्यगतं तेजः यद् चन्द्रमसि यद् च अग्नौ **कीदृशं** जगद् भासयते तद् तेजः मामकं विद्धि ?	यद् आदित्यगतं तेजः यद् चन्द्रमसि यद् च अग्नौ **अखिलं** जगद् भासयते तद् तेजः मामकं विद्धि ।

तात्पर्यम् - सूर्ये चन्द्रे अग्नौ च वर्तमाना या दीप्तिः सम्पूर्णं विश्वं प्रकाशयति सा दीप्तिः मम एव इति जानीहि ।

गामाविश्य च भूतानि धारयाम्यहमोजसा ।
पुष्णामि चौषधीः सर्वाः सोमो भूत्वा रसात्मकः ॥१५.१३॥

पदच्छेदः - गाम्, आविश्य, च, भूतानि, धारयामि, अहम्, ओजसा ।
पुष्णामि, च, ओषधीः, सर्वाः, सोमः, भूत्वा, रसात्मकः ॥

अन्वयः - अहं गाम् आविश्य च ओजसा भूतानि धारयामि, रसात्मकः सोमः भूत्वा सर्वाः ओषधीः च पुष्णामि ।

पदार्थः - अहम् = अहम्, गाम् = भूमिम्, आविश्य = प्रविश्य, च = च, ओजसा = बलेन, भूतानि = चराचराणि, धारयामि = वहामि, रसात्मकः = रसस्वभावः, सोमः = चन्द्रः, भूत्वा = स्थित्वा, सर्वाः = अखिलाः, ओषधीः = फलपाकान्तानि सस्यानि, च = च, पुष्णामि = पोषयामि ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
अहम्	अस्मद् - द. सर्व. प्र. एक.	गाम्	गो - ओ. स्त्री. द्वि. एक.
आविश्य	ल्यबन्तम् अव्ययम्	च	अव्ययम्
ओजसा	ओजस् - सका. नपुं. तृ. एक.	भूतानि	अ. नपुं. द्वि. बहु.
धारयामि	धृ (धृञ् धारणे) णिच्. पर. कर्तरि लट्. उपु. एक.	रसात्मकः	अ पुं. प्र. एक. (विशेषणम्)
सोमः	अ पुं. प्र. एक. (विशेष्यम्)	भूत्वा	क्त्वान्तम् अव्ययम्
सर्वाः	अ. सर्व. स्त्री. द्वि. बहु. (विशेषणम्)	ओषधीः	ई. स्त्री. द्वि. बहु. (विशेष्यम्)
पुष्णामि	पुष् (पुष पुष्टौ) पर. कर्तरि लट्. उपु. एक.		

व्याकरणम् -

(क) सन्धिः	धारयाम्यहम्	धारयामि + अहम्	यण्सन्धिः ।
	चौषधीः	च + ओषधीः	वृद्धिसन्धिः ।
	सोमो भूत्वा	सोमः + भूत्वा	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः ।
(ख) समासः	रसात्मकः	रसः आत्मा यस्य सः रसात्मकः - बहुव्रीहिः ।	
(ग) कृदन्तः	आविश्य	आ + विश् (विश प्रवेशने) + ल्यप् ।	
	भूतानि	भू (भू सत्तायाम्) + क्त, तानि ।	
	भूत्वा	भू (भू सत्तायाम्) + क्त्वा ।	
	रसः	रस् (रस आस्वादनस्नेहनयोः) + अच् ।	

भावस्पष्टीकरणम् -

अहं धारयामि ।	
अहं कानि धारयामि ?	**अहं भूतानि धारयामि ।**
अहं कथं भूतानि धारयामि ?	**अहम् ओजसा भूतानि धारयामि ।**

अहं **किं कृत्वा** ओजसा भूतानि धारयामि ?	अहम् **आविश्य** ओजसा भूतानि धारयामि ।
अहं **कुत्र** आविश्य ओजसा भूतानि धारयामि ?	अहं **गाम्** आविश्य च ओजसा भूतानि धारयामि ।
अहं गाम् आविश्य च ओजसा भूतानि धारयामि, **पुनः किं करोमि** ?	अहं गाम् आविश्य च ओजसा भूतानि धारयामि, **पुष्णामि** ।
अहं गाम् आविश्य च ओजसा भूतानि धारयामि, **काः** पुष्णामि ?	अहं गाम् आविश्य च ओजसा भूतानि धारयामि, **ओषधीः** पुष्णामि ।
अहं गाम् आविश्य च ओजसा भूतानि धारयामि, **कति** ओषधीः पुष्णामि ?	अहं गाम् आविश्य च ओजसा भूतानि धारयामि, **सर्वाः** ओषधीः पुष्णामि ।
अहं गाम् आविश्य च ओजसा भूतानि धारयामि, **किं कृत्वा** सर्वाः ओषधीः पुष्णामि ?	अहं गाम् आविश्य च ओजसा भूतानि धारयामि, **भूत्वा** सर्वाः ओषधीः पुष्णामि ।
अहं गाम् आविश्य च ओजसा भूतानि धारयामि, **कः** भूत्वा सर्वाः ओषधीः पुष्णामि ?	अहं गाम् आविश्य च ओजसा भूतानि धारयामि, **सोमः** भूत्वा सर्वाः ओषधीः पुष्णामि ?
अहं गाम् आविश्य च ओजसा भूतानि धारयामि, **कीदृशः** सोमः भूत्वा सर्वाः ओषधीः पुष्णामि ?	अहं गाम् आविश्य च ओजसा भूतानि धारयामि, **रसात्मकः** सोमः भूत्वा सर्वाः ओषधीः पुष्णामि ।

तात्पर्यम् - अहं धूलिराशितुल्याम् इमां पृथिवीं सर्वदा दृढीकुर्वन् स्वबलेन भूतानि धारयामि । अन्यथा सिकताराशिवत् इयं पृथिवी विच्छिद्येत । एवम् अहमेव रसरूपः चन्द्रः सन् पृथिव्याम् अस्यां जायमानानि सर्वाण्यपि व्रीहिमाषमुद्गादीनि संवर्धयामि ।

अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः ।
प्राणापानसमायुक्तः पचाम्यन्नं चतुर्विधम् ॥१५.१४॥

पदच्छेदः - अहम्, वैश्वानरः, भूत्वा, प्राणिनाम्, देहम्, आश्रितः ।
प्राणापानसमायुक्तः पचामि, अन्नम्, चतुर्विधम् ॥

अन्वयः - अहं प्राणिनां देहम् आश्रितः प्राणापानसमायुक्तः वैश्वानरः भूत्वा चतुर्विधम् अन्नं पचामि ।

पदार्थः - अहम् = अहम्, प्राणिनाम् = देहिनाम्, देहम् = शरीरम्, आश्रितः = स्थितः, प्राणापानसमायुक्तः = प्राण-अपानवायुभ्यां युक्तः, वैश्वानरः = जठराग्निः, भूत्वा = सम्भूय, चतुर्विधम् = चतुष्प्रकारकम्, अन्नम् = आहारम्, पचामि = पाचनं करोमि ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
अहम्	अस्मद् - द. सर्व. प्र. एक. (विशेष्यम्)	प्राणिनाम्	प्राणिन् - न. पुं. ष. बहु.
देहम्	अ. नपुं. द्वि. एक.	आश्रितः	अ. पुं. प्र. एक. (विशेषणम्)
प्राणापानसमायुक्तः	अ. पुं. प्र. एक. (विशेषणम्)	वैश्वानरः	अ. पुं. प्र. एक. (विशेषणम्)
भूत्वा	क्त्वान्तम् अव्ययम्	चतुर्विधम्	अ. नपुं. द्वि. एक.
अन्नम्	अ. नपुं. द्वि. एक.	पचामि	पच् (डुपचष् पाके) पर. कर्तरि लट्. उपु. एक.

व्याकरणम् -

(क) सन्धिः	वैश्वानरो भूत्वा	वैश्वानरः + भूत्वा	विसर्गसन्धिः (सकारः) रेफः उकारः गुणः।
	पचाम्यन्नम्	पचामि + अन्नम्	यण्सन्धिः।
(ख) समासः	प्राणापानसमायुक्तः	प्राणश्च अपानश्च प्राणापानौ - द्वन्द्वसमासः।	
		प्राणापानाभ्यां समायुक्तः प्राणापानसमायुक्तः - तृतीयातत्पुरुषः।	
	चतुर्विधम्	चतस्रो विधाः यस्य तत् चतुर्विधम् - बहुव्रीहिः।	
(ग) कृदन्तः	भूत्वा	भू (भू सत्तायाम्) + क्त्वा।	
	आश्रितः	आ + श्रि (श्रिञ् सेवायाम्) + क्त (कर्तरि)।	
	युक्तः	युज् (युजिर् योगे) + क्त (कर्तरि)।	
	अन्नम्	अद् (अद भक्षणे) + क्त (कर्तरि)।	
(घ) तद्धितान्तः	वैश्वानरः	विश्वानरः + अण् (विश्व + नरः, पूर्वपदस्य दीर्घः)।	
	प्राणिनाम्	प्राण + इनि, तेषाम् (प्राणाः एषाम् एषु वा सन्ति इति)।	

भावस्पष्टीकरणम् -

अहं पचामि।	
अहं किं पचामि ?	**अहम् अन्नं पचामि।**
अहं कतिविधम् अन्नं पचामि ?	**अहं चतुर्विधम् अन्नं पचामि।**
अहं किं कृत्वा चतुर्विधम् अन्नं पचामि ?	**अहं भूत्वा चतुर्विधम् अन्नं पचामि।**
अहं कः भूत्वा चतुर्विधम् अन्नं पचामि ?	**अहम् आश्रितः भूत्वा चतुर्विधम् अन्नं पचामि।**
अहं कम् आश्रितः भूत्वा चतुर्विधम् अन्नं पचामि ?	**अहं देहम् आश्रितः भूत्वा चतुर्विधम् अन्नं पचामि।**

अहं **केषां** देहम् आश्रितः भूत्वा चतुर्विधम् अन्नं पचामि ?	अहं **प्राणिनां** देहम् आश्रितः भूत्वा चतुर्विधम् अन्नं पचामि ।
अहं प्राणिनां देहम् आश्रितः **पुनः कः** भूत्वा चतुर्विधम् अन्नं पचामि ?	अहं प्राणिनां देहम् आश्रितः **वैश्वानरः** भूत्वा चतुर्विधम् अन्नं पचामि ।
अहं प्राणिनां देहम् आश्रितः **कीदृशः** वैश्वानरः भूत्वा चतुर्विधम् अन्नं पचामि ?	अहं प्राणिनां देहम् आश्रितः **प्राणापानसमायुक्तः** वैश्वानरः भूत्वा चतुर्विधम् अन्नं पचामि ।

तात्पर्यम् - देहिनः यद् अन्नं खादन्ति तत् भक्ष्यं भोज्यं लेह्यं चोष्यं चेति चतुर्विधं वर्तते । तत्र अपूपादि भक्ष्यं, पायसादि भोज्यं, गुडादि लेह्यम्, इक्षुदण्डादि च चोष्यम् इति विवेकः । चेतनानाम् इदं चतुर्विधमपि अन्नम् अहं जठराग्निः भूत्वा प्राणवायुम् अपानवायुं च अवलम्ब्य सम्यक् जीर्णीकरोमि ।

सर्वस्य चाहं हृदि सन्निविष्टो मत्तः स्मृतिर्ज्ञानमपोहनं च ।
वेदैश्च सर्वैरहमेव वेद्यो वेदान्तकृद्वेदविदेव चाहम् ॥१५.१५॥

पदच्छेदः - सर्वस्य, च, अहम्, हृदि, सन्निविष्टः, मत्तः, स्मृतिः, ज्ञानम्, अपोहनम्, च ।
वेदैः, च, सर्वैः, अहम्, एव, वेद्यः, वेदान्तकृत्, वेदवित्, एव, च, अहम् ॥

अन्वयः - अहं सर्वस्य च हृदि सन्निविष्टः, मत्तः एव स्मृतिः ज्ञानम् अपोहनं च। सर्वैः वेदैः च अहम् एव वेद्यः वेदान्तकृत् वेदवित् च ।

पदार्थः - अहम् = अहम् (परमात्मा), सर्वस्य = सर्वेषां प्राणिनाम्, च = च, हृदि = हृदये, सन्निविष्टः = संस्थितः, मत्तः = मत्प्रभावात्, एव = एव, स्मृतिः = स्मरणम्, ज्ञानम् = लौकिक-अलौकिकं च ज्ञानम् (बोधः), अपोहनं च = शङ्कानिवारणम् च, सर्वैः = सकलाभिः, वेदैः = श्रुतिभिः, च = च, अहम् एव वेद्यः = परमात्मा एव ज्ञातव्यः, वेदान्तकृत् = वेदानां तत्त्वस्य निर्णायकः, वेदवित् = वेदानां ज्ञाता च ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
अहम्	अस्मद् - द. सर्व. प्र. एक. (विशेष्यम्)	सर्वस्य	अ. सर्व. पुं. ष. एक. (विशेषणम्)
च	अव्ययम्	हृदि	हृद् - द. नपुं. स. एक.
सन्निविष्टः	अ पुं. प्र. एक. (विशेषणम्)	मत्तः	अव्ययम्
एव	अव्ययम्	स्मृतिः	इ. स्त्री. प्र. एक.

ज्ञानम्	अ नपुं. प्र. एक.	अपोहनम्	अ नपुं. प्र. एक.
सर्वैः	अ पुं. तृ. बहु. (विशेषणम्)	वेदैः	अ पुं. तृ. बहु. (विशेष्यम्)
वेद्यः	अ पुं. प्र. एक. (विशेषणम्)	वेदान्तकृत्	वेदान्तकृत् - त. पुं. प्र. एक. (विशेषणम्)
वेदवित्	वेदवित् - त. पुं. प्र. एक. (विशेषणम्)		

व्याकरणम् -

(क) सन्धिः	चाहम्	च + अहम्	सवर्णदीर्घसन्धिः ।
	सन्निविष्टो मत्तः	सन्निविष्टः + मत्तः	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः ।
	स्मृतिर्ज्ञानम्	स्मृतिः + ज्ञानम्	विसर्गसन्धिः (सकारः) (रेफः) ।
	वेदैश्च	वेदैः + च	विसर्गसन्धिः (सकारः) श्चुत्वम् ।
	सर्वैरहम्	सर्वैः + अहम्	विसर्गसन्धिः (रेफः) ।
	वेद्यो वेदान्तकृत्	वेद्यः + वेदान्तकृत्	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः ।
	वेदान्तकृद्वेदविद्	वेदान्तकृत् + वेदविद्	जश्त्वसन्धिः ।
	वेदविदेव	वेदवित् + एव	जश्त्वसन्धिः ।

(ख) समासः	वेदान्तकृत्	वेदानाम् अन्तः वेदान्तः - षष्ठीतत्पुरुषः ।
		वेदान्तं करोति इति वेदान्तकृत् - कर्तरि क्विप् उपपदसमासश्च ।
	वेदवित्	वेदान् वेत्ति इति वेदवित् - कर्तरि क्विप् उपपदसमासश्च ।
(ग) कृदन्तः	सन्निविष्टः	सम् + नि + विश् (विश प्रवेशने) + क्त (कर्तरि) ।
	स्मृतिः	स्मृ (स्मृ चिन्तायाम्) + क्तिन् ।
	ज्ञानम्	ज्ञा (ज्ञा अवबोधने) + ल्युट् ।
	अपोहनम्	अप + ऊह् (ऊह वितर्के) + ल्युट् ।
	वेदैः	विद् (विद ज्ञाने) + घञ्, तैः ।
	वेद्यः	विद् (विद ज्ञाने) + ण्यत् ।
(घ) तद्धितान्तः	मत्तः	अस्मद् + तसिल् ।

भावस्पष्टीकरणम् -

सन्निविष्टः ।	
कः सन्निविष्टः ?	**अहं सन्निविष्टः ।**
अहं कुत्र सन्निविष्टः ?	**अहं हृदि सन्निविष्टः ।**

अहं **कस्य** हृदि सन्निविष्टः ?	अहं **सर्वस्य** हृदि सन्निविष्टः ।
अहं सर्वस्य हृदि सन्निविष्टः, **मत्तः किं भवति** ?	अहं सर्वस्य हृदि सन्निविष्टः, **मत्तः स्मृतिः भवति** ।
अहं सर्वस्य हृदि सन्निविष्टः, मत्तः स्मृतिः **पुनः किं** भवति ?	अहं सर्वस्य हृदि सन्निविष्टः, मत्तः स्मृतिः **ज्ञानं** भवति ।
अहं सर्वस्य हृदि सन्निविष्टः, मत्तः स्मृतिः ज्ञानं **पुनश्च किं** भवति ?	अहं सर्वस्य हृदि सन्निविष्टः, मत्तः स्मृतिः ज्ञानम् **अपोहनं** च भवति ।
वेद्यः ।	
कः वेद्यः ?	**अहम् एव** वेद्यः ।
कीदृशः अहम् एव वेद्यः ?	**वेदान्तकृत्** अहम् एव वेद्यः ।
वेदान्तकृत् **पुनश्च कीदृशः** अहम् एव वेद्यः ?	वेदान्तकृत् **वेदवित् च** अहम् एव वेद्यः ।
कैः वेदान्तकृत् वेदवित् च अहम् एव वेद्यः ?	**वेदैः** वेदान्तकृत् वेदवित् च अहम् एव वेद्यः ।
कति वेदैः वेदान्तकृत् वेदवित् च अहम् एव वेद्यः ?	**सर्वैः** वेदैः वेदान्तकृत् वेदवित् च अहम् एव वेद्यः ।

तात्पर्यम् - अहं समस्तजीवानां हृदये तिष्ठामि । अहमेव स्मृतेः, ज्ञानस्य शङ्कानिवारणस्य च शक्तिं धारयामि । सर्वे वेदाः मामेव ज्ञातुं प्रयतन्ते । अहमेव वेदानां तत्त्वं निर्णयामि, वेदानां ज्ञाता अपि अहमेव अस्मि ।

द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च ।
क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते ॥१५.१६॥

पदच्छेदः - द्वौ, इमौ, पुरुषौ, लोके, क्षरः, च, अक्षरः, एव, च ।
क्षरः, सर्वाणि, भूतानि, कूटस्थः, अक्षरः, उच्यते ॥

अन्वयः - लोके क्षरः च अक्षरः एव च इमौ द्वौ पुरुषौ (स्तः) । सर्वाणि भूतानि क्षरः कूटस्थः अक्षरः उच्यते ।

पदार्थः - लोके = संसारे, क्षरः = नश्वरः, च = तथा, अक्षरः = अविनाशी, एव च = अपि च, इमौ = एतौ, द्वौ = द्विसंख्याकौ, पुरुषौ = प्राणिनौ, सर्वाणि = सकलानि, भूतानि = विकारजातानि, क्षरः = विनाशी, कूटस्थः = शिलाराशिः इव स्थितः, अक्षरः = अविनाशी, उच्यते = कथ्यते ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
लोके	अ. पुं. स. एक.	क्षरः	अ. पुं. प्र. एक.
च	अव्ययम्	अक्षरः	अ. पुं. प्र. एक.
एव	अव्ययम्	इमौ	इदम् - म. सर्व. पुं. प्र. द्विव. (विशेषणम्)
द्वौ	द्वि - सङ्ख्या पुं. प्र. द्विव. (विशेषणम्)	पुरुषौ	अ. पुं. प्र. द्विव. (विशेष्यम्)
सर्वाणि	अ. सर्व. नपुं. प्र. बहु. (विशेषणम्)	भूतानि	अ. नपुं. प्र. बहु. (विशेष्यम्)
कूटस्थः	अ. पुं. प्र. एक.	उच्यते	वच् (वच परिभाषणे) पर. कर्मणि लट्. प्रपु. एक.

व्याकरणम् -

(क) सन्धिः	द्वाविमौ	द्वौ + इमौ	यान्तवान्तादेशसन्धिः ।
	क्षरश्च	क्षरः + च	विसर्गसन्धिः (सकारः) श्चुत्वम् ।
	चाक्षरः	च + अक्षरः	सवर्णदीर्घसन्धिः ।
	अक्षर एव	अक्षरः + एव	विसर्गसन्धिः (लोपः) ।
	कूटस्थोऽक्षरः	कूटस्थः + अक्षरः	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः पूर्वरूपञ्च ।
	अक्षर उच्यते	अक्षरः + उच्यते	विसर्गसन्धिः (लोपः) ।
(ख) समासः	अक्षर	न क्षरः अक्षरः - नञ्तत्पुरुषः ।	
	कूटस्थः	कूटे तिष्ठति इति कूटस्थः - कर्तरि अच्प्रत्ययः उपपदतत्पुरुषः ।	
(ग) कृदन्तः	लोके	लोक् (लोकृ दर्शने) + घञ्, तस्मिन् ।	
	क्षरः	क्षर् (क्षर सञ्चलने) + अच् ।	
	भूतानि	भू (भू सत्तायाम्) + क्त, तानि ।	

भावस्पष्टीकरणम् -

द्वौ (स्तः) ।	
द्वौ कौ (स्तः) ?	**द्वौ पुरुषौ (स्तः) ।**
कौ द्वौ पुरुषौ (स्तः) ?	**इमौ द्वौ पुरुषौ (स्तः) ।**

कुत्र इमौ द्वौ पुरुषौ (स्तः) ?	**लोके** इमौ द्वौ पुरुषौ (स्तः) ।
लोके **कीदृशौ** इमौ द्वौ पुरुषौ (स्तः) ?	लोके **क्षरः च अक्षरः एव च** इमौ द्वौ पुरुषौ (स्तः) ।
उच्यते ।	
कः उच्यते ?	**क्षरः** उच्यते ।
कानि क्षरः उच्यते ?	**भूतानि** क्षरः उच्यते ।
कति भूतानि क्षरः उच्यते ?	**सर्वाणि** भूतानि क्षरः उच्यते ।
सर्वाणि भूतानि क्षरः **पुनः कः** उच्यते ?	सर्वाणि भूतानि क्षरः **अक्षरः** उच्यते ।
सर्वाणि भूतानि क्षरः **कः** अक्षरः उच्यते ?	सर्वाणि भूतानि क्षरः **कूटस्थः** अक्षरः उच्यते ।

तात्पर्यम् - अत्र लोके क्षरः अक्षरः चेति द्वौ पुरुषौ स्तः । तत्र क्षरः पुरुषो नाम महदादिः भूतान्तः सर्वोऽपि राशिः । सः च विनाशी । अक्षरः मायाशब्देन या व्यवह्रियते सा प्रकृतिः । अयं निर्विकारत्वेन स्थितः कारणभागः ।

उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः ।
यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः ॥१५.१७॥

पदच्छेदः - उत्तमः, पुरुषः, तु, अन्यः, परमात्मा, इति, उदाहृतः ।
यः, लोकत्रयम्, आविश्य, बिभर्ति, अव्ययः, ईश्वरः ॥

अन्वयः - उत्तमः पुरुषः तु अन्यः यः परमात्मा इति उदाहृतः (सः) अव्ययः ईश्वरः लोकत्रयम् आविश्य बिभर्ति ।

पदार्थः - उत्तमः = श्रेष्ठः, पुरुषः तु = नरः तु, अन्यः = इतरः, यः = यः, परमात्मा = परब्रह्म, इति = इति, उदाहृतः = अभिवर्णितः, अव्ययः = अविनाशी, ईश्वरः = प्रभुः, लोकत्रयम् = भुवनत्रयम्, आविश्य = प्रविश्य, बिभर्ति = धारयति ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
उत्तमः	अ. पुं. प्र. एक. (विशेषणम्)	पुरुषः	अ. पुं. प्र. एक. (विशेष्यम्)
तु	अव्ययम्	अन्यः	अ. सर्व. पुं. प्र. एक. (विशेषणम्)
यः	यद् - द. सर्व. पुं. प्र. एक. (विशेषणम्)	परमात्मा	परमात्मन् - न. पुं. प्र. एक. (विशेष्यम्)

इति	अव्ययम्	उदाहृतः	अ. पुं. प्र. एक. (विशेषणम्)
अव्ययः	अ. पुं. प्र. एक.	ईश्वरः	अ. पुं. प्र. एक.
लोकत्रयम्	अ. नपुं. द्वि. एक.	आविश्य	ल्यबन्तम् अव्ययम्
बिभर्ति	भृ (डुभृञ् धारणपोषणयोः) पर. कर्तरि लट्. प्रपु. एक.		

व्याकरणम् -

(क) सन्धिः	पुरुषस्तु	पुरुषः + तु	विसर्गसन्धिः (सकारः)।
	त्वन्यः	तु + अन्यः	यण्सन्धिः।
	परमात्मेति	परमात्मा + इति	गुणसन्धिः।
	इत्युदाहृतः	इति + उदाहृतः	यण्सन्धिः।
	यो लोकत्रयम्	यः + लोकत्रयम्	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः।
	बिभर्त्यव्ययः	बिभर्ति + अव्ययः	यण्सन्धिः।
	अव्यय ईश्वरः	अव्ययः + ईश्वरः	विसर्गसन्धिः (लोपः)।
(ख) समासः	परमात्मा	परमश्चासौ आत्मा परमात्मा - कर्मधारयः।	
	लोकत्रयम्	लोकानां त्रयं लोकत्रयम् - षष्ठीतत्पुरुषः।	
	अव्ययः	अविद्यमानः व्ययः यस्य सः अव्ययः - नञ्बहुव्रीहिः।	
(ग) कृदन्तः	उदाहृतः	उद् + आ + हृ (हृञ् हरणे) + क्त (कर्तरि)।	
	आविश्य	आ + विश् (विश प्रवेशने) + ल्यप्।	
	लोकः	लोक् (लोकृ दर्शने) + घञ्।	
(घ) तद्धितान्तः	उत्तमः	अतिशयेन उद् उत्तमः (बहुषु अन्यतमस्मिन् अतिशये तमप्)।	

भावस्पष्टीकरणम् -

अन्यः।	
कः अन्यः ?	**पुरुषः** तु अन्यः।
कीदृशः पुरुषः तु अन्यः ?	**उत्तमः** पुरुषः तु अन्यः।
उत्तमः पुरुषः तु अन्यः, **(सः) किं करोति ?**	उत्तमः पुरुषः तु अन्यः, **(सः) बिभर्ति।**
उत्तमः पुरुषः तु अन्यः, (सः) **कः** बिभर्ति ?	उत्तमः पुरुषः तु अन्यः, (सः) **ईश्वरः** बिभर्ति।
उत्तमः पुरुषः तु अन्यः, **कीदृशः** ईश्वरः बिभर्ति ?	उत्तमः पुरुषः तु अन्यः, **उदाहृतः** ईश्वरः बिभर्ति।

उत्तमः पुरुषः तु अन्यः, **किमिति** उदाहृतः ईश्वरः बिभर्ति ?	उत्तमः पुरुषः तु अन्यः, **परमात्मा** इति उदाहृतः ईश्वरः बिभर्ति ।
उत्तमः पुरुषः तु अन्यः, **कः** परमात्मा इति उदाहृतः ईश्वरः बिभर्ति ?	उत्तमः पुरुषः तु अन्यः, **यः** परमात्मा इति उदाहृतः ईश्वरः बिभर्ति ।
उत्तमः पुरुषः तु अन्यः, यः परमात्मा इति उदाहृतः **पुनः कीदृशः** ईश्वरः बिभर्ति ?	उत्तमः पुरुषः तु अन्यः, यः परमात्मा इति उदाहृतः **अव्ययः** ईश्वरः बिभर्ति ।
उत्तमः पुरुषः तु अन्यः, यः परमात्मा इति उदाहृतः अव्ययः ईश्वरः **किं कृत्वा** बिभर्ति ?	उत्तमः पुरुषः तु अन्यः, यः परमात्मा इति उदाहृतः अव्ययः ईश्वरः **आविश्य** बिभर्ति ।
उत्तमः पुरुषः तु अन्यः, यः परमात्मा इति उदाहृतः अव्ययः ईश्वरः **किम्** आविश्य बिभर्ति ?	उत्तमः पुरुषः तु अन्यः, यः परमात्मा इति उदाहृतः अव्ययः ईश्वरः **लोकत्रयम्** आविश्य बिभर्ति ।

तात्पर्यम् - क्षराक्षराभ्याम् उभाभ्याम् अपि भिन्नः अन्यः कश्चित् पुरुषः वर्तते । सः उत्तमः पुरुषः । सः एव परमात्मा यः त्रीन् अपि लोकान् व्याप्य तान् धारयति । एवं कार्यभूतः पदार्थः महदादिः विनाशी (क्षरः) पुरुषः । कारणीभूता प्रकृतिः अविनाशी (अक्षरः) पुरुषः । ताभ्यां व्यतिरिक्तः उत्तमः पदार्थः परमात्मा इति भागत्रयम् ।

यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तमः ।
अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः ॥१५.१८॥

पदच्छेदः - यस्मात्, क्षरम्, अतीतः, अहम्, अक्षरात्, अपि, च, उत्तमः ।
अतः, अस्मि, लोके, वेदे, च, प्रथितः, पुरुषोत्तमः ॥

अन्वयः - यस्मात् अहं क्षरम् अतीतः अक्षरात् अपि च उत्तमः अतः लोके वेदे च पुरुषोत्तमः प्रथितः अस्मि ।

पदार्थः - यस्मात् = यतः, अहम् = अहम्, क्षरम् = क्षरपुरुषम्, अतीतः = अतिक्रान्तः, अक्षरात् = अक्षरपुरुषात्, अपि च = अपि च, उत्तमः = अतिशयितः, अतः = तस्मात्, लोके = प्रपञ्चे, वेदे च = वेदे अपि, पुरुषोत्तमः = पुरुषोत्तमः इति, प्रथितः = प्रसिद्धः, अस्मि = भवामि ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
यस्मात्	यद् - द. सर्व. पुं. पं. एक. (विशेषणम्)	अहम्	अस्मद् - द. सर्व. प्र. एक. (विशेष्यम्)

क्षरम्	अ. पुं. द्वि. एक.	अतीतः	अ. पुं. प्र. एक. (विशेषणम्)
अक्षरात्	अ. पुं. पं. एक.	अपि	अव्ययम्
च	अव्ययम्	उत्तमः	अ. पुं. प्र. एक. (विशेषणम्)
अतः	अव्ययम्	लोके	अ. पुं. स. एक.
वेदे	अ. पुं. स. एक.	पुरुषोत्तमः	अ. पुं. प्र. एक. (विशेषणम्)
प्रथितः	अ. पुं. प्र. एक. (विशेषणम्)	अस्मि	अस् (अस भुवि) पर. कर्तरि लट्. उपु. एक.

व्याकरणम् -

(क) सन्धिः	अतीतोऽहम्	अतीतः + अहम्	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः पूर्वरूपं च ।
	अक्षरादपि	अक्षरात् + अपि	जश्त्वसन्धिः ।
	चोत्तमः	च + उत्तमः	गुणसन्धिः ।
	अतोऽस्मि	अतः + अस्मि	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः पूर्वरूपञ्च ।
(ख) समासः	अक्षरात्	न क्षरः अक्षरः, तस्मात् - नञ्तत्पुरुषः ।	
	पुरुषोत्तमः	पुरुषेषु उत्तमः पुरुषोत्तमः - सप्तमीतत्पुरुषः ।	
(ग) कृदन्तः	क्षरम्	क्षर् (क्षर सञ्चलने) + अच् तम् ।	
	अतीतः	अति + इ (इण् गतौ) + क्त (कर्तरि) ।	
	लोके	लोक् (लोकृ दर्शने) + घञ्, तस्मिन् ।	
	वेदे	विद् (विद ज्ञाने) + घञ्, तस्मिन् ।	
	प्रथितः	प्रथ् (प्रथ प्रख्याने) + क्त (कर्तरि) ।	

भावस्पष्टीकरणम् -

अहम् अस्मि ।	
अहं **कीदृशः** अस्मि ?	अहम् **अतीतः** अस्मि ।
अहं **कम्** अतीतः अस्मि ?	अहं **क्षरम्** अतीतः अस्मि ।
अहं क्षरम् अतीतः **पुनः कीदृशः** अस्मि ?	अहं क्षरम् अतीतः **उत्तमः च** अस्मि ।
अहं क्षरम् अतीतः **कस्मात्** उत्तमः च अस्मि ?	अहं क्षरम् अतीतः **अक्षरात्** अपि च उत्तमः अस्मि ।

कस्मात् अहं क्षरम् अतीतः अक्षरात् अपि च उत्तमः अस्मि ?	**यस्मात्** अहं क्षरम् अतीतः अक्षरात् अपि च उत्तमः अस्मि।
यस्मात् अहं क्षरम् अतीतः अक्षरात् अपि च उत्तमः **अतः कीदृशः** अस्मि ?	यस्मात् अहं क्षरम् अतीतः अक्षरात् अपि च उत्तमः **अतः प्रथितः** अस्मि।
यस्मात् अहं क्षरम् अतीतः अक्षरात् अपि च उत्तमः अतः **कीदृशः** प्रथितः अस्मि ?	यस्मात् अहं क्षरम् अतीतः अक्षरात् अपि च उत्तमः अतः **पुरुषोत्तमः** प्रथितः अस्मि।
यस्मात् अहं क्षरम् अतीतः अक्षरात् अपि च उत्तमः अतः **कुत्र** पुरुषोत्तमः प्रथितः अस्मि ?	यस्मात् अहं क्षरम् अतीतः अक्षरात् अपि च उत्तमः अतः **लोके** पुरुषोत्तमः प्रथितः अस्मि।
यस्मात् अहं क्षरम् अतीतः अक्षरात् अपि च उत्तमः अतः लोके **पुनः कुत्र** पुरुषोत्तमः प्रथितः अस्मि ?	यस्मात् अहं क्षरम् अतीतः अक्षरात् अपि च उत्तमः अतः लोके **वेदे च** पुरुषोत्तमः प्रथितः अस्मि।

तात्पर्यम् - अहं नित्यमुक्तत्वात् क्षरं पुरुषम् अतिक्रान्तः इति पुरुषः अस्मि। नियामकत्वात् अक्षरपुरुषात् उत्तमः इति उत्तमः अपि अस्मि। तदेवं पुरुषश्च उत्तमश्च इति हेतोः अहं मनुष्यलोके वेदे च पुरुषोत्तमः इति प्रसिद्धिं गतोऽस्मि।

यो मामेवमसम्मूढो जानाति पुरुषोत्तमम्।
स सर्वविद्भजति मां सर्वभावेन भारत॥१५.१९॥

पदच्छेदः - यः, माम्, एवम्, असम्मूढः, जानाति, पुरुषोत्तमम्।
सः, सर्ववित्, भजति, माम्, सर्वभावेन, भारत॥

अन्वयः - भारत ! यः असम्मूढः एवं मां पुरुषोत्तमं जानाति सः मां सर्ववित् सर्वभावेन भजति।

पदार्थः - भारत = अर्जुन, यः = यः मानवः, असम्मूढः = विवेकी, एवम् = इत्थम्, माम् = माम्, पुरुषोत्तमम् = उत्तमपुरुषम्, जानाति = वेत्ति, सः = सः मानवः, माम् = माम्, सर्ववित् = सर्वज्ञः, सर्वभावेन = सर्वात्मना, भजति = सेवते।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
भारत	अ. पुं. सम्बो. एक.	यः	यद् - द. सर्व. पुं. प्र. एक. (विशेषणम्)
असम्मूढः	अ. पुं. प्र. एक. (विशेष्यम्)	एवम्	अव्ययम्

माम्	अस्मद् - द. सर्व. द्वि. एक. (विशेष्यम्)	पुरुषोत्तमम्	अ. पुं. द्वि. एक. (विशेषणम्)
जानाति	ज्ञा (ज्ञा - अवबोधने) पर. कर्तरि लट्. प्रपु. एक.	सः	तद् - द. सर्व. पुं. प्र. एक. (विशेषणम्)
सर्ववित्	सर्ववित् - त. पुं. प्र. एक. (विशेषणम्)	सर्वभावेन	अ. पुं. तृ. एक.
भजति	भज् (भज - सेवायाम्) पर. कर्तरि लट्. प्रपु. एक.		

व्याकरणम् -

(क) सन्धिः	यो माम्	यः + माम्	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः।
	असम्मूढो जानाति	असम्मूढः + जानाति	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः।
	स सर्ववित्	सः + सर्ववित्	विसर्गसन्धिः (लोपः)।
	सर्वविद्भजति	सर्ववित् + भजति	जश्त्वसन्धिः।
(ख) समासः	असम्मूढः	न सम्मूढः असम्मूढः - नञ्तत्पुरुषसमासः।	
	पुरुषोत्तमम्	पुरुषेषु उत्तमः पुरुषोत्तमः, तम् - सप्तमीतत्पुरुषः।	
	सर्ववित्	सर्वं वेत्ति इति सर्ववित् - कर्तरि क्विप् उपपदसमासश्च।	
	सर्वभावेन	सर्वः भावः सर्वभावः, तेन - कर्मधारयः।	
(ग) कृदन्तः	सम्मूढः	सम् + मुह् (मुह वैचित्ये) + क्त (कर्तरि)।	
(घ) तद्धितान्तः	भारत	भरत + अण् (भरतस्य अपत्यं पुमान् इत्यर्थे)।	

भावस्पष्टीकरणम् -

जानाति।	
कः जानाति ?	**यः** जानाति।
कीदृशः यः जानाति ?	**असम्मूढः** यः जानाति।
असम्मूढः यः **कं** जानाति ?	असम्मूढः यः **मां** जानाति।
असम्मूढः यः **कीदृशं** मां जानाति ?	असम्मूढः यः **पुरुषोत्तमं** मां जानाति।
असम्मूढः यः **कथं** पुरुषोत्तमं मां जानाति ?	असम्मूढः यः **एवं** मां पुरुषोत्तमं जानाति।

असम्मूढः यः एवं मां पुरुषोत्तमं जानाति सः **किं करोति** ?	असम्मूढः यः एवं मां पुरुषोत्तमं जानाति सः **भजति** ।
असम्मूढः यः एवं मां पुरुषोत्तमं जानाति **कीदृशः** सः भजति ?	असम्मूढः यः एवं मां पुरुषोत्तमं जानाति **सर्ववित्** सः भजति ।
असम्मूढः यः एवं मां पुरुषोत्तमं जानाति सर्ववित् सः **कं** भजति ?	असम्मूढः यः एवं मां पुरुषोत्तमं जानाति सर्ववित् सः **मां** भजति ।
असम्मूढः यः एवं मां पुरुषोत्तमं जानाति सर्ववित् सः मां **केन** भजति ?	असम्मूढः यः एवं मां पुरुषोत्तमं जानाति सर्ववित् सः मां **सर्वभावेन** भजति ।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**भारत** !

तात्पर्यम् - अर्जुन ! यः मानवः विवेकी सन् एवं मां पुरुषोत्तमं वेत्ति सः मानवः सर्वज्ञः । सः सर्वप्रकारेण मामेव सेवते ।

इति गुह्यतमं शास्त्रमिदमुक्तं मयानघ ।
एतद् बुद्ध्वा बुद्धिमान्स्यात्कृतकृत्यश्च भारत ॥१५.२०॥

पदच्छेदः - इति, गुह्यतमम्, शास्त्रम्, इदम्, उक्तम्, मया, अनघ ।
एतत्, बुद्ध्वा, बुद्धिमान्, स्यात्, कृतकृत्यः, च, भारत ॥

अन्वयः - अनघ ! मया इदं गुह्यतमं शास्त्रम् इति उक्तम् । भारत ! एतत् बुद्ध्वा बुद्धिमान् कृतकृत्यः च स्यात् ।

पदार्थः - अनघ = अपाप, मया = मया, इदम् = एतत्, गुह्यतमम् = अतिरहस्यम्, शास्त्रम् = अबाधितार्थप्रतिपादकं वाक्यम् (शासनम्), इति = एवम्, उक्तम् = प्रतिपादितम्, भारत = अर्जुन, एतत् = इदम्, बुद्ध्वा = ज्ञात्वा, बुद्धिमान् = विवेकवान्, कृतकृत्यः = कृतार्थः, च = च, स्यात् = भवेत् ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
अनघ	अ. पुं. सम्बो. एक.	मया	अस्मद् - द. सर्व. तृ. एक.
इदम्	इदम् - म. सर्व. नपुं. प्र. एक. (विशेषणम्)	गुह्यतमम्	अ. नपुं. प्र. एक. (विशेषणम्)
शास्त्रम्	अ. नपुं. प्र. एक. (विशेष्यम्)	इति	अव्ययम्
उक्तम्	अ. नपुं. प्र. एक. (विशेषणम्)	भारत	अ. पुं. सम्बो. एक.

एतत्	एतत् - त. सर्व. नपुं. द्वि. एक. (विशेषणम्)	बुद्ध्वा	क्त्वान्तम् अव्ययम्
बुद्धिमान्	बुद्धिमत् - त. पुं. प्र. एक. (विशेषणम्)	कृतकृत्यः	अ. पुं. प्र. एक. (विशेषणम्)
च	अव्ययम्	स्यात्	अस् (अस भुवि) पर. कर्तरि विधिलिङ्. प्रपु. एक.

व्याकरणम् -

(क) सन्धिः	मयानघ	मया + अनघ	पूर्वरूपसन्धिः ।
	एतद् बुद्ध्वा	एतत् + बुद्ध्वा	जश्त्वसन्धिः ।
	कृतकृत्यश्च	कृतकृत्यः + च	विसर्गसन्धिः (सकारः) श्चुत्वम् ।
(ख) समासः	अनघ	निर्गतः अघः यस्मात् सः अनघः - नञ्बहुव्रीहिः ।	
	कृतकृत्यः	कृतं कृत्यं येन सः कृतकृत्यः - बहुव्रीहिः ।	
(ग) कृदन्तः	गुह्यम्	गुह् (गुहू संवरणे) + क्यप् ।	
	शास्त्रम्	शास् (शासु अनुशिष्टौ) + ष्ट्रन् ।	
	उक्तम्	वच् (वच परिभाषणे) + क्त (कर्मणि) ।	
	बुद्ध्वा	बुध् (बुध अवगमने) + क्त्वा ।	
	कृतकृत्यः	कृत + कृ (डुकृञ् करणे) + ण्यत् ।	
(घ) तद्धितान्तः	गुह्यतमम्	अतिशयेन गुह्यं गुह्यतमम् (बहुषु अन्यतमस्मिन् अतिशये तमप्) ।	
	बुद्धिमान्	बुद्धि + मतुप्, बुद्धिः अस्य अस्मिन् वा अस्ति इति ।	
	भारत	भरत + अण्, (अपत्यार्थे) भरतस्य अपत्यं पुमान्, तत्सम्बुद्धौ ।	

भावस्पष्टीकरणम् -

उक्तम् ।	
किम् उक्तम् ?	**शास्त्रम् इति उक्तम् ।**
कीदृशं शास्त्रम् इति उक्तम् ?	**गुह्यतमं शास्त्रम् इति उक्तम् ।**
किं गुह्यतमं शास्त्रम् इति उक्तम् ?	**इदं गुह्यतमं शास्त्रम् इति उक्तम् ।**
केन इदं गुह्यतमं शास्त्रम् इति उक्तम् ?	**मया इदं गुह्यतमं शास्त्रम् इति उक्तम् ।**
स्यात् ।	

कः स्यात् ?	**बुद्धिमान्** स्यात् ।
कीदृशः बुद्धिमान् स्यात् ?	**कृतकृत्यः** बुद्धिमान् स्यात् ।
किं कृत्वा कृतकृत्यः बुद्धिमान् स्यात् ?	**बुद्ध्वा** कृतकृत्यः बुद्धिमान् स्यात् ।
किं बुद्ध्वा कृतकृत्यः बुद्धिमान् स्यात् ?	**एतत्** बुद्ध्वा बुद्धिमान् कृतकृत्यः च स्यात् ।
अस्मिन् श्लोके **सम्बोधनपदे** के ?	**अनघ भारत** च !

तात्पर्यम् - हे अपाप (अर्जुन) ! एतत् अतिरहस्यं शास्त्रम् इति मया प्रतिपादितम् । भारत ! इदं शास्त्रं ज्ञात्वा भवान् विवेकवान् कृतार्थः च भवेत् ।

ॐ तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे
पुरुषोत्तमयोगो नाम पञ्चदशोऽध्यायः ॥१५॥

पञ्चदशाध्यायस्य सारः

अस्य अध्यायस्य नाम पुरुषोत्तमयोगः इति। अध्यायस्य आरम्भे एव संसारः कश्चित् अश्वत्थवृक्षः इति रूपकं योजितम् अस्ति। एतस्य संसाररूपवृक्षस्य मूलं पुरुषोत्तमः, सः सर्वस्मात् उपरि तिष्ठति इत्यतः एषः वृक्षः ऊर्ध्वमूलः इति उक्तमस्ति। अस्य सत्त्वरजस्तमोगुणैः वृद्धिं गताः सांसारिकविषयरूपैः अङ्कुरैः युताः शाखाः सन्ति। वेदाः अस्य पर्णानि सन्ति। विषयरूपाः शाखाः च अधः भूलोकं यावत् प्रसृताः सन्ति। तादृशः अश्वत्थवृक्षः नश्वरोऽपि प्रवाहवत् अनश्वरः कथ्यते। 'मोहाभिमानकामनाविवर्जिताः, सङ्गदोषरहिताः, आत्मनिष्ठाः, द्वन्द्वातीताः च भक्ताः तादृशं संसाररूपं वृक्षम् असङ्गरूपेण शस्त्रेण छित्वा परमं पदं प्राप्नुवन्ति' इति भगवता उक्तम् अस्ति।

अनन्तरं भगवान् उपदिशति - "परमात्मनः एव अंशः यः जीवात्मा वर्तते सः इन्द्रियाणां मनसः च साहाय्येन विषयान् उपभुङ्क्ते। पुरातनं शरीरं विहाय शरीरान्तरं गच्छन्तं, तच्छरीरे तिष्ठन्तम्, इन्द्रियैः विषयान् अनुभवन्तं वा एनं जीवं मूढजनाः कदापि ज्ञातुं न शक्नुवन्ति। परन्तु ज्ञानिनः तम् अवश्यं जानन्ति। सूर्ये चन्द्रे अग्नौ च वर्तमानं यत् तेजः तत् मम एव वर्तते। अहमेव इमां पृथिवीं सर्वदा दृढीकुर्वन् स्वबलेन भूतानि धारयामि। अहमेव रसरूपः सोमः भूत्वा सर्वाणि अपि सस्यानि पोषयामि। अहं जठराग्निः भूत्वा प्राणवायुम् अपानवायुं च अवलम्ब्य चतुर्विधमपि अन्नम् सम्यक् जीर्णीकरोमि। अहं समस्तजीवानां हृदये तिष्ठामि। स्मृतेः, ज्ञानस्य शङ्कानिवारणस्य च या शक्तिः वर्तते सा मम एव अस्ति। सर्वे वेदाः मामेव ज्ञातुं प्रयतन्ते। अहं च वेदज्ञाता, वेदान्तकर्ता'' इति।

अध्यायस्य अन्ते भगवान् वदति - "लोके द्वौ पुरुषौ वर्तेते। तयोः क्षरः पुरुषः नाम विकारजातानि सकलानि शरीराणि। तथा मायाशब्देन या व्यवह्रियते सा प्रकृतिः अर्थात् जीवात्मा इति अविनाशी अक्षरः पुरुषः। पुनः क्षराक्षराभ्याम् उभाभ्याम् अपि भिन्नः यः पुरुषः सः एव पुरुषोत्तमः। सः एव परमात्मा यः त्रीन् अपि लोकान् व्याप्य तान् धारयति। तादृशं मां पुरुषोत्तमं यः जानाति सः एव सर्वज्ञः भवति'' इति।

****

अथ षोडशोऽध्यायः

दैवासुरसम्पद्विभागयोगः

श्रीभगवानुवाच - अभयं सत्त्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः ।
दानं दमश्च यज्ञश्च स्वाध्यायस्तप आर्जवम् ॥१६.१॥
अहिंसा सत्यमक्रोधस्त्यागः शान्तिरपैशुनम् ।
दया भूतेष्वलोलुप्त्वं मार्दवं ह्रीरचापलम् ॥१६.२॥
तेजः क्षमा धृतिः शौचमद्रोहो नातिमानिता ।
भवन्ति सम्पदं दैवीमभिजातस्य भारत ॥१६.३॥

पदच्छेदः -

श्रीभगवान्, उवाच - अभयम्, सत्त्वसंशुद्धिः, ज्ञानयोगव्यवस्थितिः ।
दानम्, दमः, च, यज्ञः, च, स्वाध्यायः, तपः, आर्जवम् ॥
अहिंसा, सत्यम्, अक्रोधः, त्यागः, शान्तिः, अपैशुनम् ।
दया, भूतेषु, अलोलुप्त्वम्, मार्दवम्, ह्रीः, अचापलम् ॥
तेजः, क्षमा, धृतिः, शौचम्, अद्रोहः, न, अतिमानिता ।
भवन्ति, सम्पदम्, दैवीम्, अभिजातस्य, भारत ॥

अन्वयः - भारत ! दैवीं सम्पदम् अभिजातस्य अभयं सत्त्वसंशुद्धिः ज्ञानयोगव्यवस्थितिः दानं दमः च यज्ञः स्वाध्यायः तपः आर्जवम् अहिंसा सत्यम् अक्रोधः त्यागः शान्तिः अपैशुनम् भूतेषु दया अलोलुप्त्वम् मार्दवम् ह्रीः अचापलम् तेजः क्षमा धृतिः शौचम् अद्रोहः न अतिमानिता च भवन्ति ।

पदार्थः - भारत = अर्जुन, दैवीम् = देवसम्बन्धिनीम्, सम्पदम् = सम्पत्तिम्, अभिजातस्य = अभिमुखीभूय उत्पन्नस्य, अभयम् = अभीरुत्वम्, सत्त्वसंशुद्धिः = अन्तःकरणनैर्मल्यम्, ज्ञानयोगव्यवस्थितिः = अवबोधनैकाग्रतासम्पादनम्, दानम् = वितरणम्, दमः = बाह्येन्द्रियनिग्रहः, यज्ञः च = यागः अपि, स्वाध्यायः = वेदाध्ययनम्, तपः = विविधः नियमः, आर्जवम् = ऋजुत्वम्, अहिंसा = पीडावर्जनम्, सत्यम् = यथार्थकथनम्, अक्रोधः = कोपाभावः, त्यागः = समर्पणम्, शान्तिः = उपशमः, अपैशुनम् = अपिशुनत्वम्, भूतेषु = प्राणिषु, दया = कृपा, अलोलुप्त्वम् = तृष्णाशून्यत्वम्, मार्दवम् = अक्रौर्यम्, ह्रीः = लज्जा, अचापलम् = अचाञ्चल्यम्, तेजः = प्रागल्भ्यम्, क्षमा = सहनम्, धृतिः = धैर्यम्, शौचम् = शुद्धिः, अद्रोहः = अपकारचिन्तनाभावः, न अतिमानिता = अतिमानवर्जनम्, च = च, भवन्ति = वर्तन्ते ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
भारत	अ. पुं. सम्बो. एक.	दैवीम्	ई. स्त्री. द्वि. एक. (विशेषणम्)

सम्पदम्	सम्पद् - द. स्त्री. द्वि. एक. (विशेष्यम्)	अभिजातस्य	अ. पुं. ष. एक. (विशेषणम्)
अभयम्	अ. नपुं. प्र. एक.	सत्त्वसंशुद्धिः	इ. स्त्री. प्र. एक.
ज्ञानयोग-व्यवस्थितिः	इ. स्त्री. प्र. एक.	दानम्	अ. नपुं. प्र. एक.
दमः	अ. पुं. प्र. एक.	यज्ञः	अ. पुं. प्र. एक.
च	अव्ययम्	स्वाध्यायः	अ. पुं. प्र. एक.
तपः	तपस् - सका. नपुं. प्र. एक.	आर्जवम्	अ. नपुं. प्र. एक.
अहिंसा	आ. स्त्री. प्र. एक.	सत्यम्	अ. नपुं. प्र. एक.
अक्रोधः	अ. पुं. प्र. एक.	त्यागः	अ. पुं. प्र. एक.
शान्तिः	इ. स्त्री. प्र. एक.	अपैशुनम्	अ. नपुं. प्र. एक.
भूतेषु	अ. नपुं. स. बहु.	दया	आ. स्त्री. प्र. एक.
अलोलुप्त्वम्	अ. नपुं. प्र. एक.	मार्दवम्	अ. नपुं. प्र. एक.
ह्रीः	ई. स्त्री. प्र. एक.	अचापलम्	अ. नपुं. प्र. एक.
तेजः	तेजस् - सका. नपुं. प्र. एक.	क्षमा	आ. स्त्री. प्र. एक.
धृतिः	इ. स्त्री. प्र. एक.	शौचम्	अ. नपुं. प्र. एक.
अद्रोहः	अ. पुं. प्र. एक.	न	अव्ययम्
अतिमानिता	आ. स्त्री. प्र. एक.	भवन्ति	भू (भू सत्तायाम्) पर. कर्तरि लट्. प्रपु. बहु.

व्याकरणम् -

(क) सन्धिः

सत्त्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः	सत्त्वसंशुद्धिः + ज्ञानयोगव्यवस्थितिः	विसर्गसन्धिः (सकारः) रेफः।
दमश्च	दमः + च	विसर्गसन्धिः (सकारः) श्चुत्वम्।
यज्ञश्च	यज्ञः + च	विसर्गसन्धिः (सकारः) श्चुत्वम्।
स्वाध्यायस्तपः	स्वाध्यायः + तपः	विसर्गसन्धिः (सकारः)।
तप आर्जवम्	तपः + आर्जवम्	विसर्गसन्धिः (लोपः)।
अक्रोधस्त्यागः	अक्रोधः + त्यागः	विसर्गसन्धिः (सकारः)।

	शान्तिरपैशुनम्	शान्तिः + अपैशुनम्	विसर्गसन्धिः (रेफः)।
	भूतेष्वलोलुप्त्वम्	भूतेषु + अलोलुप्त्वम्	यण्सन्धिः।
	ह्रीरचापलम्	ह्रीः + अचापलम्	विसर्गसन्धिः (रेफः)।
	नातिमानिता	न + अतिमानिता	सवर्णदीर्घसन्धिः।
(ख) समासः	अभयम्	न भयम् अभयम् - नञ्तत्पुरुषः।	
	सत्त्वसंशुद्धिः	सत्त्वस्य संशुद्धिः सत्त्वसंशुद्धिः - षष्ठीतत्पुरुषः।	
	ज्ञानयोगव्यवस्थितिः	ज्ञानस्य योगः ज्ञानयोगः - षष्ठीतत्पुरुषः।	
		ज्ञानयोगे व्यवस्थितिः - सप्तमीतत्पुरुषः।	
	अहिंसा	न हिंसा अहिंसा - नञ्तत्पुरुषः।	
	अक्रोधः	न क्रोधः अक्रोधः - नञ्तत्पुरुषः।	
	अपैशुनम्	न पैशुनम् अपैशुनम् - नञ्तत्पुरुषः।	
	अलोलुप्त्वम्	न लोलुप्त्वम् अलोलुप्त्वम् - नञ्तत्पुरुषः।	
	अचापलम्	न चापलम् अचापलम् - नञ्तत्पुरुषः।	
	अद्रोहः	न द्रोहः अद्रोहः - नञ्तत्पुरुषः।	
(ग) कृदन्तः	भयम्	भी (ञिभी भये) + अच् (अपादाने)।	
	शुद्धिः	शुध् (शुध शौचे) + क्तिन्।	
	ज्ञानम्	ज्ञा (ज्ञा अवबोधने) + ल्युट्।	
	योगः	युज् (युजिर् योगे) + घञ् (भावे)।	
	व्यवस्थितिः	वि + अव + स्था (ष्ठा गतिनिवृत्तौ) + क्तिन्।	
	दानम्	दा (डुदाञ् दाने) + ल्युट्।	
	दमः	दम् (दमु उपशमे) + घञ्।	
	क्रोधः	क्रुध् (क्रुध क्रोधे) + घञ् (भावे)।	
	त्यागः	त्यज् (त्यज हानौ) + घञ्।	
	शान्तिः	शम् (शमु उपशमने) + क्तिन्।	
	भूतेषु	भू (भू सत्तायाम्) + क्त (कर्तरि), तेषु।	
	धृतिः	धृ (धृञ् धारणे) + क्तिन्।	
	द्रोहः	द्रुह् (द्रुह जिघांसायाम्) + घञ्।	
	अतिमानिन्	अति + मान् (मान पूजायाम्) + णिनि।	
	अभिजातस्य	अभि + ज़न् (जनी प्रादुर्भावे) + क्त (कर्तरि), तस्य।	
(घ) तद्धितान्तः	आर्जवम्	ऋजुः + अण् (ऋजोः भावः) (भावे अण्)।	
	सत्यम्	सत् + यत् (सत्सु भवम्)।	

	पैशुनम्	पिशुनः + अण्, पिशुनस्य भावः (भावे अण्) ।
	लोलुप्त्वम्	लोलुपस्य भावः लोलुपत्वम् (भावार्थे त्वप्रत्ययः) ।
	मार्दवम्	मृदुः + अण् (मृदोः भावः) (भावे अण्) ।
	चापलम्	चपलः + अण् (चपलस्य भावः) (भावे अण्) ।
	शौचम्	शुचिः + अण् (शुचेः भावः) (भावे अण्) ।
	अतिमानिता	अतिमानिन् + तल् (अतिमानिनः भावः) ।
	दैवीम्	देवः + अण् (दैवम्) + ङीप्, ताम् (देवानाम् इयम् दैवी) (इदमर्थे अण् स्त्रीत्वे च ङीप्) ।
	भारत	भरत + अण् (भरतस्य अपत्यं पुमान्) ।
(ङ) सुबन्तः	ह्रीः	स्त्रीलिङ्गे ह्री शब्दात् प्रथमा-एकवचने विसर्गस्य लोपो न भवति। एकाक्षरशब्दत्वात् ।

भावस्पष्टीकरणम् -

भवन्ति ।	
कस्य भवन्ति ?	**अभिजातस्य** भवन्ति ।
काम् अभिजातस्य भवन्ति ?	**सम्पदम्** अभिजातस्य भवन्ति ।
कीदृशीं सम्पदम् अभिजातस्य भवन्ति ?	**दैवीं** सम्पदम् अभिजातस्य भवन्ति ।
दैवीं सम्पदम् अभिजातस्य **कानि (लक्षणानि)** भवन्ति ?	दैवीं सम्पदम् अभिजातस्य **अभयं सत्त्वसंशुद्धिः ज्ञानयोगव्यवस्थितिः दानं दमः च यज्ञः स्वाध्यायः तपः आर्जवम् अहिंसा सत्यम् अक्रोधः त्यागः शान्तिः अपैशुनं भूतेषु दया अलोलुप्त्वं मार्दवं ह्रीः अचापलं तेजः क्षमा धृतिः शौचम् अद्रोहः न अतिमानिता च** भवन्ति ।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**भारत !**

तात्पर्यम् - भारत ! दिव्यसम्पदां प्राप्तस्य मनुष्यस्य लक्षणेषु निर्भयता, अन्तःकरणस्य शुद्धता, ज्ञानयोगयोः दृढस्थितिः, सात्त्विकः उत्सर्गः, इन्द्रियाणां नियमनं, यज्ञः, स्वाध्यायः, कर्तव्यसम्पादनाय कष्टसहनात्मकं तपः, मनसः वाचश्च सरलता, अहिंसा, सत्यवादिता, क्रोधाभावः, त्यागः, शान्तिः, पिशुनतायाः अभावः, प्राणिषु दया, लोभाभावः, अन्तःकरणस्य कोमलता, अकार्ये लज्जा, चञ्चलतायाः अभावः, तेजस्विता, क्षमा, धैर्यं, पावनता, वैरस्य अभावः, मानं प्रतिलिप्सायाः अभावः - एतानि प्रमुखानि लक्षणानि सन्ति ।

दम्भो दर्पोऽभिमानश्च क्रोधः पारुष्यमेव च।
अज्ञानं चाभिजातस्य पार्थ सम्पदमासुरीम् ॥१६.४॥

पदार्थः - दम्भः, दर्पः, अभिमानः, च, क्रोधः, पारुष्यम्, एव, च।
अज्ञानम्, च, अभिजातस्य, पार्थ, सम्पदम्, आसुरीम् ॥

अन्वयः - पार्थ ! आसुरीं सम्पदम् अभिजातस्य दम्भः दर्पः अभिमानः च क्रोधः पारुष्यम् अज्ञानम् एव च (भवन्ति)।

पदार्थः - पार्थ = अर्जुन, आसुरीम् = राक्षसीम्, सम्पदम् = सम्पत्तिम्, अभिजातस्य = अभिमुखीभूय सम्भूतस्य, दम्भः = आडम्बरः (धार्मिकतया आत्मनः ख्यापनम्), दर्पः = अहङ्कारः, अभिमानः च = गर्वः च, क्रोधः = कोपः, पारुष्यम् = कठोरता, अज्ञानम् = अविवेकः, एव च = अपि च।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
पार्थ	अ. पुं. सम्बो. एक.	आसुरीम्	ई. स्त्री. द्वि. एक. (विशेषणम्)
सम्पदम्	सम्पद् - द. स्त्री. द्वि. एक. (विशेष्यम्)	अभिजातस्य	अ. पुं. ष. एक. (विशेषणम्)
दम्भः	अ. पुं. प्र. एक.	दर्पः	अ. पुं. प्र. एक.
अभिमानः	अ. पुं. प्र. एक.	च	अव्ययम्
क्रोधः	अ. पुं. प्र. एक.	पारुष्यम्	अ. नपुं. प्र. एक.
अज्ञानम्	अ. नपुं. प्र. एक.	एव	अव्ययम्

व्याकरणम् -

(क) सन्धिः
- दम्भो दर्पः — दम्भः + दर्पः — विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः।
- दर्पोऽभिमानः — दर्पः + अभिमानः — विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः पूर्वरूपं च।
- अभिमानश्च — अभिमानः + च — विसर्गसन्धिः (सकारः) श्चुत्वम्।
- चाभिजातस्य — च + अभिजातस्य — सवर्णदीर्घसन्धिः।

(ख) समासः
- अज्ञानम् — न ज्ञानम् अज्ञानम् - नञ्तत्पुरुषः।

(ग) कृदन्तः
- दम्भः — दम्भ् (दम्भु दमने) + घञ्।
- दर्पः — दृप् (दृप उत्क्लेशे) + अच् (कर्तरि)।
- अभिमानः — अभि + मन (मनु अवबोधने) + घञ्।
- क्रोधः — क्रुध् (क्रुध क्रोधे) + घञ् (भावे)।

	ज्ञानम्	ज्ञा (ज्ञा अवबोधने) + ल्युट् ।
	अभिजातस्य	अभि + जन् (जनि प्रादुर्भावे) + क्त, तस्य (कर्तरि) ।
(घ) तद्धितान्तः	पारुष्यम्	परुषः + ष्यञ् (परुषस्य भावः पारुष्यम्) ।
	पार्थ	पृथा + अण् (पृथायाः अपत्यं पुमान्) ।
	आसुरीम्	असुरः + अण् (आसुरम्) + ङीप्, ताम् (असुराणाम् इयम् आसुरी) (इदमर्थे अण् स्त्रीत्वे च ङीप्) ।

भावस्पष्टीकरणम् -

(भवन्ति) ।	
कस्य (भवन्ति) ?	**अभिजातस्य** (भवन्ति) ।
काम् अभिजातस्य भवन्ति ?	**सम्पदम्** अभिजातस्य भवन्ति ।
कीदृशीं सम्पदम् अभिजातस्य भवन्ति ?	**आसुरीं** सम्पदम् अभिजातस्य भवन्ति ।
आसुरीं सम्पदम् अभिजातस्य **किं (लक्षणम्) भवति** ?	आसुरीं सम्पदम् अभिजातस्य **दम्भः** भवति ।
आसुरीं सम्पदम् अभिजातस्य दम्भः **पुनश्च किं (लक्षणम्) भवति** ?	आसुरीं सम्पदम् अभिजातस्य दम्भः **दर्पः** भवति ।
आसुरीं सम्पदम् अभिजातस्य दम्भः दर्पः **पुनश्च किं (लक्षणम्) भवति** ?	आसुरीं सम्पदम् अभिजातस्य दम्भः दर्पः **अभिमानः** भवति ।
आसुरीं सम्पदम् अभिजातस्य दम्भः दर्पः अभिमानः पुनश्च **किं (लक्षणम्) भवति** ?	आसुरीं सम्पदम् अभिजातस्य दम्भः दर्पः अभिमानः च **क्रोधः** भवति ।
आसुरीं सम्पदम् अभिजातस्य दम्भः दर्पः अभिमानः च क्रोधः पुनश्च **किं (लक्षणम्) भवति** ?	आसुरीं सम्पदम् अभिजातस्य दम्भः दर्पः अभिमानः च क्रोधः **पारुष्यं** भवति ।
आसुरीं सम्पदम् अभिजातस्य दम्भः दर्पः अभिमानः च क्रोधः पारुष्यं पुनश्च **किं (लक्षणम्) भवति** ?	आसुरीं सम्पदम् अभिजातस्य दम्भः दर्पः अभिमानः च क्रोधः पारुष्यम् **अज्ञानम्** एव च भवति ।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**पार्थ !**

तात्पर्यम् - हे अर्जुन ! राक्षसीं सम्पत्तिं प्राप्तस्य मनुष्यस्य लक्षणेषु आत्मश्लाघा, अहङ्कारः, गर्वः, कोपः, कठोरता, विवेकहीनतादीनि प्रमुखानि लक्षणानि भवन्ति ।

दैवी सम्पद्विमोक्षाय निबन्धायासुरी मता।
मा शुचः सम्पदं दैवीमभिजातोऽसि पाण्डव॥१६.५॥

पदच्छेदः - दैवी, सम्पद्, विमोक्षाय, निबन्धाय, आसुरी, मता।
मा, शुचः, सम्पदम्, दैवीम्, अभिजातः, असि, पाण्डव॥

अन्वयः - पाण्डव ! दैवी सम्पद् विमोक्षाय आसुरी निबन्धाय मता। मा शुचः। दैवीं सम्पदम् अभिजातः असि।

पदार्थः - पाण्डव = अर्जुन, दैवी = दिव्या, सम्पद् = सम्पत्तिः, विमोक्षाय = बन्धनाशाय, आसुरी = राक्षसी, निबन्धाय = संसाराय, मता = अभीष्टा, मा शुचः = शोकं मा कार्षीः, दैवीम् = दिव्याम्, सम्पदम् = सम्पत्तिम्, अभिजातः = अभिमुखीभूय समुत्पन्नः, असि = भवसि।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
पाण्डव	अ. पुं. सम्बो. एक.	दैवी	ई. स्त्री. प्र. एक. (विशेषणम्)
सम्पद्	सम्पद् - द. स्त्री. प्र. एक. (विशेष्यम्)	विमोक्षाय	अ. पुं. च. एक.
आसुरी	ई. स्त्री. प्र. एक. (विशेषणम्)	निबन्धाय	अ. पुं. च. एक.
मता	आ. स्त्री. प्र. एक. (विशेषणम्)	मा	अव्ययम्
(अ) शुचः (अशोचीः)	शुच् (शुच शोके) पर. कर्तरि लुङ्. मपु. एक.	दैवीम्	ई. स्त्री. द्वि. एक. (विशेषणम्)
सम्पदम्	सम्पद् - द. स्त्री. द्वि. एक. (विशेष्यम्)	अभिजातः	अ. पुं. प्र. एक. (विशेषणम्)
असि	अस् (अस भुवि) पर. कर्तरि लट्. मपु. एक.		

व्याकरणम् -

(क) सन्धिः

सम्पद्विमोक्षाय	सम्पत् + विमोक्षाय	जश्त्वसन्धिः।
निबन्धायासुरी	निबन्धाय + आसुरी	सवर्णदीर्घसन्धिः।
अभिजातोऽसि	अभिजातः + असि	विसर्गसन्धिः (सकारः) रेफः उकारः गुणः पूर्वरूपं च।

(ख) कृदन्तः

विमोक्षाय	वि + मोक्ष् (मोक्ष असने) + घञ्।
निबन्धाय	नि + बन्ध् (बन्ध बन्धने) + घञ्।
मता	मन् (मन ज्ञाने) + क्त (कर्तरि)।
अभिजातः	अभि + जन् (जनी प्रादुर्भावे) + क्त (कर्मणि)।

(ग) तद्धितान्तः दैवी — देवः + अण् (दैवम्) + ङीप् (देवानाम् इयं दैवी) (इदमर्थे अण् स्त्रीत्वे च ङीप्)।

आसुरी — असुरः + अण् (आसुरम्) + ङीप् (असुराणाम् इयम् आसुरी) (इदमर्थे अण् स्त्रीत्वे च ङीप्)।

पाण्डव — पाण्डु + अण् (पाण्डोः अपत्यं पुमान् इत्यर्थे)।

भावस्पष्टीकरणम् -

मता।	
का मता ?	**सम्पद्** मता।
कीदृशी सम्पद् मता ?	**दैवी** सम्पद् मता।
दैवी सम्पद् **किमर्थं** मता ?	दैवी सम्पद् **विमोक्षाय** मता।
दैवी सम्पद् विमोक्षाय **पुनः का** मता ?	दैवी सम्पद् विमोक्षाय **आसुरी (सम्पद्)** मता।
दैवी सम्पद् विमोक्षाय आसुरी (सम्पद्) **किमर्थं** मता ?	दैवी सम्पद् विमोक्षाय आसुरी (सम्पद्) **निबन्धाय** मता।
असि।	
कः असि ?	**अभिजातः** असि।
काम् अभिजातः असि ?	**सम्पदम्** अभिजातः असि।
कीदृशीं सम्पदम् अभिजातः असि ?	**दैवीं** सम्पदम् अभिजातः असि।
दैवीं सम्पदम् अभिजातः असि। (त्वं) **किं मा कुरु** ?	दैवीं सम्पदम् अभिजातः असि। (त्वं) **मा शुचः**।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**पाण्डव !**

तात्पर्यम् - दैवी सम्पद् संसाररूपं बन्धनं नाशयति। आसुरी तु तदेव बन्धनं जनयति। परन्तु त्वं शोकं मा कार्षीः। यतः अभयसत्त्वसंशुद्धिप्रभृतयः गुणाः यथा सम्भवन्ति तथा उत्पन्नोऽसि।

द्वौ भूतसर्गौ लोकेऽस्मिन्दैव आसुर एव च।
दैवो विस्तरशः प्रोक्त आसुरं पार्थ मे शृणु॥१६.६॥

पदच्छेदः - द्वौ, भूतसर्गौ, लोके, अस्मिन्, दैवः, आसुरः, एव, च।
दैवः, विस्तरशः, प्रोक्तः, आसुरम्, पार्थ, मे, शृणु॥

अन्वयः - पार्थ ! अस्मिन् लोके दैवः आसुरः एव च (इति) द्वौ भूतसर्गौ। दैवः विस्तरशः प्रोक्तः आसुरं मे शृणु।

पदार्थः - पार्थ = अर्जुन, अस्मिन् = एतस्मिन्, लोके = संसारे, दैवः = दिव्यः, आसुरः एव च = राक्षसः अपि, द्वौ = द्वे, भूतसर्गौ = मानवसृष्टी, दैवः = दिव्यः, विस्तरशः = विस्तरेण, प्रोक्तः = कथितः, आसुरम् = राक्षसम्, मे = मम, शृणु = आकर्णय।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
पार्थ	अ. पुं. सम्बो. एक.	अस्मिन्	इदम्- म. सर्व. पुं. स. एक. (विशेषणम्)
लोके	अ. पुं. स. एक. (विशेष्यम्)	दैवः	अ. पुं. प्र. एक.
आसुरः	अ. पुं. प्र. एक.	एव	अव्ययम्
च	अव्ययम्	द्वौ	अ. पुं. प्र. द्वि. (विशेषणम्)
भूतसर्गौ	अ. पुं. प्र. द्वि. (विशेष्यम्)	विस्तरशः	अव्ययम्
प्रोक्तः	अ. पुं. प्र. एक. (विशेषणम्)	आसुरम्	अ. पुं. द्वि. एक. (विशेषणम्)
मे	अस्मद् - द. सर्व. ष. एक.	शृणु	श्रु (श्रु श्रवणे) पर. कर्तरि लट्. मपु. एक.

व्याकरणम् -

(क) सन्धिः	लोकेऽस्मिन्	लोके + अस्मिन्	पूर्वरूपसन्धिः।
	दैव आसुरः	दैवः + आसुरः	विसर्गसन्धिः (लोपः)।
	आसुर एव	आसुरः + एव	विसर्गसन्धिः (लोपः)।
	दैवो विस्तरशः	दैवः + विस्तरशः	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः।
	प्रोक्त आसुरम्	प्रोक्तः + आसुरम्	विसर्गसन्धिः (लोपः)।
(ख) समासः	भूतसर्गौ	भूतानां सर्गौ भूतसर्गौ - षष्ठीतत्पुरुषः।	
(ग) कृदन्तः	सर्गः	सृज् (सृज विसर्गे) + घञ्।	
	लोके	लोक् (लोकृ दर्शने) + घञ्, तस्मिन्।	
	प्रोक्तः	प्र + वच् (वच परिभाषणे) + क्त (कर्मणि)।	
(घ) तद्धितान्तः	दैवः	देवः + अण् (इदमर्थे) देवानाम् अयम् दैवः।	
	आसुरः	असुरः + अण् (असुराणाम् अयम् आसुरः) (इदमर्थे अण्)।	
	विस्तरशः	विस्तर + शस्।	
	पार्थ	पृथा + अण् (पृथायाः अपत्यं पुमान्)।	

भावस्पष्टीकरणम् -

(स्तः) ।	
कौ (स्तः) ?	**भूतसर्गौ** (स्तः) ।
कति भूतसर्गौ (स्तः) ?	**द्वौ** भूतसर्गौ (स्तः) ।
कुत्र द्वौ भूतसर्गौ (स्तः) ?	**लोके** द्वौ भूतसर्गौ (स्तः) ।
कस्मिन् लोके द्वौ भूतसर्गौ (स्तः) ?	**अस्मिन्** लोके द्वौ भूतसर्गौ (स्तः) ।
अस्मिन् लोके **कौ** द्वौ भूतसर्गौ (स्तः) ?	अस्मिन् लोके **दैवः आसुरः एव च** द्वौ भूतसर्गौ (स्तः) ।
अस्मिन् लोके दैवः आसुरः एव च द्वौ भूतसर्गौ (स्तः) **(तयोः) किम्** ?	अस्मिन् लोके दैवः आसुरः एव च द्वौ भूतसर्गौ (स्तः) **(तयोः) प्रोक्तः** ।
अस्मिन् लोके दैवः आसुरः एव च द्वौ भूतसर्गौ (स्तः) (तयोः) **कः** प्रोक्तः ?	अस्मिन् लोके दैवः आसुरः एव च द्वौ भूतसर्गौ (स्तः) (तयोः) **दैवः** प्रोक्तः ।
अस्मिन् लोके दैवः आसुरः एव च द्वौ भूतसर्गौ (स्तः) (तयोः) दैवः **कथं** प्रोक्तः ?	अस्मिन् लोके दैवः आसुरः एव च द्वौ भूतसर्गौ (स्तः) (तयोः) दैवः **विस्तरशः** प्रोक्तः ।
अस्मिन् लोके दैवः आसुरः एव च द्वौ भूतसर्गौ (स्तः) (तयोः) दैवः विस्तरशः प्रोक्तः **(अधुना) किं कुरु** ?	अस्मिन् लोके दैवः आसुरः एव च द्वौ भूतसर्गौ (स्तः) (तयोः) दैवः विस्तरशः प्रोक्तः **(अधुना) शृणु** ।
अस्मिन् लोके दैवः आसुरः एव च द्वौ भूतसर्गौ (स्तः) (तयोः) दैवः विस्तरशः प्रोक्तः (अधुना) **किं** शृणु ?	अस्मिन् लोके दैवः आसुरः एव च द्वौ भूतसर्गौ (स्तः) (तयोः) दैवः विस्तरशः प्रोक्तः (अधुना) **आसुरं** शृणु ।
अस्मिन् लोके दैवः आसुरः एव च द्वौ भूतसर्गौ (स्तः) (तयोः) दैवः विस्तरशः प्रोक्तः (अधुना) आसुरं **कस्य** शृणु ?	अस्मिन् लोके दैवः आसुरः एव च द्वौ भूतसर्गौ (स्तः) (तयोः) दैवः विस्तरशः प्रोक्तः (अधुना) आसुरं **मे** शृणु ।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**पार्थ** !

तात्पर्यम् - एतस्मिन् जगति द्विविधे प्राणिनां सृष्टी स्तः । एका दैवी सृष्टिः यत्र दैवीगुणसम्पन्नाः प्राणिनः, अपरा च आसुरी सृष्टिः यत्र राक्षसगुणसम्पन्नाः प्राणिनः सन्ति । दैवीसृष्टिः पूर्वमेव विस्तरेण निरूपिता । हे अर्जुन ! सम्प्रति त्वं मम वचनात् उच्यमानम् आसुरगुणसम्पन्नस्य निरूपणं शृणु ।

प्रवृत्तिं च निवृत्तिं च जना न विदुरासुराः।
न शौचं नापि चाचारो न सत्यं तेषु विद्यते॥१६.७॥

पदच्छेदः - प्रवृत्तिम्, च, निवृत्तिम्, च, जनाः, न, विदुः, आसुराः।
न, शौचम्, न, अपि, च, आचारः, न, सत्यम्, तेषु, विद्यते॥

अन्वयः - आसुराः जनाः प्रवृत्तिं च निवृत्तिं च न विदुः। तेषु न शौचं, न च आचारः, न अपि सत्यं विद्यते।

पदार्थः - आसुराः = असुरप्रकृतयः, जनाः = मानवाः, प्रवृत्तिं च = प्रवर्तनं च (विधिं च), निवृत्तिं च = निवर्तनं च (निषेधं च), न विदुः = न जानन्ति, तेषु = जनेषु, न = नास्ति, शौचम् = शुद्धिः, आचारः च = सदाचारः अपि, न = नास्ति, सत्यम् अपि = यथार्थकथनम् अपि, न विद्यते = नास्ति।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
आसुराः	अ. पुं. प्र. बहु. (विशेषणम्)	जनाः	अ. पुं. प्र. बहु. (विशेष्यम्)
प्रवृत्तिम्	इ. स्त्री. द्वि. एक.	च	अव्ययम्
निवृत्तिम्	इ. स्त्री. द्वि. एक.	न	अव्ययम्
विदुः	विद् (विद ज्ञाने) पर. कर्तरि लट्. प्रपु. बहु.	तेषु	तद् - द. सर्व. पुं. स. बहु. (विशेषणम्)
शौचम्	अ. नपुं. प्र. एक.	आचारः	अ. पुं. प्र. एक.
अपि	अव्ययम्	सत्यम्	अ. नपुं. प्र. एक.
विद्यते	विद् (विद सत्तायाम्) आत्म. कर्तरि लट्. प्रपु. एक.		

व्याकरणम् -

(क) सन्धिः	जना न	जनाः + न	विसर्गसन्धिः (लोपः)।
	विदुरासुराः	विदुः + आसुराः	विसर्गसन्धिः (सकारः) रेफः।
	नापि	न + अपि	सवर्णदीर्घसन्धिः।
	चाचारः	च + आचारः	सवर्णदीर्घसन्धिः।
	आचारो न	आचारः + न	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः।
(ख) कृदन्तः	प्रवृत्तिम्	प्र + वृत् (वृतु वर्तने) + क्तिन्, ताम्।	

	निवृत्तिम्	नि + वृत् (वृतु वर्तने) + क्तिन्, ताम् ।
	आचारः	आ + चर् (चर गतिभक्षणयोः) + घञ् ।
(ग) तद्धितान्तः	आसुराः	असुर + अण् असुराणाम् इमे आसुराः (इदमर्थे अण्) ।
	शौचम्	शुचि + अण् (शुचेः भावः) ।
	सत्यम्	सत् + यत् (सत्सु भवम्) ।

भावस्पष्टीकरणम् -

न विदुः ।	
के न विदुः ?	**जनाः** न विदुः ।
कीदृशाः जनाः न विदुः ?	**आसुराः** जनाः न विदुः ।
आसुराः जनाः **कां** न विदुः ?	आसुराः जनाः **प्रवृत्तिं** न विदुः ।
आसुराः जनाः प्रवृत्तिं **पुनश्च कां** न विदुः ?	आसुराः जनाः प्रवृत्तिं **निवृत्तिं च** न विदुः ।
आसुराः जनाः प्रवृत्तिं निवृत्तिं च न विदुः । **पुनः किं न** ?	आसुराः जनाः प्रवृत्तिं निवृत्तिं च न विदुः । **न विद्यते** ।
आसुराः जनाः प्रवृत्तिं निवृत्तिं च न विदुः । **किं** न विद्यते ?	आसुराः जनाः प्रवृत्तिं निवृत्तिं च न विदुः । **शौचं** न विद्यते ।
आसुराः जनाः प्रवृत्तिं निवृत्तिं च न विदुः । **केषु** शौचं न विद्यते ?	आसुराः जनाः प्रवृत्तिं निवृत्तिं च न विदुः । **तेषु** शौचं न विद्यते ।
आसुराः जनाः प्रवृत्तिं निवृत्तिं च न विदुः । तेषु शौचं न विद्यते । **पुनश्च किं न** ?	आसुराः जनाः प्रवृत्तिं निवृत्तिं च न विदुः । तेषु शौचं न विद्यते । **आचारः च न** ।
आसुराः जनाः प्रवृत्तिं निवृत्तिं च न विदुः । तेषु शौचं न विद्यते । आचारः च न **पुनश्च किं न** ?	आसुराः जनाः प्रवृत्तिं निवृत्तिं च न विदुः । तेषु शौचं न विद्यते । आचारः च न **सत्यम् अपि न** ।

तात्पर्यम् - असुरगुणसम्पन्नाः जनाः धर्मे प्रवृत्तिं न जानन्ति । अधर्मात् निवृत्तिं च न जानन्ति । कायिकं वाचिकं मानसिकं चेति यत् त्रिविधं शौचं तत् तेषु न सम्भवति । तेषु यथार्थवादित्वम् अपि न भवति ।

असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरम् ।
अपरस्परसम्भूतं किमन्यत्कामहैतुकम् ॥१६.८॥

पदच्छेदः - असत्यम्, अप्रतिष्ठम्, ते, जगत्, आहुः, अनीश्वरम् ।
अपरस्परसम्भूतम्, किम्, अन्यत्, कामहैतुकम् ॥

अन्वयः - ते जगत् असत्यम् अप्रतिष्ठम् अनीश्वरम् आहुः । अपरस्परसम्भूतं कामहैतुकम् अन्यत् किम् ?

पदार्थः - ते = ते जनाः, जगत् = भुवनम्, असत्यम् = अवास्तविकम्, अप्रतिष्ठम् = अनाधारम्, अनीश्वरम् = अप्रभुम् (नियन्तृरहितम्), आहुः = वर्णयन्ति, अपरस्परसम्भूतम् = स्त्रीपुरुषमैथुनात् जातम्, कामहैतुकम् = कामनिमित्तकम्, अन्यत् = इतरत्, किम् = किम् (कारणम्) (इति आहुः) ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
ते	तद् - द. सर्व. पुं. प्र. बहु. (विशेषणम्)	जगत्	जगत् - त. नपुं. द्वि. एक. (विशेष्यम्)
असत्यम्	अ. नपुं. द्वि. एक.	अप्रतिष्ठम्	अ. नपुं. द्वि. एक.
अनीश्वरम्	अ. नपुं. द्वि. एक.	आहुः	ब्रू (ब्रूञ् व्यक्तायां वाचि) पर. कर्तरि लट्. प्रपु. बहु
अपरस्पर-सम्भूतम्	अ. नपुं. प्र. एक.	कामहैतुकम्	अ. नपुं. प्र. एक.
अन्यत्	अन्यद् - द. सर्व. नपुं. प्र. एक. (विशेषणम्)	किम्	किम् - म. सर्व. नपुं. प्र. एक.

व्याकरणम् -

(क) सन्धिः	जगदाहुः	जगत् + आहुः	जश्त्वसन्धिः ।
	आहुरनीश्वरम्	आहुः + अनीश्वरम्	विसर्गसन्धिः (सकारः) रेफः ।
(ख) समासः	असत्यम्	न विद्यते सत्यं यस्मिन् तत् असत्यम् - बहुव्रीहिः ।	
	अप्रतिष्ठम्	न विद्यते प्रतिष्ठा यस्मिन् तत् अप्रतिष्ठम् - बहुव्रीहिः ।	
	अनीश्वरम्	न विद्यते ईश्वरः यस्मिन् तत् अनीश्वरम् - बहुव्रीहिः ।	
	अपरस्परसम्भूतम्	अपरः च परः च अपरस्परौ - द्वन्द्वः ।	
		अपरस्पराभ्यां सम्भूतम्, अपरस्परसम्भूतम् - तृतीयातत्पुरुषः ।	
	कामहैतुकम्	कामः हेतुः यस्य तत् - षष्ठीतत्पुरुषः ।	
(ग) कृदन्तः	प्रतिष्ठम्	प्र + स्था (ष्ठा गतिनिवृत्तौ) + अच् (प्रतिष्ठा अस्य अस्ति) ।	
	सम्भूतम्	सम् + भू (भू सत्तायाम्) + क्त (कर्तरि) ।	
(घ) तद्धितान्तः	सत्यम्	सत् + यत् (सत्सु भवम्) ।	

भावस्पष्टीकरणम् -

आहुः ।	
के आहुः ?	**ते** आहुः ।
ते **किम्** आहुः ?	ते **जगत्** आहुः ।
ते जगत् **कीदृशम्** आहुः ?	ते जगत् **असत्यम्** आहुः ।
ते जगत् असत्यं **पुनः कीदृशम्** आहुः ?	ते जगत् असत्यम् **अप्रतिष्ठम्** आहुः ।
ते जगत् असत्यम् अप्रतिष्ठं **पुनः कीदृशम्** आहुः ?	ते जगत् असत्यम् अप्रतिष्ठम् **अनीश्वरम्** आहुः ।
ते जगत् असत्यम् अप्रतिष्ठम् अनीश्वरं **पुनः कीदृशम्** आहुः ?	ते जगत् असत्यम् अप्रतिष्ठम् अनीश्वरम् **अपरस्परसम्भूतम्** आहुः ।
ते जगत् असत्यम् अप्रतिष्ठम् अनीश्वरम् अपरस्परसम्भूतम् **अन्यत् अन्यत् किम्** आहुः ?	ते जगत् असत्यम् अप्रतिष्ठम् अनीश्वरम् अपरस्परसम्भूतं **कामहैतुकम् अन्यत् किम्** आहुः ।

तात्पर्यम् - ते जनाः वदन्ति - अस्मिन् लोके सत्यार्थप्रतिपादकाः वेदपुराणादयः न प्रमाणानि । तारतम्ये स्वभावः एव कारणम्, न तु धर्माधर्मौ । लोकेऽस्मिन् न कोऽपि नियामकः अस्ति । स्त्रीपुरुषद्वन्द्वात् एव जगदिदं समुत्पन्नम् इति कामः एव जगतः उत्पत्तौ कारणम् । कारणान्तरं सर्वथा नास्ति ।

एतां दृष्टिमवष्टभ्य नष्टात्मानोऽल्पबुद्धयः ।
प्रभवन्त्युग्रकर्माणः क्षयाय जगतोऽहिताः ॥१६.९॥

पदच्छेदः - एताम्, दृष्टिम्, अवष्टभ्य, नष्टात्मानः, अल्पबुद्धयः ।
प्रभवन्ति, उग्रकर्माणः, क्षयाय, जगतः, अहिताः ॥

अन्वयः - एतां दृष्टिम् अवष्टभ्य नष्टात्मानः अल्पबुद्धयः उग्रकर्माणः अहिताः जगतः क्षयाय प्रभवन्ति ।

पदार्थः - एताम् = इमाम्, दृष्टिम् = दृशम्, अवष्टभ्य = अवलम्ब्य, नष्टात्मानः = नष्टस्वभावाः, अल्पबुद्धयः = स्वल्पविवेकाः, उग्रकर्माणः = क्रूरकर्माणः, अहिताः = शत्रवः, जगतः = लोकस्य, क्षयाय = विनाशाय, प्रभवन्ति = कल्पन्ते (उद्भवन्ति) ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
एताम्	एतद् - द. सर्व. स्त्री. द्वि. एक. (विशेषणम्)	दृष्टिम्	इ. स्त्री. द्वि. एक. (विशेष्यम्)
अवष्टभ्य	ल्यबन्तम् अव्ययम्	नष्टात्मानः	नष्टात्मन् - न. पुं. प्र. बहु. (विशेषणम्)
अल्पबुद्धयः	इ. पुं. प्र. बहु. (विशेषणम्)	उग्रकर्माणः	उग्रकर्मन्- न. पुं. प्र. बहु. (विशेषणम्)
अहिताः	अ. पुं. प्र. बहु. (विशेष्यम्)	जगतः	जगत्- त. नपुं. ष. एक.
क्षयाय	अ. पुं. च. एक.	प्रभवन्ति	प्र + भू (भू सत्तायाम्) पर. कर्तरि लट्. प्रपु. बहु.

व्याकरणम् -

(क) सन्धिः	नष्टात्मानोऽल्पबुद्धयः	नष्टात्मानः + अल्पबुद्धयः	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः पूर्वरूपं च ।
	प्रभवन्त्युग्रकर्माणः	प्रभवन्ति + उग्रकर्माणः	यण्सन्धिः ।
	जगतोऽहिताः	जगतः + अहिताः	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः पूर्वरूपं च ।

(ख) समासः	नष्टात्मानः	नष्टः आत्मा येषां ते नष्टात्मानः - बहुव्रीहिः ।
	अल्पबुद्धयः	अल्पा बुद्धिः येषां ते अल्पबुद्धयः - बहुव्रीहिः ।
	उग्रकर्माणः	उग्रं कर्म येषां ते उग्रकर्माणः - बहुव्रीहिः ।
	अहिताः	न हिताः अहिताः - नञ्तत्पुरुषः ।
(ग) कृदन्तः	दृष्टिम्	दृश् (दृशिर् प्रेक्षणे) + क्तिन्, ताम् ।
	अवष्टभ्य	अव + स्तम्भ् (ष्टभि प्रतिबन्धे) + ल्यप् ।
	बुद्धयः	बुध् (बुध अवगमने) + क्तिन् ।
	क्षयाय	क्षि (क्षि क्षये) + अच्, तस्मै ।

भावस्पष्टीकरणम् -

प्रभवन्ति ।	
के प्रभवन्ति ?	**अहिताः** प्रभवन्ति ।
कीदृशाः अहिताः प्रभवन्ति ?	**नष्टात्मानः** अहिताः प्रभवन्ति ।

नष्टात्मानः **पुनश्च कीदृशाः** अहिताः प्रभवन्ति ?	नष्टात्मानः **अल्पबुद्धयः** अहिताः प्रभवन्ति ।
नष्टात्मानः अल्पबुद्धयः **पुनश्च कीदृशाः** अहिताः प्रभवन्ति ?	नष्टात्मानः अल्पबुद्धयः **उग्रकर्माणः** अहिताः प्रभवन्ति ।
नष्टात्मानः अल्पबुद्धयः उग्रकर्माणः अहिताः **किमर्थं** प्रभवन्ति ?	नष्टात्मानः अल्पबुद्धयः उग्रकर्माणः अहिताः **क्षयाय** प्रभवन्ति ।
नष्टात्मानः अल्पबुद्धयः उग्रकर्माणः अहिताः **कस्य** क्षयाय प्रभवन्ति ?	नष्टात्मानः अल्पबुद्धयः उग्रकर्माणः अहिताः **जगतः** क्षयाय प्रभवन्ति ।
किं कृत्वा नष्टात्मानः अल्पबुद्धयः उग्रकर्माणः अहिताः जगतः क्षयाय प्रभवन्ति ?	**अवष्टभ्य** नष्टात्मानः अल्पबुद्धयः उग्रकर्माणः अहिताः जगतः क्षयाय प्रभवन्ति ।
काम् अवष्टभ्य नष्टात्मानः अल्पबुद्धयः उग्रकर्माणः अहिताः जगतः क्षयाय प्रभवन्ति ?	**दृष्टिम्** अवष्टभ्य नष्टात्मानः अल्पबुद्धयः उग्रकर्माणः अहिताः जगतः क्षयाय प्रभवन्ति ।
कां दृष्टिम् अवष्टभ्य नष्टात्मानः अल्पबुद्धयः उग्रकर्माणः अहिताः जगतः क्षयाय प्रभवन्ति ?	**एतां** दृष्टिम् अवष्टभ्य नष्टात्मानः अल्पबुद्धयः उग्रकर्माणः अहिताः जगतः क्षयाय प्रभवन्ति ।

तात्पर्यम् - नष्टस्वभावाः मन्दमतयश्च ते जनाः इमां दृष्टिम् अवलम्ब्य क्रूरे कार्ये आसक्ताः शत्रवः सन्तः जगतो नाशाय प्रवर्तन्ते ।

काममाश्रित्य दुष्पूरं दम्भमानमदान्विताः ।
मोहाद् गृहीत्वाऽसद्ग्राहान्प्रवर्तन्तेऽशुचिव्रताः ॥१६.१०॥

पदच्छेदः - काममम्, आश्रित्य, दुष्पूरम्, दम्भमानमदान्विताः ।
मोहात्, गृहीत्वा, असद्ग्राहान्, प्रवर्तन्ते, अशुचिव्रताः ॥

अन्वयः - दुष्पूरं कामम् आश्रित्य दम्भमानमदान्विताः अशुचिव्रताः मोहात् असद्ग्राहान् गृहीत्वा प्रवर्तन्ते ।

पदार्थः - दुष्पूरम् = अशक्यपूरणम्, कामम् = इच्छाविशेषम्, आश्रित्य = अवलम्ब्य, दम्भमानमदान्विताः = आडम्बराभिमानगर्वसहिताः, अशुचिव्रताः = अशुद्धकर्माणः, मोहात् = अविवेकात्, असद्ग्राहान् = दुष्टनिश्चयान्, गृहीत्वा = स्वीकृत्य, प्रवर्तन्ते = प्रवृत्ताः भवन्ति ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
दुष्पूरम्	अ. पुं. द्वि. एक. (विशेषणम्)	कामम्	अ. पुं. द्वि. एक. (विशेष्यम्)
आश्रित्य	ल्यबन्तम् अव्ययम्	दम्भमानमदान्विताः	अ. पुं. प्र. बहु. (विशेषणम्)
अशुचिव्रताः	अ. पुं. प्र. बहु. (विशेष्यम्)	मोहात्	अ. पुं. पं. एक.
असद्ग्राहान्	अ. पुं. द्वि. बहु. (विशेषणम्)	गृहीत्वा	क्त्वान्तम् अव्ययम्
प्रवर्तन्ते	प्र + वृत् (वृतु वर्तने) आत्म. कर्तरि लट्. प्रपु. बहु.		

व्याकरणम् -

(क) सन्धिः	मोहाद् गृहीत्वा	मोहात् + गृहीत्वा	जश्त्वसन्धिः ।
	गृहीत्वासद्ग्राहान्	गृहीत्वा + असद्ग्राहान्	सवर्णदीर्घसन्धिः ।
	प्रवर्तन्तेऽशुचिव्रताः	प्रवर्तन्ते + अशुचिव्रताः	पूर्वरूपसन्धिः ।

(ख) समासः	दम्भमानमदान्विताः	दम्भश्च मानश्च मदश्च दम्भमानमदाः - द्वन्द्वः ।
		दम्भमानमदैः अन्विताः दम्भमानमदान्विताः - तृतीयातत्पुरुषः ।
	असद्ग्राहान्	असन्तश्च ते ग्राहाश्च असद्ग्राहाः, तान् - कर्मधारयः ।
	अशुचिव्रताः	अशुचि व्रतं येषां ते अशुचिव्रताः - बहुव्रीहिः ।
(ग) कृदन्तः	कामम्	कम् (कमु कान्तौ) + घञ्, तम् ।
	आश्रित्य	आ + श्रि (श्रिञ् सेवायाम्) + ल्यप् ।
	अन्विताः	अनु + इ (इण् गतौ) + क्त (कर्तरि) ।
	मोहात्	मुह् (मुह वैचित्ये) + घञ्, तस्मात् ।
	गृहीत्वा	ग्रह् (ग्रह उपादाने) + क्त्वा ।

भावस्पष्टीकरणम् -

प्रवर्तन्ते ।	
के प्रवर्तन्ते ?	**अशुचिव्रताः** प्रवर्तन्ते ।
कीदृशाः अशुचिव्रताः प्रवर्तन्ते ?	**दम्भमानमदान्विताः** अशुचिव्रताः प्रवर्तन्ते ।
किं कृत्वा दम्भमानमदान्विताः अशुचिव्रताः प्रवर्तन्ते ?	**आश्रित्य** दम्भमानमदान्विताः अशुचिव्रताः प्रवर्तन्ते ।

किम् आश्रित्य दम्भमानमदान्विताः अशुचिव्रताः प्रवर्तन्ते ?	**कामम्** आश्रित्य दम्भमानमदान्विताः अशुचिव्रताः प्रवर्तन्ते ।
कीदृशं कामम् आश्रित्य दम्भमानमदान्विताः अशुचिव्रताः प्रवर्तन्ते ?	**दुष्पूरं** कामम् आश्रित्य दम्भमानमदान्विताः अशुचिव्रताः प्रवर्तन्ते ।
दुष्पूरं कामम् आश्रित्य **पुनः किं कृत्वा** दम्भमानमदान्विताः अशुचिव्रताः प्रवर्तन्ते ?	दुष्पूरं कामम् आश्रित्य **गृहीत्वा** दम्भमानमदान्विताः अशुचिव्रताः प्रवर्तन्ते ।
दुष्पूरं कामम् आश्रित्य **कान्** गृहीत्वा दम्भमानमदान्विताः अशुचिव्रताः प्रवर्तन्ते ?	दुष्पूरं कामम् आश्रित्य **असद्ग्राहान्** गृहीत्वा दम्भमानमदान्विताः अशुचिव्रताः प्रवर्तन्ते ।
दुष्पूरं कामम् आश्रित्य **कस्मात्** असद्ग्राहान् गृहीत्वा दम्भमानमदान्विताः अशुचिव्रताः प्रवर्तन्ते ?	दुष्पूरं कामम् आश्रित्य **मोहात्** असद्ग्राहान् गृहीत्वा दम्भमानमदान्विताः अशुचिव्रताः प्रवर्तन्ते ।

तात्पर्यम् - ते हि दम्भादिभिः समन्विताः गर्हितं व्रतं चरन्तश्च अमितं विषयाभिलाषम् आश्रित्य अनर्थकरान् निर्णयान् विधाय जगतः नाशाय प्रवर्तन्ते ।

चिन्तामपरिमेयां च प्रलयान्तामुपाश्रिताः ।
कामोपभोगपरमा एतावदिति निश्चिताः ॥१६.११॥
आशापाशशतैर्बद्धाः कामक्रोधपरायणाः ।
ईहन्ते कामभोगार्थमन्यायेनार्थसञ्चयान् ॥१६.१२॥

पदच्छेदः - चिन्ताम्, अपरिमेयाम्, च, प्रलयान्ताम्, उपाश्रिताः ।
कामोपभोगपरमाः, एतावत्, इति, निश्चिताः ॥
आशापाशशतैः, बद्धाः, कामक्रोधपरायणाः ।
ईहन्ते, कामभोगार्थम्, अन्यायेन, अर्थसञ्चयान् ॥

अन्वयः - अपरिमेयां प्रलयान्तां चिन्तां च उपाश्रिताः कामोपभोगपरमाः एतावत् इति निश्चिताः आशापाशशतैः बद्धाः कामक्रोधपरायणाः कामभोगार्थम् अन्यायेन अर्थसञ्चयान् ईहन्ते ।

पदार्थः - अपरिमेयाम् = परिमातुमशक्याम्, प्रलयान्ताम् = मरणान्ताम्, चिन्तां च = आलोचनामपि, उपाश्रिताः = अवलम्बिताः, कामोपभोगपरमाः = विषयानुभवपरमपुरुषार्थाः, एतावत् इति = इयत् इति, निश्चिताः = दृढचित्ताः, आशापाशशतैः = स्पृहारज्जुशतैः, बद्धाः = नियन्त्रिताः, कामक्रोधपरायणाः = रागद्वेषासक्ताः, कामभोगार्थम् = विषयानुभवप्रयोजनाय, अन्यायेन = अधर्मेण, अर्थसञ्चयान् = वस्तुसमुदायान्, ईहन्ते = वाञ्छन्ति ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
अपरिमेयाम्	आ. स्त्री. द्वि. एक. (विशेषणम्)	प्रलयान्ताम्	आ. स्त्री. द्वि. एक. (विशेषणम्)
चिन्ताम्	आ. स्त्री. द्वि. एक. (विशेष्यम्)	च	अव्ययम्
उपाश्रिताः	अ पुं. प्र. बहु. (विशेषणम्)	कामोपभोगपरमाः	अ पुं. प्र. बहु. (विशेषणम्)
एतावत्	अव्ययम्	इति	अव्ययम्
निश्चिताः	अ पुं. प्र. बहु. (विशेषणम्)	आशापाशशतैः	अ पुं. तृ. बहु.
बद्धाः	अ पुं. प्र. बहु. (विशेष्यम्)	कामक्रोधपरायणाः	अ पुं. प्र. बहु. (विशेषणम्)
कामभोगार्थम्	अव्ययम्	अन्यायेन	अ पुं. तृ. एक.
अर्थसञ्चयान्	अ पुं. द्वि. बहु.	ईहन्ते	ईह् (ईह चेष्टायाम्) आत्म. कर्तरि लट्. प्रपु. बहु.

व्याकरणम् -

(क) सन्धिः कामोपभोगपरमा एतावत्
कामोपभोगपरमाः + एतावत्
विसर्गसन्धिः (लोपः)।

एतावदिति — एतावत् + इति — जश्त्वसन्धिः।

आशापाशशतैर्बद्धाः — आशापाशशतैः + बद्धाः — विसर्गसन्धिः (सकारः) रेफः।

अन्यायेनार्थसञ्चयान् — अन्यायेन + अर्थसञ्चयान् — सवर्णदीर्घसन्धिः।

(ख) समासः अपरिमेयाम् — न परिमेया अपरिमेया, ताम् - नञ्तत्पुरुषः।

प्रलयान्ताम् — प्रलयः अन्तः यस्याः सा प्रलयान्ता, ताम् - बहुव्रीहिः।

कामोपभोगपरमाः — कामानाम् उपभोगः कामोपभोगः - षष्ठीतत्पुरुषः।
कामोपभोगः एव परमः येषां ते कामोपभोगपरमाः - बहुव्रीहिः।

आशापाशशतैः — आशा एव पाशाः आशापाशाः - कर्मधारयः।
आशापाशानां शतानि आशापाशशतानि, तैः आशापाशशतैः - षष्ठीतत्पुरुषः।

कामक्रोधपरायणाः — कामश्च क्रोधश्च कामक्रोधौ - द्वन्द्वः।
परम् अयनम् परायणम् - कर्मधारयः।
कामक्रोधौ परायणं येषां ते कामक्रोधपरायणाः - बहुव्रीहिः।

	कामभोगार्थम्	कामभोगाय इदं कामभोगार्थम्, नित्यसमासोऽयम् चतुर्थीतत्पुरुषः ।
	अर्थसञ्चयान्	अर्थानां सञ्चयाः अर्थसञ्चयाः, तान् - षष्ठीतत्पुरुषः ।
(ग) कृदन्तः	परिमेयाम्	परि + मा (माङ् माने शब्दे च) + यत् ।
	उपाश्रिताः	उप + आ + श्रि (श्रिञ् सेवायाम्) + क्त (कर्तरि) ।
	निश्चिताः	निस् + चि (चिञ् चयने) + क्त (कर्तरि) ।
	बद्धाः	बन्ध् (बन्ध बन्धने) + क्त (कर्तरि) ।
	क्रोधः	क्रुध् (क्रुध क्रोधे) + घञ् (भावे) ।
	परायणाः	पर + इ (इण् गतौ) + ल्युट् (णत्वम्) ।
	सञ्चयान्	सम् + चि (चिञ् चयने) + अच्, तान् ।

भावस्पष्टीकरणम् -

ईहन्ते ।	
के ईहन्ते ?	**बद्धाः** ईहन्ते ।
कैः बद्धाः ईहन्ते ?	**आशापाशशतैः** बद्धाः ईहन्ते ।
पुनः के आशापाशशतैः बद्धाः ईहन्ते ?	**निश्चिताः** आशापाशशतैः बद्धाः ईहन्ते ।
किम् इति निश्चिताः आशापाशशतैः बद्धाः ईहन्ते ?	**एतावत् इति** निश्चिताः आशापाशशतैः बद्धाः ईहन्ते ।
पुनः के एतावत् इति निश्चिताः आशापाशशतैः बद्धाः ईहन्ते ?	**कामोपभोगपरमाः** एतावत् इति निश्चिताः आशापाशशतैः बद्धाः ईहन्ते ।
कीदृशाः कामोपभोगपरमाः एतावत् इति निश्चिताः आशापाशशतैः बद्धाः ईहन्ते ?	**उपाश्रिताः** कामोपभोगपरमाः एतावत् इति निश्चिताः आशापाशशतैः बद्धाः ईहन्ते ।
काम् उपाश्रिताः कामोपभोगपरमाः एतावत् इति निश्चिताः आशापाशशतैः बद्धाः ईहन्ते ?	**चिन्ताम्** उपाश्रिताः कामोपभोगपरमाः एतावत् इति निश्चिताः आशापाशशतैः बद्धाः ईहन्ते ।
कीदृशीं चिन्ताम् उपाश्रिताः कामोपभोगपरमाः एतावत् इति निश्चिताः आशापाशशतैः बद्धाः ईहन्ते ?	**अपरिमेयां** चिन्ताम् उपाश्रिताः कामोपभोगपरमाः एतावत् इति निश्चिताः आशापाशशतैः बद्धाः ईहन्ते ।
अपरिमेयां **पुनः कीदृशीं** चिन्ताम् उपाश्रिताः कामोपभोगपरमाः एतावत् इति निश्चिताः आशापाशशतैः बद्धाः ईहन्ते ?	अपरिमेयां **प्रलयान्तां** चिन्ताम् उपाश्रिताः कामोपभोगपरमाः एतावत् इति निश्चिताः आशापाशशतैः बद्धाः ईहन्ते ।

अपरिमेयां प्रलयान्तां चिन्ताम् उपाश्रिताः कामोपभोगपरमाः एतावत् इति निश्चिताः आशापाशशतैः बद्धाः **पुनः के** ईहन्ते ?	अपरिमेयां प्रलयान्तां चिन्ताम् उपाश्रिताः कामोपभोगपरमाः एतावत् इति निश्चिताः आशापाशशतैः बद्धाः **कामक्रोधपरायणाः** ईहन्ते ।
अपरिमेयां प्रलयान्तां चिन्ताम् उपाश्रिताः कामोपभोगपरमाः एतावत् इति निश्चिताः आशापाशशतैः बद्धाः कामक्रोधपरायणाः **कान्** ईहन्ते ?	अपरिमेयां प्रलयान्तां चिन्ताम् उपाश्रिताः कामोपभोगपरमाः एतावत् इति निश्चिताः आशापाशशतैः बद्धाः कामक्रोधपरायणाः **अर्थसञ्चयान्** ईहन्ते ।
अपरिमेयां प्रलयान्तां चिन्ताम् उपाश्रिताः कामोपभोगपरमाः एतावत् इति निश्चिताः आशापाशशतैः बद्धाः कामक्रोधपरायणाः **केन** अर्थसञ्चयान् ईहन्ते ?	अपरिमेयां प्रलयान्तां चिन्ताम् उपाश्रिताः कामोपभोगपरमाः एतावत् इति निश्चिताः आशापाशशतैः बद्धाः कामक्रोधपरायणाः **अन्यायेन** अर्थसञ्चयान् ईहन्ते ।
अपरिमेयां प्रलयान्तां चिन्ताम् उपाश्रिताः कामोपभोगपरमाः एतावत् इति निश्चिताः आशापाशशतैः बद्धाः कामक्रोधपरायणाः **किमर्थम्** अन्यायेन अर्थसञ्चयान् ईहन्ते ?	अपरिमेयां प्रलयान्तां चिन्ताम् उपाश्रिताः कामोपभोगपरमाः एतावत् इति निश्चिताः आशापाशशतैः बद्धाः कामक्रोधपरायणाः **कामभोगार्थम्** अन्यायेन अर्थसञ्चयान् ईहन्ते ।

तात्पर्यम् - तेषां विचारः तादृशो भवति यः अपरिमितः भवति यस्य च फलं भवति अन्ततः मरणम्। तेषां मतेन विषयोपभोगरूपः कामः एव प्रधानः पुरुषार्थः। कामजन्यसुखात् अतिरिक्तं सुखं ते नाङ्गीकुर्वन्ति। नानाविधैः आशापाशैः बद्धाः ते कामक्रोधादिना सहिताः विषयभोगार्थम् अधर्म्येण मार्गेण धनसङ्ग्रहं कर्तुम् इच्छन्ति ।

इदमद्य मया लब्धमिमं प्राप्स्ये मनोरथम्।
इदमस्तीदमपि मे भविष्यति पुनर्धनम्॥१६.१३॥
असौ मया हतः शत्रुर्हनिष्ये चापरानपि।
ईश्वरोऽहमहं भोगी सिद्धोऽहं बलवान्सुखी॥१६.१४॥
आढ्योऽभिजनवानस्मि कोऽन्योऽस्ति सदृशो मया।
यक्ष्ये दास्यामि मोदिष्य इत्यज्ञानविमोहिताः॥१६.१५॥
अनेकचित्तविभ्रान्ता मोहजालसमावृताः।
प्रसक्ताः कामभोगेषु पतन्ति नरकेऽशुचौ॥१६.१६॥

पदच्छेदः - इदम्, अद्य, मया, लब्धम्, इमम्, प्राप्स्ये, मनोरथम् ।
इदम्, अस्ति, इदम्, अपि, मे, भविष्यति, पुनः, धनम् ॥
असौ, मया, हतः, शत्रुः, हनिष्ये, च, अपरान् अपि ।
ईश्वरः, अहम्, अहम्, भोगी, सिद्धः, अहम्, बलवान्, सुखी ॥
आढ्यः, अभिजनवान्, अस्मि, कः, अन्यः, अस्ति, सदृशः, मया ।
यक्ष्ये, दास्यामि, मोदिष्ये, इति, अज्ञानविमोहिताः ॥
अनेकचित्तविभ्रान्ताः, मोहजालसमावृताः ।
प्रसक्ताः, कामभोगेषु, पतन्ति, नरके, अशुचौ ॥

अन्वयः - अद्य इदं मया लब्धम्, इमं मनोरथं प्राप्स्ये, इदं धनम् अस्ति, इदम् अपि मे पुनः भविष्यति, असौ शत्रुः मया हतः, अपरान् अपि हनिष्ये । अहम् ईश्वरः, अहं भोगी, अहं सिद्धः बलवान् सुखी । आढ्यः अभिजनवान् अस्मि, मया सदृशः अन्यः कः अस्ति ? यक्ष्ये, दास्यामि, मोदिष्ये इति अज्ञानविमोहिताः अनेकचित्तविभ्रान्ताः मोहजालसमावृताः कामभोगेषु प्रसक्ताः अशुचौ नरके पतन्ति ।

पदार्थः - अद्य = अस्मिन् दिवसे, इदम् = एतत्, मया = मया, लब्धम् = प्राप्तम्, इमम् = एतम्, मनोरथम् = अभीष्टम्, प्राप्स्ये = लप्स्ये, इदम् = एतत्, धनम् = द्रविणम्, अस्ति = विद्यते, इदम् = एतत्, अपि = अपि, मे = मम, पुनः = भूयः, भविष्यति = आगमिष्यति, असौ = एषः, शत्रुः = वैरी, मया हतः = मया निहतः, अपरान् अपि = अन्यान् अपि, हनिष्ये = नाशयिष्यामि, अहम् ईश्वरः = अहं प्रभुः, अहं भोगी = अहं भोगसाधनवान्, अहं सिद्धः = अहं कृतकृत्यः, बलवान् = बलशाली, सुखी = सन्तोषी, आढ्यः = धनी, अभिजनवान् = उत्तमकुलजातः, अस्मि = भवामि, मया सदृशः = मया तुल्य, अन्यः = अपरः, कः अस्ति = कः विद्यते, यक्ष्ये = यज्ञं करिष्ये, दास्यामि = वितरिष्यामि, मोदिष्ये = हर्षं प्राप्स्यामि, इति अज्ञानविमोहिताः = एवम् अविवेकभ्रान्ताः, अनेकचित्तविभ्रान्ताः = विविधमनोविभ्रममोहिताः, मोहजालसमावृताः = अविवेकजालसहिताः, कामभोगेषु = विषयानुभवेषु, प्रसक्ताः = अत्यन्तमासक्ताः, अशुचौ = अपवित्रे, नरके = नरकलोके, पतन्ति = प्रविशन्ति ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
अद्य	अव्ययम्	इदम्	इदम्- म. सर्व. नपुं. प्र. एक. (विशेषणम्)
मया	अस्मद् - द. सर्व. तृ. एक.	लब्धम्	अ. नपुं. प्र. एक. (विशेषणम्)

1. अत्र 'प्राप्स्ये' इति आत्मनेपदित्वेन आर्षप्रयोगः ।
2. अत्र 'हनिष्ये' इति आत्मनेपदित्वेन आर्षप्रयोगः ।

इमम्	इदम् - म. सर्व. पुं. द्वि. एक. (विशेषणम्)	मनोरथम्	अ. पुं. द्वि. एक. (विशेष्यम्)
प्राप्स्ये (प्राप्स्यामि)	प्र + आप् (आप्लृ - व्याप्तौ)[1] पर. कर्तरि लृट्. उपु. एक.	धनम्	अ. नपुं. प्र. एक.
अस्ति	अस् (अस भुवि) पर. कर्तरि लट्. प्रपु. एक.	अपि	अव्ययम्
मे	अस्मद् - द. (सर्व.) ष. एक.	पुनः	अव्ययम्
भविष्यति	भू (भू - सत्तायाम्) पर. कर्तरि लृट्. प्रपु. एक.	असौ	अदस् - स. सर्व. पुं. प्र. एक. (विशेषणम्)
शत्रुः	उ. पुं. प्र. एक. (विशेष्यम्)	हतः	अ. पुं. प्र. एक. (विशेषणम्)
अपरान्	अ. पुं. द्वि. बहु. (विशेषणम्)	हनिष्ये (हनिष्यामि)	हन् (हन हिंसागत्योः)[2] पर. कर्तरि लृट्. उपु. एक.
अहम्	अस्मद् - द. सर्व. प्र. एक. (विशेष्यम्)	ईश्वरः	अ. पुं. प्र. एक. (विशेषणम्)
भोगी	भोगिन् - न. पुं. प्र. एक. (विशेषणम्)	सिद्धः	अ. पुं. प्र. एक. (विशेषणम्)
बलवान्	बलवत् - त. पुं. प्र. एक. (विशेषणम्)	सुखी	सुखिन् - न. पुं. प्र. एक. (विशेषणम्)
आढ्यः	अ. पुं. प्र. एक. (विशेषणम्)	अभिजनवान्	अभिजनवत् - त. पुं. प्र. एक. (विशेषणम्)
अस्मि	अस् (अस भुवि) पर. कर्तरि लट्. उपु. एक.	सदृशः	अ. पुं. प्र. एक. (विशेषणम्)
अन्यः	अ. पुं. प्र. एक. (विशेषणम्)	कः	किम् - म. सर्व. पुं. प्र. एक. (विशेषणम्)
यक्ष्ये	यज् (यज - देवपूजासङ्गतिकरणदानेषु) आत्म. कर्तरि लृट्. उपु. एक.	दास्यामि	दा (डुदाञ् दाने) पर. कर्तरि लृट्. उपु. एक.
मोदिष्ये	मुद् (मुद हर्षे) आत्म. कर्तरि लृट्. उपु. एक.	इति	अव्ययम्

अज्ञान-विमोहिताः	अ. पुं. प्र. बहु. (विशेषणम्)	अनेकचि-त्तविभ्रान्ताः	अ. पुं. प्र. बहु. (विशेषणम्)
मोहजाल-समावृताः	अ. पुं. प्र. बहु. (विशेषणम्)	कामभोगेषु	अ. पुं. स. बहु.
प्रसक्ताः	अ. पुं. प्र. बहु. (विशेषणम्)	अशुचौ	अ. पुं. स. एक. (विशेषणम्)
नरके	अ. पुं. स. एक. (विशेष्यम्)	पतन्ति	पत् (पत्लृ गतौ) पर. कर्तरि लट्. प्रपु. बहु.

व्याकरणम् -

(क) सन्धिः

अस्तीदम्	अस्ति + इदम्	सवर्णदीर्घसन्धिः ।
पुनर्धनम्	पुनः + धनम्	विसर्गसन्धिः (सकारः) रेफः ।
शत्रुर्हनिष्ये	शत्रुः + हनिष्ये	विसर्गसन्धिः (सकारः) रेफः ।
चापरान्	च + अपरान्	सवर्णदीर्घसन्धिः ।
ईश्वरोऽहम्	ईश्वरः + अहम्	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः पूर्वरूपं च ।
सिद्धोऽहम्	सिद्धः + अहम्	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः पूर्वरूपं च ।
आढ्योऽभिजनवान्	आढ्यः + अभिजनवान्	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः पूर्वरूपं च ।
कोऽन्यः	कः + अन्यः	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः पूर्वरूपं च ।
अन्योऽस्ति	अन्यः + अस्ति	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः पूर्वरूपं च ।
सदृशो मया	सदृशः + मया	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः ।
मोदिष्य इति	मोदिष्ये + इति	यान्तावान्तादेशसन्धिः यलोपः, प्रकृतिभावश्च ।
इत्यज्ञानविमोहिताः	इति + अज्ञानविमोहिताः	यण्सन्धिः ।
अनेकचित्तविभ्रान्ता मोहजालसमावृताः	अनेकचित्तविभ्रान्ताः + मोहजालसमावृताः	विसर्गसन्धिः (लोपः) ।
नरकेऽशुचौ	नरके + अशुचौ	पूर्वरूपसन्धिः ।

(ख) समासः	मनोरथम्	मनः एव रथः मनोरथः, तम् - कर्मधारयः ।
	अज्ञानविमोहिताः	अज्ञानेन विमोहिताः अज्ञानविमोहिताः - तृतीयातत्पुरुषः ।
	अनेकचित्तविभ्रान्ताः	अनेकविषयकं चित्तम् अनेकचित्तम् - मध्यमपदलोपी तत्पुरुषः ।
		अनेकचित्तेन विभ्रान्ताः अनेकचित्तविभ्रान्ताः - तृतीयातत्पुरुषः ।
	मोहजालसमावृताः	मोह एव जालं मोहजालम् - कर्मधारयः ।
		मोहजालेन समावृताः मोहजालसमावृताः - तृतीयातत्पुरुषः ।
	कामभोगेषु	कामानां भोगाः कामभोगाः, तेषु - षष्ठीतत्पुरुषः ।
	अशुचौ	न शुचिः अशुचिः, तस्मिन् - नञ्तत्पुरुषः ।
(ग) कृदन्तः	लब्धम्	लभ् (डुलभष् प्राप्तौ) + क्त (कर्मणि) ।
	हतः	हन् (हन हिंसागत्योः) + क्त (कर्मणि) ।
	सिद्धः	सिध् (षिधु संराद्धौ) + क्त (कर्तरि) ।
	विमोहिताः	वि + मुह् (मुह वैचित्ये) + क्त (कर्तरि) ।
	विभ्रान्ताः	वि + भ्रम् (भ्रमु चलने) + क्त (कर्तरि) ।
	समावृताः	सम् + आ + वृत् (वृतु वर्तने) + क्त (कर्तरि) ।
	प्रसक्ताः	प्र + सज् (षञ्ज सङ्गे) + क्त (कर्तरि) ।
	नरके	नृ (नॄ नये) + वुन् नरकः, तस्मिन् (नृणाति क्लेशं नयति इति नरकम्) ।
	शुचौ	शुच् (शुच शोके) + क्तिन्, तस्याम् ।
(घ) तद्धितान्तः	भोगी	भोगः अस्य अस्मिन् वा अस्ति इति भोगी (मतुबर्थे इनि) ।
	बलवान्	बलम् अस्य अस्मिन् वा अस्ति इति बलवान् (मतुप्) ।
	सुखी	सुखम् अस्य अस्मिन् वा अस्ति इति सुखी (मतुबर्थे इनि) ।
	अभिजनवान्	अभिजनः अस्य अस्मिन् वा अस्ति इति अभिजनवान् (मतुप्) ।

भावस्पष्टीकरणम् -

पतन्ति ।	
कुत्र पतन्ति ?	**नरके** पतन्ति ।
कीदृशे नरके पतन्ति ?	**अशुचौ** नरके पतन्ति ।
के अशुचौ नरके पतन्ति ?	**प्रसक्ताः** अशुचौ नरके पतन्ति ।
केषु प्रसक्ताः अशुचौ नरके पतन्ति ?	**कामभोगेषु** प्रसक्ताः अशुचौ नरके पतन्ति ।
पुनः कीदृशाः कामभोगेषु प्रसक्ताः अशुचौ नरके पतन्ति ?	**मोहजालसमावृताः** कामभोगेषु प्रसक्ताः अशुचौ नरके पतन्ति ।

पुनः कीदृशाः मोहजालसमावृताः कामभोगेषु प्रसक्ताः अशुचौ नरके पतन्ति ?	**अनेकचित्तविभ्रान्ताः** मोहजालसमावृताः कामभोगेषु प्रसक्ताः अशुचौ नरके पतन्ति।
पुनः कीदृशाः अनेकचित्तविभ्रान्ताः मोहजालसमावृताः कामभोगेषु प्रसक्ताः अशुचौ नरके पतन्ति ?	**अज्ञानविमोहिताः** अनेकचित्तविभ्रान्ताः मोहजालसमावृताः कामभोगेषु प्रसक्ताः अशुचौ नरके पतन्ति।
किम् **(चिन्तयन्तः)** अज्ञानविमोहिताः अनेकचित्तविभ्रान्ताः मोहजालसमावृताः कामभोगेषु प्रसक्ताः अशुचौ नरके पतन्ति ?	**अद्य इदं मया लब्धम्** इति (चिन्तयन्तः) अज्ञानविमोहिताः अनेकचित्तविभ्रान्ताः मोहजालसमावृताः कामभोगेषु प्रसक्ताः अशुचौ नरके पतन्ति।
अद्य इदं मया लब्धं **पुनः किम् (चिन्तयन्तः)** इति अज्ञानविमोहिताः अनेकचित्तविभ्रान्ताः मोहजालसमावृताः कामभोगेषु प्रसक्ताः अशुचौ नरके पतन्ति ?	अद्य इदं मया लब्धम्, **इमं मनोरथं प्राप्स्ये** इति (चिन्तयन्तः) अज्ञानविमोहिताः अनेकचित्तविभ्रान्ताः मोहजालसमावृताः कामभोगेषु प्रसक्ताः अशुचौ नरके पतन्ति।
अद्य इदं मया लब्धम्, इमं मनोरथं प्राप्स्ये **पुनः किम् (चिन्तयन्तः)** इति अज्ञानविमोहिताः अनेकचित्तविभ्रान्ताः मोहजालसमावृताः कामभोगेषु प्रसक्ताः अशुचौ नरके पतन्ति ?	अद्य इदं मया लब्धम्, इमं मनोरथं प्राप्स्ये, **इदं धनम् अस्ति** इति (चिन्तयन्तः) अज्ञानविमोहिताः अनेकचित्तविभ्रान्ताः मोहजालसमावृताः कामभोगेषु प्रसक्ताः अशुचौ नरके पतन्ति।
अद्य इदं मया लब्धम्, इमं मनोरथं प्राप्स्ये, इदं धनम् अस्ति **पुनः किम् (चिन्तयन्तः)** इति अज्ञानविमोहिताः अनेकचित्तविभ्रान्ताः मोहजालसमावृताः कामभोगेषु प्रसक्ताः अशुचौ नरके पतन्ति ?	अद्य इदं मया लब्धम्, इमं मनोरथं प्राप्स्ये, इदं धनम् अस्ति, **इदम् अपि मे पुनः भविष्यति** इति (चिन्तयन्तः) अज्ञानविमोहिताः अनेकचित्तविभ्रान्ताः मोहजालसमावृताः कामभोगेषु प्रसक्ताः अशुचौ नरके पतन्ति।

अद्य इदं मया लब्धम्, इमं मनोरथं प्राप्स्ये, इदं धनम् अस्ति, इदम् अपि मे पुनः भविष्यति **पुनः किम्** **(चिन्तयन्तः)** इति अज्ञानविमोहिताः अनेकचित्तविभ्रान्ताः मोहजालसमावृताः कामभोगेषु प्रसक्ताः अशुचौ नरके पतन्ति ?	अद्य इदं मया लब्धम्, इमं मनोरथं प्राप्स्ये, इदं धनम् अस्ति, इदम् अपि मे पुनः भविष्यति, **असौ शत्रुः मया हतः** इति (चिन्तयन्तः) अज्ञानविमोहिताः अनेकचित्तविभ्रान्ताः मोहजालसमावृताः कामभोगेषु प्रसक्ताः अशुचौ नरके पतन्ति ।
अद्य इदं मया लब्धम्, इमं मनोरथं प्राप्स्ये, इदं धनम् अस्ति, इदम् अपि मे पुनः भविष्यति, असौ शत्रुः मया हतः **पुनः किम् (चिन्तयन्तः)** इति अज्ञानविमोहिताः अनेकचित्तविभ्रान्ताः मोहजालसमावृताः कामभोगेषु प्रसक्ताः अशुचौ नरके पतन्ति ?	अद्य इदं मया लब्धम्, इमं मनोरथं प्राप्स्ये, इदं धनम् अस्ति, इदम् अपि मे पुनः भविष्यति, असौ शत्रुः मया हतः, **अपरान् अपि हनिष्ये** इति (चिन्तयन्तः) अज्ञानविमोहिताः अनेकचित्तविभ्रान्ताः मोहजालसमावृताः कामभोगेषु प्रसक्ताः अशुचौ नरके पतन्ति ।
अद्य इदं मया लब्धम्, इमं मनोरथं प्राप्स्ये, इदं धनम् अस्ति, इदम् अपि मे पुनः भविष्यति, असौ शत्रुः मया हतः, अपरान् अपि हनिष्ये **पुनः किम् (चिन्तयन्तः)** इति अज्ञानविमोहिताः अनेकचित्तविभ्रान्ताः मोहजालसमावृताः कामभोगेषु प्रसक्ताः अशुचौ नरके पतन्ति ?	अद्य इदं मया लब्धम्, इमं मनोरथं प्राप्स्ये, इदं धनम् अस्ति, इदम् अपि मे पुनः भविष्यति, असौ शत्रुः मया हतः, अपरान् अपि हनिष्ये, **अहम् ईश्वरः** इति (चिन्तयन्तः) अज्ञानविमोहिताः अनेकचित्तविभ्रान्ताः मोहजालसमावृताः कामभोगेषु प्रसक्ताः अशुचौ नरके पतन्ति ।
अद्य इदं मया लब्धम्, इमं मनोरथं प्राप्स्ये, इदं धनम् अस्ति, इदम् अपि मे पुनः भविष्यति, असौ शत्रुः मया हतः, अपरान् अपि हनिष्ये, अहम् ईश्वरः **पुनः किम् (चिन्तयन्तः)** इति अज्ञानविमोहिताः अनेकचित्तविभ्रान्ताः मोहजालसमावृताः कामभोगेषु प्रसक्ताः अशुचौ नरके पतन्ति ?	अद्य इदं मया लब्धम्, इमं मनोरथं प्राप्स्ये, इदं धनम् अस्ति, इदम् अपि मे पुनः भविष्यति, असौ शत्रुः मया हतः, अपरान् अपि हनिष्ये, अहम् ईश्वरः, **अहं भोगी** इति (चिन्तयन्तः) अज्ञानविमोहिताः अनेकचित्तविभ्रान्ताः मोहजालसमावृताः कामभोगेषु प्रसक्ताः अशुचौ नरके पतन्ति ।

अद्य इदं मया लब्धम्, इमं मनोरथं प्राप्स्ये, इदं धनम् अस्ति, इदम् अपि मे पुनः भविष्यति, असौ शत्रुः मया हतः, अपरान् अपि हनिष्ये, अहम् ईश्वरः, अहं भोगी **पुनः किम् (चिन्तयन्तः)** इति अज्ञानविमोहिताः अनेकचित्तविभ्रान्ताः मोहजालसमावृताः कामभोगेषु प्रसक्ताः अशुचौ नरके पतन्ति ?	अद्य इदं मया लब्धम्, इमं मनोरथं प्राप्स्ये, इदं धनम् अस्ति, इदम् अपि मे पुनः भविष्यति, असौ शत्रुः मया हतः, अपरान् अपि हनिष्ये, अहम् ईश्वरः, अहं भोगी, **अहं सिद्धः** इति (चिन्तयन्तः) अज्ञानविमोहिताः अनेकचित्तविभ्रान्ताः मोहजालसमावृताः कामभोगेषु प्रसक्ताः अशुचौ नरके पतन्ति ।
अद्य इदं मया लब्धम्, इमं मनोरथं प्राप्स्ये, इदं धनम् अस्ति, इदम् अपि मे पुनः भविष्यति, असौ शत्रुः मया हतः, अपरान् अपि हनिष्ये, अहम् ईश्वरः, अहं भोगी, अहं सिद्धः **पुनः किम् (चिन्तयन्तः)** इति अज्ञानविमोहिताः अनेकचित्तविभ्रान्ताः मोहजालसमावृताः कामभोगेषु प्रसक्ताः अशुचौ नरके पतन्ति ?	अद्य इदं मया लब्धम्, इमं मनोरथं प्राप्स्ये, इदं धनम् अस्ति, इदम् अपि मे पुनः भविष्यति, असौ शत्रुः मया हतः, अपरान् अपि हनिष्ये, अहम् ईश्वरः, अहं भोगी, अहं सिद्धः, **बलवान् सुखी** इति (चिन्तयन्तः) अज्ञानविमोहिताः अनेकचित्तविभ्रान्ताः मोहजालसमावृताः कामभोगेषु प्रसक्ताः अशुचौ नरके पतन्ति ।
अद्य इदं मया लब्धम्, इमं मनोरथं प्राप्स्ये, इदं धनम् अस्ति, इदम् अपि मे पुनः भविष्यति, असौ शत्रुः मया हतः, अपरान् अपि हनिष्ये, अहम् ईश्वरः, अहं भोगी, अहं सिद्धः, बलवान् सुखी **पुनः किम् (चिन्तयन्तः)** इति अज्ञानविमोहिताः अनेकचित्तविभ्रान्ताः मोहजालसमावृताः कामभोगेषु प्रसक्ताः अशुचौ नरके पतन्ति ?	अद्य इदं मया लब्धम्, इमं मनोरथं प्राप्स्ये, इदं धनम् अस्ति, इदम् अपि मे पुनः भविष्यति, असौ शत्रुः मया हतः, अपरान् अपि हनिष्ये, अहम् ईश्वरः, अहं भोगी, अहं सिद्धः, बलवान् सुखी, **आढ्यः अभिजनवान् अस्मि** इति (चिन्तयन्तः) अज्ञानविमोहिताः अनेकचित्तविभ्रान्ताः मोहजालसमावृताः कामभोगेषु प्रसक्ताः अशुचौ नरके पतन्ति ।
अद्य इदं मया लब्धम्, इमं मनोरथं प्राप्स्ये, इदं धनम् अस्ति, इदम् अपि मे पुनः भविष्यति, असौ शत्रुः मया हतः, अपरान् अपि हनिष्ये, अहम् ईश्वरः, अहं भोगी, अहं सिद्धः, बलवान् सुखी, आढ्यः अभिजनवान् अस्मि **पुनः किम् (चिन्तयन्तः)** इति अज्ञानविमोहिताः अनेकचित्तविभ्रान्ताः मोहजालसमावृताः कामभोगेषु प्रसक्ताः अशुचौ नरके पतन्ति ?	अद्य इदं मया लब्धम्, इमं मनोरथं प्राप्स्ये, इदं धनम् अस्ति, इदम् अपि मे पुनः भविष्यति, असौ शत्रुः मया हतः, अपरान् अपि हनिष्ये, अहम् ईश्वरः, अहं भोगी, अहं सिद्धः, बलवान् सुखी आढ्यः अभिजनवान् अस्मि, **मया सदृशः अन्यः कः अस्ति** इति (चिन्तयन्तः) अज्ञानविमोहिताः अनेकचित्तविभ्रान्ताः मोहजालसमावृताः कामभोगेषु प्रसक्ताः अशुचौ नरके पतन्ति ।

अद्य इदं मया लब्धम्, इमं मनोरथं प्राप्स्ये, इदं धनम् अस्ति, इदम् अपि मे पुनः भविष्यति, असौ शत्रुः मया हतः, अपरान् अपि हनिष्ये, अहम् ईश्वरः, अहं भोगी, अहं सिद्धः, बलवान् सुखी, आढ्यः अभिजनवान् अस्मि, मया सदृशः अन्यः कः अस्ति, **पुनः किम् (चिन्तयन्तः)** इति अज्ञानविमोहिताः अनेकचित्तविभ्रान्ताः मोहजालसमावृताः कामभोगेषु प्रसक्ताः अशुचौ नरके पतन्ति ?	अद्य इदं मया लब्धम्, इमं मनोरथं प्राप्स्ये, इदं धनम् अस्ति, इदम् अपि मे पुनः भविष्यति, असौ शत्रुः मया हतः, अपरान् अपि हनिष्ये, अहम् ईश्वरः, अहं भोगी, अहं सिद्धः, बलवान् सुखी, आढ्यः अभिजनवान् अस्मि, मया सदृशः अन्यः कः अस्ति, **यक्ष्ये** इति (चिन्तयन्तः) अज्ञानविमोहिताः अनेकचित्तविभ्रान्ताः मोहजालसमावृताः कामभोगेषु प्रसक्ताः अशुचौ नरके पतन्ति।
अद्य इदं मया लब्धम्, इमं मनोरथं प्राप्स्ये, इदं धनम् अस्ति, इदम् अपि मे पुनः भविष्यति, असौ शत्रुः मया हतः, अपरान् अपि हनिष्ये, अहम् ईश्वरः, अहं भोगी, अहं सिद्धः, बलवान् सुखी, आढ्यः अभिजनवान् अस्मि, मया सदृशः अन्यः कः अस्ति यक्ष्ये **पुनः किम् (चिन्तयन्तः)** इति अज्ञानविमोहिताः अनेकचित्तविभ्रान्ताः मोहजालसमावृताः कामभोगेषु प्रसक्ताः अशुचौ नरके पतन्ति ?	अद्य इदं मया लब्धम्, इमं मनोरथं प्राप्स्ये, इदं धनम् अस्ति, इदम् अपि मे पुनः भविष्यति, असौ शत्रुः मया हतः, अपरान् अपि हनिष्ये, अहम् ईश्वरः, अहं भोगी, अहं सिद्धः, बलवान् सुखी, आढ्यः अभिजनवान् अस्मि, मया सदृशः अन्यः कः अस्ति, यक्ष्ये, **दास्यामि** इति (चिन्तयन्तः) अज्ञानविमोहिताः अनेकचित्तविभ्रान्ताः मोहजालसमावृताः कामभोगेषु प्रसक्ताः अशुचौ नरके पतन्ति।
अद्य इदं मया लब्धम्, इमं मनोरथं प्राप्स्ये, इदं धनम् अस्ति, इदम् अपि मे पुनः भविष्यति, असौ शत्रुः मया हतः, अपरान् अपि हनिष्ये, अहम् ईश्वरः, अहं भोगी, अहं सिद्धः, बलवान् सुखी, आढ्यः अभिजनवान् अस्मि, मया सदृशः अन्यः कः अस्ति, यक्ष्ये, दास्यामि **पुनः किम् (चिन्तयन्तः)** इति अज्ञानविमोहिताः अनेकचित्तविभ्रान्ताः मोहजालसमावृताः कामभोगेषु प्रसक्ताः अशुचौ नरके पतन्ति ?	अद्य इदं मया लब्धम्, इमं मनोरथं प्राप्स्ये, इदं धनम् अस्ति, इदम् अपि मे पुनः भविष्यति, असौ शत्रुः मया हतः, अपरान् अपि हनिष्ये, अहम् ईश्वरः, अहं भोगी, अहं सिद्धः, बलवान् सुखी, आढ्यः अभिजनवान् अस्मि, मया सदृशः अन्यः कः अस्ति, यक्ष्ये, दास्यामि, **मोदिष्य** इति (चिन्तयन्तः) अज्ञानविमोहिताः अनेकचित्तविभ्रान्ताः मोहजालसमावृताः कामभोगेषु प्रसक्ताः अशुचौ नरके पतन्ति।

तात्पर्यम् - ते हि 'इदं धनं मया अद्य प्राप्तम् इति, तच्च धनम् अचिरादेव प्राप्स्यामि इति, इदं धनम् इदानीमस्ति इति, तच्च धनं मम अचिरादेव भविष्यति इति, शत्रुम् इमम् अद्य मारितवान्, अन्यानपि शत्रून् अचिरादेव मारयिष्यामि इति, अहमेव लोकस्य नियामकः अन्यो नियामको नास्ति इति, अहं सर्वैः सुखसाधनैः उपेतः इति, अहं कृतकृत्यः इति, अहमेव बलवान् सुखी चेति, अहं धनिकः इति, अहं सत्कुलजातः

इति, एतादृशस्य मम अन्यः सदृशो नास्ति इति, अहं यज्ञं करिष्यामि इति, अहं दानं करिष्यामि इति, अहं सन्तोषं प्राप्स्यामि इति' च स्वच्छन्दं कथयन्तः अविवेकेन भ्रान्ताः, नानाविषयेषु मनसः सञ्चारात् मूढाः, रागरूपजालेन आवृताः, विषयोपभोगे आसक्ताः च अनर्थकारिणि नरके निपतन्ति ।

आत्मसम्भाविताः स्तब्धा धनमानमदान्विताः ।
यजन्ते नामयज्ञैस्ते दम्भेनाविधिपूर्वकम् ॥१६.१७॥
अहङ्कारं बलं दर्पं कामं क्रोधं च संश्रिताः ।
मामात्मपरदेहेषु प्रद्विषन्तोऽभ्यसूयकाः ॥१६.१८॥

पदच्छेदः - आत्मसम्भाविताः, स्तब्धाः, धनमानमदान्विताः ।
यजन्ते, नामयज्ञैः, ते, दम्भेन, अविधिपूर्वकम् ॥
अहङ्कारम्, बलम्, दर्पम्, कामम्, क्रोधम्, च, संश्रिताः ।
माम्, आत्मपरदेहेषु, प्रद्विषन्तः, अभ्यसूयकाः ॥

अन्वयः - आत्मसम्भाविताः स्तब्धाः धनमानमदान्विताः ते दम्भेन अविधिपूर्वकं नामयज्ञैः यजन्ते । अहङ्कारं बलं दर्पं कामं क्रोधं च संश्रिताः आत्मपरदेहेषु मां प्रद्विषन्तः अभ्यसूयकाः (भवन्ति) ।

पदार्थः - आत्मसम्भाविताः = स्वयं पूजिताः, स्तब्धाः = धृष्टाः, धनमानमदान्विताः = वित्तमानगर्वसहिताः, ते = जनाः, दम्भेन = आत्मनो धार्मिकतया ख्यापनेन, अविधिपूर्वकम् = अशास्त्रीयम्, नामयज्ञैः = नाममात्रयागैः, यजन्ते = देवान् पूजयन्ति, अहङ्कारम् = अहङ्करणम्, बलम् = सामर्थ्यम्, दर्पम् = गर्वम्, कामम् = अभिलाषम्, क्रोधं च = कोपमपि, संश्रिताः = अवलम्बिताः, आत्मपरदेहेषु = स्वकीयान्यशरीरेषु, माम् = मा, प्रद्विषन्तः = खेदयन्तः, अभ्यसूयकाः = असहमानाः भवन्ति ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
आत्मसम्भाविताः	अ. पुं. प्र. बहु. (विशेषणम्)	स्तब्धाः	अ. पुं. प्र. बहु. (विशेषणम्)
धनमानमदान्विताः	अ. पुं. प्र. बहु. (विशेषणम्)	ते	तद् - द. सर्व. पुं. प्र. बहु. (विशेषणम्)
दम्भेन	अ. पुं. तृ. एक.	अविधिपूर्वकम्	अ. पुं. द्वि. एक.
नामयज्ञैः	अ. पुं. तृ. बहु.	यजन्ते	यज् (यज देवपूजासङ्गतिकरणदानेषु) आत्म. कर्तरि लट्. प्रपु. बहु.

अहङ्कारम्	अ. पुं. द्वि. एक.	बलम्	अ. नपुं. द्वि. एक.
दर्पम्	अ. पुं. द्वि. एक.	कामम्	अ. पुं. द्वि. एक.
क्रोधम्	अ. पुं. द्वि. एक.	च	अव्ययम्
संश्रिताः	अ. पुं. प्र. बहु. (विशेषणम्)	आत्मपरदेहेषु	अ. पुं. स. बहु.
माम्	अस्मद् - द. (सर्व.) द्वि. एक.	प्रद्विषन्तः	प्रद्विषत् - त. पुं. प्र. बहु. (विशेषणम्)
अभ्यसूयकाः	अ. पुं. प्र. बहु. (विशेषणम्)		

व्याकरणम् -

(क) सन्धिः

स्तब्धा धनमानमदान्विताः	स्तब्धाः + धनमानमदान्विताः	विसर्गसन्धिः (लोपः)।
नामयज्ञैस्ते	नामयज्ञैः + ते	विसर्गसन्धिः (सकारः)।
दम्भेनाविधिपूर्वकम्	दम्भेन + अविधिपूर्वकम्	सवर्णदीर्घसन्धिः।
प्रद्विषन्तोऽभ्यसूयकाः	प्रद्विषन्तः + अभ्यसूयकाः	विसर्गसन्धिः (सकारः) रेफः,उकारः, गुणः पूर्वरूपं च।

(ख) समासः

आत्मसम्भाविताः	आत्मना सम्भाविताः आत्मसम्भाविताः - तृतीयातत्पुरुषः।
धनमानमदान्विताः	धनं च मानश्च मदश्च धनमानमदाः - द्वन्द्वः। धनमानमदैः अन्विताः धनमानमदान्विताः - तृतीयातत्पुरुषः।
अहङ्कारम्	अहं करोतीति अहङ्कारः, तम् - उपपदसमासः।
नामयज्ञैः	नामसम्पादकाः यज्ञाः नामयज्ञाः, तैः - मध्यमपदलोपी तत्पुरुषः।
अविधिपूर्वकम्	विधिः पूर्वं यथा भवति तथा विधिपूर्वकम् - क्रियाविशेषणम् बहुव्रीहिः (समासान्ते स्वार्थे कप्प्रत्ययः च)। न विधिपूर्वकम् अविधिपूर्वकम् - नञ्तत्पुरुषः।
आत्मपरदेहेषु	आत्मा च परे च आत्मपराः (द्वन्द्वः)। आत्मपराणाम् देहाः आत्मपरदेहाः, तेषु - षष्ठीतत्पुरुषः।

(ग) कृदन्तः

सम्भाविताः	सम् + भू (भू सत्तायाम्) + णिच् + क्त (कर्तरि)।
स्तब्धाः	स्तम्भ् (स्तम्भु प्रतिघाते) + क्त (कर्तरि)।
अन्विताः	अनु + इ (इण् गतौ) + क्त (कर्तरि)।
दम्भेन	दम्भ् (दम्भु दमने) + घञ्, तेन।
दर्पम्	दृप् (दृप उत्क्लेशे) + अच् (कर्तरि), तम्।
कामम्	कम् (कमु कान्तौ) + घञ्, तम्।

क्रोधम्	क्रुध् (क्रुध क्रोधे) + घञ् (भावे), तम् ।
संश्रिताः	सम् + श्रि (श्रिञ् सेवायाम्) + क्त (कर्तरि) ।
प्रद्विषन्तः	प्र + द्विष् (द्विष अप्रीतौ) + शतृ ।
अभ्यसूयकाः	अभि + असु (असु उपतापे) + ण्वुल् ।

भावस्पष्टीकरणम् -

यजन्ते ।	
के यजन्ते ?	ते यजन्ते ।
के ते यजन्ते ?	**आत्मसम्भाविताः** ते यजन्ते ।
आत्मसम्भाविताः **पुनः के** ते यजन्ते ?	आत्मसम्भाविताः **स्तब्धाः** ते यजन्ते ।
आत्मसम्भाविताः स्तब्धाः **पुनः के** ते यजन्ते ?	आत्मसम्भाविताः स्तब्धाः **धनमानमदान्विताः** ते यजन्ते ।
आत्मसम्भाविताः स्तब्धाः धनमानमदान्विताः ते **कैः** यजन्ते ?	आत्मसम्भाविताः स्तब्धाः धनमानमदान्विताः ते **नामयज्ञैः** यजन्ते ।
आत्मसम्भाविताः स्तब्धाः धनमानमदान्विताः ते **कथं** नामयज्ञैः यजन्ते ?	आत्मसम्भाविताः स्तब्धाः धनमानमदान्विताः ते **अविधिपूर्वकं** नामयज्ञैः यजन्ते ।
आत्मसम्भाविताः स्तब्धाः धनमानमदान्विताः ते **केन** अविधिपूर्वकं नामयज्ञैः यजन्ते ?	आत्मसम्भाविताः स्तब्धाः धनमानमदान्विताः ते **दम्भेन** अविधिपूर्वकं नामयज्ञैः यजन्ते ।
(भवन्ति) ।	
के (भवन्ति) ?	**संश्रिताः** (भवन्ति) ।
कं संश्रिताः (भवन्ति) ?	**अहङ्कारं** संश्रिताः (भवन्ति) ।
अहङ्कारं **पुनः किं** संश्रिताः (भवन्ति) ?	अहङ्कारं **बलं** संश्रिताः (भवन्ति) ।
अहङ्कारं बलं **पुनः कं** संश्रिताः (भवन्ति) ?	अहङ्कारं बलं **दर्पं** संश्रिताः (भवन्ति) ।
अहङ्कारं बलं दर्पं **पुनः कं** संश्रिताः (भवन्ति) ?	अहङ्कारं बलं दर्पं **कामं** संश्रिताः (भवन्ति) ।
अहङ्कारं बलं दर्पं कामं **पुनश्च कं** संश्रिताः (भवन्ति) ?	अहङ्कारं बलं दर्पं कामं **क्रोधं** च संश्रिताः (भवन्ति) ।
अहङ्कारं बलं दर्पं कामं क्रोधं च संश्रिताः **पुनः के** (भवन्ति) ?	अहङ्कारं बलं दर्पं कामं क्रोधं च संश्रिताः **अभ्यसूयकाः** (भवन्ति) ।

अहङ्कारं बलं दर्पं कामं क्रोधं च संश्रिताः **कीदृशाः** अभ्यसूयकाः (भवन्ति) ?	अहङ्कारं बलं दर्पं कामं क्रोधं च संश्रिताः **प्रद्विषन्तः** अभ्यसूयकाः (भवन्ति)।
अहङ्कारं बलं दर्पं कामं क्रोधं च संश्रिताः **कं** प्रद्विषन्तः अभ्यसूयकाः (भवन्ति) ?	अहङ्कारं बलं दर्पं कामं क्रोधं च संश्रिताः **मां** प्रद्विषन्तः अभ्यसूयकाः (भवन्ति)।
अहङ्कारं बलं दर्पं कामं क्रोधं च संश्रिताः **कुत्र** मां प्रद्विषन्तः अभ्यसूयकाः (भवन्ति) ?	अहङ्कारं बलं दर्पं कामं क्रोधं च संश्रिताः **आत्मपरदेहेषु** मां प्रद्विषन्तः अभ्यसूयकाः (भवन्ति)।

तात्पर्यम् - ते हि आत्मानं पूज्यत्वेन प्रचारयन्ति, अविनीताः भवन्ति, धनमानमदैः उपेताः भवन्ति, तादृशाः ते सोमयाजिप्रभृतिभिः शब्दैः आत्मनः व्यपदेशम् इच्छन्तः अश्रद्धया अशास्त्रीयक्रमेण च कथञ्चित् यागं कुर्वन्ति, तेषु अहङ्कारबलदर्पादयः निवासं कुर्वन्ति। एतादृशाः ते असूयापराः सर्वेषु शरीरेषु अन्तर्यामितया वर्तमानं मां खेदयन्ति।

तानहं द्विषतः क्रूरान्संसारेषु नराधमान्।
क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु ॥१६.१९॥

पदच्छेदः - तान्, अहम्, द्विषतः, क्रूरान्, संसारेषु, नराधमान्।
क्षिपामि, अजस्रम्, अशुभान्, आसुरीषु, एव, योनिषु ॥

अन्वयः - द्विषतः क्रूरान् अशुभान् तान् नराधमान् संसारेषु आसुरीषु योनिषु एव अजस्रम् अहं क्षिपामि।

पदार्थः - द्विषतः = शत्रून्, क्रूरान् = उग्रान्, अशुभान् = अपवित्रान्, तान् = तान् जनान्, नराधमान् = नीचमानवान्, संसारेषु = भवेषु, आसुरीषु = राक्षसीषु, योनिषु एव = योनिषु एव, अजस्रम् = सततम् (निरन्तरम्), अहं क्षिपामि = अहं पातयामि।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
द्विषतः	द्विषत् - त. पुं. द्वि. बहु. (विशेषणम्)	क्रूरान्	अ. पुं. द्वि. बहु. (विशेषणम्)
अशुभान्	अ. पुं. द्वि. बहु. (विशेषणम्)	तान्	तद् - द. सर्व. पुं. द्वि. बहु. (विशेषणम्)
नराधमान्	अ. पुं. द्वि. बहु. (विशेष्यम्)	संसारेषु	अ. पुं. स. बहु.
आसुरीषु	ई. स्त्री. स. बहु. (विशेषणम्)	योनिषु	इ. स्त्री. स. बहु. (विशेष्यम्)

एव	अव्ययम्	अजस्रम्	अ. नपुं. द्वि. एक.
अहम्	अस्मद् - द. सर्व. प्र. एक.	क्षिपामि	क्षिप् (क्षिप प्रेरणे) पर. कर्तरि लट्. उपु. एक.

व्याकरणम् -

(क) सन्धिः	क्षिपाम्यजस्रम्	क्षिपामि + अजस्रम्	यण्सन्धिः ।
	आसुरीष्वेव	आसुरीषु + एव	यण्सन्धिः ।
(ख) समासः	नराधमान्	नरेषु अधमाः नराधमाः, तान् - सप्तमीतत्पुरुषः ।	
	अशुभान्	न शुभाः अशुभाः, तान् - नञ्तत्पुरुषः ।	
(ग) कृदन्तः	द्विषतः	द्विष् (द्विष अप्रीतौ) + शतृ ।	
(घ) तद्धितान्तः	आसुरीषु	असुराणाम् इमे आसुराः, तेषु (इदमर्थे अण्) ।	

भावस्पष्टीकरणम् -

अहं क्षिपामि ।	
कान् अहं क्षिपामि ?	**नराधमान्** अहं क्षिपामि ।
कीदृशान् नराधमान् अहं क्षिपामि ?	**क्रूरान्** नराधमान् अहं क्षिपामि ।
क्रूरान् **पुनः कीदृशान्** नराधमान् अहं क्षिपामि ?	क्रूरान् **अशुभान्** नराधमान् अहं क्षिपामि ।
क्रूरान् अशुभान् **पुनः कीदृशान्** नराधमान् अहं क्षिपामि ?	क्रूरान् अशुभान् **द्विषतः** नराधमान् अहं क्षिपामि ।
द्विषतः क्रूरान् अशुभान् **पुनः कान्** नराधमान् अहं क्षिपामि ?	क्रूरान् अशुभान् द्विषतः **तान्** नराधमान् अहं क्षिपामि ।
क्रूरान् अशुभान् द्विषतः तान् नराधमान् **कुत्र** अहं क्षिपामि ?	क्रूरान् अशुभान् द्विषतः तान् नराधमान् **संसारेषु** अहं क्षिपामि ।
क्रूरान् अशुभान् द्विषतः तान् नराधमान् संसारेषु **पुनः कुत्र** अहं क्षिपामि ?	क्रूरान् अशुभान् द्विषतः तान् नराधमान् संसारेषु **योनिषु** अहं क्षिपामि ।
क्रूरान् अशुभान् द्विषतः तान् नराधमान् संसारेषु **कासु** योनिषु अहं क्षिपामि ?	क्रूरान् अशुभान् द्विषतः तान् नराधमान् संसारेषु **आसुरीषु** योनिषु एव अहं क्षिपामि ।
क्रूरान् अशुभान् द्विषतः तान् नराधमान् संसारेषु आसुरीषु योनिषु एव **कथम्** अहं क्षिपामि ?	क्रूरान् अशुभान् द्विषतः तान् नराधमान् संसारेषु आसुरीषु योनिषु एव **अजस्रम्** अहं क्षिपामि ।

तात्पर्यम् - ये मां द्विषन्ति, क्रूराः अशुभाश्च सन्ति आसुरगुणसम्पन्नाः तादृशान् नरापसदान् अहं सर्वदा संसारे एव पातयामि, तत्रापि आसुरस्वभावेषु एव जन्म कल्पयामि।

आसुरीं योनिमापन्ना मूढा जन्मनि जन्मनि।
मामप्राप्यैव कौन्तेय ततो यान्त्यधमां गतिम्॥१६.२०॥

पदच्छेदः - आसुरीम्, योनिम्, आपन्नाः, मूढाः, जन्मनि, जन्मनि।
माम्, अप्राप्य, एव, कौन्तेय, ततः, यान्ति, अधमाम्, गतिम्॥

अन्वयः - कौन्तेय ! आसुरीं योनिम् आपन्नाः मूढाः माम् अप्राप्य एव ततः जन्मनि जन्मनि अधमां गतिं यान्ति।

पदार्थः - कौन्तेय = अर्जुन, आसुरीम् = राक्षसीम्, योनिम् = प्रकृतिम्, आपन्नाः = प्राप्ताः, मूढाः = अविवेकिनः, माम् = मा, अप्राप्य एव = अनासाद्य एव, ततः = अनन्तरम्, जन्मनि जन्मनि = प्रतिजन्म, अधमाम् = नीचम्, गतिम् = स्थानम्, यान्ति = गच्छन्ति।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
कौन्तेय	अ पुं. सम्बो. एक.	आसुरीम्	ई. स्त्री. द्वि. एक. (विशेषणम्)
योनिम्	इ. स्त्री. द्वि. एक. (विशेष्यम्)	आपन्नाः	अ. पुं. प्र. बहु. (विशेषणम्)
मूढाः	अ. पुं. प्र. बहु. (विशेषणम्)	माम्	अस्मद् - द. (सर्व.) द्वि. एक.
अप्राप्य	अव्ययम्	एव	अव्ययम्
ततः	अव्ययम्	जन्मनि	जन्मन् - न. नपुं. स. बहु.
अधमाम्	आ. स्त्री. द्वि. एक. (विशेषणम्)	गतिम्	इ. स्त्री. द्वि. एक. (विशेष्यम्)
यान्ति	या (या प्रापणे) पर. कर्तरि लट्. प्रपु. बहु.		

व्याकरणम् -

(क) सन्धिः

आपन्ना मूढाः	आपन्नाः + मूढाः	विसर्गसन्धिः (लोपः)।
मूढा जन्मनि	मूढाः + जन्मनि	विसर्गसन्धिः (लोपः)।
अप्राप्यैव	अप्राप्य + एव	वृद्धिसन्धिः।
ततो यान्ति	ततः + यान्ति	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः।
यान्त्यधमाम्	यान्ति + अधमाम्	यण्सन्धिः।

(ख) समासः	अप्राप्य	न प्राप्य अप्राप्य - नञ्तत्पुरुषः।
(ग) कृदन्तः	आपन्नाः	आ + पद् (पद गतौ) + क्त (कर्तरि)।
	मूढाः	मुह् (मुह वैचित्ये) + क्त (कर्तरि)।
	प्राप्य	प्र + आप् (आप्लृ व्याप्तौ) + ल्यप्।
	गतिम्	गम् (गम्लृ गतौ) + क्तिन्, ताम्।
(घ) तद्धितान्तः	आसुरीम्	असुरः + अण् (आसुरम्) + ङीप्, ताम् (असुराणाम् इयम् आसुरी) (इदमर्थे अण् स्त्रीत्वे च ङीप्)।
	कौन्तेय	कुन्ती + ढक् (कुन्त्याः अपत्यं पुमान्)।

भावस्पष्टीकरणम् -

यान्ति।	
के यान्ति ?	**मूढाः** यान्ति।
कीदृशाः मूढाः यान्ति ?	**आपन्नाः** मूढाः यान्ति।
काम् आपन्नाः मूढाः यान्ति ?	**योनिम्** आपन्नाः मूढाः यान्ति।
कीदृशीं योनिम् आपन्नाः मूढाः यान्ति ?	**आसुरीं** योनिम् आपन्नाः मूढाः यान्ति।
आसुरीं योनिम् आपन्नाः मूढाः **कां** यान्ति ?	आसुरीं योनिम् आपन्नाः मूढाः **गतिं** यान्ति।
आसुरीं योनिम् आपन्नाः मूढाः **कीदृशीं** गतिं यान्ति ?	आसुरीं योनिम् आपन्नाः मूढाः **अधमां** गतिं यान्ति।
आसुरीं योनिम् आपन्नाः मूढाः **कदा** अधमां गतिं यान्ति ?	आसुरीं योनिम् आपन्नाः मूढाः **जन्मनि जन्मनि** अधमां गतिं यान्ति।
आसुरीं योनिम् आपन्नाः मूढाः **कुतः** जन्मनि जन्मनि अधमां गतिं यान्ति ?	आसुरीं योनिम् आपन्नाः मूढाः **ततः** जन्मनि जन्मनि अधमां गतिं यान्ति।
आसुरीं योनिम् आपन्नाः मूढाः **किं कृत्वा** ततः जन्मनि जन्मनि अधमां गतिं यान्ति ?	आसुरीं योनिम् आपन्नाः मूढाः **अप्राप्य** एव ततः जन्मनि जन्मनि अधमां गतिं यान्ति।
आसुरीं योनिम् आपन्नाः मूढाः **कम्** अप्राप्य एव ततः जन्मनि जन्मनि अधमां गतिं यान्ति ?	आसुरीं योनिम् आपन्नाः मूढाः **माम्** अप्राप्य एव ततः जन्मनि जन्मनि अधमां गतिं यान्ति।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**कौन्तेय** !

तात्पर्यम् - अर्जुन ! तादृशानाम् असुरस्वभावं प्राप्तवतां नराधमानां न कदापि मम प्राप्तिः भवति। ते हि प्रत्येकस्मिन् जन्मनि क्रमेण नीचामेव गतिं प्राप्नुवन्ति।

त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः।
कामः क्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्यजेत्॥१६.२१॥

पदच्छेदः - त्रिविधम्, नरकस्य, इदम्, द्वारम्, नाशनम्, आत्मनः।
कामः, क्रोधः, तथा, लोभः, तस्मात्, एतत्, त्रयम्, त्यजेत्॥

अन्वयः - कामः क्रोधः तथा लोभः इदम् आत्मनः नाशनं नरकस्य त्रिविधं द्वारम्। तस्मात् एतत् त्रयं त्यजेत्।

पदार्थः - कामः = वाञ्छा (इच्छा), क्रोधः = कोपः, तथा = तेन प्रकारेण, लोभः = तृष्णा, इदम् = एतत्, आत्मनः = स्वस्य, नाशनम् = विनाशकरम्, नरकस्य = नरकलोकस्य, त्रिविधम् = त्रिप्रकारकम्, द्वारम् = प्रवेशस्थानम्, तस्मात् = ततः, एतत् = इदम्, त्रयम् = त्रितयम्, त्यजेत् = वर्जयेत्।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
कामः	अ. पुं. प्र. एक.	क्रोधः	अ. पुं. प्र. एक.
तथा	अव्ययम्	लोभः	अ. पुं. प्र. एक.
इदम्	इदम् - म. (सर्व.) नपुं. प्र. एक. (विशेषणम्)	आत्मनः	आत्मन् - न. पुं. ष. एक.
नाशनम्	अ. नपुं. प्र. एक.	नरकस्य	अ. पुं. ष. एक.
त्रिविधम्	अ. नपुं. प्र. एक. (विशेषणम्)	द्वारम्	अ. नपुं. प्र. एक. (विशेष्यम्)
तस्मात्	तद् - द. सर्व. नपुं. पं. एक. (विशेषणम्)	एतत्	एतद् - द. सर्व. नपुं. द्वि. एक. (विशेषणम्)
त्रयम्	अ. नपुं. द्वि. एक. (विशेष्यम्)	त्यजेत्	त्यज् (त्यज हानौ) पर. कर्तरि विधिलिङ्. प्रपु. एक.

व्याकरणम् -

(क) सन्धिः	नरकस्येदम्	नरकस्य + इदम्	गुणसन्धिः।
	क्रोधस्तथा	क्रोधः + तथा	विसर्गसन्धिः (सकारः)।
	लोभस्तस्मात्	लोभः + तस्मात्	विसर्गसन्धिः (सकारः)।
	तस्मादेतत्	तस्मात् + एतत्	जश्त्वसन्धिः।
(ख) समासः	त्रिविधम्	त्रयः विधाः यस्य तत् - बहुव्रीहिः।	
(ग) कृदन्तः	नरकस्य	नृ (नॄ नये) + वुन् नरकः, तस्य (नृणाति क्लेशं नयति इति नरकम्)।	
	द्वारम्	द्वृ (द्वृ संवरणे) + णिच् + अच्।	

नाशनम्	नश् (णश अदर्शने) + णिच् + ल्युट्।
कामः	कम् (कमु कान्तौ) + घञ्।
क्रोधः	क्रुध् (क्रुध क्रोधे) + घञ् (भावे)।
लोभः	लुभ् (लुभ गार्ध्ये) + घञ्।
आत्मनः	अत (अत सातत्यगमने) + मनिन् आत्मन्, तस्य।

भावस्पष्टीकरणम् -

नाशनम् (अस्ति)।	
नाशनम् **(इति) किम्** (अस्ति) ?	नाशनम् **(इति) द्वारम्** (अस्ति)।
नाशनं **कतिविधं** द्वारम् (अस्ति) ?	नाशनं **त्रिविधं** द्वारम् (अस्ति)।
नाशनं **कस्य** त्रिविधं द्वारम् (अस्ति) ?	नाशनं **नरकस्य** त्रिविधं द्वारम् (अस्ति)।
कस्य नाशनं नरकस्य त्रिविधं द्वारम् (अस्ति) ?	**आत्मनः** नाशनं नरकस्य त्रिविधं द्वारम् (अस्ति)।
आत्मनः नाशनं **किं किं** नरकस्य त्रिविधं द्वारम् (अस्ति) ?	आत्मनः नाशनं **कामः क्रोधः तथा लोभः इदं** नरकस्य त्रिविधं द्वारम् (अस्ति)।
आत्मनः नाशनं कामः क्रोधः तथा लोभः इदं नरकस्य त्रिविधं द्वारं (अस्ति) **तस्मात् किं कुर्यात्** ?	आत्मनः नाशनं कामः क्रोधः तथा लोभः इदं नरकस्य त्रिविधं द्वारं (अस्ति) **तस्मात् त्यजेत्**।
आत्मनः नाशनं कामः क्रोधः तथा लोभः इदं नरकस्य त्रिविधं द्वारं (अस्ति) तस्मात् **किं** त्यजेत् ?	आत्मनः नाशनं कामः क्रोधः तथा लोभः इदं नरकस्य त्रिविधं द्वारं (अस्ति) तस्मात् **एतत् त्रयं** त्यजेत्।

तात्पर्यम् - कामः क्रोधः तथा लोभः इति एतत् आत्मनः नाशनं कर्तुं नरकस्य त्रिविधं द्वारम् अस्ति। अतः जनः आत्मकल्याणं कर्तुम् एतत् त्रिविधम् अपि द्वारं त्यजेत्।

एतैर्विमुक्तः कौन्तेय तमोद्वारैस्त्रिभिर्नरः।
आचरत्यात्मनः श्रेयस्ततो याति परां गतिम्॥१६.२२॥

पदच्छेदः - एतैः, विमुक्तः, कौन्तेय, तमोद्वारैः, त्रिभिः, नरः।
आचरति, आत्मनः, श्रेयः, ततः, याति, पराम्, गतिम्॥

अन्वयः - कौन्तेय! तमोद्वारैः एतैः त्रिभिः विमुक्तः नरः आत्मनः श्रेयः आचरति। ततः परां गतिं याति।

पदार्थः - कौन्तेय = अर्जुन, तमोद्वारैः = नरकद्वारैः, एतैः = अमीभिः, त्रिभिः = त्रिसङ्ख्याकैः, विमुक्तः =

विवर्जितः, नरः = मानवः, आत्मनः = स्वस्य, श्रेयः = हितम्, आचरति = करोति, ततः = अनन्तरम्, परम् = उत्कृष्टाम्, गतिम् = मोक्षस्थानम्, याति = अधिगच्छति।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
कौन्तेय	अ. पुं. सम्बो. एक.	तमोद्वारैः	अ. नपुं. तृ. बहु. (विशेष्यम्)
एतैः	एतत् - त. (सर्व.) नपुं. तृ. बहु. (विशेषणम्)	त्रिभिः	इ. नपुं. तृ. बहु. (विशेषणम्)
विमुक्तः	अ. पुं. प्र. एक. (विशेषणम्)	विवर्जितः	अ. पुं. प्र. एक. (विशेषणम्)
नरः	अ. पुं. प्र. एक. (विशेष्यम्)	आत्मनः	आत्मन् - न. पुं. ष. एक.
श्रेयः	श्रेयस् - स. नपुं. प्र. एक.	आचरति	आ + चर् (चर गतिभक्षणयोः) पर. कर्तरि लट्. प्रपु. एक.
ततः	अव्ययम्	पराम्	आ. स्त्री. द्वि. एक. (विशेषणम्)
गतिम्	इ. स्त्री. द्वि. एक. (विशेष्यम्)	याति	या (या प्रापणे) पर. कर्तरि लट्. प्रपु. एक.

व्याकरणम् -

(क) सन्धिः	एतैर्विमुक्तः	एतैः + विमुक्तः	विसर्गसन्धिः (सकारः) रेफः।
	तमोद्वारैस्त्रिभिः	तमोद्वारैः + त्रिभिः	विसर्गसन्धि (सकारः)।
	त्रिभिर्नरः	त्रिभिः + नरः	विसर्गसन्धिः (रेफः)।
	आचरत्यात्मनः	आचरति + आत्मनः	यण्सन्धिः।
	श्रेयस्ततः	श्रेयः + ततः	विसर्गसन्धिः (सकारः)।
	ततो याति	ततः + याति	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः।
(ख) समासः	तमोद्वारैः	तमसो द्वाराणि तमोद्वाराणि, तैः - षष्ठीतत्पुरुषः।	
(ग) कृदन्तः	विमुक्तः	वि + मुच् (मुच्लृ मोक्षणे) + क्त (कर्मणि)।	
	द्वारैः	द्वृ (द्वृ संवरणे) + णिच् + अच्, तैः।	
	नरः	नॄ (नॄ नये) + अच्।	
	गतिम्	गम् (गम्लृ गतौ) + क्तिन्, ताम्।	
(घ) तद्धितान्तः	कौन्तेय	कुन्ती + ढक् (कुन्त्याः अपत्यं पुमान् इत्यर्थे)।	
	श्रेयः	प्रशस्य + ईयसुन् (अतिशये) (श्र इति आदेशः)।	

भावस्पष्टीकरणम् -

आचरति ।	
कः आचरति ?	**नरः** आचरति ।
कीदृशः नरः आचरति ?	**विमुक्तः** नरः आचरति ।
विमुक्तः नरः **किम्** आचरति ?	विमुक्तः नरः **श्रेयः** आचरति ।
विमुक्तः नरः **कस्य** श्रेयः आचरति ?	विमुक्तः नरः **आत्मनः** श्रेयः आचरति ।
कैः विमुक्तः नरः आत्मनः श्रेयः आचरति ?	**एतैः** विमुक्तः नरः आत्मनः श्रेयः आचरति ।
एतैः **कैः** विमुक्तः नरः आत्मनः श्रेयः आचरति ?	एतैः **तमोद्वारैः** विमुक्तः नरः आत्मनः श्रेयः आचरति ।
एतैः **कतिभिः** तमोद्वारैः विमुक्तः नरः आत्मनः श्रेयः आचरति ?	एतैः **त्रिभिः** तमोद्वारैः विमुक्तः नरः आत्मनः श्रेयः आचरति ।
एतैः त्रिभिः तमोद्वारैः विमुक्तः नरः आत्मनः श्रेयः आचरति, **ततः किं करोति** ?	एतैः त्रिभिः तमोद्वारैः विमुक्तः नरः आत्मनः श्रेयः आचरति, **ततः याति** ।
एतैः त्रिभिः तमोद्वारैः विमुक्तः नरः आत्मनः श्रेयः आचरति, ततः **कां** याति ?	एतैः त्रिभिः तमोद्वारैः विमुक्तः नरः आत्मनः श्रेयः आचरति, ततः **गतिं** याति ।
एतैः त्रिभिः तमोद्वारैः विमुक्तः नरः आत्मनः श्रेयः आचरति, ततः **कीदृशीं** गतिं याति ?	एतैः त्रिभिः तमोद्वारैः विमुक्तः नरः आत्मनः श्रेयः आचरति, ततः **परां** गतिं याति ।
श्लोकेऽस्मिन् **सम्बोधनपदं** किम् ?	**कौन्तेय !**

तात्पर्यम् - अर्जुन ! नरकद्वारैः एतैः कामादिभिः त्रिभिः विवर्जितः मानवः स्वस्य हितं यदि करोति तर्हि सः अत्यन्तप्रशंसनीयम् उत्कृष्टं मोक्षम् अधिगच्छति ।

यः शास्त्रविधिमुत्सृज्य वर्तते कामकारतः ।
न स सिद्धिमवाप्नोति न सुखं न परां गतिम् ॥१६.२३ ॥

पदच्छेदः - यः, शास्त्रविधिम्, उत्सृज्य, वर्तते, कामकारतः ।
न, सः, सिद्धिम्, अवाप्नोति, न, सुखम्, न, पराम्, गतिम् ॥

अन्वयः - यः शास्त्रविधिम् उत्सृज्य कामकारतः वर्तते सः न सिद्धिं न सुखं न परां गतिम् अवाप्नोति ।

पदार्थः - यः = यः मानवः, शास्त्रविधिम् = शास्त्रपद्धतिम्, उत्सृज्य = परित्यज्य, कामकारतः = स्वच्छन्दाचरणेन, वर्तते = तिष्ठति, सः = सः मानवः, न सिद्धिम् = न कार्यपद्धतिम्, न सुखम् = न आनन्दम्, न पराम् = न उत्कृष्टाम्, गतिम् = स्थितिम्, अवाप्नोति = लभते ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
यः	यद् - द. (सर्व.) पुं. प्र. एक. (विशेषणम्)	शास्त्रविधिम्	इ. पुं. द्वि. एक.
उत्सृज्य	ल्यबन्तम् अव्ययम्	कामकारतः	अव्ययम्
वर्तते	वृत् (वृतु वर्तने) आत्म. कर्तरि लट्. प्रपु. एक.	सः	तद् - द. (सर्व.) पुं. प्र. एक. (विशेषणम्)
सिद्धिम्	इ. स्त्री. द्वि. एक.	न	अव्ययम्
सुखम्	अ. नपुं. द्वि. एक.	पराम्	आ. स्त्री. द्वि. एक. (विशेषणम्)
गतिम्	इ. स्त्री. द्वि. एक. (विशेष्यम्)	अवाप्नोति	अव + आप् (आप्लृ व्याप्तौ) पर. कर्तरि लट्. प्रपु. एक.

व्याकरणम् -

(क) सन्धिः स सिद्धिम् — सः + सिद्धिम् — विसर्गसन्धिः (लोपः) ।

(ख) समासः शास्त्रविधिम् — शास्त्रसम्मतो विधिः शास्त्रविधिः तम् - मध्यमपदलोपी तत्पुरुषः ।

कामकारतः — कामेन कारः कामकारः, तेन कामकारेण - तृतीयाविभक्त्यन्तात् तसिप्रत्यये कामकारतः इति शब्दः ।

(ग) कृदन्तः शास्त्रम् — शास् (शासु अनुशिष्टौ) + ष्ट्रन् (शिष्यते अनेन इति शास्त्रम्) ।

उत्सृज्य — उत् + सृज् (सृज गतौ) + ल्यप् ।

सिद्धिम् — सिध् (षिधु संराद्धौ) + क्तिन् ।

सुखम् — सुख् (सुख तत्क्रियायाम्) + अच् ।

गतिम् — गम् (गम्लृ गतौ) + क्तिन्, ताम् ।

भावस्पष्टीकरणम् -

न अवाप्नोति ।	
कां न अवाप्नोति ?	**सिद्धिं** न अवाप्नोति ।

कः सिद्धिं न अवाप्नोति ?	**सः** सिद्धिं न अवाप्नोति।
कः सः सिद्धिं न अवाप्नोति ?	**यः वर्तते** सः सिद्धिं न अवाप्नोति।
यः **कीदृशः** वर्तते सः सिद्धिं न अवाप्नोति ?	यः **कामकारतः** वर्तते सः सिद्धिं न अवाप्नोति।
यः **किं कृत्वा** कामकारतः वर्तते सः सिद्धिं न अवाप्नोति ?	यः **उत्सृज्य** कामकारतः वर्तते सः सिद्धिं न अवाप्नोति।
यः **कम्** उत्सृज्य कामकारतः वर्तते सः सिद्धिं न अवाप्नोति	यः **शास्त्रविधिम्** उत्सृज्य कामकारतः वर्तते सः सिद्धिं न अवाप्नोति।
यः शास्त्रविधिम् उत्सृज्य कामकारतः वर्तते सः सिद्धिं न अवाप्नोति **पुनः किम् (न अवाप्नोति)** ?	यः शास्त्रविधिम् उत्सृज्य कामकारतः वर्तते सः सिद्धिं न अवाप्नोति **न सुखम्**।
यः शास्त्रविधिम् उत्सृज्य कामकारतः वर्तते सः सिद्धिं न अवाप्नोति न सुखं **पुनः किम् (न अवाप्नोति)** ?	यः शास्त्रविधिम् उत्सृज्य कामकारतः वर्तते सः सिद्धिं न अवाप्नोति न सुखं **न परां गतिम्**।

तात्पर्यम् - यः खलु पुरुषः शास्त्रसम्मतं मार्गं विहाय स्वेच्छया सन्ततम् अमार्गेणैव सञ्चरति तस्य कार्यसिद्धिः न भवति, न सुखं नापि मोक्षः। सः अत्रैव संसारे चिरं पीडाम् अनुभवति।

तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ।
ज्ञात्वा शास्त्रविधानोक्तं कर्म कर्तुमिहार्हसि ॥१६.२४॥

पदच्छेदः - तस्मात्, शास्त्रम्, प्रमाणम्, ते, कार्याकार्यव्यवस्थितौ।
ज्ञात्वा, शास्त्रविधानोक्तम्, कर्म, कर्तुम्, इह, अर्हसि ॥

अन्वयः - तस्मात् ते कार्याकार्यव्यवस्थितौ शास्त्रं प्रमाणम्। शास्त्रविधानोक्तं कर्म ज्ञात्वा इह कर्तुम् अर्हसि।

पदार्थः - तस्मात् = ततः, ते = तव, कार्याकार्यव्यवस्थितौ = कर्तव्याकर्तव्यव्यवस्थायाम्, शास्त्रम् = शासनम्, प्रमाणम् = ज्ञानसाधनम्, शास्त्रविधानोक्तम् = शास्त्रविहितम्, कर्म = कर्म, ज्ञात्वा = विदित्वा, इह = अत्र, कर्तुम् = विधातुम्, अर्हसि = योग्यः भवसि।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
तस्मात्	तद् - द. (सर्व.) नपुं. पं. एक. (विशेषणम्)	ते	युष्मद् - द. (सर्व.) ष. एक. (विशेषणम्)

कार्याकार्य-व्यवस्थितौ	इ. स्त्री. स. एक.	शास्त्रम्	अ. नपुं. प्र. एक.
प्रमाणम्	अ. नपुं. प्र. एक.	शास्त्रविधानोक्तम्	अ. नपुं. द्वि. एक. (विशेषणम्)
कर्म	कर्मन् - न. नपुं. द्वि. एक. (विशेष्यम्)	ज्ञात्वा	क्त्वान्तम् अव्ययम्
इह	अव्ययम्	कर्तुम्	तुमुनन्तम् अव्ययम्
अर्हसि	अर्ह् (अर्ह पूजायाम्) पर. कर्तरि लट्. मपु. एक.		

व्याकरणम् -

(क) सन्धिः	तस्माच्छास्त्रम्	तस्मात् + शास्त्रम्	श्चुत्वसन्धिः ।
	इहार्हसि	इह + अर्हसि	सवर्णदीर्घसन्धिः ।

(ख) समासः

	कार्याकार्यव्यवस्थितौ	कार्यं च अकार्यं च कार्याकार्ये - द्वन्द्वः ।
		कार्याकार्ययोः व्यवस्थितिः कार्याकार्यव्यवस्थितिः, तस्याम् -षष्ठीतत्पुरुषः ।
	शास्त्रविधानोक्तम्	शास्त्रस्य विधानं शास्त्रविधानम् - षष्ठीतत्पुरुषः ।
		शास्त्रविधानेन उक्तं शास्त्रविधानोक्तम् - तृतीयातत्पुरुषः ।

(ग) कृदन्तः

	शास्त्रम्	शास् (शासु अनुशिष्टौ) + ष्ट्रन् (शिष्यते अनेन इति शास्त्रम्) ।
	प्रमाणम्	प्र + मा (माङ् माने शब्दे च) + ल्युट् ।
	कार्यम्	कृ (डुकृञ् करणे) + ण्यत् ।
	व्यवस्थितौ	वि + अव + स्था (ष्ठा गतिनिवृत्तौ) + क्तिन् - व्यवस्थितिः ।
	ज्ञात्वा	ज्ञा (ज्ञा अवबोधने) + क्त्वा ।
	विधान	वि + धा (डुधाञ् धारणपोषणयोः) + ल्युट् ।
	उक्तम्	वच् (वच परिभाषणे) + क्त (कर्मणि) ।
	कर्तुम्	कृ (डुकृञ् करणे) + तुमुन् ।

भावस्पष्टीकरणम् -

प्रमाणम् ।	
किं प्रमाणम् ?	**शास्त्रं प्रमाणम् ।**
कस्यां शास्त्रं प्रमाणम् ?	**कार्याकार्यव्यवस्थितौ शास्त्रं प्रमाणम् ।**

कस्य कार्यव्यवस्थितौ शास्त्रं प्रमाणम् ?	ते कार्यव्यवस्थितौ शास्त्रं प्रमाणम्।
ते कार्यव्यवस्थितौ शास्त्रं प्रमाणम्, तस्मात् **किं** भवसि ?	ते कार्यव्यवस्थितौ शास्त्रं प्रमाणम्, तस्मात् **अर्हसि**।
ते कार्यव्यवस्थितौ शास्त्रं प्रमाणम्, तस्मात् **किम्** अर्हसि ?	ते कार्यव्यवस्थितौ शास्त्रं प्रमाणं तस्मात् **कर्तुम्** अर्हसि।
ते कार्यव्यवस्थितौ शास्त्रं प्रमाणं तस्मात् **कुत्र** कर्तुम् अर्हसि ?	ते कार्यव्यवस्थितौ शास्त्रं प्रमाणं तस्मात् **इह** कर्तुम् अर्हसि।
ते कार्यव्यवस्थितौ शास्त्रं प्रमाणं तस्मात् **किं कृत्वा** इह कर्तुम् अर्हसि ?	ते कार्यव्यवस्थितौ शास्त्रं प्रमाणं तस्मात् **ज्ञात्वा** इह कर्तुम् अर्हसि।
ते कार्यव्यवस्थितौ शास्त्रं प्रमाणं तस्मात् **किं** ज्ञात्वा इह कर्तुम् अर्हसि ?	ते कार्यव्यवस्थितौ शास्त्रं प्रमाणं तस्मात् **कर्म** ज्ञात्वा इह कर्तुम् अर्हसि।
ते कार्यव्यवस्थितौ शास्त्रं प्रमाणं तस्मात् **कीदृशं** कर्म ज्ञात्वा इह कर्तुम् अर्हसि ?	ते कार्यव्यवस्थितौ शास्त्रं प्रमाणं तस्मात् **शास्त्रविधानोक्तं** कर्म ज्ञात्वा इह कर्तुम् अर्हसि।

तात्पर्यम् - शास्त्रविधिमुत्सृज्य लोके स्वेच्छया कर्माणि न कर्तव्यानि, किं कर्तव्यम् ? किम् अकर्तव्यम् ? इति संशये, शास्त्रबोधितनिर्णयानुसारेण एव कर्माणि कर्तुं शक्नोषि।

ॐ तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे दैवासुरसम्पद्विभागयोगो नाम षोडशोऽध्यायः ॥१६॥

षोडशाध्यायस्य सारः

'दैवासुरसम्पद्विभागयोग'नामके षोडशे अध्याये दैवीसम्पदः आसुरीसम्पदः च वर्णनं कृतमस्ति। प्रथमं तु दैवीसम्पदः षड्विंशतिः लक्षणानि उक्तानि सन्ति। अनन्तरं राक्षसीं सम्पत्तिं प्राप्तस्य मनुष्यस्य प्रमुखानि लक्षणानि उक्तानि। दैवी सम्पद् संसाररूपं बन्धनं नाशयति। आसुरी तु तदेव बन्धनं जनयति। अर्थात् दैवीगुणसम्पन्नाः जनाः मोक्षं प्राप्नुवन्ति, राक्षसगुणसम्पन्नाः तु अधोगतिं प्राप्नुवन्ति इति तयोः फलम् अपि उक्तं वर्तते।

तदनन्तरम् आसुरगुणसम्पन्नानां जनानां विस्तृतं वर्णनम् अस्ति। यथा - एते जनाः धर्मे प्रवृत्तिं न जानन्ति। अधर्मात् निवृत्तिं च न जानन्ति। कायिकं वाचिकं मानसिकं चेति यत् त्रिविधं शौचं तत् तेषु न सम्भवति। तेषु यथार्थवादित्वम् अपि न भवति। ते जनाः वदन्ति - "अस्मिन् लोके सत्यार्थप्रतिपादकाः वेदपुराणादयः न प्रमाणानि। लोकेऽस्मिन् न कोऽपि नियामकः अस्ति। स्त्रीपुरुषद्वन्द्वात् एव जगदिदं समुत्पन्नम् इति कामः एव जगतः उत्पत्तौ कारणम्। कारणान्तरं सर्वथा नास्ति" इति। कामजन्यसुखात् अतिरिक्तं सुखं ते नाङ्गीकुर्वन्ति। नानाविधैः आशापाशैः बद्धाः ते कामक्रोधादिभिः सहिताः विषयभोगार्थम् अधर्म्येण मार्गेण धनसङ्ग्रहं कर्तुमिच्छन्ति। ते हि 'इदं धनं मया अद्य प्राप्तम्, तच्च धनम् अचिरादेव प्राप्स्यामि, इदं धनम् इदानीमस्ति, तच्च धनं मम अचिरादेव भविष्यति, शत्रुम् इमम् अद्य मारितवान्, अन्यानपि शत्रून् अचिरादेव मारयिष्यामि, अहमेव लोकस्य नियामकः, अन्यो नियामको नास्ति, अहं सर्वैः सुखसाधनैः उपेतः, अहं कृतकृत्यः, अहमेव बलवान् सुखी च, अहं धनिकः, अहं सत्कुलजातः, एतादृशस्य मम अन्यः सदृशः नास्ति, अहं यज्ञं करिष्यामि, अहं दानं करिष्यामि, अहं सन्तोषं प्राप्स्यामि' इति च स्वच्छन्दं कथयन्तः अविवेकेन भ्रान्ताः विषयोपभोगे आसक्ताः च अनर्थकारिणि नरके निपतन्ति।

अध्यायान्ते भगवान् वदति - "कामः क्रोधः तथा लोभः एतत् नरकस्य त्रिविधं द्वारं वर्तते। एतत् त्रयं त्यक्त्वा यः जनः सत्कर्म आचरति सः परमां गतिं याति। यः पुरुषः शास्त्रसम्मतं मार्गं विहाय स्वच्छन्दाचरणं करोति तस्य कार्यसिद्धिः, सुखं, मोक्षः च न भवति। तस्मात् किं कर्तव्यम्? किं च अकर्तव्यम्? इति संशये शास्त्रम् एव प्रमाणम्। एवं मत्वा त्वं शास्त्रविधानोक्तं कर्म कर्तुमर्हसि" इति।

****

अथ सप्तदशोऽध्यायः

श्रद्धात्रयविभागयोगः

अर्जुन उवाच - **ये शास्त्रविधिमुत्सृज्य यजन्ते श्रद्धयान्विताः ।**
तेषां निष्ठा तु का कृष्ण सत्त्वमाहो रजस्तमः ॥१७.१ ॥

पदच्छेदः -

अर्जुनः, उवाच - ये, शास्त्रविधिम्, उत्सृज्य, यजन्ते, श्रद्धया, अन्विताः ।
तेषाम्, निष्ठा, तु, का, कृष्ण, सत्त्वम्, आहो, रजः, तमः ॥

अन्वयः - कृष्ण ! ये शास्त्रविधिम् उत्सृज्य श्रद्धया अन्विताः यजन्ते तेषां निष्ठा तु का सत्त्वम् आहो रजः तमः ?

पदार्थः - कृष्ण = हे कृष्ण, ये = ये मानवाः, शास्त्रविधिम् = शास्त्रविधानम्, उत्सृज्य = वर्जयित्वा, श्रद्धया = विश्वासेन, अन्विताः = सहिताः, यजन्ते = पूजयन्ति, तेषाम् = तेषाम्, निष्ठा तु का = स्थितिः च का, सत्त्वम् = सत्त्वम्, आहो = अथवा, रजः = रजः, तमः = तमः ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
कृष्ण	अ. पुं. सम्बो. एक.	ये	यद् - द. सर्व. पुं. प्र. बहु. (विशेषणम्)
शास्त्रविधिम्	इ. पुं. द्वि. एक.	उत्सृज्य	ल्यबन्तम् अव्ययम्
श्रद्धया	आ. स्त्री. तृ. एक.	अन्विताः	अ. पुं. प्र. बहु. (विशेषणम्)
यजन्ते	यज (देवपूजासङ्गतिकरणदानेषु) आत्म. कर्तरि लट्. प्रपु. बहु.	तेषाम्	तद् - द. सर्व. पुं. ष. बहु. (विशेषणम्)
निष्ठा	आ. स्त्री. प्र. एक. (विशेष्यम्)	तु	अव्ययम्
का	किम् - म. सर्व. स्त्री. प्र. एक. (विशेषणम्)	सत्त्वम्	अ. नपुं. प्र. एक.
आहो	अव्ययम्	रजः	रजस् - सका. नपुं. प्र. एक.
तमः	तमस् - सका. नपुं. प्र. एक.		

व्याकरणम् -

(क) सन्धिः श्रद्धयान्विताः — श्रद्धया + अन्विताः — सवर्णदीर्घसन्धिः ।
रजस्तमः — रजः + तमः — विसर्गसन्धिः (सकारः) ।

(ख) समासः शास्त्रविधिम् — शास्त्रस्य विधिः शास्त्रविधिः, तम् - षष्ठीतत्पुरुषः ।

(ग) कृदन्तः उत्सृज्य उत् + सृज् (सृज विसर्गे) + ल्यप्।
अन्विताः अनु + इ (इण् गतौ) + क्त (कर्तरि)।

भावस्पष्टीकरणम् -

यजन्ते।	
के यजन्ते ?	**ये** यजन्ते।
ये **कीदृशाः** यजन्ते ?	ये **अन्विताः** यजन्ते।
ये **कया** अन्विताः यजन्ते ?	ये **श्रद्धया** अन्विताः यजन्ते।
ये **किं कृत्वा** श्रद्धया अन्विताः यजन्ते ?	ये **उत्सृज्य** श्रद्धया अन्विताः यजन्ते।
ये **कम्** उत्सृज्य श्रद्धया अन्विताः यजन्ते ?	ये **शास्त्रविधिम्** उत्सृज्य श्रद्धया अन्विताः यजन्ते।
ये शास्त्रविधिम् उत्सृज्य श्रद्धया अन्विताः यजन्ते **तेषां का** ?	ये शास्त्रविधिम् उत्सृज्य श्रद्धया अन्विताः यजन्ते **तेषां निष्ठा**।
ये शास्त्रविधिम् उत्सृज्य श्रद्धया अन्विताः यजन्ते तेषां निष्ठा **तु सा**।	ये शास्त्रविधिम् उत्सृज्य श्रद्धया अन्विताः यजन्ते तेषां निष्ठा **तु का** ?
ये शास्त्रविधिम् उत्सृज्य श्रद्धया अन्विताः यजन्ते तेषां निष्ठा तु का **(कीदृशी)** ?	ये शास्त्रविधिम् उत्सृज्य श्रद्धया अन्विताः यजन्ते तेषां निष्ठा तु का **सत्त्वम् आहो रजः तमः**।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**कृष्ण** !

तात्पर्यम् - ये शास्त्रीयं कर्म उल्लङ्घ्य कर्म कुर्वन्ति ते आसुराः। ये शास्त्रविधिम् अनुसृत्य श्रद्धया कर्म कुर्वन्ति ते दैवाः। ये पुनः शास्त्रविधिं त्यजन्ति वृद्धव्यवहारेण सम्प्रदायः इति श्रद्धया कर्म अनुतिष्ठन्ति न ते दैवाः, शास्त्रविधेः त्यागात्। नापि आसुराः श्रद्धया कर्मानुष्ठानात्। ततश्च तादृशानां का स्थितिः ? किं तेषु सत्त्वं गुणो निर्णयः, किं वा तमः, उत रजः ?

श्रीभगवानुवाच - **त्रिविधा भवति श्रद्धा देहिनां सा स्वभावजा।**
सात्त्विकी राजसी चैव तामसी चेति तां शृणु ॥१७.२॥

पदच्छेदः - त्रिविधा, भवति, श्रद्धा, देहिनाम्, सा, स्वभावजा।
सात्त्विकी, राजसी, च, एव, तामसी, च, इति, ताम्, शृणु ॥

अन्वयः - देहिनां स्वभावजा श्रद्धा सा सात्त्विकी राजसी च एव तामसी च इति त्रिविधा भवति तां शृणु।

पदार्थः - देहिनाम् = शरीरवताम्, स्वभावजा = स्वभावात् सञ्जाता, श्रद्धा = विश्वासः, सा = एषा, सात्त्विकी = सत्त्वनिर्वृत्ता, राजसी = रजोनिर्वृत्ता, च एव = च एव, तामसी च = तमोनिर्वृत्ता च, इति = एवम्, त्रिविधा = त्रिप्रकारा, भवति = वर्तते, ताम् = श्रद्धाम्, शृणु = आकर्णय।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
देहिनाम्	देहिन्- न. पुं. ष. बहु.	स्वभावजा	आ. स्त्री. प्र. एक. (विशेषणम्)
श्रद्धा	आ. स्त्री. प्र. एक. (विशेष्यम्)	सा	तद् - द. सर्व. स्त्री. प्र. एक. (विशेषणम्)
सात्त्विकी	ई. स्त्री. प्र. एक. (विशेषणम्)	राजसी	ई. स्त्री. प्र. एक. (विशेषणम्)
च	अव्ययम्	एव	अव्ययम्
तामसी	ई. स्त्री. प्र. एक. (विशेषणम्)	इति	अव्ययम्
त्रिविधा	आ. स्त्री. प्र. एक. (विशेषणम्)	भवति	भू (भू सत्तायाम्) पर. कर्तरि लट्. प्रपु. एक.
ताम्	तद् - द. सर्व. स्त्री. द्वि. एक. (विशेषणम्)	शृणु	श्रु (श्रु श्रवणे) पर. कर्तरि लोट्. मपु. एक.

व्याकरणम् -

(क) सन्धिः	चैव	च + एव	वृद्धिसन्धिः।
	चेति	च + इति	गुणसन्धिः।
(ख) समासः	त्रिविधा	तिस्रः विधाः यस्याः सा त्रिविधा - बहुव्रीहिः।	
	स्वभावजा	स्वभावात् जाता स्वभावजा - कर्तरि डप्रत्ययः उपपदसमासश्च।	
(ग) तद्धितान्तः	देहिनाम्	देह + इनि (मतुबर्थे) देहः अस्य अस्मिन् वा अस्ति इति देही, तेषाम्।	
	सात्त्विकी	सत्त्व + ठक्, सत्त्वात् आगता सात्त्विकी (आगता इत्यर्थे ठक् स्त्रीत्वे ङीप् च)।	
	राजसी	रजस् + अण्, रजसः आगता राजसी (आगता इत्यर्थे अण् स्त्रीत्वे च ङीप्)।	
	तामसी	तमस् + अण्, तमसः आगता तामसी (आगता इत्यर्थे अण् स्त्रीत्वे च ङीप्)।	

भावस्पष्टीकरणम् -

भवति।	
का भवति ?	**श्रद्धा** भवति।
कीदृशी श्रद्धा भवति ?	**स्वभावजा** श्रद्धा भवति।
केषां स्वभावजा श्रद्धा भवति ?	**देहिनां** स्वभावजा श्रद्धा भवति।
देहिनां स्वभावजा श्रद्धा सा **कतिविधा** भवति ?	देहिनां स्वभावजा श्रद्धा सा **त्रिविधा** भवति।
देहिनां स्वभावजा श्रद्धा सा **कथं** त्रिविधा भवति ?	देहिनां स्वभावजा श्रद्धा सा **सात्त्विकी राजसी च एव तामसी च इति** त्रिविधा भवति।
देहिनां स्वभावजा श्रद्धा सा सात्त्विकी राजसी च एव तामसी च इति त्रिविधा भवति। **तां किं कुरु** ?	देहिनां स्वभावजा श्रद्धा सा सात्त्विकी राजसी च एव तामसी च इति त्रिविधा भवति। **तां शृणु**।

तात्पर्यम् - प्राणिनां स्वभाववशात् या श्रद्धा भवति सा सात्त्विकी राजसी तामसी चेति त्रिविधा वर्तते। तद्विवृणोमि शृणु।

सत्त्वानुरूपा सर्वस्य श्रद्धा भवति भारत।
श्रद्धामयोऽयं पुरुषो यो यच्छ्रद्धः स एव सः ॥१७.३॥

पदच्छेदः - सत्त्वानुरूपा, सर्वस्य, श्रद्धा, भवति, भारत।
श्रद्धामयः, अयम्, पुरुषः, यः, यच्छ्रद्धः, सः, एव, सः ॥

अन्वयः - भारत ! सर्वस्य सत्त्वानुरूपा श्रद्धा भवति। अयं पुरुषः श्रद्धामयः। यः यच्छ्रद्धः सः सः एव।

पदार्थः - भारत = कृष्ण, सर्वस्य = सकलस्य, सत्त्वानुरूपा = अन्तःकरणानुगुणा, श्रद्धा = विश्वासः, भवति = वर्तते, अयम् = एषः, पुरुषः = पुरुषः, श्रद्धामयः = विश्वासमयः, यः = यः मानवः, यच्छ्रद्धः = यादृशःविश्वासवान्, सः = सः मानवः, सः एव = तद्विश्वासरूपः एव।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
भारत	अ. पुं. सम्बो. एक.	सर्वस्य	अ. सर्व. पुं. ष. एक. (विशेषणम्)
सत्त्वानुरूपा	आ. स्त्री. प्र. एक. (विशेषणम्)	श्रद्धा	आ. स्त्री. प्र. एक. (विशेष्यम्)

भवति	भू (भू सत्तायाम्) पर. कर्तरि लट्. प्रपु. एक.	अयम्	इदम् - म. सर्व. पुं. प्र. एक. (विशेषणम्)
पुरुषः	अ. पुं. प्र. एक. (विशेष्यम्)	श्रद्धामयः	अ. पुं. प्र. एक. (विशेषणम्)
यः	यद् - द. सर्व. पुं. प्र. एक. (विशेषणम्)	यच्छ्रद्धः	अ. पुं. प्र. एक. (विशेषणम्)
सः	तद् - द. सर्व. पुं. प्र. एक. (विशेषणम्)	एव	अव्ययम्

व्याकरणम् -

(क) सन्धिः	श्रद्धामयोऽयम्	श्रद्धामयः + अयम्	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः पूर्वरूपं च।
	पुरुषो यः	पुरुषः + यः	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः।
	यो यच्छ्रद्धः	यः + यच्छ्रद्धः	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः।
	स एव	सः + एव	विसर्गसन्धिः (लोपः)।
(ख) समासः	सत्त्वानुरूपा	सत्त्वस्य अनुरूपा सत्त्वानुरूपा - षष्ठीतत्पुरुषः।	
	यच्छ्रद्धः	या श्रद्धा यस्य सः यच्छ्रद्धः - बहुव्रीहिः।	
(ग) तद्धितान्तः	श्रद्धामयः	प्रचुरार्थे मयट् श्रद्धाप्रचुरः इत्यर्थः।	
	भारतः	भरत + अण्, भरतस्य अपत्यं पुमान्, तत्सम्बुद्धौ।	

भावस्पष्टीकरणम् -

भवति।	
का भवति ?	**श्रद्धा भवति।**
कीदृशी श्रद्धा भवति ?	**सत्त्वानुरूपा श्रद्धा भवति।**
कस्य सत्त्वानुरूपा श्रद्धा भवति ?	**सर्वस्य सत्त्वानुरूपा श्रद्धा भवति।**
श्रद्धामयः।	
कः श्रद्धामयः ?	**पुरुषः श्रद्धामयः।**
कः पुरुषः श्रद्धामयः ?	**अयं पुरुषः श्रद्धामयः।**
यः यच्छ्रद्धः सः कः ?	**यः यच्छ्रद्धः सः सः एव।**
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**भारत !**

तात्पर्यम् - सर्वस्यापि अन्तःकरणानुगुणा श्रद्धा भवति। यस्मिन् श्रद्धा सः श्रद्धामयः इत्युच्यते। सा च श्रद्धा क्वचित् सत्त्वगुणप्रधाना, क्वचित् रजोगुणप्रधाना, क्वचिच्च तमोगुणप्रधाना चेति त्रिविधा भवति। यः यादृश्या श्रद्धया विशिष्टः सः तादृशश्रद्धः इति निर्णयः।

यजन्ते सात्त्विका देवान्यक्षरक्षांसि राजसाः।
प्रेतान्भूतगणांश्चान्ये यजन्ते तामसा जनाः ॥१७.४॥

पदच्छेदः - यजन्ते, सात्त्विकाः, देवान्, यक्षरक्षांसि, राजसाः।
प्रेतान्, भूतगणान्, च, अन्ये, यजन्ते, तामसाः, जनाः ॥

अन्वयः - सात्त्विकाः देवान् यजन्ते, राजसाः यक्षरक्षांसि, अन्ये तामसाः जनाः प्रेतान् भूतगणान् च यजन्ते।

पदार्थः - सात्त्विकाः = सत्त्वनिष्ठाः, देवान् = अमरान्, यजन्ते = पूजयन्ति, राजसाः = रजःप्रवृत्तयः, यक्षरक्षांसि = यक्षराक्षसान्, अन्ये = इतरे, तामसाः = तमोव्रताः, जनाः = मानवाः, प्रेतान् = प्रेतान्, भूतगणान् = भूतसमुदायान्, च = अपि, यजन्ते = पूजयन्ति।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
सात्त्विकाः	अ. पुं. प्र. बहु. (विशेषणम्)	देवान्	अ. पुं. द्वि. बहु.
यजन्ते	यज (यज देवपूजासङ्गतिकरणदानेषु) आत्म. कर्तरि लट्. प्रपु. बहु.	राजसाः	अ. पुं. प्र. बहु. (विशेषणम्)
यक्षरक्षांसि	यक्षरक्षस् - सका. नपुं. द्वि. बहु.	अन्ये	अ. सर्व. पुं. प्र. बहु. (विशेषणम्)
तामसाः	अ. पुं. प्र. बहु. (विशेषणम्)	जनाः	अ. पुं. प्र. बहु. (विशेष्यम्)
प्रेतान्	अ. पुं. द्वि. बहु.	भूतगणान्	अ. पुं. द्वि. बहु.
च	अव्ययम्		

व्याकरणम् -

(क) सन्धिः	सात्त्विका देवान्	सात्त्विकाः + देवान्	विसर्गसन्धिः (लोपः)।
	भूतगणांश्चान्ये	भूतगणान् + चान्ये	सत्वसन्धिः, रुत्वम्, अनुस्वारागमः, विसर्गः, सत्वम्, श्चुत्वम्।
	चान्ये	च + अन्ये	सवर्णदीर्घसन्धिः।
	तामसा जनाः	तामसाः + जनाः	विसर्गसन्धिः (लोपः)।

(ख) समासः यक्षरक्षांसि — यक्षाः रक्षांसि च यक्षरक्षांसि - द्वन्द्वः ।
भूतगणान् — भूतानां गणाः भूतगणाः, तान् - षष्ठीतत्पुरुषः ।

(ग) कृदन्तः देवान् — दिव् (दिवु क्रीडा-विजिगीषा-व्यवहार-द्युति-स्तुति-मोद-मद-स्वप्न-कान्ति-गतिषु) + घञ्, तान् ।
जनाः — जन् (जनी प्रादुर्भावे) + अच् ।

(घ) तद्धितान्तः सात्त्विकाः — सत्त्व + ठञ् (सत्त्वगुणप्रधानाः) ।
राजसाः — रजस् + अण् (रजसः आगतः राजसः) ।
तामसाः — तमस् + अण् (तमसः आगतः तामसः) ।

भावस्पष्टीकरणम् -

यजन्ते ।	
के यजन्ते ?	**सात्त्विकाः** यजन्ते ।
सात्त्विकाः **कान्** यजन्ते ?	सात्त्विकाः **देवान्** यजन्ते ।
सात्त्विकाः देवान्, **पुनः के** यजन्ते ?	सात्त्विकाः देवान्, **राजसाः** यजन्ते ।
सात्त्विकाः देवान्, राजसाः **कानि** यजन्ते ?	सात्त्विकाः देवान्, राजसाः **यक्षरक्षांसि** यजन्ते ।
सात्त्विकाः देवान्, राजसाः यक्षरक्षांसि, **पुनः के** यजन्ते ?	सात्त्विकाः देवान्, राजसाः यक्षरक्षांसि, **जनाः** यजन्ते ।
सात्त्विकाः देवान्, राजसाः यक्षरक्षांसि, **कीदृशाः** जनाः यजन्ते ?	सात्त्विकाः देवान्, राजसाः यक्षरक्षांसि, **तामसाः** जनाः यजन्ते ।
सात्त्विकाः देवान्, राजसाः यक्षरक्षांसि, **के** तामसाः जनाः यजन्ते ?	सात्त्विकाः देवान्, राजसाः यक्षरक्षांसि, **अन्ये** तामसाः जनाः यजन्ते ।
सात्त्विकाः देवान्, राजसाः यक्षरक्षांसि, अन्ये तामसाः जनाः **कान्** यजन्ते ?	सात्त्विकाः देवान्, राजसाः यक्षरक्षांसि, अन्ये तामसाः जनाः **प्रेतान्** यजन्ते ।
सात्त्विकाः देवान्, राजसाः यक्षरक्षांसि, अन्ये तामसाः जनाः प्रेतान् **पुनश्च कान्** यजन्ते ?	सात्त्विकाः देवान्, राजसाः यक्षरक्षांसि, अन्ये तामसाः जनाः प्रेतान् **भूतगणान् च** यजन्ते ।

तात्पर्यम् - तत्र येषु सत्त्वं वर्तते ते देवान् पूजयन्ति । येषु रजः ते यक्षान् राक्षसान् च पूजयन्ति । येषु पुनः तमः ते प्रेतान् भूतान् च पूजयन्ति ।

अशास्त्रविहितं घोरं तप्यन्ते ये तपो जनाः।
दम्भाहङ्कारसंयुक्ताः कामरागबलान्विताः ॥१७.५॥
कर्शयन्तः शरीरस्थं भूतग्राममचेतसः।
मां चैवान्तःशरीरस्थं तान्विद्ध्यासुरनिश्चयान् ॥१७.६॥

पदच्छेदः - अशास्त्रविहितम्, घोरम्, तप्यन्ते, ये, तपः, जनाः।
दम्भाहङ्कारसंयुक्ताः, कामरागबलान्विताः ॥
कर्शयन्तः, शरीरस्थम्, भूतग्रामम्, अचेतसः।
माम्, च, एव, अन्तःशरीरस्थम्, तान्, विद्धि, आसुरनिश्चयान् ॥

अन्वयः - दम्भाहङ्कारसंयुक्ताः कामरागबलान्विताः अचेतसः शरीरस्थं भूतग्रामम् अन्तःशरीरस्थं मां च एव कर्शयन्तः ये जनाः अशास्त्रविहितं घोरं तपः तप्यन्ते तान् आसुरनिश्चयान् विद्धि।

पदार्थः - दम्भाहङ्कारसंयुक्ताः = आडम्बराभिमानसहिताः, कामरागबलान्विताः = इच्छानुरागबलयुक्ताः, अचेतसः = अविवेकिनः, शरीरस्थम् = देहस्थितम्, भूतग्रामम् = इन्द्रियसमुदायम्, अन्तःशरीरस्थम् = साक्षिभूतम्, मां च एव = माम् अपि, कर्शयन्तः = कृशीकुर्वन्तः, ये जनाः = ये मानवाः, अशास्त्रविहितम् = अशास्त्रप्रतिपादितम्, घोरम् = उग्रम्, तपः = नियमम्, तप्यन्ते = कुर्वन्ति, तान् = तान् जनान्, आसुरनिश्चयान् = क्रूरनिर्णयान्, विद्धि = जानीहि।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
दम्भाहङ्कारसंयुक्ताः	अ. पुं. प्र. बहु. (विशेषणम्)	कामरागबलान्विताः	अ. पुं. प्र. बहु. (विशेषणम्)
अचेतसः	अचेतस् - सका. पुं. प्र. बहु.	शरीरस्थम्	अ. पुं. द्वि. एक. (विशेषणम्)
भूतग्रामम्	अ. पुं. द्वि. एक. (विशेष्यम्)	अन्तःशरीरस्थम्	अ. पुं. द्वि. एक. (विशेषणम्)
माम्	अस्मद् - द. सर्व. द्वि. एक. (विशेष्यम्)	च	अव्ययम्
एव	अव्ययम्	कर्शयन्तः	कर्शयत् - त. पुं. प्र. बहु. (विशेषणम्)
ये	यद् - द. सर्व. पुं. प्र. बहु. (विशेषणम्)	जनाः	अ. पुं. प्र. बहु. (विशेष्यम्)

अशास्त्रविहितम्	अ. नपुं. द्वि. एक. (विशेषणम्)	घोरम्	अ. नपुं. द्वि. एक. (विशेषणम्)
तपः	तपस् - सका. नपुं. द्वि. एक. (विशेष्यम्)	तप्यन्ते	तप् (तप ऐश्वर्ये) आत्म. कर्तरि लट्. प्रपु. बहु.
तान्	तद् - द. सर्व. पुं. द्वि. बहु. (विशेषणम्)	आसुरनिश्चयान्	अ. पुं. द्वि. बहु. (विशेषणम्)
विद्धि	विद् (विद ज्ञाने) पर. कर्तरि लोट्. मपु. एक.		

व्याकरणम् -

(क) सन्धिः तपो जनाः — तपः + जनाः — विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः।
चैव — च + एव — वृद्धिसन्धिः।
एवान्तःशरीरस्थम् — एव + अन्तःशरीरस्थम् — सवर्णदीर्घसन्धिः।
विद्ध्यासुरनिश्चयान् — विद्धि + आसुरनिश्चयान् — यण्सन्धिः।

(ख) समासः अशास्त्रविहितम् — शास्त्रेण विहितं शास्त्रविहितम् - तृतीयातत्पुरुषः।
न शास्त्रविहितम् अशास्त्रविहितम् - नञ्तत्पुरुषः।
दम्भाहङ्कारसंयुक्ताः — दम्भश्च अहङ्कारश्च दम्भाहङ्कारौ - द्वन्द्वः।
दम्भाहङ्काराभ्यां संयुक्ताः दम्भाहङ्कारसंयुक्ताः - तृतीयातत्पुरुषः।
कामरागबलान्विताः — कामश्च रागश्च बलञ्च कामरागबलानि - द्वन्द्वः।
कामरागबलैः अन्विताः कामरागबलान्विताः - तृतीयातत्पुरुषः।
शरीरस्थम् — शरीरे तिष्ठतीति शरीरस्थः, तम् - कर्तरि कप्रत्ययः उपपदसमासश्च।
भूतग्रामम् — भूतानां ग्रामः भूतग्रामः, तम् - षष्ठीतत्पुरुषः।
अचेतसः — न विद्यते चेतः येषां ते अचेतसः - बहुव्रीहिः।
अन्तःशरीरस्थम् — अन्तश्शरीरे तिष्ठति अन्तःशरीरस्थम्, तम् - उपपदसमासः।
आसुरनिश्चयान् — आसुरः निश्चयः येषां ते आसुरनिश्चयाः, तान् - बहुव्रीहिः।

(ग) कृदन्तः शास्त्रम् — शास् (शासु अनुशिष्टौ) + ष्ट्रन्।
विहितम् — वि + धा (डुधाञ् धारणपोषणयोः) + क्त (कर्मणि)।
घोरम् — घुर् (घुर भीमार्थशब्दयोः) + अच्, तम्।
जनाः — जन् (जनी प्रादुर्भावे) + अच्।

	कामः	कम् (कमु कान्तौ) + घञ्।
	बलम्	बल् (बल प्राणने धान्यावरोधने च) + अच्।
	अन्विताः	अनु + इ (इण् गतौ) + क्त (कर्तरि)।
	कर्शयन्तः	कृश् (कृश तनूकरणे) + णिच् + शतृ।
	निश्चयान्	निस् + चि (चिञ् चयने) + अच्, तान्।
(घ) तद्धितान्तः	आसुरः	असुर + अण् (असुरस्य अयम् आसुरः)।

भावस्पष्टीकरणम् -

तप्यन्ते।	
के तप्यन्ते ?	**जनाः** तप्यन्ते।
के जनाः तप्यन्ते ?	**ये** जनाः तप्यन्ते।
कीदृशाः ये जनाः तप्यन्ते ?	**दम्भाहङ्कारसंयुक्ताः** ये जनाः तप्यन्ते।
दम्भाहङ्कारसंयुक्ताः **पुनः कीदृशाः** ये जनाः तप्यन्ते ?	दम्भाहङ्कारसंयुक्ताः **कामरागबलान्विताः** ये जनाः तप्यन्ते।
दम्भाहङ्कारसंयुक्ताः कामरागबलान्विताः **पुनः कीदृशाः** ये जनाः तप्यन्ते ?	दम्भाहङ्कारसंयुक्ताः कामरागबलान्विताः **अचेतसः** ये जनाः तप्यन्ते।
दम्भाहङ्कारसंयुक्ताः कामरागबलान्विताः अचेतसः **किं कुर्वन्तः** ये जनाः तप्यन्ते ?	दम्भाहङ्कारसंयुक्ताः कामरागबलान्विताः अचेतसः **कर्शयन्तः** ये जनाः तप्यन्ते।
दम्भाहङ्कारसंयुक्ताः कामरागबलान्विताः अचेतसः **कं** कर्शयन्तः ये जनाः तप्यन्ते ?	दम्भाहङ्कारसंयुक्ताः कामरागबलान्विताः अचेतसः **भूतग्रामं** कर्शयन्तः ये जनाः तप्यन्ते।
दम्भाहङ्कारसंयुक्ताः कामरागबलान्विताः अचेतसः **कुत्रत्यं** भूतग्रामं कर्शयन्तः ये जनाः तप्यन्ते ?	दम्भाहङ्कारसंयुक्ताः कामरागबलान्विताः अचेतसः **शरीरस्थं** भूतग्रामं कर्शयन्तः ये जनाः तप्यन्ते।
दम्भाहङ्कारसंयुक्ताः कामरागबलान्विताः अचेतसः शरीरस्थं भूतग्रामं **पुनः कं** कर्शयन्तः ये जनाः तप्यन्ते ?	दम्भाहङ्कारसंयुक्ताः कामरागबलान्विताः अचेतसः शरीरस्थं भूतग्रामं **मां च एव** कर्शयन्तः ये जनाः तप्यन्ते।
दम्भाहङ्कारसंयुक्ताः कामरागबलान्विताः अचेतसः शरीरस्थं भूतग्रामं **कुत्रत्यं** मां च एव कर्शयन्तः ये जनाः तप्यन्ते ?	दम्भाहङ्कारसंयुक्ताः कामरागबलान्विताः अचेतसः शरीरस्थं भूतग्रामम् **अन्तःशरीरस्थं** मां च एव कर्शयन्तः ये जनाः तप्यन्ते।

दम्भाहङ्कारसंयुक्ताः कामरागबलान्विताः अचेतसः शरीरस्थं भूतग्रामम् अन्तःशरीरस्थं मां च एव कर्शयन्तः ये जनाः **किं** तप्यन्ते ?	दम्भाहङ्कारसंयुक्ताः कामरागबलान्विताः अचेतसः शरीरस्थं भूतग्रामम् अन्तःशरीरस्थं मां च एव कर्शयन्तः ये जनाः **तपः** तप्यन्ते ।
दम्भाहङ्कारसंयुक्ताः कामरागबलान्विताः अचेतसः शरीरस्थं भूतग्रामम् अन्तःशरीरस्थं मां च एव कर्शयन्तः ये जनाः **कीदृशं** तपः तप्यन्ते ?	दम्भाहङ्कारसंयुक्ताः कामरागबलान्विताः अचेतसः शरीरस्थं भूतग्रामम् अन्तःशरीरस्थं मां च एव कर्शयन्तः ये जनाः **घोरं** तपः तप्यन्ते ।
दम्भाहङ्कारसंयुक्ताः कामरागबलान्विताः अचेतसः शरीरस्थं भूतग्रामम् अन्तःशरीरस्थं मां च एव कर्शयन्तः ये जनाः **पुनः कीदृशं** घोरं तपः तप्यन्ते ?	दम्भाहङ्कारसंयुक्ताः कामरागबलान्विताः अचेतसः शरीरस्थं भूतग्रामम् अन्तःशरीरस्थं मां च एव कर्शयन्तः ये जनाः **अशास्त्रविहितं** घोरं तपः तप्यन्ते ।
दम्भाहङ्कारसंयुक्ताः कामरागबलान्विताः अचेतसः शरीरस्थं भूतग्रामम् अन्तःशरीरस्थं मां च एव कर्शयन्तः ये जनाः अशास्त्रविहितं घोरं तपः तप्यन्ते, **तान् किम्** ?	दम्भाहङ्कारसंयुक्ताः कामरागबलान्विताः अचेतसः शरीरस्थं भूतग्रामम् अन्तःशरीरस्थं मां च एव कर्शयन्तः ये जनाः अशास्त्रविहितं घोरं तपः तप्यन्ते, **तान् विद्धि** ।
दम्भाहङ्कारसंयुक्ताः कामरागबलान्विताः अचेतसः शरीरस्थं भूतग्रामम् अन्तःशरीरस्थं मां च एव कर्शयन्तः ये जनाः अशास्त्रविहितं घोरं तपः तप्यन्ते तान्, **कान्** विद्धि ?	दम्भाहङ्कारसंयुक्ताः कामरागबलान्विताः अचेतसः शरीरस्थं भूतग्रामम् अन्तःशरीरस्थं मां च एव कर्शयन्तः ये जनाः अशास्त्रविहितं घोरं तपः तप्यन्ते तान्, **आसुरनिश्चयान्** विद्धि ।

तात्पर्यम् - ये पुरुषाः आडम्बरेण अहम्भावेन च युक्ताः सन्ति, ये भोगैः आसक्त्या हठेन च युक्ताः सन्ति, ये अविवेकिनः स्वशरीरे वर्तमानं पृथिव्यादिभूतसमूहं साक्षिभूतं माम् अपि कृशीकुर्वन्तः अशास्त्रीयां घोरां तपस्यां कुर्वन्ति तादृशाः आसुरीसम्पदायुक्ताः इति ज्ञातव्यम् ।

आहारस्त्वपि सर्वस्य त्रिविधो भवति प्रियः ।
यज्ञस्तपस्तथा दानं तेषां भेदमिमं शृणु ॥१७.७॥

पदच्छेदः - आहारः, तु, अपि, सर्वस्य, त्रिविधः, भवति, प्रियः ।
यज्ञः, तपः, तथा, दानम्, तेषाम्, भेदम्, इमम्, शृणु ॥

अन्वयः - आहारः तु अपि सर्वस्य त्रिविधः प्रियः भवति तथा यज्ञः तपः दानं तेषाम् इमं भेदं शृणु ।

पदार्थः - आहारः तु अपि = भोजनम् अपि, सर्वस्य = समस्तस्य प्राणिनः, त्रिविधः = त्रिप्रकारकः, प्रियः = इष्टः, भवति = वर्तते, तथा = तेन प्रकारेण, यज्ञः = यागः, तपः = तपस्या, दानम् = वितरणम्, तेषाम् = आहारादीनाम्, इमम् = अमुम्, भेदम् = विभागम्, शृणु = आकर्णय।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
आहारः	अ. पुं. प्र. एक. (विशेष्यम्)	तु	अव्ययम्
अपि	अव्ययम्	सर्वस्य	अ. सर्व. पुं. ष. एक. (विशेषणम्)
प्राणिनः	प्राणिन् - न. पुं. ष. एक. (विशेष्यम्)	त्रिविधः	अ. पुं. प्र. एक. (विशेषणम्)
प्रियः	अ. पुं. प्र. एक. (विशेषणम्)	भवति	भू (भू सत्तायाम्) - पर. कर्तरि लट्. प्रपु. एक.
तथा	अव्ययम्	यज्ञः	अ. पुं. प्र. एक.
तपः	तपस् - सका. नपुं. प्र. एक.	दानम्	अ. नपुं. प्र. एक.
तेषाम्	तद् - द. सर्व. पुं. ष. बहु. (विशेषणम्)	इमम्	इदम् - म. सर्व. पुं. द्वि. एक. (विशेषणम्)
भेदम्	अ. पुं. द्वि. एक. (विशेष्यम्)	शृणु	श्रु (श्रु श्रवणे) पर. कर्तरि लोट्. मपु. एक.

व्याकरणम् -

(क) सन्धिः	आहारस्तु	आहारः + तु	विसर्गसन्धिः (सकारः)।
	त्वपि	तु + अपि	यण्सन्धिः।
	त्रिविधो भवति	त्रिविधः + भवति	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः।
	यज्ञस्तपः	यज्ञः + तपः	विसर्गसन्धिः (सकारः)।
	तपस्तथा	तपः + तथा	विसर्गसन्धिः (सकारः)।
(ख) कृदन्तः	आहारः	आ + हृ (हृञ् हरणे) + घञ्।	
	दानम्	दा (डुदाञ् दाने) + ल्युट्।	
	भेदम्	भिद् (भिदिर् विदारणे) + घञ्।	

भावस्पष्टीकरणम् -

भवति।	
कः भवति ?	**आहारः** भवति।
आहारः **कीदृशः** भवति ?	आहारः **प्रियः** भवति।

आहारः **कतिविधः** प्रियः भवति ?	आहारः **तु त्रिविधः** प्रियः भवति ।
आहारः तु **कस्य** त्रिविधः प्रियः भवति ?	आहारः तु **सर्वस्य अपि** त्रिविधः प्रियः भवति ।
आहारः तु सर्वस्य अपि त्रिविधः प्रियः भवति, **तथा किम्** ?	आहारः तु सर्वस्य अपि त्रिविधः प्रियः भवति, **तथा यज्ञः** ।
आहारः तु सर्वस्य अपि त्रिविधः प्रियः भवति, तथा यज्ञः **पुनः किम्** ?	आहारः तु सर्वस्य अपि त्रिविधः प्रियः भवति, तथा यज्ञः **तपः** ।
आहारः तु सर्वस्य अपि त्रिविधः प्रियः भवति, तथा यज्ञः तपः **पुनः किम्** ?	आहारः तु सर्वस्य अपि त्रिविधः प्रियः भवति, तथा यज्ञः तपः **दानम् (च)** ।
आहारः तु सर्वस्य अपि त्रिविधः प्रियः भवति, तथा यज्ञः तपः दानं **तेषां किम्** ?	आहारः तु सर्वस्य अपि त्रिविधः प्रियः भवति, तथा यज्ञः तपः दानं **तेषां शृणु** ।
आहारः तु सर्वस्य अपि त्रिविधः प्रियः भवति, तथा यज्ञः तपः दानं तेषां **कं** शृणु ?	आहारः तु सर्वस्य अपि त्रिविधः प्रियः भवति, तथा यज्ञः तपः दानं तेषां **भेदं** शृणु ।
आहारः तु सर्वस्य अपि त्रिविधः प्रियः भवति, तथा यज्ञः तपः दानं तेषां **कं** भेदं शृणु ?	आहारः तु सर्वस्य अपि त्रिविधः प्रियः भवति, तथा यज्ञः तपः दानं तेषाम् **इमं** भेदं शृणु ।

तात्पर्यम् - सर्वेषां यत् भोजनं प्रियं भवति तदपि त्रिप्रकारकम् अस्ति । तथैव यागः, तपस्या दानमपि त्रिप्रकारकम् अस्ति । तेषाम् इमं विभागम् आकर्णय ।

आयुःसत्त्वबलारोग्यसुखप्रीतिविवर्धनाः ।
रस्याः स्निग्धाः स्थिरा हृद्या आहाराः सात्त्विकप्रियाः ॥१७.८॥

पदच्छेदः - आयुःसत्त्वबलारोग्यसुखप्रीतिविवर्धनाः ।
रस्याः, स्निग्धाः, स्थिराः, हृद्याः, आहाराः, सात्त्विकप्रियाः ॥

अन्वयः - आयुःसत्त्वबलारोग्यसुखप्रीतिविवर्धनाः रस्याः स्निग्धाः स्थिराः हृद्याः आहाराः सात्त्विकप्रियाः ।

पदार्थः - आयुःसत्त्वबलारोग्यसुखप्रीतिविवर्धनाः = आयुष्यम्, उत्साहः, शक्तिः, आरोग्यं, चित्तप्रसादः प्रीतिश्च एतेषां वर्धकाः, रस्याः = आस्वादनीयाः, स्निग्धाः = स्नेहवन्तः, स्थिराः = चिरस्थायिनः, हृद्याः = रमणीयाः, आहाराः = भोज्यपदार्थाः, सात्त्विकप्रियाः = सात्त्विकाभिमताः ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
आयुःसत्त्वबलारोग्यसुखप्रीतिविवर्धनाः	अ. पुं. प्र. बहु. (विशेषणम्)	रस्याः	अ. पुं. प्र. बहु. (विशेषणम्)
स्निग्धाः	अ. पुं. प्र. बहु. (विशेषणम्)	स्थिराः	अ. पुं. प्र. बहु. (विशेषणम्)
हृद्याः	अ. पुं. प्र. बहु. (विशेषणम्)	आहाराः	अ. पुं. प्र. बहु. (विशेष्यम्)
सात्त्विकप्रियाः	अ. पुं. प्र. बहु. (विशेषणम्)		

व्याकरणम् -

(क) सन्धिः स्थिरा हृद्याः — स्थिराः + हृद्याः — विसर्गसन्धिः (लोपः)।
हृद्या आहाराः — हृद्याः + आहाराः — विसर्गसन्धिः (लोपः)।

(ख) समासः आयुःसत्त्वबलारोग्यसुखप्रीतिविवर्धनाः
आयुश्च सत्त्वं च बलं च आरोग्यं च सुखं च प्रीतिश्च
आयुःसत्त्वबलारोग्यसुखप्रीतयः - द्वन्द्वः।
आयुःसत्त्वबलारोग्यसुखप्रीतीनां विवर्धनाः - षष्ठीतत्पुरुषः।
सात्त्विकप्रियाः — सात्त्विकानां प्रियाः सात्त्विकप्रियाः - षष्ठीतत्पुरुषः।

(ग) कृदन्तः बलम् — बल् (बल प्राणने धान्यावरोधने च) + अच्।
प्रीतिः — प्री (प्रीङ् प्रीतौ) + क्तिन्।
विवर्धनाः — वि + वृध् (वृधु वर्धने) + णिच् + ल्युट्।
स्निग्धाः — स्निह् (ष्णिह् प्रीतौ) + क्त (कर्तरि)।
आहाराः — आ + हृ (हृञ् हरणे) + घञ्।

(घ) तद्धितान्तः आरोग्यम् — अरोग + ष्यञ्।
रस्याः — रस + यत्।
हृद्याः — हृदय + यत्।

भावस्पष्टीकरणम् -

के (भवन्ति) ?	**सात्त्विकप्रियाः (भवन्ति)।**
के सात्त्विकप्रियाः (भवन्ति) ?	**आहाराः सात्त्विकप्रियाः (भवन्ति)।**

पुनः कीदृशाः आहाराः सात्त्विकप्रियाः (भवन्ति) ?	**हृद्याः** आहाराः सात्त्विकप्रियाः (भवन्ति) ।
पुनः कीदृशाः हृद्याः आहाराः सात्त्विकप्रियाः (भवन्ति) ?	**स्थिराः** हृद्याः आहाराः सात्त्विकप्रियाः (भवन्ति) ।
पुनः कीदृशाः स्थिराः हृद्याः आहाराः सात्त्विकप्रियाः (भवन्ति) ?	**स्निग्धाः** स्थिराः हृद्याः आहाराः सात्त्विकप्रियाः (भवन्ति) ।
पुनः कीदृशाः स्निग्धाः स्थिराः हृद्याः आहाराः सात्त्विकप्रियाः (भवन्ति) ?	**रस्याः** स्निग्धाः स्थिराः हृद्याः आहाराः सात्त्विकप्रियाः (भवन्ति) ।
पुनः कीदृशाः रस्याः स्निग्धाः स्थिराः हृद्याः आहाराः सात्त्विकप्रियाः (भवन्ति) ?	**आयुःसत्त्वबलारोग्यसुखप्रीतिविवर्धनाः** रस्याः स्निग्धाः स्थिराः हृद्याः आहाराः सात्त्विकप्रियाः (भवन्ति) ।

तात्पर्यम् - तत्र आयुष्यम्, उत्साहः, शक्तिः, आरोग्यं, चित्तप्रसादः, प्रीतिश्चेति एतेषां गुणानां विवर्धकाः, आस्वाद्याः, स्नेहवन्तः, चिरस्थायिनः, रमणीयाश्च ये आहाराः सन्ति ते सात्त्विकानां प्रियाः भवन्ति ।

कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः ।
आहारा राजसस्येष्टा दुःखशोकामयप्रदाः ॥१७.९॥

पदच्छेदः - कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः ।
आहाराः, राजसस्य, इष्टाः, दुःखशोकामयप्रदाः ॥

अन्वयः - कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः दुःखशोकामयप्रदाः आहाराः राजसस्य इष्टाः ।

पदार्थः - कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः = अतिकटवः, अत्यम्लाः, अतिलवणाः, अत्युष्णाः, तीक्ष्णाः, रूक्षाः, दाहकराश्च, दुःखशोकामयप्रदाः = दुःखरोगादिदायकाः, आहाराः = भोज्यपदार्थाः, राजसस्य = रजोगुणसहितस्य, इष्टाः = प्रीतिकराः ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
कट्वम्ललवणा-त्युष्णतीक्ष्णरूक्ष-विदाहिनः	कट्वम्ललवणात्युष्ण-तीक्ष्णरूक्षविदाहिन् - न. पुं. प्र. बहु. (विशेषणम्)	दुःखशोकामयप्रदाः	अ. पुं. प्र. बहु. (विशेषणम्)

आहाराः	अ. पुं. प्र. बहु. (विशेष्यम्)	राजसस्य	अ. पुं. ष. एक. (विशेषणम्)
इष्टाः	अ. पुं. प्र. बहु. (विशेषणम्)		

व्याकरणम् -

(क) सन्धिः आहारा राजसस्य — आहाराः + राजसस्य — विसर्गसन्धिः (लोपः)।
राजसस्येष्टाः — राजसस्य + इष्टाः — गुणसन्धिः।
इष्टा दुःखशोकामयप्रदाः
इष्टाः + दुःखशोकामयप्रदाः — विसर्गसन्धिः (लोपः)।

(ख) समासः कट्वम्ललवणात्युष्ण-तीक्ष्णरूक्षविदाहिनः
कटवश्च अम्लाश्च लवणाश्च अत्युष्णाश्च तीक्ष्णाश्च रूक्षाश्च विदाहिनश्च
कट्वम्ल-लवणात्युष्णतीक्ष्णरूक्षविदाहिनः - द्वन्द्वः।
दुःखशोकामयप्रदाः — दुःखं च शोकश्च आमयश्च दुःखशोकामयाः - द्वन्द्वः।
दुःखशोकामयानां प्रदाः दुःखशोकामयप्रदाः - षष्ठीतत्पुरुषः।

(ग) कृदन्तः लवणम् — लू (लूञ् छेदने) + ल्युट्।
रूक्षः — रूक्ष् (रूक्ष पारुष्ये) + अच्।
विदाहिनः — वि + दह् (दह भस्मीकरणे) + णिनि।
आहाराः — आ + हृ (हृञ् हरणे) + घञ्।
इष्टाः — इष् (इषु इच्छायाम्) + क्त (कर्तरि)।
शोकः — शुच् (शुच शोके) + घञ्।

(घ) तद्धितान्तः राजसस्य — रजस् + अण्, रजसः इदम् राजसः (स्वार्थे अण्)।

भावस्पष्टीकरणम् -

इष्टाः।	
के इष्टाः ?	**आहाराः** इष्टाः।
कीदृशाः आहाराः इष्टाः ?	**कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः** आहाराः इष्टाः।
कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः **पुनः कीदृशाः** आहाराः इष्टाः ?	कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः **दुःखशोकामयप्रदाः** आहाराः इष्टाः।
कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः दुःखशोकामयप्रदाः आहाराः **कस्य** इष्टाः ?	कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः दुःखशोकामयप्रदाः आहाराः **राजसस्य** इष्टाः।

तात्पर्यम् - ये पुनः आहाराः अतिकटवः अत्यम्लाः अतिलवणाः अत्युष्णाः तीक्ष्णाः रूक्षाः विदाहिनश्च ते दुःखं शोकम् अनारोग्यं च जनयन्ति । तादृशाः आहाराः राजसानां प्रियाः भवन्ति ।

यातयामं गतरसं पूति पर्युषितं च यत् ।
उच्छिष्टमपि चामेध्यं भोजनं तामसप्रियम् ॥१७.१०॥

पदच्छेदः - यातयामम्, गतरसम्, पूति, पर्युषितम्, च, यत् ।
उच्छिष्टम्, अपि, च, अमेध्यम्, भोजनम्, तामसप्रियम् ॥

अन्वयः - यातयामं गतरसं पूति पर्युषितं च उच्छिष्टम् अपि अमेध्यं च यत् भोजनं तत् तामसप्रियम् ।

पदार्थः - यातयामम् = मन्दपक्वम्, गतरसम् = रसविहीनम्, पूति = दुर्गन्धम्, पर्युषितम् च = रात्र्यन्तरितम्, उच्छिष्टम् अपि = भुक्तावशिष्टम्, अमेध्यं च = अपवित्रं च, यत् = यत्, भोजनम् = भोज्यपदार्थम्, तत् = तत्, तामसप्रियम् = तामसाभिमतम् ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
यातयामम्	अ. नपुं. प्र. एक. (विशेषणम्)	गतरसम्	अ. नपुं. प्र. एक. (विशेषणम्)
पूति	इ. नपुं. प्र. एक. (विशेषणम्)	पर्युषितम्	अ. नपुं. प्र. एक. (विशेषणम्)
च	अव्ययम्	उच्छिष्टम्	अ. नपुं. प्र. एक. (विशेषणम्)
अपि	अव्ययम्	अमेध्यम्	अ. नपुं. प्र. एक. (विशेषणम्)
यत्	यद् - द. सर्व. नपुं. प्र. एक. (विशेषणम्)	भोजनम्	अ. नपुं. प्र. एक. (विशेष्यम्)
तत्	तद् - द. सर्व. नपुं. प्र. एक. (विशेषणम्)	तामसप्रियम्	अ. नपुं. प्र. एक. (विशेषणम्)

व्याकरणम् -

(क) सन्धिः	चामेध्यम्	च + अमेध्यम् - सवर्णदीर्घसन्धिः ।
(ख) समासः	यातयामम्	यातः यामः यस्य तत् यातयामम् - बहुव्रीहिः ।
	गतरसम्	गतः रसः यस्य तत् गतरसम् - बहुव्रीहिः ।
	अमेध्यम्	न मेध्यम् अमेध्यम् - नञ्तत्पुरुषः ।
	तामसप्रियम्	तामसानां प्रियं तामसप्रियम् - षष्ठीतत्पुरुषः ।
(ग) कृदन्तः	यातम्	या (या प्रापणे) + क्त (कर्तरि) ।

	गतः	गम् (गम्लृ गतौ) + क्त (कर्तरि)।
	रसः	रस् (रस आस्वादनस्नेहनयोः) + अच्।
	पर्युषितम्	परि + वस् (वस निवासे) + क्त (कर्तरि)।
	उच्छिष्टम्	उत् + शिष् (शिष असर्वोपयोगे) + क्त (कर्तरि)।
	भोजनम्	भुज् (भुज पालनाभ्यवहारयोः) + ल्युट्।
(घ) तद्धितान्तम्	तामसः	तमस् + अण्, तमसः इदं तामसः (स्वार्थे अण्)।

भावस्पष्टीकरणम् -

यत् किम् ?	यत् भोजनम्।
यत् भोजनं **तत् किम्** ?	यत् भोजनं **तत् तामसप्रियम्**।
कीदृशं यत् भोजनं तत् तामसप्रियम् ?	**यातयामं** यत् भोजनं तत् तामसप्रियम्।
यातयामं **कीदृशं** यत् भोजनं तत् तामसप्रियम् ?	यातयामं **गतरसं** यत् भोजनं तत् तामसप्रियम्।
यातयामं गतरसं **कीदृशं** यत् भोजनं तत् तामसप्रियम् ?	यातयामं गतरसं **पूति** यत् भोजनं तत् तामसप्रियम्।
यातयामं गतरसं पूति **कीदृशं** यत् भोजनं तत् तामसप्रियम् ?	यातयामं गतरसं पूति **पर्युषितं च** यत् भोजनं तत् तामसप्रियम्।
यातयामं गतरसं पूति पर्युषितं च **कीदृशं** यत् भोजनं तत् तामसप्रियम् ?	यातयामं गतरसं पूति पर्युषितं च **उच्छिष्टम् अपि** यत् भोजनं तत् तामसप्रियम् ?
यातयामं गतरसं पूति पर्युषितं च उच्छिष्टम् अपि **कीदृशं** यत् भोजनं तत् तामसप्रियम् ?	यातयामं गतरसं पूति पर्युषितं च उच्छिष्टम् अपि **अमेध्यं** च यत् भोजनं तत् तामसप्रियम्।

तात्पर्यम् - ये पुनः आहाराः यामात्मकः कालः यस्य व्यतीतः तादृशाः, सारविहीनाः, दुर्गन्धविशिष्टाः, दिनान्तरे पक्वाः, भुक्तावशिष्टाः अभक्षणीयाश्च सन्ति ते तामसानां प्रियाः भवन्ति।

अफलाकाङ्क्षिभिर्यज्ञो विधिदृष्टो य इज्यते।
यष्टव्यमेवेति मनः समाधाय स सात्त्विकः ॥१७.११॥

पदच्छेदः - अफलाकाङ्क्षिभिः, यज्ञः, विधिदृष्टः, यः, इज्यते।
यष्टव्यम्, एव, इति, मनः, समाधाय, सः, सात्त्विकः ॥

अन्वयः - अफलाकाङ्क्षिभिः यष्टव्यम् एव इति मनः समाधाय विधिदृष्टः यः यज्ञः इज्यते सः सात्त्विकः।

पदार्थः - अफलाकाङ्क्षिभिः = फलम् अनपेक्षमाणैः, यष्टव्यम् एव इति = यज्ञः कर्तव्यः इति, मनः = चित्तम्, समाधाय = एकाग्रं कृत्वा, विधिदृष्टः = शास्त्रविहितः, यः यज्ञः = यः यागः, इज्यते = क्रियते, सः सात्त्विकः = सः सत्त्वसम्बन्धी।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
अफलाकाङ्क्षिभिः	अफलाकाङ्क्षिन् - न. पुं. तृ. बहु.	यष्टव्यम्	अ. नपुं. प्र. एक.
एव	अव्ययम्	इति	अव्ययम्
मनः	मनस् - सका. नपुं. द्वि. एक.	समाधाय	ल्यबन्तम् अव्ययम्
विधिदृष्टः	अ. पुं. प्र. एक. (विशेषणम्)	यः	यद् - द. सर्व. पुं. प्र. एक. (विशेषणम्)
यज्ञः	अ. पुं. प्र. एक. (विशेष्यम्)	इज्यते	यज (यज देवपूजासङ्गति-करणदानेषु) आत्म. कर्मणि लट्. प्रपु. एक.
सः	तद् - द. सर्व. पुं. प्र. एक. (विशेषणम्)	सात्त्विकः	अ. पुं. प्र. एक. (विशेषणम्)

व्याकरणम् -

(क) सन्धिः	अफलाकाङ्क्षिभिर्यज्ञः	अफलाकाङ्क्षिभिः + यज्ञः	विसर्गसन्धिः (रेफः)।
	यज्ञो विधिदृष्टः	यज्ञः + विधिदृष्टः	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः।
	विधिदृष्टो यः	विधिदृष्टः + यः	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः।
	य इज्यते	यः + इज्यते	विसर्गसन्धिः (लोपः)।
	एवेति	एव + इति	गुणसन्धिः।
	स सात्त्विकः	सः + सात्त्विकः	विसर्गसन्धिः (लोपः)।

(ख) समासः अफलाकाङ्क्षिभिः - फलम् आकाङ्क्षन्ति इति फलाकाङ्क्षिणः - ताच्छीलिके कर्तरि णिनि उपपदसमासश्च।
न फलाकाङ्क्षिणः अफलाकाङ्क्षिणः, तैः - नञ्तत्पुरुषः।

विधिदृष्टः - विधिना दृष्टः विधिदृष्टः - तृतीयातत्पुरुषः।

(ग) कृदन्तः दृष्टः - दर्श् (दृशिर् प्रेक्षणे) + क्त (कर्मणि)।

यष्टव्यम् - यज (यज देवपूजासङ्गतिकरणदानेषु) + तव्यत्।

समाधाय - सम् + आ + धा (डुधाञ् धारणपोषणयोः) + ल्यप्।

(घ) तद्धितान्तः काङ्क्षिभिः काङ्क्षा + णिनि (काङ्क्षा अस्य अस्मिन् वा अस्ति इति)।
सात्त्विकः सत्त्व + ठञ् (सत्त्वगुणप्रधानाः)।

भावस्पष्टीकरणम् -

इज्यते।	
कः इज्यते ?	**यज्ञः** इज्यते।
कैः यज्ञः इज्यते ?	**अफलाकाङ्क्षिभिः** यज्ञः इज्यते।
अफलाकाङ्क्षिभिः **कः** यज्ञः इज्यते ?	अफलाकाङ्क्षिभिः **यः** यज्ञः इज्यते।
अफलाकाङ्क्षिभिः यः यज्ञः इज्यते **सः कः** ?	अफलाकाङ्क्षिभिः यः यज्ञः इज्यते **सः सात्त्विकः**।
अफलाकाङ्क्षिभिः **कीदृशः** यः यज्ञः इज्यते सः सात्त्विकः ?	अफलाकाङ्क्षिभिः **विधिदृष्टः** यः यज्ञः इज्यते सः सात्त्विकः।
अफलाकाङ्क्षिभिः **किं कृत्वा** विधिदृष्टः यः यज्ञः इज्यते सः सात्त्विकः ?	अफलाकाङ्क्षिभिः **समाधाय** विधिदृष्टः यः यज्ञः इज्यते सः सात्त्विकः।
अफलाकाङ्क्षिभिः **किं** समाधाय विधिदृष्टः यः यज्ञः इज्यते सः सात्त्विकः ?	अफलाकाङ्क्षिभिः **मनः** समाधाय विधिदृष्टः यः यज्ञः इज्यते सः सात्त्विकः।
अफलाकाङ्क्षिभिः **किं करणीयम् इत्येव** मनः समाधाय विधिदृष्टः यः यज्ञः इज्यते सः सात्त्विकः ?	अफलाकाङ्क्षिभिः **यष्टव्यम् एव इति** मनः समाधाय विधिदृष्टः यः यज्ञः इज्यते सः सात्त्विकः।

तात्पर्यम् - फलम् अनपेक्ष्य यज्ञः कर्तव्यः इति दृढं सङ्कल्प्य एकाग्रेण मनसा यथाशास्त्रं यः यज्ञः क्रियते सः सात्त्विकः इत्युच्यते।

अभिसन्धाय तु फलं दम्भार्थमपि चैव यत्।
इज्यते भरतश्रेष्ठ तं यज्ञं विद्धि राजसम्॥१७.१२॥

पदच्छेदः - अभिसन्धाय, तु, फलम्, दम्भार्थम्, अपि, च, एव, यत्।
इज्यते, भरतश्रेष्ठ, तम्, यज्ञम्, विद्धि, राजसम्॥

अन्वयः - भरतश्रेष्ठ ! फलं तु अभिसन्धाय दम्भार्थम् अपि च एव यत् इज्यते तं यज्ञं राजसं विद्धि।

पदार्थः - भरतश्रेष्ठ = अर्जुन, फलं तु = प्रयोजनं तु, अभिसन्धाय = उद्दिश्य, दम्भार्थम् अपि च एव = आडम्बरार्थम् अपि, यत् = यदि, इज्यते = निर्वर्त्यते, तं यज्ञम् = तं यागम्, राजसम् = रजोगुणसम्बन्धिनम्, विद्धि = जानीहि।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
भरतश्रेष्ठ	अ. पुं. सम्बो. एक.	फलम्	अ. नपुं. द्वि. एक.
तु	अव्ययम्	अभिसन्धाय	ल्यबन्तम् अव्ययम्
दम्भार्थम्	अ. पुं. द्वि. एक.	अपि	अव्ययम्
च	अव्ययम्	एव	अव्ययम्
यत्	यद् - द. सर्व. नपुं. प्र. एक. (विशेषणम्)	इज्यते	यज (यज देवपूजासङ्गतिकरणदानेषु) आत्म. कर्मणि लट्. प्रपु. एक.
तम्	तद् - द. सर्व. पुं. द्वि. एक. (विशेषणम्)	यज्ञम्	अ. पुं. द्वि. एक. (विशेष्यम्)
राजसम्	अ. पुं. द्वि. एक. (विशेषणम्)	विद्धि	विद् (विद ज्ञाने) पर. कर्तरि लोट्. मपु. एक.

व्याकरणम् -

(क) सन्धिः	चैव	च + एव	वृद्धिसन्धिः।
(ख) समासः	भरतश्रेष्ठः	भरतेषु श्रेष्ठः भरतश्रेष्ठः - सप्तमीतत्पुरुषः।	
	दम्भार्थम्	दम्भाय इदम् दम्भार्थम् - चतुर्थीतत्पुरुषः, नित्यसमासः।	
(ग) कृदन्तः	अभिसन्धाय	अभि + सम् + धा (डुधाञ् धारणपोषणयोः) + ल्यप्।	
	फलम्	फल् (फल निष्पत्तौ) + अच्।	
	दम्भः	दन्भ् (दम्भु दमने) + घञ्।	
(घ) तद्धितान्तः	राजसम्	रजस् + अण्, रजसः इदम् (स्वार्थे अण्)।	

भावस्पष्टीकरणम् -

इज्यते।	
किं कृत्वा इज्यते ?	**अभिसन्धाय इज्यते।**
किम् अभिसन्धाय इज्यते ?	**फलं** तु अभिसन्धाय इज्यते।
फलं तु अभिसन्धाय **किमर्थम्** इज्यते ?	फलं तु अभिसन्धाय **दम्भार्थम् अपि च एव** इज्यते।

फलं तु अभिसन्धाय दम्भार्थम् अपि च एव यत् इज्यते **तं किम्** ?	फलं तु अभिसन्धाय दम्भार्थम् अपि च एव यत् इज्यते **तं विद्धि** ।
फलं तु अभिसन्धाय दम्भार्थम् अपि च एव यत् इज्यते तं **कं** विद्धि ?	फलं तु अभिसन्धाय दम्भार्थम् अपि च एव यत् इज्यते तं **यज्ञं** विद्धि ।
फलं तु अभिसन्धाय दम्भार्थम् अपि च एव यत् इज्यते तं यज्ञं **कीदृशं** विद्धि ?	फलं तु अभिसन्धाय दम्भार्थम् अपि च एव यत् इज्यते तं यज्ञं **राजसं** विद्धि ।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**भरतश्रेष्ठ** !

तात्पर्यम् - अर्जुन ! फलम् अपेक्ष्य धार्मिकतया आत्मानं ख्यापयितुं यः यज्ञः क्रियते सः राजसः इति जानीहि ।

विधिहीनमसृष्टान्नं मन्त्रहीनमदक्षिणम् ।
श्रद्धाविरहितं यज्ञं तामसं परिचक्षते ॥१७.१३॥

पदच्छेदः - विधिहीनम्, असृष्टान्नम्, मन्त्रहीनम्, अदक्षिणम् ।
श्रद्धाविरहितम्, यज्ञम्, तामसम्, परिचक्षते ॥

अन्वयः - विधिहीनम् असृष्टान्नं मन्त्रहीनम् अदक्षिणं श्रद्धाविरहितं यज्ञं तामसं परिचक्षते ।

पदार्थः - विधिहीनम् = शास्त्ररहितम्, असृष्टान्नम् = अदत्तान्नम्, मन्त्रहीनम् = मन्त्रशून्यम्, अदक्षिणम् = दक्षिणाविरहितम्, श्रद्धाविरहितम् = अनासक्तिसहितम्, यज्ञम् = यागम्, तामसम् = तमस्सम्बन्धिनम्, परिचक्षते = कथयन्ति ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
विधिहीनम्	अ. पुं. द्वि. एक. (विशेषणम्)	असृष्टान्नम्	अ. पुं. द्वि. एक. (विशेषणम्)
मन्त्रहीनम्	अ. पुं. द्वि. एक. (विशेषणम्)	अदक्षिणम्	अ. पुं. द्वि. एक. (विशेषणम्)
श्रद्धाविरहितम्	अ. पुं. द्वि. एक. (विशेषणम्)	यज्ञम्	अ. पुं. द्वि. एक. (विशेष्यम्)
तामसम्	अ. पुं. द्वि. एक. (विशेषणम्)	परिचक्षते	परि + चक्ष् (चक्षिङ् व्यक्तायां वाचि) आत्म. कर्तरि लट्. प्रपु. बहु.

व्याकरणम् -

(क) समासः	विधिहीनम्	विधिना हीनः विधिहीनः, तम् - तृतीयातत्पुरुषः ।
	असृष्टान्नम्	सृष्टम् अन्नं यस्मिन् सः सृष्टान्नः - बहुव्रीहिः ।
		न सृष्टान्नः असृष्टान्नः, तम् - नञ्तत्पुरुषः ।
	मन्त्रहीनम्	मन्त्रेण हीनः मन्त्रहीनः, तम् - तृतीयातत्पुरुषः ।
	अदक्षिणम्	न विद्यते दक्षिणा यत्र सः अदक्षिणः, तम् - बहुव्रीहिः ।
	श्रद्धाविरहितम्	श्रद्धया विरहितः श्रद्धाविरहितः, तम् - तृतीयातत्पुरुषः ।
(ख) कृदन्तः	हीनम्	हा (ओहाक् त्यागे) + क्त (कर्तरि), तम् ।
	सृष्टम्	सृज् (सृज विसर्गे) + क्त (कर्तरि), तम् ।
	मन्त्रम्	मन्त्र् (मत्रि गुप्तपरिभाषणे) + अच्, तम् ।
(ग) तद्धितान्तः	तामसम्	तमसः इदं तामसम् (स्वार्थे अण्) ।

भावस्पष्टीकरणम् -

परिचक्षते ।	
कं परिचक्षते ?	**यज्ञं** परिचक्षते ।
कीदृशं यज्ञं परिचक्षते ?	**विधिहीनं** यज्ञं परिचक्षते ।
विधिहीनं **पुनः कीदृशं** यज्ञं परिचक्षते ?	विधिहीनम् **असृष्टान्नं** यज्ञं परिचक्षते ।
विधिहीनम् असृष्टान्नं **पुनः कीदृशं** यज्ञं परिचक्षते ?	विधिहीनम् असृष्टान्नं **मन्त्रहीनं** यज्ञं परिचक्षते ।
विधिहीनम् असृष्टान्नं मन्त्रहीनं **पुनः कीदृशं** यज्ञं परिचक्षते ?	विधिहीनम् असृष्टान्नं मन्त्रहीनम् **अदक्षिणं** यज्ञं परिचक्षते ।
विधिहीनम् असृष्टान्नं मन्त्रहीनम् अदक्षिणं **पुनः कीदृशं** यज्ञं परिचक्षते ?	विधिहीनम् असृष्टान्नं मन्त्रहीनम् अदक्षिणं **श्रद्धाविरहितं** यज्ञं परिचक्षते ।
विधिहीनम् असृष्टान्नं मन्त्रहीनम् अदक्षिणं श्रद्धाविरहितं यज्ञं **पुनः कीदृशं** परिचक्षते ?	विधिहीनम् असृष्टान्नं मन्त्रहीनम् अदक्षिणं श्रद्धाविरहितं यज्ञं **तामसं** परिचक्षते ।

तात्पर्यम् - यः यज्ञः शास्त्रसम्मतो न विद्यते, यत्र अन्नं परेभ्यः न दीयते, यत्र स्वरादिशुद्धः मन्त्रः नास्ति, यत्र दक्षिणा अपि नास्ति, यश्च अश्रद्धया क्रियते सः तामसः इति कथ्यते ।

देवद्विजगुरुप्राज्ञपूजनं शौचमार्जवम्।
ब्रह्मचर्यमहिंसा च शारीरं तप उच्यते॥१७.१४॥

पदच्छेदः - देवद्विजगुरुप्राज्ञपूजनम्, शौचम्, आर्जवम्।
ब्रह्मचर्यम्, अहिंसा, च, शारीरम्, तपः, उच्यते॥

अन्वयः - देवद्विजगुरुप्राज्ञपूजनं शौचम् आर्जवं ब्रह्मचर्यम् अहिंसा च शारीरं तपः उच्यते।

पदार्थः - देवद्विजगुरुप्राज्ञपूजनम् = देवस्य द्विजस्य आचार्यस्य पण्डितस्य च सेवनम्, शौचम् = परिशुद्धिः, आर्जवम् = सरलता, ब्रह्मचर्यम् = ब्रह्मव्रतम्, अहिंसा च = अपीडनम् अपि, शारीरम् = दैहिकम्, तपः = तपस्या, उच्यते = कथ्यते।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
देवद्विजगुरुप्राज्ञपूजनम्	अ. नपुं. प्र. एक.	शौचम्	अ. नपुं. प्र. एक.
आर्जवम्	अ. नपुं. प्र. एक.	ब्रह्मचर्यम्	अ. नपुं. प्र. एक.
अहिंसा	आ. स्त्री. प्र. एक.	च	अव्ययम्
शारीरम्	अ. नपुं. प्र. एक.	तपः	तपस् - सका. नपुं. प्र. एक.
उच्यते	वच् (वच परिभाषणे) पर. कर्मणि लट्. प्रपु. एक.		

व्याकरणम् -

(क) सन्धिः तप उच्यते — तपः + उच्यते — विसर्गसन्धिः (लोपः)।

(ख) समासः देवद्विजगुरुप्राज्ञपूजनम् — देवश्च द्विजश्च गुरुश्च प्राज्ञश्च देवद्विजगुरुप्राज्ञाः - द्वन्द्वः।
देवद्विजगुरुप्राज्ञानां पूजनम् देवद्विजगुरुप्राज्ञपूजनम् - षष्ठीतत्पुरुषः।

अहिंसा — न हिंसा अहिंसा - नञ्तत्पुरुषः।

(ग) कृदन्तः देवः — दिव् (दिवु क्रीडा-विजिगीषा-व्यवहार-द्युति-स्तुति-मोद-मद-स्वप्न-कान्ति-गतिषु) + घञ्।

पूजनम् — पूज् (पूज पूजने) + ल्युट्।

(घ) तद्धितान्तः प्राज्ञः — प्रज्ञः + अण् (स्वार्थे)।

शौचम् — शुचि + अण् (शुचेः भावः)।

आर्जवम् — ऋजु + अण् (ऋजोः भावः)।

शारीरम् — शरीर + अण् (शरीरस्य इदम्)।

भावस्पष्टीकरणम् -

उच्यते।	
किम् उच्यते ?	**तपः** उच्यते।
कीदृशं तपः उच्यते ?	**शारीरं** तपः उच्यते।
किं शारीरं तपः उच्यते ?	**देवद्विजगुरुप्राज्ञपूजनं** शारीरं तपः उच्यते।
देवद्विजगुरुप्राज्ञपूजनं **पुनः किं** शारीरं तपः उच्यते ?	देवद्विजगुरुप्राज्ञपूजनं **शौचं** शारीरं तपः उच्यते।
देवद्विजगुरुप्राज्ञपूजनं शौचं **पुनः किं** शारीरं तपः उच्यते ?	देवद्विजगुरुप्राज्ञपूजनं शौचम् **आर्जवं** शारीरं तपः उच्यते।
देवद्विजगुरुप्राज्ञपूजनं शौचम् आर्जवं **पुनः किं** शारीरं तपः उच्यते ?	देवद्विजगुरुप्राज्ञपूजनं शौचम् आर्जवं **ब्रह्मचर्यं** शारीरं तपः उच्यते।
देवद्विजगुरुप्राज्ञपूजनं शौचम् आर्जवं ब्रह्मचर्यं **पुनः का** शारीरं तपः उच्यते ?	देवद्विजगुरुप्राज्ञपूजनं शौचम् आर्जवं ब्रह्मचर्यम् **अहिंसा च** शारीरं तपः उच्यते।

तात्पर्यम् - देवस्य, द्विजस्य, आचार्यस्य पण्डितस्य च अर्चनं, शुद्धता, आर्जवं, ब्रह्मचर्यम् अहिंसा च शारीरं तपः इत्युच्यते।

अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत्।
स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते ॥१७.१५॥

पदच्छेदः - अनुद्वेगकरम्, वाक्यम्, सत्यम्, प्रियहितम्, च, यत्।
स्वाध्यायाभ्यसनम्, च, एव, वाङ्मयम्, तपः, उच्यते ॥

अन्वयः - अनुद्वेगकरं सत्यं प्रियहितं च यत् वाक्यं स्वाध्यायाभ्यसनं च एव वाङ्मयं तपः उच्यते।

पदार्थः - अनुद्वेगकरम् = अक्लेशकरम्, सत्यम् = यथार्थम्, प्रियहितं च = इष्टं हितकरं च, यत् वाक्यम् = यत् वचनम्, स्वाध्यायाभ्यसनम् च एव = वेदाभ्यासः अपि, वाङ्मयम् = भाषामयम्, तपः = तपस्या, उच्यते = कथ्यते।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
अनुद्वेगकरम्	अ. नपुं. प्र. एक. (विशेषणम्)	सत्यम्	अ. नपुं. प्र. एक. (विशेषणम्)

प्रियहितम्	अ. नपुं. प्र. एक. (विशेषणम्)	च	अव्ययम्
यत्	यद् - द. सर्व. नपुं. प्र. एक. (विशेषणम्)	वाक्यम्	अ. नपुं. प्र. एक. (विशेष्यम्)
स्वाध्याया-भ्यसनम्	अ. नपुं. प्र. एक. (विशेषणम्)	एव	अव्ययम्
वाङ्मयम्	अ. नपुं. प्र. एक. (विशेषणम्)	तपः	तपस् - सका. नपुं. प्र. एक. (विशेष्यम्)
उच्यते	वच् (वच परिभाषणे) पर. कर्मणि लट्. प्रपु. एक.		

व्याकरणम् -

(क) सन्धिः	चैव	च + एव - वृद्धिसन्धिः।
	तप उच्यते	तपः + उच्यते - विसर्गसन्धिः (लोपः)।
(ख) समासः	अनुद्वेगकरम्	न उद्वेगः अनुद्वेगः - नञ्तत्पुरुषः।
		अनुद्वेगं करोति इति अनुद्वेगकरम् - उपपदतत्पुरुषः समासान्ते टच्।
	प्रियहितम्	प्रियं च तत् हितं च प्रियहितम् - कर्मधारयः।
	स्वाध्यायाभ्यसनम्	स्वाध्यायस्य अभ्यसनं स्वाध्यायाभ्यसनम् - षष्ठीतत्पुरुषः।
(ग) कृदन्तः	अनुद्वेगः	अनु + विज् (ओविजी भयचलनयोः) + घञ्।
	वाक्यम्	वच् (वच परिभाषणे) + ण्यत्।
	हितम्	धा (डुधाञ् धारणपोषणयोः) + क्त (कर्मणि)।
	स्वाध्यायः	सु + अधि + इ (इङ् - अध्ययने) + घञ्।
	अभ्यसनम्	अभि + अस् (असु क्षेपणे) + ल्युट्।
(घ) तद्धितान्तः	सत्यम्	सत् + यत्।
	वाङ्मयम्	वाच् + मयट्।

भावस्पष्टीकरणम् -

उच्यते।	
किम् उच्यते ?	**तपः** उच्यते।
कीदृशं तपः उच्यते ?	**वाङ्मयं** तपः उच्यते।
किं वाङ्मयं तपः उच्यते ?	**वाक्यं** वाङ्मयं तपः उच्यते।
कीदृशं वाक्यं वाङ्मयं तपः उच्यते ?	**अनुद्वेगकरं** वाक्यं वाङ्मयं तपः उच्यते।

अनुद्वेगकरं **पुनः कीदृशं** वाक्यं वाङ्मयं तपः उच्यते ?	अनुद्वेगकरं **सत्यं** वाक्यं वाङ्मयं तपः उच्यते ।
अनुद्वेगकरं सत्यं **पुनः कीदृशं** वाक्यं वाङ्मयं तपः उच्यते ?	अनुद्वेगकरं सत्यं **प्रियहितं च** यत् वाक्यं वाङ्मयं तपः उच्यते ।
अनुद्वेगकरं सत्यं प्रियहितं च यत् वाक्यं **पुनः किं** वाङ्मयं तपः उच्यते ?	अनुद्वेगकरं सत्यं प्रियहितं च यत् वाक्यं **स्वाध्यायाभ्यसनं च** एव वाङ्मयं तपः उच्यते ।

तात्पर्यम् - अक्षोभकरं यथार्थम् इष्टं हितकरं च यत् भाषणं स्वाध्यायः अभ्यासश्च वाङ्मयं तपः इति कथ्यते ।

मनःप्रसादः सौम्यत्वं मौनमात्मविनिग्रहः ।
भावसंशुद्धिरित्येतत्तपो मानसमुच्यते ॥१७.१६॥

पदच्छेदः - मनःप्रसादः, सौम्यत्वम्, मौनम्, आत्मविनिग्रहः ।
भावसंशुद्धिः, इति, एतत्, तपः, मानसम्, उच्यते ॥

अन्वयः - मनःप्रसादः सौम्यत्वं मौनम् आत्मविनिग्रहः भावसंशुद्धिः इति एतत् मानसं तपः उच्यते ।

पदार्थः - मनःप्रसादः = चित्तशान्तिः, सौम्यत्वम् = सौमनस्यम्, मौनम् = वाक्संयमः, आत्मविनिग्रहः = मनोनिरोधः, भावसंशुद्धिः = वञ्चनाराहित्यम्, इति = एवम्, एतत् = इदम्, मानसम् = अन्तःकरणसम्बन्धि, तपः = तपस्या, उच्यते = कथ्यते ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
मनःप्रसादः	अ. पुं. प्र. एक.	सौम्यत्वम्	अ. नपुं. प्र. एक.
मौनम्	अ. नपुं. प्र. एक.	आत्मविनिग्रहः	अ. पुं. प्र. एक.
भावसंशुद्धिः	इ. स्त्री. प्र. एक.	इति	अव्ययम्
एतत्	एतद् - द. सर्व. नपुं. प्र. एक. (विशेषणम्)	मानसम्	अ. नपुं. प्र. एक. (विशेषणम्)
तपः	तपस् - सका. नपुं. प्र. एक. (विशेष्यम्)	उच्यते	वच् (वच परिभाषणे) पर. कर्मणि लट्. प्रपु. एक.

व्याकरणम् -

(क) सन्धिः	भावसंशुद्धिरिति	भावसंशुद्धिः + इति	विसर्गसन्धिः (रेफः) ।
	इत्येतत्	इति + एतत्	यण्सन्धिः ।

	तपो मानसम्	तपः + मानसम्	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः ।
(ख) समासः	मनःप्रसादः	मनसः प्रसादः मनःप्रसादः - षष्ठीतत्पुरुषः ।	
	आत्मविनिग्रहः	आत्मनः विनिग्रहः आत्मविनिग्रहः - षष्ठीतत्पुरुषः ।	
	भावसंशुद्धिः	भावे संशुद्धिः भावसंशुद्धिः - सप्तमीतत्पुरुषः ।	
(ग) कृदन्तः	प्रसादः	प्र + सद् (षदलृ विशरणगत्यवसादनेषु) + घञ् ।	
	विनिग्रहः	वि + नि + ग्रह् (ग्रह उपादाने) + अप् ।	
	संशुद्धिः	सम् + शुध् (शुध शौचे) + क्तिन् ।	
(घ) तद्धितान्तः	सौम्यत्वम्	सौम्य + त्व (सौम्यस्य भावः) ।	
	मौनम्	मुनि + अण् (मुनेः भावः) ।	
	मानसम्	मनस् + अण् (मनसः इदम्) ।	

भावस्पष्टीकरणम् -

उच्यते ।	
किम् उच्यते ?	**तपः** उच्यते ।
कीदृशं तपः उच्यते ?	**मानसं** तपः उच्यते ।
किं मानसं तपः उच्यते ?	**एतत्** मानसं तपः उच्यते ।
किम् एतत् मानसं तपः उच्यते ?	**मनःप्रसादः** एतत् मानसं तपः उच्यते ।
मनःप्रसादः **पुनः किम्** एतत् मानसं तपः उच्यते ?	मनःप्रसादः सौम्यत्वम् [illegible] सं तपः उच्यते ।
मनःप्रसादः सौम्यत्वं **पुनः किम्** एतत् मानसं तपः उच्यते ?	मनःप्रसादः सौम्[illegible]त्वं **मौनम्** [illegible]नसं तपः उच्यते ।
मनःप्रसादः सौम्यत्वं मौनं **पुनः किम्** एतत् मानसं तपः उच्यते ?	मनःप्रसादः सौम्यत्वं मौनम् **आत्मविनिग्रहः** एतत् मानसं तपः उच्यते ।
मनःप्रसादः सौम्यत्वं मौनम् आत्मविनिग्रहः **पुनः किम्** एतत् मानसं तपः उच्यते ?	मनःप्रसादः सौम्यत्वं मौनम् आत्मविनिग्रहः **भावसंशुद्धिः** इति एतत् मानसं तपः उच्यते ।

तात्पर्यम् - मनसः प्रसन्नता, सौम्यभावः, मननशीलता, मनसः सम्यक् नियन्त्रणं, भावानां महती पवित्रता एवं यस्मिन् तपसि मनसः प्रधानता भवति तत् तपः मानसं कथ्यते ।

श्रद्धया परया तप्तं तपस्तत् त्रिविधं नरैः ।
अफलाकाङ्क्षिभिर्युक्तैः सात्त्विकं परिचक्षते ॥१७.१७॥

पदच्छेदः - श्रद्धया, परया, तप्तम्, तपः, तत्, त्रिविधम्, नरैः ।
अफलाकाङ्क्षिभिः, युक्तैः, सात्त्विकम्, परिचक्षते ॥

अन्वयः - अफलाकाङ्क्षिभिः युक्तैः नरैः परया श्रद्धया तप्तं त्रिविधं तत् तपः सात्त्विकं परिचक्षते ।

पदार्थः - अफलाकाङ्क्षिभिः = अकामैः, युक्तैः = समाहितैः, नरैः = मानवैः, परया = उत्तमया, श्रद्धया = आस्तिक्यबुद्ध्या, तप्तम् = आचरितम्, त्रिविधम् = त्रिप्रकारकम्, तत् = तत्, तपः = तपस्या, सात्त्विकम् = सत्त्वसम्बन्धि, परिचक्षते = व्याख्यान्ति ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
अफलाकाङ्क्षिभिः	अफलाकाङ्क्षिन् - न. पुं. तृ. बहु. (विशेषणम्)	युक्तैः	अ. पुं. तृ. बहु. (विशेषणम्)
नरैः	अ. पुं. तृ. बहु. (विशेष्यम्)	परया	आ. स्त्री. तृ. एक. (विशेषणम्)
श्रद्धया	आ. स्त्री. तृ. एक. (विशेष्यम्)	तप्तम्	अ. नपुं. प्र. एक. (विशेषणम्)
त्रिविधम्	अ. नपुं. प्र. एक. (विशेषणम्)	तत्	तद् - द. सर्व. नपुं. प्र. एक. (विशेषणम्)
तपः	तपस् - सका. नपुं. प्र. एक. (विशेष्यम्)	सात्त्विकम्	अ. नपुं. प्र. एक. (विशेषणम्)
परिचक्षते	परि + चक्ष् (चक्षिङ् व्यक्तायां वाचि) आत्म. कर्तरि लट्. प्रपु. बहु.		

व्याकरणम् -

(क) सन्धिः तपस्तत् — तपः + तत् — विसर्गसन्धिः (सकारः) ।
अफलाकाङ्क्षिभिर्युक्तैः — अफलाकाङ्क्षिभिः + युक्तैः — विसर्गसन्धिः (रेफः) ।

(ख) समासः त्रिविधम् — तिस्रः विधाः यस्य तत् त्रिविधम् - बहुव्रीहिः ।
अफलाकाङ्क्षिभिः — फलम् आकाङ्क्षन्ति इति फलाकाङ्क्षिणः - ताच्छीलिके कर्तरि णिनि उपपदसमासश्च ।
न फलाकाङ्क्षिणः अफलाकाङ्क्षिणः, तैः - नञ्तत्पुरुषः ।

(ग) कृदन्तः	तप्तम्	तप् (तप सन्तापे) + क्त (कर्मणि)।
	नरः	नॄ (नॄ नये) + अच्।
	युक्तैः	युज् (युजिर् योगे) + क्त (कर्मणि)।
(घ) तद्धितान्तः	फलाकाङ्क्षी	फलाकाङ्क्षा + णिनि (काङ्क्षा अस्य अस्मिन् वा अस्ति इति)।
	सात्त्विकम्	सत्त्व + ठञ् (सत्त्वगुणप्रधानाः)।

भावस्पष्टीकरणम् -

परिचक्षते।	
किं परिचक्षते ?	**तपः** परिचक्षते।
तपः **कीदृशं** परिचक्षते ?	तपः **सात्त्विकं** परिचक्षते।
किं तपः सात्त्विकं परिचक्षते ?	**तत्** तपः सात्त्विकं परिचक्षते।
कतिविधं तत् तपः सात्त्विकं परिचक्षते ?	**त्रिविधं** तत् तपः सात्त्विकं परिचक्षते।
किं कृतं त्रिविधं तत् तपः सात्त्विकं परिचक्षते ?	**तप्तं** त्रिविधं तत् तपः सात्त्विकं परिचक्षते।
कया तप्तं त्रिविधं तत् तपः सात्त्विकं परिचक्षते ?	**श्रद्धया** तप्तं त्रिविधं तत् तपः सात्त्विकं परिचक्षते ?
कीदृश्या श्रद्धया तप्तं त्रिविधं तत् तपः सात्त्विकं परिचक्षते ?	**परया** श्रद्धया तप्तं त्रिविधं तत् तपः सात्त्विकं परिचक्षते।
कैः परया श्रद्धया तप्तं त्रिविधं तत् तपः सात्त्विकं परिचक्षते ?	**नरैः** परया श्रद्धया तप्तं त्रिविधं तत् तपः सात्त्विकं परिचक्षते।
कीदृशैः नरैः परया श्रद्धया तप्तं त्रिविधं तत् तपः सात्त्विकं परिचक्षते ?	**युक्तैः** नरैः परया श्रद्धया तप्तं त्रिविधं तत् तपः सात्त्विकं परिचक्षते।
कीदृशैः युक्तैः नरैः परया श्रद्धया तप्तं त्रिविधं तत् तपः सात्त्विकं परिचक्षते ?	**अफलाकाङ्क्षिभिः** युक्तैः नरैः परया श्रद्धया तप्तं त्रिविधं तत् तपः सात्त्विकं परिचक्षते।

तात्पर्यम् - फलम् अनपेक्ष्य एकाग्रेण मनसा गाढश्रद्धया आचरितं त्रिप्रकारकं तपः सात्त्विकम् इति व्याख्यान्ति।

सत्कारमानपूजार्थं तपो दम्भेन चैव यत्।
क्रियते तदिह प्रोक्तं राजसं चलमध्रुवम्॥१७.१८॥

पदच्छेदः - सत्कारमानपूजार्थम्, तपः, दम्भेन, च, एव, यत्।
क्रियते, तत्, इह, प्रोक्तम्, राजसम्, चलम्, अध्रुवम्॥

अन्वयः - सत्कारमानपूजार्थं दम्भेन च एव यत् तपः क्रियते तत् इह चलम् अध्रुवं राजसं प्रोक्तम् ।

पदार्थः - सत्कारमानपूजार्थम् = स्तुतिगौरवप्रशंसार्थम्, दम्भेन च एव = धार्मिकत्वेन आत्मनः ख्यापनार्थं च, यत् तपः = या तपस्या, क्रियते = चर्यते, तत् = सा तपस्या, इह = अत्र, चलम् = चञ्चलम्, अध्रुवम् = अस्थिरम्, राजसम् = रजस्सम्बन्धि, प्रोक्तम् = कथितम् ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
सत्कारमानपूजार्थम्	अव्ययम्	दम्भेन	अ. पुं. तृ. एक.
च	अव्ययम्	एव	अव्ययम्
यत्	यद् - द. सर्व. नपुं. प्र. एक. (विशेषणम्)	तपः	तपस् - स. नपुं. प्र. एक. (विशेष्यम्)
क्रियते	कृ (डुकृञ् करणे) आत्म. कर्मणि लट्. प्रपु. एक.	तत्	तद् - द. सर्व. नपुं. प्र. एक. (विशेषणम्)
इह	अव्ययम्	चलम्	अ. नपुं. प्र. एक. (विशेषणम्)
अध्रुवम्	अ. नपुं. प्र. एक. (विशेषणम्)	राजसम्	अ. नपुं. प्र. एक. (विशेषणम्)
प्रोक्तम्	अ. नपुं. प्र. एक. (विशेषणम्)		

व्याकरणम् -

(क) सन्धिः तपो दम्भेन — तपः + दम्भेन — विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः ।
चैव — च + एव — वृद्धिसन्धिः ।
तदिह — तत् + इह — जश्त्वसन्धिः ।

(ख) समासः सत्कारमानपूजार्थम् — सत्कारश्च मानश्च पूजा च सत्कारमानपूजाः - द्वन्द्वः ।
सत्कारमानपूजाभ्यः इदं सत्कारमानपूजार्थम् - नित्यसमासोऽयम् (चतुर्थीतत्पुरुषः) ।
अध्रुवम् — न ध्रुवम् अध्रुवम् - नञ्तत्पुरुषः ।

(ग) कृदन्तः दम्भेन — दम्भ् (दम्भु दमने) + घञ्, तेन ।
प्रोक्तम् — प्र + वच् (वच परिभाषणे) + क्त (कर्मणि) ।
चलम् — चल् (चल कम्पने) + अच् ।
ध्रुवम् — ध्रु (ध्रु गतिस्थैर्ययोः) + अच् ।

(घ) तद्धितान्तः राजसम् — रजस् + अण् (रजसः इदम्) ।

भावस्पष्टीकरणम् -

क्रियते।	
किं क्रियते ?	**तपः** क्रियते।
किं तपः क्रियते ?	**यत्** तपः क्रियते।
किमर्थं यत् तपः क्रियते ?	**सत्कारमानपूजार्थं** यत् तपः क्रियते।
सत्कारमानपूजार्थं **केन च** यत् तपः क्रियते ?	सत्कारमानपूजार्थं **दम्भेन च** एव यत् तपः क्रियते।
सत्कारमानपूजार्थं दम्भेन च एव यत् तपः क्रियते **तत् किम्** ?	सत्कारमानपूजार्थं दम्भेन च एव यत् तपः क्रियते **तत् प्रोक्तम्**।
सत्कारमानपूजार्थं दम्भेन च एव यत् तपः क्रियते तत् **किं** प्रोक्तम् ?	सत्कारमानपूजार्थं दम्भेन च एव यत् तपः क्रियते तत् **राजसं** प्रोक्तम्।
सत्कारमानपूजार्थं दम्भेन च एव यत् तपः क्रियते तत् राजसं **पुनः किं** प्रोक्तम् ?	सत्कारमानपूजार्थं दम्भेन च एव यत् तपः क्रियते तत् राजसं **चलं** प्रोक्तम्।
सत्कारमानपूजार्थं दम्भेन च एव यत् तपः क्रियते तत् राजसं चलं **पुनः किं** प्रोक्तम् ?	सत्कारमानपूजार्थं दम्भेन च एव यत् तपः क्रियते तत् राजसं चलम् **अध्रुवं** प्रोक्तम्।
सत्कारमानपूजार्थं दम्भेन च एव यत् तपः क्रियते तत् **कुत्र** राजसं चलम् अध्रुवं प्रोक्तम् ?	सत्कारमानपूजार्थं दम्भेन च एव यत् तपः क्रियते तत् **इह** राजसं चलम् अध्रुवं प्रोक्तम्।

तात्पर्यम् - स्तुतिं बहुमानम् अर्चनं च प्राप्तुं धार्मिकतया आत्मानं ख्यापयितुं च यत् तपः क्रियते तत् राजसम् उदाहृतम् अस्ति। तच्च तपः अत्रैव लोके फलदायकं न परलोके इति चलम्। फलं नियमेन न जनयति इति अध्रुवं च वर्तते।

मूढग्राहेणात्मनो यत्पीडया क्रियते तपः।
परस्योत्सादनार्थं वा तत्तामसमुदाहृतम्॥१७.१९॥

पदच्छेदः - मूढग्राहेण, आत्मनः, यत्, पीडया, क्रियते, तपः।
परस्य, उत्सादनार्थम्, वा, तत्, तामसम्, उदाहृतम्॥

अन्वयः - मूढग्राहेण आत्मनः पीडया परस्य उत्सादनार्थं वा यत् तपः क्रियते तत् तामसम् उदाहृतम्।

पदार्थः - मूढग्राहेण = अविवेकनिश्चयेन, आत्मनः = स्वस्य, पीडया = बाधया, परस्य = अन्यस्य, उत्सादनार्थं वा = विनाशार्थं वा, यत् तपः = या तपस्या, क्रियते = निर्वर्त्यते, तत् = सा तपस्या, तामसम् = तमस्सम्बन्धि, उदाहृतम् = प्रख्यातम् ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
मूढग्राहेण	अ. पुं. तृ. एक.	आत्मनः	आत्मन् - न. पुं. ष. एक.
पीडया	आ. स्त्री. तृ. एक.	परस्य	अ. पुं. ष. एक. (विशेषणम्)
उत्सादनार्थम्	अव्ययम्	वा	अव्ययम्
यत्	यद् - द. सर्व. नपुं. प्र. एक. (विशेषणम्)	तपः	तपस् - सका. नपुं. प्र. एक. (विशेष्यम्)
क्रियते	कृ (डुकृञ् करणे) आत्म. कर्मणि लट्. प्रपु. एक.	तत्	तद् - द. सर्व. नपुं. प्र. एक. (विशेषणम्)
तामसम्	अ. नपुं. प्र. एक. (विशेषणम्)	उदाहृतम्	अ. नपुं. प्र. एक. (विशेषणम्)

व्याकरणम् -

(क) सन्धिः
- मूढग्राहेणात्मनः — मूढग्राहेण + आत्मनः — सवर्णदीर्घसन्धिः ।
- आत्मनो यत् — आत्मनः + यत् — विसर्गसन्धिः (सकारः) रेफः, उकारः गुणः ।
- परस्योत्सादनार्थम् — परस्य + उत्सादनार्थम् — गुणसन्धिः ।

(ख) समासः
- मूढग्राहेण — मूढः ग्राहः मूढग्राहः, तेन - कर्मधारयः (विवेकाभावकृतेन दुराग्रहेण इति पर्यवसितः अर्थः) ।
- उत्सादनार्थम् — उत्सादनाय इदम् उत्सादनार्थम् - चतुर्थीतत्पुरुषः, नित्यसमासः ।

(ग) कृदन्तः
- मूढः — मुह् (मुह वैचित्ये) + क्त (कर्तरि) ।
- उत्सादनम् — उद् + सद् (षदलृ विशरणगत्यवसादनेषु) + णिच् + ल्युट् ।
- उदाहृतम् — उद् + आ + हृ (हृञ् हरणे) + क्त (कर्मणि) ।

(घ) तद्धितान्तः
- तामसम् — तमस् + अण्, तमसः इदं तामसम् (स्वार्थे अण्) ।

भावस्पष्टीकरणम् -

क्रियते ।	
किं क्रियते ?	**तपः** क्रियते ।
किं तपः क्रियते ?	**यत्** तपः क्रियते ।

किमर्थं यत् तपः क्रियते ?	**उत्सादनार्थं वा** यत् तपः क्रियते ।
कस्य उत्सादनार्थं वा यत् तपः क्रियते ?	**परस्य** उत्सादनार्थं वा यत् तपः क्रियते ।
कया परस्य उत्सादनार्थं वा यत् तपः क्रियते ?	**पीडया** परस्य उत्सादनार्थं वा यत् तपः क्रियते ।
कस्य पीडया परस्य उत्सादनार्थं वा यत् तपः क्रियते ?	**आत्मनः** पीडया परस्य उत्सादनार्थं वा यत् तपः क्रियते ।
केन आत्मनः पीडया परस्य उत्सादनार्थं वा यत् तपः क्रियते ?	**मूढग्राहेण** आत्मनः पीडया परस्य उत्सादनार्थं वा यत् तपः क्रियते ।
मूढग्राहेण आत्मनः पीडया परस्य उत्सादनार्थं वा यत् तपः क्रियते **तत् किम्** ?	मूढग्राहेण आत्मनः पीडया परस्य उत्सादनार्थं वा यत् तपः क्रियते **तत् उदाहृतम्** ।
मूढग्राहेण आत्मनः पीडया परस्य उत्सादनार्थं वा यत् तपः क्रियते तत् **कीदृशम्** उदाहृतम् ?	मूढग्राहेण आत्मनः पीडया परस्य उत्सादनार्थं वा यत् तपः क्रियते तत् **तामसम्** उदाहृतम् ।

तात्पर्यम् - अविवेककृतेन दुराग्रहेण, शरीरायासेन, शत्रोः विनाशार्थं च यत् तपः क्रियते तत् तामसम् इत्यभिहितम् ।

दातव्यमिति यद्दानं दीयतेऽनुपकारिणे ।
देशे काले च पात्रे च तद्दानं सात्त्विकं स्मृतम् ॥१७.२०॥

पदच्छेदः - दातव्यम्, इति, यद्, दानम्, दीयते, अनुपकारिणे ।
देशे, काले, च, पात्रे, च, तद्, दानम्, सात्त्विकम्, स्मृतम् ॥

अन्वयः - देशे काले च पात्रे च दातव्यम् इति अनुपकारिणे यद् दानं दीयते तद् दानं सात्त्विकं स्मृतम् ।

पदार्थम् - देशे = पुण्यप्रदेशे, काले च = पवित्रसमये च, पात्रे च = शमादिगुणसम्पन्ने च, दातव्यम् इति = देयम् इति, अनुपकारिणे = उपकारविहीनाय, यद् दानम् = यत् वितरणम्, दीयते = निर्वर्त्यते, तद् दानम् = तत् वितरणम्, सात्त्विकम् = सत्त्वगुणप्रधानम्, स्मृतम् = प्रोक्तम् ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
देशे	अ. पुं. स. एक.	काले	अ. पुं. स. एक.
च	अव्ययम्	पात्रे	अ. पुं. स. एक.

दातव्यम्	अ. नपुं. प्र. एक.	इति	अव्ययम्
अनुपकारिणे	अनुपकारिन् - न. पुं. च. एक.	यद्	यद् - द. सर्व. नपुं. प्र. एक. (विशेषणम्)
दानम्	अ. नपुं. प्र. एक. (विशेष्यम्)	दीयते	दा (डुदाञ् दाने) आत्म. कर्मणि लट्. प्रपु. एक.
तद्	तद् - द. सर्व. नपुं. प्र. एक. (विशेषणम्)	सात्त्विकम्	अ. नपुं. प्र. एक. (विशेषणम्)
स्मृतम्	अ. नपुं. प्र. एक. (विशेषणम्)		

व्याकरणम् -

(क) सन्धिः	यद्दानम्	यत् + दानम्	जश्त्वसन्धिः ।
	दीयतेऽनुपकारिणे	दीयते + अनुपकारिणे	पूर्वरूपसन्धिः ।
	तद्दानम्	तत् + दानम्	जश्त्वसन्धिः ।
(ख) समासः	अनुपकारिणे	न उपकारी अनुपकारी, तस्मै - नञ्तत्पुरुषः ।	
(ग) कृदन्तः	दातव्यम्	दा (डुदाञ् दाने) + तव्यत् (कर्मणि) ।	
	दानम्	दा (डुदाञ् दाने) + ल्युट् ।	
	काले	कल् (कल शब्दसङ्ख्यानयोः) + घञ्, तस्मिन् ।	
	पात्रे	पा (पा रक्षणे) + ष्ट्रन्, तस्मिन् ।	
	स्मृतम्	स्मृ (स्मृ चिन्तायाम्) + क्त (कर्मणि) ।	
(घ) तद्धितान्तः	उपकारिणे	उपकार + इनि, तस्मै (उपकारः अस्य अस्मिन् वा अस्ति इति) ।	
	सात्त्विकम्	सत्त्व + ठञ् (सत्त्वगुणप्रधानम्) ।	

भावस्पष्टीकरणम् -

दीयते ।	
किं दीयते ?	**दानं दीयते ।**
किं दानं दीयते ?	**यद् दानं दीयते ।**
कीदृशं यद् दानं दीयते ?	**दातव्यम्** इति यद् दानं दीयते ।
कुत्र दातव्यम् इति यद् दानं दीयते ?	**देशे** दातव्यम् इति यद् दानं दीयते ।
देशे **पुनः कुत्र च** दातव्यम् इति यद् दानं दीयते ?	देशे **काले च** दातव्यम् इति यद् दानं दीयते ।

देशे काले च **पुनः कुत्र** दातव्यम् इति यद् दानं दीयते ?	देशे काले च **पात्रे च** दातव्यम् इति यद् दानं दीयते।
देशे काले च पात्रे च दातव्यम् इति **कस्मै** यद् दानं दीयते ?	देशे काले च पात्रे च दातव्यम् इति **अनुपकारिणे** यद् दानं दीयते।
देशे काले च पात्रे च दातव्यम् इति अनुपकारिणे यद् दानं दीयते **तत् किम्** ?	देशे काले च पात्रे च दातव्यम् इति अनुपकारिणे यद् दानं दीयते **तत् स्मृतम्**।
देशे काले च पात्रे च दातव्यम् इति अनुपकारिणे यद् दानं दीयते तत् **किं** स्मृतम् ?	देशे काले च पात्रे च दातव्यम् इति अनुपकारिणे यद् दानं दीयते तत् **दानं** स्मृतम्।
देशे काले च पात्रे च दातव्यम् इति अनुपकारिणे यद् दानं दीयते तत् दानं **कीदृशं** स्मृतम् ?	देशे काले च पात्रे च दातव्यम् इति अनुपकारिणे यद् दानं दीयते तद् दानं **सात्त्विकं** स्मृतम्।

तात्पर्यम् - दानं मम कर्तव्यमिति स्वभावेन यः मनुष्यः पुण्यप्रदेशे, शुभे पुण्ये च काले, उत्तमे च पात्रे प्राप्ते सति प्रत्युपकारदृष्टिं त्यक्त्वा यद् किमपि दानं करोति तत् दानं सात्त्विकं दानम् उच्यते।

यत्तु प्रत्युपकारार्थं फलमुद्दिश्य वा पुनः।
दीयते च परिक्लिष्टं तद्दानं राजसं स्मृतम्॥१७.२१॥

पदच्छेदः - यत्, तु, प्रत्युपकारार्थम्, फलम्, उद्दिश्य, वा, पुनः।
दीयते, च, परिक्लिष्टम्, तद्, दानम्, राजसम्, स्मृतम्॥

अन्वयः - यत् तु प्रत्युपकारार्थं फलम् उद्दिश्य वा पुनः परिक्लिष्टं च दीयते तद् दानं राजसं स्मृतम्।

पदार्थः - यत् तु = यत् च दानम्, प्रत्युपकारार्थम् = प्रतिसेवार्थम्, फलम् = प्रयोजनम्, उद्दिश्य = सङ्कल्प्य, वा = अथवा, पुनः = भूयः, परिक्लिष्टं च = दुःखसहितं च, दीयते = अर्प्यते, तद् दानम् = तत् अर्पणम्, राजसम् = रजोगुणयुक्तम्, स्मृतम् = कथितम्।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
यत्	यद् - द. सर्व. नपुं. प्र. एक. (विशेषणम्)	तु	अव्ययम्
प्रत्युपकारार्थम्	अव्ययम्	फलम्	अ. नपुं. द्वि. एक.
उद्दिश्य	ल्यबन्तम् अव्ययम्	वा	अव्ययम्

पुनः	अव्ययम्	परिक्लिष्टम्	अ. नपुं. प्र. एक. (विशेषणम्)
च	अव्ययम्	दीयते	दा (डुदाञ् दाने) आत्म. कर्मणि लट्. प्रपु. एक.
तद्	तद् - द. सर्व. नपुं. प्र. एक. (विशेषणम्)	दानम्	अ. नपुं. प्र. एक. (विशेष्यम्)
राजसम्	अ. नपुं. प्र. एक. (विशेषणम्)	स्मृतम्	अ. नपुं. प्र. एक. (विशेषणम्)

व्याकरणम् -

(क) सन्धिः तद्दानम् तत् + दानम् जश्त्वसन्धिः ।

(ख) समासः प्रत्युपकारार्थम् प्रत्युपकाराय इदम् प्रत्युपकारार्थम् - चतुर्थीतत्पुरुषः, नित्यसमासः ।

(ग) कृदन्तः फलम् फल् (फल निष्पत्तौ) + अच् ।

उद्दिश्य उद् + दिश् (दिश अतिसर्जने) + ल्यप् ।

परिक्लिष्टम् परि + क्लिश् (क्लिश उपतापे) + क्त (कर्मणि) ।

दानम् दा (डुदाञ् दाने) + ल्युट् ।

स्मृतम् स्मृ (स्मृ चिन्तायाम्) + क्त (कर्मणि) ।

(घ) तद्धितान्तः राजसम् रजस् + अण् (रजसः इदम्) ।

भावस्पष्टीकरणम् -

दीयते ।	
किं दीयते ?	**दानं** दीयते ।
किं दानं दीयते ?	**यद्** दानं दीयते ।
किमर्थं यद् दानं दीयते ?	**प्रत्युपकारार्थं तु** यद् दानं दीयते ।
प्रत्युपकारार्थं तु **किं कृत्वा** यद् दानं दीयते ?	प्रत्युपकारार्थं तु **उद्दिश्य** यद् दानं दीयते ।
प्रत्युपकारार्थं तु **किम्** उद्दिश्य यद् दानं दीयते ?	प्रत्युपकारार्थं तु **फलम्** उद्दिश्य यद् दानं दीयते ।
प्रत्युपकारार्थं तु फलम् उद्दिश्य **वा पुनः कथं** यद् दानं दीयते ?	प्रत्युपकारार्थं तु फलम् उद्दिश्य **वा पुनः परिक्लिष्टं** यद् दानं दीयते ।
प्रत्युपकारार्थं तु फलम् उद्दिश्य वा पुनः परिक्लिष्टं यद् दानं दीयते **तत् किम्** ?	प्रत्युपकारार्थं तु फलम् उद्दिश्य वा पुनः परिक्लिष्टं यद् दानं दीयते **तत् स्मृतम्** ।

प्रत्युपकारार्थं तु फलम् उद्दिश्य वा पुनः परिक्लिष्टं यद् दानं दीयते तत् **कीदृशं** स्मृतम् ?	प्रत्युपकारार्थं तु फलम् उद्दिश्य वा पुनः परिक्लिष्टं यद् दानं दीयते तत् **राजसं** स्मृतम् ।

तात्पर्यम् - अयं मे काले प्रत्युपकारं करिष्यति इत्यभिप्रायेण, फलापेक्षया, सन्तापसहिततया वा यत् अर्पणं क्रियते तत् राजसम् इति आख्यायते ।

अदेशकाले यद्दानमपात्रेभ्यश्च दीयते ।
असत्कृतमवज्ञातं तत्तामसमुदाहृतम् ॥१७.२२॥

पदच्छेदः - अदेशकाले, यद्, दानम्, अपात्रेभ्यः, च, दीयते ।
असत्कृतम्, अवज्ञातम्, तत्, तामसम्, उदाहृतम् ॥

अन्वयः - अदेशकाले असत्कृतम् अवज्ञातं च अपात्रेभ्यः यद् दानं दीयते तत् तामसम् उदाहृतम् ।

पदार्थः - अदेशकाले = अनुचिते प्रदेशे अनुचिते समये च, असत्कृतम् = सत्काररहितम्, अवज्ञातम् च = परिभवसहितं च, अपात्रेभ्यः = अनर्हेभ्यः, यद् दानम् = यत् अर्पणम्, दीयते = अर्प्यते, तत् = तत् अर्पणम्, तामसम् = तमोगुणयुक्तम्, उदाहृतम् = प्रख्यातम् ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
अदेशकाले	अ. पुं. स. एक.	असत्कृतम्	अ. नपुं. प्र. एक.
अवज्ञातम्	अ. नपुं. प्र. एक.	च	अव्ययम्
अपात्रेभ्यः	अ. पुं. च. बहु.	यद्	यद् - द. सर्व. नपुं. प्र. एक. (विशेषणम्)
दानम्	अ. नपुं. प्र. एक. (विशेष्यम्)	दीयते	दा (डुदाञ् दाने) आत्म. कर्मणि लट्. प्रपु. एक.
तत्	तद् - द. सर्व. नपुं. प्र. एक. (विशेषणम्)	तामसम्	अ. नपुं. प्र. एक. (विशेषणम्)
उदाहृतम्	अ. नपुं. प्र. एक. (विशेषणम्)		

व्याकरणम् -

(क) सन्धिः	यद्दानम्	यत् + दानम्	जश्त्वसन्धिः ।
	अपात्रेभ्यश्च	अपात्रेभ्यः + च	विसर्गसन्धिः, सकारः, श्चुत्वम् ।

(ख) समासः	अदेशकाले	देशश्च कालश्च अनयोः समाहारः देशकालम्। न देशकालम् अदेशकालम्, तस्मिन् - नञ्तत्पुरुषः।
	अपात्रेभ्यः	न पात्राणि अपात्राणि, तेभ्यः - नञ्तत्पुरुषः।
	असत्कृतम्	न सत्कृतम् असत्कृतम् - नञ्तत्पुरुषः।
(ग) कृदन्तः	दानम्	दा (डुदाञ् दाने) + ल्युट्।
	पात्रेभ्यः	पा (पा रक्षणे) + ष्ट्रन्, तेभ्यः ।
	कृतम्	कृ (डुकृञ् करणे) + क्त (कर्मणि)।
	अवज्ञातम्	अव + ज्ञा (ज्ञा अवबोधने) + क्त (कर्मणि)।
	उदाहृतम्	उद् + आ + हृ (हृञ् हरणे) + क्त (कर्मणि)।
(घ) तद्धितान्तः	तामसम्	तमस् + अण्, तमसः इदं तामसम् (स्वार्थे अण्)।

भावस्पष्टीकरणम् -

दीयते।	
किं दीयते ?	**दानं** दीयते।
किं दानं दीयते ?	**यद्** दानं दीयते।
केभ्यः यद् दानं दीयते ?	**अपात्रेभ्यः** तु यद् दानं दीयते।
कुत्र अपात्रेभ्यः तु यद् दानं दीयते ?	**अदेशकाले** अपात्रेभ्यः तु यद् दानं दीयते।
अदेशकाले **कीदृशम्** अपात्रेभ्यः तु यद् दानं दीयते ?	अदेशकाले **असत्कृतम्** अपात्रेभ्यः तु यद् दानं दीयते।
अदेशकाले असत्कृतं **पुनः च कीदृशम्** अपात्रेभ्यः तु यद् दानं दीयते ?	अदेशकाले असत्कृतम् **अवज्ञातं च** अपात्रेभ्यः तु यद् दानं दीयते।
अदेशकाले असत्कृतम् अवज्ञातं च अपात्रेभ्यः तु यद् दानं दीयते **तत् किम्** ?	अदेशकाले असत्कृतम् अवज्ञातं च अपात्रेभ्यः तु यद् दानं दीयते **तत् उदाहृतम्**।
अदेशकाले असत्कृतम् अवज्ञातं च अपात्रेभ्यः तु यद् दानं दीयते तत् **कीदृशम्** उदाहृतम् ?	अदेशकाले असत्कृतम् अवज्ञातं च अपात्रेभ्यः तु यद् दानं दीयते तत् **तामसम्** उदाहृतम्।

तात्पर्यम् - अयोग्ये देशे अयोग्ये काले च शमविद्यादिगुणरहिताय अनादरेण तिरस्कारेण च यत् अर्पणं क्रियते तत् तामसम् इति आख्यायते।

ॐ तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः ।
ब्राह्मणास्तेन वेदाश्च यज्ञाश्च विहिताः पुरा ॥१७.२३॥

पदच्छेदः - ॐ, तत्, सत्, इति, निर्देशः, ब्रह्मणः, त्रिविधः, स्मृतः ।
ब्राह्मणाः, तेन, वेदाः, च, यज्ञाः, च, विहिताः, पुरा ॥

अन्वयः - ॐ तत् सत् इति त्रिविधः निर्देशः ब्रह्मणः स्मृतः तेन ब्राह्मणाः वेदाः च यज्ञाः च पुरा विहिताः ।

पदार्थः - ॐ तत् सत् = ॐ तत् सत्, इति = एवम्, त्रिविधः = त्रिप्रकारः, निर्देशः = उच्चारणम्, ब्रह्मणः = परब्रह्मणः, स्मृतः = प्रसिद्धः, तेन = तेन निर्देशेन, ब्राह्मणाः = ब्राह्मणादिग्रन्थाः, वेदाः च = निगमाः अपि, यज्ञाः च = यागाः च, पुरा = पूर्वम्, विहिताः = निर्मिताः ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
ॐ	अव्ययम्	तत्	तद् - द. सर्व. नपुं. प्र. एक.
सत्	सत् - त. सर्व. नपुं. प्र. एक.	इति	अव्ययम्
त्रिविधः	अ. पुं. प्र. एक. (विशेषणम्)	निर्देशः	अ. पुं. प्र. एक. (विशेष्यम्)
ब्रह्मणः	ब्रह्मन् - न. नपुं. ष. एक.	स्मृतः	अ. पुं. प्र. एक. (विशेषणम्)
तेन	तद् - द. सर्व. नपुं. तृ. एक. (विशेषणम्)	ब्राह्मणाः	अ. पुं. प्र. बहु.
वेदाः	अ. पुं. प्र. बहु.	च	अव्ययम्
यज्ञाः	अ. पुं. प्र. बहु.	पुरा	अव्ययम्
विहिताः	अ. पुं. प्र. बहु. (विशेषणम्)		

व्याकरणम् -

(क) सन्धिः	सदिति	सत् + इति	जश्त्वसन्धिः ।
	निर्देशो ब्रह्मणः	निर्देशः ब्रह्मणः	विसर्गसन्धिः (सकारः) रेफः उकारः गुणः ।
	ब्रह्मणस्त्रिविधः	ब्रह्मणः + त्रिविधः	विसर्गसन्धिः (सकारः) ।
	ब्राह्मणास्तेन	ब्राह्मणाः + तेन	विसर्गसन्धिः (सकारः) ।
	वेदाश्च	वेदाः + च	विसर्गसन्धिः (सकारः) श्चुत्वम् ।
	यज्ञाश्च	यज्ञाः + च	विसर्गसन्धिः (सकारः) श्चुत्वम् ।
(ख) समासः	त्रिविधः	तिस्रः विधाः यस्य सः त्रिविधः - बहुव्रीहिः ।	
(ग) कृदन्तः	निर्देशः	निर् + दिश् (दिश अतिसर्जने) + घञ् ।	

	स्मृतः	स्मृ (स्मृ चिन्तायाम्) + क्त (कर्मणि)।
	वेदाः	विद् (विद ज्ञाने) + घञ्। (वेत्ति इति वेदः)।
	विहिताः	वि + धा (डुधाञ् धारणपोषणयोः) + क्त (कर्मणि)।
(घ) तद्धितान्तः	ब्राह्मणाः	ब्रह्मन् + अण् (ब्रह्मणः इमे ब्राह्मणाः)।

भावस्पष्टीकरणम् -

स्मृतः।	
कः स्मृतः ?	**निर्देशः** स्मृतः।
कतिविधः निर्देशः स्मृतः ?	**त्रिविधः** निर्देशः स्मृतः।
कः त्रिविधः निर्देशः स्मृतः ?	**ॐ तत् सत् इति** त्रिविधः निर्देशः स्मृतः।
ॐ तत् सत् इति त्रिविधः निर्देशः **कस्य** स्मृतः ?	ॐ तत् सत् इति त्रिविधः निर्देशः **ब्रह्मणः** स्मृतः।
ॐ तत् सत् इति त्रिविधः निर्देशः ब्रह्मणः स्मृतः, **तेन किं कृतम्** ?	ॐ तत् सत् इति त्रिविधः निर्देशः ब्रह्मणः स्मृतः, **तेन विहिताः**।
ॐ तत् सत् इति त्रिविधः निर्देशः ब्रह्मणः स्मृतः, तेन **के** विहिताः ?	ॐ तत् सत् इति त्रिविधः निर्देशः ब्रह्मणः स्मृतः, तेन **ब्राह्मणाः** विहिताः।
ॐ तत् सत् इति त्रिविधः निर्देशः ब्रह्मणः स्मृतः, तेन ब्राह्मणाः **पुनः के** विहिताः ?	ॐ तत् सत् इति त्रिविधः निर्देशः ब्रह्मणः स्मृतः, तेन ब्राह्मणाः **वेदाः च** विहिताः।
ॐ तत् सत् इति त्रिविधः निर्देशः ब्रह्मणः स्मृतः, तेन ब्राह्मणाः वेदाः च **पुनः के** विहिताः ?	ॐ तत् सत् इति त्रिविधः निर्देशः ब्रह्मणः स्मृतः, तेन ब्राह्मणाः वेदाः च **यज्ञाः च** विहिताः।
ॐ तत् सत् इति त्रिविधः निर्देशः ब्रह्मणः स्मृतः, तेन ब्राह्मणाः वेदाः च यज्ञाः च **कदा** विहिताः ?	ॐ तत् सत् इति त्रिविधः निर्देशः ब्रह्मणः स्मृतः, तेन ब्राह्मणाः वेदाः च यज्ञाः च **पुरा** विहिताः।

तात्पर्यम् - ॐ तत् सत् इति त्रिभिः शब्दैः ब्रह्मणः निर्देशः क्रियते। तेन च ब्राह्मणाः वेदाः यज्ञाः च पूर्वं निर्मिताः।

तस्मादोमित्युदाहृत्य यज्ञदानतपःक्रियाः।
प्रवर्तन्ते विधानोक्ताः सततं ब्रह्मवादिनाम्॥१७.२४॥

पदच्छेदः - तस्मात्, ओम्, इति, उदाहृत्य, यज्ञदानतपःक्रियाः।
प्रवर्तन्ते, विधानोक्ताः, सततम्, ब्रह्मवादिनाम्॥

अन्वयः - तस्मात् ब्रह्मवादिनां विधानोक्ताः यज्ञदानतपःक्रियाः ओम् इति उदाहृत्य सततं प्रवर्तन्ते।

पदार्थः - तस्मात् = ततः हेतोः, ब्रह्मवादिनाम् = ब्रह्मविदाम्, विधानोक्ताः = शास्त्रविहिताः, यज्ञदानतपःक्रियाः = यागदानतपोरूपाः क्रियाः, ओम् इति = ओम् इति, उदाहृत्य = उच्चार्य, सततम् = सदा, प्रवर्तन्ते = प्रचलन्ति।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
तस्मात्	तद् - द. सर्व. पुं. पं. एक. (विशेषणम्)	ब्रह्मवादिनाम्	ब्रह्मवादिन् - न. पुं. ष. बहु.
विधानोक्ताः	आ. स्त्री. प्र. बहु. (विशेषणम्)	यज्ञदानतपःक्रियाः	आ. स्त्री. प्र. बहु. (विशेष्यम्)
ओम्	अव्ययम्	इति	अव्ययम्
उदाहृत्य	ल्यबन्तम् अव्ययम्	सततम्	अव्ययम्
प्रवर्तन्ते	वृत् (वृतु वर्तने) आत्म. कर्तरि लट्. प्रपु. बहु.		

व्याकरणम् -

(क) सन्धिः

तस्मादोम्	तस्मात् + ओम्	जश्त्वसन्धिः।
इत्युदाहृत्य	इति + उदाहृत्य	यण्सन्धिः।

(ख) समासः

यज्ञदानतपःक्रियाः	यज्ञश्च दानं च तपश्च यज्ञदानतपांसि - द्वन्द्वः।
	यज्ञदानतपांसि इति क्रियाः यज्ञदानतपःक्रियाः - कर्मधारयः।
विधानोक्ताः	विधानेन उक्ताः विधानोक्ताः - तृतीयातत्पुरुषः।
ब्रह्मवादिनाम्	ब्रह्मणः वादी ब्रह्मवादी, तेषाम् - षष्ठीतत्पुरुषः।

(ग) कृदन्तः

उदाहृत्य	उद् + आ + हृ (हृञ् हरणे) + ल्यप्।
दानम्	दा (डुदाञ् दाने) + ल्युट्।
उक्ताः	वच् (वच परिभाषणे) + क्त (कर्तरि)।
वादी	वद् (व्यक्तायां वाचि) + णिनि।

भावस्पष्टीकरणम् -

प्रवर्तन्ते।	
काः प्रवर्तन्ते ?	**यज्ञदानतपःक्रियाः** प्रवर्तन्ते।
कीदृश्यः यज्ञदानतपःक्रियाः प्रवर्तन्ते ?	**विधानोक्ताः** यज्ञदानतपःक्रियाः प्रवर्तन्ते।

केषां विधानोक्ताः यज्ञदानतपःक्रियाः प्रवर्तन्ते ?	**ब्रह्मवादिनां** विधानोक्ताः यज्ञदानतपःक्रियाः प्रवर्तन्ते ।
कस्मात् ब्रह्मवादिनां विधानोक्ताः यज्ञदानतपः-क्रियाः प्रवर्तन्ते ?	**तस्मात्** ब्रह्मवादिनां विधानोक्ताः यज्ञदानतपः-क्रियाः प्रवर्तन्ते ।
तस्मात् ब्रह्मवादिनां विधानोक्ताः यज्ञदानतपःक्रियाः **किं कृत्वा** प्रवर्तन्ते ?	तस्मात् ब्रह्मवादिनां विधानोक्ताः यज्ञदानतपःक्रियाः **उदाहृत्य** प्रवर्तन्ते ।
तस्मात् ब्रह्मवादिनां विधानोक्ताः यज्ञदानतपःक्रियाः **किम्** उदाहृत्य प्रवर्तन्ते ?	तस्मात् ब्रह्मवादिनां विधानोक्ताः यज्ञदानतपःक्रियाः **ओम् इति** उदाहृत्य प्रवर्तन्ते ।
तस्मात् ब्रह्मवादिनां विधानोक्ताः यज्ञदानतपःक्रियाः ओम् इति उदाहृत्य **कदा** प्रवर्तन्ते ?	तस्मात् ब्रह्मवादिनां विधानोक्ताः यज्ञदानतपःक्रियाः ओम् इति उदाहृत्य **सततं** प्रवर्तन्ते ।

तात्पर्यम् - तस्मात् ब्रह्मविदां शास्त्रविहिताः यागदानतपोरूपाः क्रियाः ओम् इति शब्देनैव आरब्धाः भवन्ति ।

तदित्यनभिसन्धाय फलं यज्ञतपःक्रियाः ।
दानक्रियाश्चविविधाःक्रियन्तेमोक्षकाङ्क्षिभिः ॥१७.२५॥

पदच्छेदः - तत्, इति, अनभिसन्धाय, फलम्, यज्ञतपःक्रियाः ।
दानक्रियाः, च, विविधाः, क्रियन्ते, मोक्षकाङ्क्षिभिः ॥

अन्वयः - मोक्षकाङ्क्षिभिः तत् इति फलम् अनभिसन्धाय विविधाः यज्ञतपःक्रियाः दानक्रियाः च क्रियन्ते ।

पदार्थः - मोक्षकाङ्क्षिभिः = मोक्षार्थिभिः, तत् इति = ब्रह्मणः तत् इति शब्दम्, फलम् = प्रयोजनम्, अनभिसन्धाय = अनपेक्ष्य, विविधाः = बहुप्रकाराः, यज्ञतपःक्रियाः = यागादिक्रियाः, दानक्रियाः च = वितरणक्रियाः अपि, क्रियन्ते = आचर्यन्ते ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
मोक्षकाङ्क्षिभिः	मोक्षकाङ्क्षिन् - न. पुं. तृ. बहु. (विशेषणम्)	तत्	तद् - द. सर्व. नपुं. प्र. एक. (विशेषणम्)
इति	अव्ययम्	फलम्	अ. नपुं. द्वि. एक. (विशेष्यम्)
अनभिसन्धाय	ल्यबन्तम् अव्ययम्	विविधाः	आ. स्त्री. प्र. बहु. (विशेषणम्)

यज्ञतपःक्रियाः	आ. स्त्री. प्र. बहु. (विशेष्यम्)	दानक्रियाः	आ. स्त्री. प्र. बहु. (विशेष्यम्)
च	अव्ययम्	क्रियन्ते	कृ (डुकृञ् करणे) आत्म. कर्मणि लट्. प्रपु. बहु.

व्याकरणम् -

(क) सन्धिः	तदिति	तत् + इति	जश्त्वसन्धिः।
	इत्यनभिसन्धाय	इति + अनभिसन्धाय	यण्सन्धिः।
	दानक्रियाश्च	दानक्रियाः + च	विसर्गसन्धिः (सकारः) श्चुत्वम्।
(ख) समासः	अनभिसन्धाय	न अभिसन्धाय अनभिसन्धाय - नञ्तत्पुरुषः।	
	यज्ञतपःक्रियाः	यज्ञाश्च तपांसि च यज्ञतपांसि - द्वन्द्वः। यज्ञतपांसि इति क्रियाः यज्ञतपःक्रियाः - कर्मधारयः।	
	दानक्रियाः	दानानि इति क्रियाः दानक्रियाः - कर्मधारयः।	
	मोक्षकाङ्क्षिभिः	मोक्षं काङ्क्षन्ति इति मोक्षकाङ्क्षिणः - ताच्छीलिके कर्तरि णिनि उपपदसमासश्च।	
(ग) कृदन्तः	अभिसन्धाय	अभि + सम् + धा (डुधाञ् धारणपोषणयोः) + ल्यप्।	
	फलम्	फल् (फल निष्पत्तौ) + अच्।	
	दानम्	दा (डुदाञ् दाने) + ल्युट्।	

भावस्पष्टीकरणम् -

क्रियन्ते।	
काः क्रियन्ते ?	**यज्ञतपःक्रियाः** क्रियन्ते।
कीदृशाः यज्ञतपःक्रियाः क्रियन्ते ?	**विविधाः** यज्ञतपःक्रियाः क्रियन्ते।
विविधाः यज्ञतपःक्रियाः **पुनश्च काः** क्रियन्ते ?	विविधाः यज्ञतपःक्रियाः **दानक्रियाः च** क्रियन्ते।
किं कृत्वा विविधाः यज्ञतपःक्रियाः दानक्रियाः च क्रियन्ते ?	**अनभिसन्धाय** विविधाः यज्ञतपःक्रियाः दानक्रियाः च क्रियन्ते।
किम् अनभिसन्धाय विविधाः यज्ञतपःक्रियाः दानक्रियाः च क्रियन्ते ?	**फलम्** अनभिसन्धाय विविधाः यज्ञतपःक्रियाः दानक्रियाः च क्रियन्ते।
किं फलम् अनभिसन्धाय विविधाः यज्ञतपःक्रियाः दानक्रियाः च क्रियन्ते ?	**तत् इति** फलम् अनभिसन्धाय विविधाः यज्ञतपःक्रियाः दानक्रियाः च क्रियन्ते।

कैः तत् इति फलम् अनभिसन्धाय विविधाः यज्ञतपःक्रियाः दानक्रियाः च क्रियन्ते ?	**मोक्षकाङ्क्षिभिः** तत् इति फलम् अनभिसन्धाय विविधाः यज्ञतपःक्रियाः दानक्रियाः च क्रियन्ते ।

तात्पर्यम् - ये मोक्षम् इच्छन्ति ते तत् इति ब्रह्मणः तदिति शब्दम् उच्चार्य फलनिरपेक्षतया नानाविधं यज्ञं तपः दानं च कुर्वन्ति ।

सद्भावे साधुभावे च सदित्येतत्प्रयुज्यते ।
प्रशस्ते कर्मणि तथा सच्छब्दः पार्थ युज्यते ॥१७.२६॥

पदच्छेदः - सद्भावे, साधुभावे, च, सत्, इति, एतत्, प्रयुज्यते ।
प्रशस्ते, कर्मणि, तथा, सच्छब्दः, पार्थ, युज्यते ॥

अन्वयः - पार्थ ! सद्भावे साधुभावे च सत् इति एतत् प्रयुज्यते तथा प्रशस्ते कर्मणि सच्छब्दः युज्यते ।

पदार्थः - पार्थ = अर्जुन. सद्भावे = अस्तित्वे, साधुभावे च = श्रेष्ठत्वे अपि, सत् इति एतत् = सत् इति इदम्, प्रयुज्यते = उच्चार्यते. तथा = तेन प्रकारेण, प्रशस्ते = श्लाघ्ये, कर्मणि = कर्मणि, सच्छब्दः = सत् इति पदम्, युज्यते = कथ्यते ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
पार्थ	अ. पुं. सम्बो. एक.	सद्भावे	अ. पुं. स. एक.
साधुभावे	अ. पुं. स. एक.	च	अव्ययम्
सत्	सत् - त. नपुं. प्र. एक. (विशेषणम्)	इति	अव्ययम्
एतत्	एतत् - त. नपुं. प्र. एक. (विशेषणम्)	प्रयुज्यते	प्र + युज् (युजिर् योगे) आत्म. कर्मणि लट्. प्रपु. एक.
तथा	अव्ययम्	प्रशस्ते	अ. पुं. स. एक. (विशेषणम्)
कर्मणि	कर्मन् - न. नपुं. स. एक. (विशेष्यम्)	शब्दः	अ. पुं. प्र. एक.
युज्यते	युज् (युजिर् योगे) आत्म. कर्मणि लट्. प्रपु. एक.		

व्याकरणम् -

(क) सन्धिः	तदिति	तत् + इति	जश्त्वसन्धिः।
	इत्येतत्	इति + एतत्	यण्सन्धिः।
(ख) समासः	सद्भावे	सतः भावः सद्भावः, तस्मिन् - षष्ठीतत्पुरुषः।	
	साधुभावे	साधुः भावः साधुभावः, तस्मिन् - कर्मधारयः।	
	सच्छब्दः	सत् इति शब्दः सच्छब्दः - कर्मधारयः।	
(ग) कृदन्तः	प्रशस्ते	प्र + शन्स् (शंसु स्तुतौ) + क्त (कर्मणि)।	
(घ) तद्धितान्तः	पार्थ	पृथा + अण् (पृथायाः अपत्यं पुमान्)।	

भावस्पष्टीकरणम् -

प्रयुज्यते।	
किं प्रयुज्यते ?	**एतत्** प्रयुज्यते।
किमिति एतत् प्रयुज्यते ?	**सत् इति** एतत् प्रयुज्यते।
कुत्र सत् इति एतत् प्रयुज्यते ?	**सद्भावे** सत् इति एतत् प्रयुज्यते।
सद्भावे **पुनः कुत्र** सत् इति एतत् प्रयुज्यते ?	सद्भावे **साधुभावे** च सत् इति एतत् प्रयुज्यते।
सद्भावे साधुभावे च सत् इति एतत् प्रयुज्यते, **तथा किम्** ?	सद्भावे साधुभावे च सत् इति एतत् प्रयुज्यते, **तथा युज्यते**।
सद्भावे साधुभावे च सत् इति एतत् प्रयुज्यते, तथा **कः** युज्यते ?	सद्भावे साधुभावे च सत् इति एतत् प्रयुज्यते, तथा **शब्दः** युज्यते।
सद्भावे साधुभावे च सत् इति एतत् प्रयुज्यते, तथा **कः** शब्दः युज्यते ?	सद्भावे साधुभावे च सत् इति एतत् प्रयुज्यते, तथा **सत्** शब्दः युज्यते।
सद्भावे साधुभावे च सत् इति एतत् प्रयुज्यते, तथा **कुत्र** सत् शब्दः युज्यते ?	सद्भावे साधुभावे च सत् इति एतत् प्रयुज्यते, तथा **कर्मणि** सत् शब्दः युज्यते।
सद्भावे साधुभावे च सत् इति एतत् प्रयुज्यते, तथा **कीदृशे** कर्मणि सत् शब्दः युज्यते ?	सद्भावे साधुभावे च सत् इति एतत् प्रयुज्यते, तथा **प्रशस्ते** कर्मणि सत् शब्दः युज्यते।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**पार्थ** !

तात्पर्यम् - अस्ति इति, श्रेष्ठम् इति च अर्थे प्रतिपादनीये सत् इति शब्दः प्रयुज्यते पण्डितैः। तस्मात् प्रशस्ते विवाहादौ कर्मणि 'सत् इदं कर्म' इति सत् शब्दस्य प्रयोगः सुतरां सङ्गच्छते।

यज्ञे तपसि दाने च स्थितिः सदिति चोच्यते।
कर्म चैव तदर्थीयं सदित्येवाभिधीयते ॥१७.२७॥

पदच्छेदः - यज्ञे, तपसि, दाने, च, स्थितिः, सत्, इति, च, उच्यते।
कर्म, च, एव, तदर्थीयम्, सत्, इति, एव, अभिधीयते ॥

अन्वयः - यज्ञे तपसि दाने च स्थितिः सत् इति च उच्यते तदर्थीयं कर्म च एव सत् इति एव अभिधीयते।

पदार्थः - यज्ञे = यागकर्मणि, तपसि = तपःकर्मणि, दाने च = वितरणे अपि, स्थितिः = वृत्तिः, सत् इति च = सत् इति च, उच्यते = कथ्यते, तदर्थीयम् = यज्ञदानतपःप्रयोजनार्थम्, कर्म च एव = कर्म अपि, सत् इति एव = सत् इति एव, अभिधीयते = प्रोच्यते।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
यज्ञे	अ. पुं. स. एक.	तपसि	तपस् - स. नपुं. स. एक.
दाने	अ. नपुं. स. एक.	च	अव्ययम्
स्थितिः	इ. स्त्री. प्र. एक.	सत्	सत् - त. नपुं. प्र. एक.
इति	अव्ययम्	उच्यते	वच् (वच परिभाषणे) पर. कर्मणि लट्. प्रपु. एक.
तदर्थीयम्	अ. नपुं. प्र. एक. (विशेषणम्)	कर्म	कर्मन् - न. नपुं. प्र. एक. (विशेष्यम्)
एव	अव्ययम्	अभिधीयते	अभि + धा (डुधाञ् धारणपोषणयोः) आत्म. कर्मणि लट्. प्रपु. एक.

व्याकरणम् -

(क) सन्धिः

सदिति	सत् + इति	जश्त्वसन्धिः।
चोच्यते	च + उच्यते	गुणसन्धिः।
चैव	च + एव	वृद्धिसन्धिः।
इत्येव	इति + एव	यण्सन्धिः।
एवाभिधीयते	एव + अभिधीयते	सवर्णदीर्घसन्धिः।

(ख) समासः तदर्थीयम्

सः अर्थः तदर्थः - कर्मधारयः।
तदर्थस्य इदं तदर्थीयम् - चतुर्थीतत्पुरुषः, नित्यसमासः (इदमर्थे छप्रत्ययः - ईय)।

(ग) कृदन्तः दाने — दा (डुदाञ् दाने) + ल्युट्, तस्मिन्।
स्थितिः — स्था (ष्ठा गतिनिवृत्तौ) + क्तिन्।

भावस्पष्टीकरणम् -

उच्यते।	
किम् उच्यते ?	**सत् इति च** उच्यते।
का सत् इति च उच्यते ?	**स्थितिः** सत् इति च उच्यते।
कुत्रत्या स्थितिः सत् इति च उच्यते ?	**यज्ञे** स्थितिः सत् इति च उच्यते।
यज्ञे **पुनः कुत्रत्या** स्थितिः सत् इति च उच्यते ?	यज्ञे **तपसि** स्थितिः सत् इति च उच्यते।
यज्ञे तपसि **पुनः कुत्रत्या** स्थितिः सत् इति च उच्यते ?	यज्ञे तपसि **दाने च** स्थितिः सत् इति च उच्यते।
अभिधीयते।	
किम् अभिधीयते ?	**सत् इति एव** अभिधीयते।
किं सत् इति एव अभिधीयते ?	**कर्म च एव** सत् इति एव अभिधीयते।
किं कर्म च एव सत् इति एव अभिधीयते ?	**तदर्थीयं** कर्म च एव सत् इति एव अभिधीयते।

तात्पर्यम् - यज्ञाय तपसे दानाय च या स्थितिः क्रियते सापि सत् इति कथ्यते। तथा तेषां यज्ञादीनां यद् अनुकूलं कर्म वर्तते तदपि सत् इति शब्देनैव उच्यते।

अश्रद्धया हुतं दत्तं तपस्तप्तं कृतं च यत्।
असदित्युच्यते पार्थ न च तत्प्रेत्य नो इह॥१७.२८॥

पदच्छेदः - अश्रद्धया, हुतम्, दत्तम्, तपः, तप्तम्, कृतम्, च, यत्।
असत्, इति, उच्यते, पार्थ, न, च, तत्, प्रेत्य, नो, इह॥

अन्वयः - पार्थ ! अश्रद्धया हुतं दत्तं तपः तप्तं कृतं च यत् असत् इति उच्यते तत् प्रेत्य न च इह नो।

पदार्थः - पार्थ = अर्जुन, अश्रद्धया = अविश्वासेन, हुतम् = हवनं कृतम्, दत्तम् = अन्येभ्यः वितीर्णम्, तपः = तपस्या, तप्तम् = अनुष्ठितम्, कृतं च = आचरितं च, यत् = यदस्ति, असत् इति = असत्यम् इति, उच्यते = कथ्यते, तत् = तत्, प्रेत्य = परलोकफलाय, न च = अपि न भवति, इह = एतल्लोके, नो = न भवति।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
पार्थ	अ. पुं. सम्बो. एक.	अश्रद्धया	आ. स्त्री. तृ. एक.
हुतम्	अ. नपुं. प्र. एक.	दत्तम्	अ. नपुं. प्र. एक.
तपः	तपस् - स. नपुं. प्र. एक. (विशेष्यम्)	तप्तम्	अ. नपुं. प्र. एक. (विशेषणम्)
कृतम्	अ. नपुं. प्र. एक.	च	अव्ययम्
यत्	यद् - द्. नपुं. प्र. एक.	असत्	असत् - त. नपुं. प्र. एक.
इति	अव्ययम्	उच्यते	वच् (वच परिभाषणे) पर. कर्मणि लट्. प्रपु. एक.
तत्	तद् - द्. नपुं. प्र. एक.	प्रेत्य	ल्यबन्तम् अव्ययम्
न	अव्ययम्	इह	अव्ययम्
नो	अव्ययम्		

व्याकरणम् -

(क) सन्धिः	तपस्तप्तम्	तपः + तप्तम्	विसर्गसन्धिः (सकारः) ।
	असदिति	असत् + इति	जश्त्वसन्धिः ।
	इत्युच्यते	इति + उच्यते	यण्सन्धिः ।
(ख) समासः	अश्रद्धया	न श्रद्धा अश्रद्धा, तया - नञ्तत्पुरुषः ।	
	असत्	न सत् असत् - नञ्तत्पुरुषः ।	
(ग) कृदन्तः	हुतम्	हु (हु दानादनयोः) + क्त (कर्मणि) ।	
	दत्तम्	दा (डुदाञ् दाने) + क्त (कर्मणि) ।	
	तप्तम्	तप् (तप सन्तापे) + क्त (भावे) ।	
	कृतम्	कृ (डुकृञ् करणे) + क्त (कर्मणि) ।	
	प्रेत्य	प्र + इ (इण् गतौ) + ल्यप् ।	
(घ) तद्धितान्तः	पार्थ	पृथा + अण् (पृथायाः अपत्यं पुमान्) ।	

भावस्पष्टीकरणम् -

उच्यते ।	
किम् उच्यते ?	**असत् इति उच्यते ।**

किम् असत् इति उच्यते ?	**यत्** असत् इति उच्यते।
पुनश्च किं यत् असत् इति उच्यते ?	**कृतं च** यत् असत् इति उच्यते।
पुनश्च किं कृतं च यत् असत् इति उच्यते ?	**तप्तं** कृतं च यत् असत् इति उच्यते।
पुनश्च किं तप्तं कृतं च यत् असत् इति उच्यते ?	**तपः** तप्तं कृतं च यत् असत् इति उच्यते।
पुनश्च किं तपः तप्तं कृतं च यत् असत् इति उच्यते ?	**दत्तं** तपः तप्तं कृतं च यत् असत् इति उच्यते।
पुनश्च किं दत्तं तपः तप्तं कृतं च यत् असत् इति उच्यते ?	**हुतं** दत्तं तपः तप्तं कृतं च यत् असत् इति उच्यते।
कया हुतं दत्तं तपः तप्तं कृतं च यत् असत् इति उच्यते ?	**अश्रद्धया** हुतं दत्तं तपः तप्तं कृतं च यत् असत् इति उच्यते।
अश्रद्धया हुतं दत्तं तपः तप्तं कृतं च यत् असत् इति उच्यते **तत् किम्** ?	अश्रद्धया हुतं दत्तं तपः तप्तं कृतं च यत् असत् इति उच्यते **तत् न**।
अश्रद्धया हुतं दत्तं तपः तप्तं कृतं च यत् असत् इति उच्यते तत् **कुत्र न भवति** ?	अश्रद्धया हुतं दत्तं तपः तप्तं कृतं च यत् असत् इति उच्यते तत् **प्रेत्य न**।
अश्रद्धया हुतं दत्तं तपः तप्तं कृतं च यत् असत् इति उच्यते तत् प्रेत्य न **पुनः कुत्र न** ?	पार्थ ! अश्रद्धया हुतं दत्तं तपः तप्तं कृतं च यत् असत् इति उच्यते तत् प्रेत्य न च **इह नो**।

तात्पर्यम् - अश्रद्धया यत् हुतं दत्तं तपः तप्तं च भवति, यच्च अन्यत् कर्म आचरितं तत् सर्वम् असत् इत्युच्यते। न तत् इहलोके फलं ददाति, नापि परलोके। तस्मात् असत् इति व्यपदेशः अर्थवान्।

ॐ तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे श्रद्धात्रयविभागयोगो नाम सप्तदशोऽध्यायः ॥१७॥

सप्तदशाध्यायस्य सारः

षोडशे अध्याये 'किं कर्तव्यम् ? किं च अकर्तव्यम् ?' इति संशये शास्त्रम् एव प्रमाणम् इति उक्तम् अस्ति। अतः अस्मिन् अध्याये आरम्भे एव अर्जुनः पृष्टवान् - "ये जनाः शास्त्रविधिं त्यक्त्वा श्रद्धया यजन्ते तेषां का गतिः ? तेषां निष्ठा कीदृशी मन्तव्या ?" तदा भगवान् उक्तवान् - "मनुष्याणां स्वभाववशात् सात्त्विकी, राजसी तामसी चेति त्रिविधा श्रद्धा भवति। यः यादृश्या श्रद्धया विशिष्टः सः तादृशः श्रद्धेयः।"

अग्रे भगवान् त्रिविधायाः श्रद्धायाः लक्षणानि उक्तवान्। यथा - "येषु सत्त्वं वर्तते ते देवान् पूजयन्ति। येषु रजः ते यक्षराक्षसान्। येषु पुनः तमः ते प्रेतभूतान् च पूजयन्ति। तमोगुणयुक्ताः दम्भेन अहम्भावेन भोगैः च युक्ताः भवन्ति, ते अविवेकिनः आत्मानं पीडयन्तः अशास्त्रीयां घोरां च तपस्यां कुर्वन्ति।

सर्वेषाम् आहाराः अपि त्रिप्रकारकाः भवन्ति। तत्र आयुरारोग्यशक्तिविवर्धकाः, आस्वाद्याः च आहाराः सात्त्विकानां प्रियाः भवन्ति। पुनः ये आहाराः अतिकटवः अत्यम्लाः अतिलवणाः अत्युष्णाः, ये अनारोग्यं च जनयन्ति ते राजसानां प्रियाः भवन्ति। ये आहाराः सारविहीनाः, दुर्गन्धविशिष्टाः, पर्युषिताः, उच्छिष्टाः अभक्षणीयाश्च सन्ति ते तामसानां प्रियाः भवन्ति।

तथैव यागः, तपस्या दानमपि त्रिप्रकारकम्। फलम् अनपेक्ष्य यज्ञः कर्तव्यः इति दृढं सङ्कल्प्य एकाग्रेण मनसा यथाशास्त्रं यः यज्ञः क्रियते सः सात्त्विकः। फलम् अपेक्ष्य दाम्भिकतया यः यज्ञः क्रियते सः राजसः। यः यज्ञः शास्त्रसम्मतः न विद्यते, यश्च अश्रद्धया क्रियते सः तामसः।

पुनः कायिकं, वाचिकं, मानसिकं चेति त्रिविधं तपः वर्तते। देवस्य, पण्डितस्य च अर्चनं, ब्रह्मचर्यम् अहिंसा च शारीरं तपः। अक्षोभकरं, यथार्थं हितकरं च यत् भाषणम् अभ्यासश्च तत् वाङ्मयं तपः। यस्मिन् तपसि मनसः प्रधानता भवति तत् तपः मानसं कथ्यते। फलम् अनपेक्ष्य एकाग्रेण मनसा आचरितं त्रिप्रकारकं तपः सात्त्विकम् इति कथ्यते। दम्भभावेन यत् तपः क्रियते तत् राजसम् उदाहृतम् अस्ति। अविवेकेन, आत्मनः पीडनया अन्यस्य विनाशाय यत् तपः क्रियते तत् तामसम् इत्यभिहितम्।

दानं मम कर्तव्यमिति भावेन यः मनुष्यः पुण्यप्रदेशे, उत्तमे च पात्रे प्रत्युपकारदृष्टिं त्यक्त्वा यत् किमपि दानं करोति तत् दानं सात्त्विकम्। प्रत्युपकारदृष्ट्या, फलापेक्षया यत् दीयते तत् राजसम्। अयोग्ये देशे अयोग्ये काले अपात्रे अनादरेण तिरस्कारेण च यत् अर्पणं क्रियते तत् तामसम् इति आख्यायते।"

तदनन्तरम् अध्यायान्ते भगवान् उपदिष्टवान् - "ॐ तत् सत् इति त्रिभिः शब्दैः ब्रह्मणः निर्देशः क्रियते। ब्रह्मविदां क्रियाः 'ओम्' इति शब्देन भवन्ति। ये मोक्षम् इच्छन्ति तेषां तदिति शब्दम् उच्चार्य भवन्ति। यज्ञे तपसि दाने च या स्थितिः भवति सा सत् इति उच्यते। अश्रद्धया यत् अन्यत् कर्म आचरितं तत् सर्वम् असत् इत्युच्यते। तत् इहलोके परलोके वा फलं न ददाति" इति।

****

अथ अष्टादशोऽध्यायः

मोक्षसंन्यासयोगः

अर्जुन उवाच - **संन्यासस्य महाबाहो तत्त्वमिच्छामि वेदितुम्।**
त्यागस्य च हृषीकेश पृथक्केशिनिषूदन ॥१८.१॥

पदच्छेदः -

अर्जुनः, उवाच - संन्यासस्य, महाबाहो, तत्त्वम्, इच्छामि, वेदितुम्।
त्यागस्य, च, हृषीकेश, पृथक्, केशिनिषूदन ॥

अन्वयः - महाबाहो हृषीकेश केशिनिषूदन ! संन्यासस्य त्यागस्य च तत्त्वं पृथक् वेदितुम् इच्छामि।

पदार्थः - महाबाहो = दीर्घबाहो, हृषीकेश = इन्द्रियाधीश, केशिनिषूदन = केशिसंहारक, संन्यासस्य = संन्यासविषयकम्, त्यागस्य च = त्यागविषयकं च, तत्त्वम् = याथात्म्यम्, पृथक् = प्रत्येकम्, वेदितुम् = ज्ञातुम्, इच्छामि = अभिलषामि।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
महाबाहो	उ. पुं. सम्बो. एक.	हृषीकेश	अ. पुं. सम्बो. एक.
केशिनिषूदन	अ. पुं. सम्बो. एक.	संन्यासस्य	अ. पुं. ष. एक.
त्यागस्य	अ. पुं. ष. एक.	च	अव्ययम्
तत्त्वम्	अ. नपुं. द्वि. एक.	पृथक्	अव्ययम्
वेदितुम्	तुमुन् अव्ययम्	इच्छामि	इष् (इषु इच्छायाम्) पर. कर्तरि लट्. उपु. एक.

व्याकरणम् -

(क) समासः महाबाहो — महान्तौ बाहू यस्य सः महाबाहुः, तत्सम्बुद्धौ - बहुव्रीहिः।
हृषीकेश — हृषीकाणाम् ईशः हृषीकेशः, तत्सम्बुद्धौ - षष्ठीतत्पुरुषः।
केशिनिषूदन — केशिनः निषूदनः केशिनिषूदनः, तत्सम्बुद्धौ केशिनिषूदन -षष्ठीतत्पुरुषः।

(ख) कृदन्तः संन्यासस्य — सम् + नि + अस् (असु क्षेपणे) + घञ्, तस्य।
वेदितुम् — विद् (विद ज्ञाने) + तुमुन्।
त्यागस्य — त्यज् (त्यज हानौ) + घञ्, तस्य।

भावस्पष्टीकरणम् -

इच्छामि ।	
किं कर्तुम् इच्छामि ?	**वेदितुम्** इच्छामि ।
किं वेदितुम् इच्छामि ?	**तत्त्वं** वेदितुम् इच्छामि ।
तत्त्वं **कथं** वेदितुम् इच्छामि ?	तत्त्वं **पृथक्** वेदितुम् इच्छामि ।
कस्य तत्त्वं पृथक् वेदितुम् इच्छामि ?	**संन्यासस्य** तत्त्वं पृथक् वेदितुम् इच्छामि ।
संन्यासस्य **पुनश्च कस्य** तत्त्वं पृथक् वेदितुम् इच्छामि ?	संन्यासस्य **त्यागस्य च** तत्त्वं पृथक् वेदितुम् इच्छामि ।
अस्मिन् श्लोके सम्बोधनपदानि कानि ?	**महाबाहो, हृषीकेश केशिनिषूदन च !**

तात्पर्यम् - श्रीकृष्ण ! संन्यासस्य याथात्म्यं त्यागस्य च याथात्म्यं पृथक् पृथक् ज्ञातुम् अभिलषामि ।

श्रीभगवानुवाच - **काम्यानां कर्मणां न्यासं संन्यासं कवयो विदुः ।**
सर्वकर्मफलत्यागं प्राहुस्त्यागं विचक्षणाः ॥१८.२॥

पदच्छेदः -

श्रीभगवान्, उवाच - काम्यानाम्, कर्मणाम्, न्यासम्, संन्यासम्, कवयः, विदुः ।
सर्वकर्मफलत्यागम्, प्राहुः, त्यागम्, विचक्षणाः ॥

अन्वयः - काम्यानां कर्मणां न्यासं संन्यासं कवयः विदुः । सर्वकर्मफलत्यागं विचक्षणाः त्यागं प्राहुः ।

पदार्थः - काम्यानाम् = फलमुद्दिश्य क्रियमाणानाम्, कर्मणाम् = क्रियाणाम्, न्यासम् = परित्यागम्, संन्यासम् = संन्यासः इति, कवयः = पण्डिताः, विदुः = आचक्षते, सर्वकर्मफलत्यागम् = सकलकर्मप्रयोजनपरित्यागम्, विचक्षणाः = विवेकिनः, त्यागम् = त्यागः इति, प्राहुः = कथयन्ति ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
काम्यानाम्	अ. पुं. ष. बहु. (विशेषणम्)	कर्मणाम्	कर्मन् - न. नपुं. ष. बहु. (विशेष्यम्)
न्यासम्	अ. पुं. द्वि. एक.	संन्यासम्	अ. पुं. द्वि. एक.
कवयः	इ. पुं. प्र. बहु.	विदुः	विद् (विद ज्ञाने) पर. कर्तरि लट्. प्रपु. बहु.

सर्वकर्मफलत्यागम्	अ. पुं. द्वि. एक.	विचक्षणाः	इ. पुं. प्र. बहु. (विशेषणम्)
त्यागम्	अ. पुं. द्वि. एक.	प्राहुः	प्र + ब्रू (ब्रूञ् व्यक्तायां वाचि) पर. कर्तरि लट्. प्रपु. बहु.

व्याकरणम् -

(क) सन्धिः	कवयो विदुः	कवयः + विदुः	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः।
	प्राहुस्त्यागम्	प्राहुः + त्यागम्	विसर्गसन्धिः (सकारः)।

(ख) समासः सर्वकर्मफलत्यागम्

सर्वाणि कर्माणि सर्वकर्माणि - कर्मधारयः।

सर्वकर्मणां फलं सर्वकर्मफलम् - षष्ठीतत्पुरुषः।

सर्वकर्मफलस्य त्यागः सर्वकर्मफलत्यागः, तम् - षष्ठीतत्पुरुषः।

(ग) कृदन्तः	न्यासम्	नि + अस् (असु क्षेपणे) + घञ्, तम्।
	संन्यासम्	सम् + नि + अस् (असु क्षेपणे) + घञ्, तम्।
	फलम्	फल् (फल निष्पत्तौ) + अच्।
	त्यागम्	त्यज् (त्यज हानौ) + घञ्, तम्।
	विचक्षणाः	वि + चक्ष् (चक्षिङ् व्यक्तायां वाचि) + ल्यु।

भावस्पष्टीकरणम् -

विदुः।	
के विदुः ?	**कवयः** विदुः।
कवयः **कं** विदुः ?	कवयः **संन्यासं** विदुः।
कवयः **कं** संन्यासं विदुः ?	कवयः **न्यासं** संन्यासं विदुः।
कवयः **केषां** न्यासं संन्यासं विदुः ?	कवयः **कर्मणां** न्यासं संन्यासं विदुः।
कवयः **कीदृशानां** कर्मणां न्यासं संन्यासं विदुः ?	कवयः **काम्यानां** कर्मणां न्यासं संन्यासं विदुः।
प्राहुः।	
के प्राहुः ?	**विचक्षणाः** प्राहुः।
विचक्षणाः **कं** प्राहुः ?	विचक्षणाः **त्यागं** प्राहुः।
विचक्षणाः **कं** त्यागं प्राहुः ?	विचक्षणाः **सर्वकर्मफलत्यागं** त्यागं प्राहुः।

तात्पर्यम् - फलमुद्दिश्य क्रियमाणानां कर्मणां परित्यागं संन्यासः इति पण्डिताः आचक्षते। सर्वकर्मप्रयोजनपरित्यागं विवेकिनः त्यागः इति कथयन्ति।

त्याज्यं दोषवदित्येके कर्म प्राहुर्मनीषिणः।
यज्ञदानतपःकर्म न त्याज्यमिति चापरे॥१८.३॥

पदच्छेदः - त्याज्यम्, दोषवत्, इति, एके, कर्म, प्राहुः, मनीषिणः।
यज्ञदानतपःकर्म, न, त्याज्यम्, इति, च, अपरे॥

अन्वयः - एके मनीषिणः दोषवत् कर्म त्याज्यम् इति प्राहुः अपरे यज्ञदानतपःकर्म न त्याज्यम् इति।

पदार्थः - एके = अन्ये, मनीषिणः = बुधाः, दोषवत् = दोषः इव, कर्म = क्रिया, त्याज्यम् इति = वर्जनीयम् इति, प्राहुः = वर्णयन्ति, अपरे = इतरे, यज्ञदानतपःकर्म = यागवितरणतपःकर्म, न त्याज्यम् इति = न वर्जनीयम् इति अपि।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
एके	अ. सर्व. पुं. प्र. बहु. (विशेषणम्)	मनीषिणः	मनीषिन् - न. पुं. प्र. बहु. (विशेष्यम्)
दोषवत्	दोषवत् - त. नपुं. प्र. एक.	कर्म	कर्मन् - न. नपुं. प्र. एक.
त्याज्यम्	अ. नपुं. प्र. एक.	इति	अव्ययम्
प्राहुः	प्र + ब्रू (ब्रूञ् व्यक्तायां वाचि) पर. कर्तरि लट्. प्रपु. बहु.	अपरे	अ. सर्व. पुं. प्र. बहु. (विशेषणम्)
यज्ञदानतपःकर्म	यज्ञदानतपःकर्मन् - न. नपुं. प्र. एक.	न	अव्ययम्

व्याकरणम् -

(क) सन्धिः	दोषवदिति	दोषवत् + इति	जश्त्वसन्धिः।
	इत्येके	इति + एके	यण्सन्धिः।
	प्राहुर्मनीषिणः	प्राहुः + मनीषिणः	विसर्गसन्धिः (रेफः)।
	चापरे	च + अपरे	सवर्णदीर्घसन्धिः।

(ख) समासः यज्ञदानतपःकर्म — यज्ञश्च दानं च तपश्च यज्ञदानतपांसि - द्वन्द्वः।
यज्ञदानतपांसि इति कर्म यज्ञदानतपःकर्म - कर्मधारयः।

(ग) कृदन्तः	त्याज्यम्	त्यज् (त्यज हानौ) + ण्यत् (कर्मणि) (त्यक्तव्यम् इत्यर्थः)।
	दानम्	दा (डुदाञ् दाने) + ल्युट्।
(घ) तद्धितान्तः	दोषवत्	दोष + मतुप् (दोषः अस्य अस्मिन् वा अस्ति इत्यर्थः)।
	मनीषिणः	मनीषा + इनि (मनीषा एषाम् एषु वा अस्ति)।

भावस्पष्टीकरणम् -

प्राहुः।	
के प्राहुः ?	**एके** प्राहुः।
एके **के** प्राहुः ?	एके **मनीषिणः** प्राहुः।
एके मनीषिणः **किं** प्राहुः ?	एके मनीषिणः **त्याज्यम् इति** प्राहुः।
एके मनीषिणः **किं** त्याज्यम् इति प्राहुः ?	एके मनीषिणः **कर्म** त्याज्यम् इति प्राहुः।
एके मनीषिणः **कीदृशं** कर्म त्याज्यम् इति प्राहुः ?	एके मनीषिणः **दोषवत्** कर्म त्याज्यम् इति प्राहुः।
एके मनीषिणः दोषवत् कर्म त्याज्यम् इति **पुनः के** प्राहुः ?	एके मनीषिणः दोषवत् कर्म त्याज्यम् इति **अपरे** प्राहुः।
एके मनीषिणः दोषवत् कर्म त्याज्यम् इति अपरे **किं** प्राहुः ?	एके मनीषिणः दोषवत् कर्म त्याज्यम् इति अपरे **न त्याज्यं** प्राहुः।
एके मनीषिणः दोषवत् कर्म त्याज्यम् इति अपरे **किं** न त्याज्यं प्राहुः ?	एके मनीषिणः दोषवत् कर्म त्याज्यम् इति अपरे **यज्ञदानतपःकर्म** न त्याज्यं प्राहुः।

तात्पर्यम् - अन्ये बुधाः यथा दोषः वर्जनीयः तथा कर्म वर्जनीयम् इति वदन्ति। इतरे तु यज्ञदानतपःकर्म न वर्जनीयम् इति वदन्ति।

निश्चयं शृणु मे तत्र त्यागे भरतसत्तम।
त्यागो हि पुरुषव्याघ्र त्रिविधः सम्प्रकीर्तितः ॥१८.४॥

पदच्छेदः - निश्चयम्, शृणु, मे, तत्र, त्यागे, भरतसत्तम।
त्यागः, हि, पुरुषव्याघ्र, त्रिविधः, सम्प्रकीर्तितः ॥

अन्वयः - भरतसत्तम ! तत्र त्यागे मे निश्चयं शृणु, पुरुषव्याघ्र ! त्यागः हि त्रिविधः सम्प्रकीर्तितः।

पदार्थः - भरतसत्तम = भरतश्रेष्ठ, तत्र = तस्मिन्, त्यागे = त्यागविषये, मे = मम, निश्चयम् = निर्धारणम्, शृणु = आकर्णय, पुरुषव्याघ्र = पुरुषश्रेष्ठ, त्यागः हि = त्यागः खलु, त्रिविधः = त्रिप्रकारकः, सम्प्रकीर्तितः = वर्णितः ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
भरतसत्तम	अ. पुं. सम्बो. एक.	तत्र	अव्ययम्
त्यागे	अ. पुं. स. एक.	मे	अस्मद् - द. सर्व. ष. एक,
निश्चयम्	अ. पुं. द्वि. एक.	शृणु	श्रु (श्रु श्रवणे) पर. कर्तरि लोट्. मपु. एक.
पुरुषव्याघ्र	अ. पुं. सम्बो. एक.	त्यागः	अ. पुं. प्र. एक. (विशेष्यम्)
हि	अव्ययम्	त्रिविधः	अ. पुं. प्र. एक. (विशेषणम्)
सम्प्रकीर्तितः	अ. पुं. प्र. एक. (विशेषणम्)		

व्याकरणम् -

(क) सन्धिः	त्यागो हि	त्यागः + हि	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः ।
(ख) समासः	पुरुषव्याघ्र	पुरुषः व्याघ्रः इव पुरुषव्याघ्रः, तत्सम्बुद्धौ पुरुषव्याघ्र - कर्मधारयः ।	
(ग) कृदन्तः	निश्चयम्	निस् + चि (चिञ् चयने) + अप्, तम् ।	
	त्यागे	त्यज् (त्यज हानौ) + घञ्, तस्मिन् ।	
	सम्प्रकीर्तितः	सम् + प्र + कृ (कॄ विक्षेपे) + क्तिन् + तसिल् ।	
(घ) तद्धितान्तः	भरतसत्तम	भरतसत् + तमप्, अतिशयेन भरतसत् भरतसत्तमः (बहुषु अन्यतमस्मिन् अतिशये तमप्) ।	

भावस्पष्टीकरणम् -

शृणु ।	
किं शृणु ?	**निश्चयं शृणु ।**
कस्य निश्चयं शृणु ?	**मे निश्चयं शृणु ।**
कस्मिन् मे निश्चयं शृणु ?	**त्यागे मे निश्चयं शृणु ।**
कुत्र त्यागे मे निश्चयं शृणु ?	**तत्र त्यागे मे निश्चयं शृणु ।**
तत्र त्यागे मे निश्चयं शृणु, कः (निश्चयः) ?	**तत्र त्यागे मे निश्चयं शृणु, सम्प्रकीर्तितः ।**

तत्र त्यागे मे निश्चयं शृणु, **कः** सम्प्रकीर्तितः ?	तत्र त्यागे मे निश्चयं शृणु, **त्यागः हि** सम्प्रकीर्तितः ।
तत्र त्यागे मे निश्चयं शृणु, त्यागः हि **कतिविधः** सम्प्रकीर्तितः ?	तत्र त्यागे मे निश्चयं शृणु, त्यागः हि **त्रिविधः** सम्प्रकीर्तितः ।
अस्मिन् श्लोके सम्बोधनपदे के ?	**भरतसत्तम, पुरुषव्याघ्र !**

तात्पर्यम् - भरतश्रेष्ठ अर्जुन ! तत्र त्यागे तावत् मम निर्धारणं शृणु । अर्जुन ! त्यागः त्रिविधः वर्णितः अस्ति ।

यज्ञदानतपःकर्म न त्याज्यं कार्यमेव तत् ।
यज्ञो दानं तपश्चैव पावनानि मनीषिणाम् ॥१८.५॥

पदच्छेदः - यज्ञदानतपःकर्म, न, त्याज्यम्, कार्यम्, एव, तत् ।
यज्ञः, दानम्, तपः, च, एव, पावनानि, मनीषिणाम् ॥

अन्वयः - यज्ञदानतपःकर्म न त्याज्यं तत् कार्यम् एव, यज्ञः दानं तपः च एव मनीषिणां पावनानि ।

पदार्थः - यज्ञदानतपःकर्म = यागवितरणतपःकर्म, न त्याज्यम् = न वर्जनीयम्, तत् = तत् (कर्माणि), कार्यम् एव = कर्तव्यम् एव, यज्ञः = यागः, दानम् = वितरणम्, तपः च एव = तपस्या अपि, मनीषिणाम् = विदुषाम्, पावनानि = शुद्धिकराणि ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
यज्ञदानतपःकर्म	यज्ञदानतपःकर्मन् - न. नपुं. प्र. एक. (विशेष्यम्)	न	अव्ययम्
त्याज्यम्	अ. नपुं. प्र. एक. (विशेषणम्)	तत्	तद् - द. सर्व. नपुं. प्र. एक. (विशेषणम्)
कार्यम्	अ. नपुं. प्र. एक. (विशेष्यम्)	एव	अव्ययम्
यज्ञः	अ. पुं. प्र. एक.	दानम्	अ. नपुं. प्र. एक.
तपः	तपस् - सका. नपुं. प्र. एक.	च	अव्ययम्
मनीषिणाम्	मनीषिन् - न. पुं. ष. बहु.	पावनानि	अ. नपुं. प्र. बहु.

व्याकरणम् -

(क) सन्धिः यज्ञो दानम् यज्ञः + दानम् विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः ।

तपश्च	तपः + च	विसर्गसन्धिः (सकारः) श्चुत्वम्।
चैव	च + एव	वृद्धिसन्धिः।

(ख) समासः	यज्ञदानतपःकर्म	यज्ञश्च दानं च तपश्च यज्ञदानतपांसि - द्वन्द्वः। यज्ञदानतपांसि इति कर्म यज्ञदानतपःकर्म - कर्मधारयः।
(ग) कृदन्तः	त्याज्यम्	त्यज् (त्यज हानौ) + यक् (कर्मणि) + ण्यत् (त्यक्तव्यम् इत्यर्थः)।
	कार्यम्	कृ (डुकृञ् करणे) + ण्यत् (कर्तव्यम् इत्यर्थः)।
	दानम्	दा (डुदाञ् दाने) + ल्युट्।
	पावनानि	पू (पूञ् पवने) + णिच् + ल्युट्।
(घ) तद्धितान्तः	मनीषिणाम्	मनीषा + इनि (मतुबर्थे) तेषाम्, मनीषा (बुद्धिः) एषाम् एषु वा अस्ति।

भावस्पष्टीकरणम् -

न त्याज्यम्।	
किं न त्याज्यम्?	**यज्ञदानतपःकर्म** न त्याज्यम्।
यज्ञदानतपःकर्म न त्याज्यं **तर्हि किम्**?	यज्ञदानतपःकर्म न त्याज्यं **तत् कार्यम् एव**।
यज्ञदानतपःकर्म न त्याज्यं तत् कार्यम् एव, **(किमर्थम्)**?	यज्ञदानतपःकर्म न त्याज्यं तत् कार्यम् एव, **(तानि) पावनानि (अतः)**।
यज्ञदानतपःकर्म न त्याज्यं तत् कार्यम् एव, (तानि) **केषां** पावनानि?	यज्ञदानतपःकर्म न त्याज्यं तत् कार्यम् एव, (तानि) **मनीषिणां** पावनानि।
यज्ञदानतपःकर्म न त्याज्यं तत् कार्यम् एव, **कानि** मनीषिणां पावनानि?	यज्ञदानतपःकर्म न त्याज्यं तत् कार्यम् एव, **यज्ञः दानं तपः च एव** मनीषिणां पावनानि।

तात्पर्यम् - यज्ञः दानं तपश्च इति एतत् कर्मत्रयं न सर्वथा वर्जनीयम्। तत् अवश्यं कर्तव्यम्। यतः तत् त्रिविधं कर्म मनीषिणां शुद्धिकरम्।

एतान्यपि तु कर्माणि सङ्गं त्यक्त्वा फलानि च।
कर्तव्यानीति मे पार्थ निश्चितं मतमुत्तमम्॥१८.६॥

पदच्छेदः - एतानि, अपि, तु, कर्माणि, सङ्गम्, त्यक्त्वा, फलानि, च।
कर्तव्यानि, इति, मे, पार्थ, निश्चितम्, मतम्, उत्तमम्॥

अन्वयः - पार्थ! एतानि अपि तु कर्माणि सङ्गं फलानि च त्यक्त्वा कर्तव्यानि इति निश्चितं मे उत्तमं मतम्।

पदार्थः - पार्थ = अर्जुन, एतानि अपि तु = इमानि अपि तु, कर्माणि = क्रियाः, सङ्गम् = आसक्तिम्, फलानि च = प्रयोजनानि अपि, त्यक्त्वा = वर्जयित्वा, कर्तव्यानि = आचरणीयानि, इति = एवम्, निश्चितम् = निर्णीतम्, मे = मम, उत्तमम् = श्रेष्ठम्, मतम् = अभीष्टम्।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
पार्थ	अ. पुं. सम्बो. एक.	एतानि	एतद्- द. नपुं. प्र. एक. (विशेषणम्)
अपि	अव्ययम्	तु	अव्ययम्
कर्माणि	कर्मन् - न. नपुं. प्र. बहु. (विशेष्यम्)	सङ्गम्	अ. नपुं. द्वि. एक.
फलानि	अ. नपुं. द्वि. बहु.	च	अव्ययम्
त्यक्त्वा	क्त्वान्तम् अव्ययम्	कर्तव्यानि	अ. नपुं. प्र. बहु. (विशेषणम्)
इति	अव्ययम्	निश्चितम्	अ. नपुं. प्र. एक.
मे	अस्मद् - द. सर्व. ष. एक.	उत्तमम्	अ. नपुं. प्र. एक. (विशेषणम्)
मतम्	अ. नपुं. प्र. एक. (विशेष्यम्)		

व्याकरणम् -

(क) सन्धिः	एतान्यपि	एतानि + अपि	यण्सन्धिः।
	कर्तव्यानीति	कर्तव्यानि + इति	सवर्णदीर्घसन्धिः।
(ग) कृदन्तः	सङ्गम्	सञ्ज् (सञ्ज सङ्गे) + घञ् (भावे), तम्।	
	त्यक्त्वा	त्यज् (त्यज हानौ) + क्त्वा।	
	फलानि	फल् (फल निष्पत्तौ) + अच्।	
	कर्तव्यानि	कृ (डुकृञ् करणे) + तव्यत् (कर्मणि)।	
	निश्चितम्	नि + चि (चिञ् चयने) + क्त (कर्तरि)।	
	मतम्	मन् (मन ज्ञाने) + क्त (कर्तरि)।	
(घ) तद्धितान्तः	पार्थ	पृथा + अण् (पृथायाः अपत्यं पुमान्)।	
	उत्तमम्	अतिशयेन उद् उत्तमः (बहुषु अन्यतमस्मिन् अतिशये तमप्)।	

भावस्पष्टीकरणम् -

मतम्।	
कीदृशं मतम्?	**उत्तमं मतम्।**

कस्य उत्तमं मतम् ?	**मे** उत्तमं मतम् ।
कथम्भूतं मे उत्तमं मतम् ?	**निश्चितं** मे उत्तमं मतम् ।
कानि इति निश्चितं मे उत्तमं मतम् ?	**कर्तव्यानि इति** निश्चितं मे उत्तमं मतम् ।
कानि कर्तव्यानि इति निश्चितं मे उत्तमं मतम् ?	**कर्माणि** कर्तव्यानि इति निश्चितं मे उत्तमं मतम् ।
कीदृशानि कर्माणि कर्तव्यानि इति निश्चितं मे उत्तमं मतम् ?	**एतानि अपि तु** कर्माणि कर्तव्यानि इति निश्चितं मे उत्तमं मतम् ।
एतानि अपि तु कर्माणि **किं कृत्वा** कर्तव्यानि इति निश्चितं मे उत्तमं मतम् ?	एतानि अपि तु कर्माणि **त्यक्त्वा** कर्तव्यानि इति निश्चितं मे उत्तमं मतम् ।
एतानि अपि तु कर्माणि **किं** त्यक्त्वा कर्तव्यानि इति निश्चितं मे उत्तमं मतम् ?	एतानि अपि तु कर्माणि **सङ्गं** त्यक्त्वा कर्तव्यानि इति निश्चितं मे उत्तमं मतम् ।
एतानि अपि तु कर्माणि सङ्गं **पुनः कानि** त्यक्त्वा कर्तव्यानि इति निश्चितं मे उत्तमं मतम् ?	एतानि अपि तु कर्माणि सङ्गं **फलानि च** त्यक्त्वा कर्तव्यानि इति निश्चितं मे उत्तमं मतम् ।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**पार्थ** !

तात्पर्यम् - अर्जुन ! एतानि कर्माणि 'अहमेव करोमि' इति बुद्धिं विना, फलापेक्षां च विना कर्तव्यानि इति यत् निर्णीयते तदेव मम परमं मतम् इति जानीहि ।

नियतस्य तु संन्यासः कर्मणो नोपपद्यते ।
मोहात्तस्य परित्यागस्तामसः परिकीर्तितः ॥१८.७॥

पदच्छेदः - नियतस्य, तु, संन्यासः, कर्मणः, न, उपपद्यते ।
मोहात्, तस्य, परित्यागः, तामसः, परिकीर्तितः ॥

अन्वयः - नियतस्य कर्मणः तु संन्यासः न उपपद्यते मोहात् तस्य परित्यागः तामसः परिकीर्तितः ।

पदार्थः - नियतस्य = नित्यस्य, कर्मणः तु = क्रियायाः तु, संन्यासः = परित्यागः, न उपपद्यते = न युज्यते, मोहात् = अज्ञानात्, तस्य = एतस्य, परित्यागः = वर्जनम्, तामसः = तमस्सम्बन्धि, परिकीर्तितः = कथितम् ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
नियतस्य	अ. पुं. ष. एक. (विशेषणम्)	कर्मणः	कर्मन् - न. नपुं. ष. एक. (विशेष्यम्)
तु	अव्ययम्	संन्यासः	अ. पुं. प्र. एक.
न	अव्ययम्	उपपद्यते	उप + पद् (पद गतौ) आत्म. कर्तरि लट्. प्रपु. एक.
मोहात्	अ. पुं. पं. एक.	तस्य	तद् - द. सर्व. नपुं. ष. एक. (विशेषणम्)
परित्यागः	अ. पुं. प्र. एक. (विशेष्यम्)	तामसः	अ. पुं. प्र. एक. (विशेषणम्)
परिकीर्तितः	अ. पुं. प्र. एक. (विशेषणम्)		

व्याकरणम् -

(क) सन्धिः	कर्मणो न	कर्मणः + न	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः।
	नोपपद्यते	न + उपपद्यते	गुणसन्धिः।
	परित्यागस्तामसः	परित्यागः + तामसः	विसर्गसन्धिः (सकारः)।
(ख) कृदन्तः	नियतस्य	नि + यम् (यम उपरमे) + क्त (कर्तरि), तस्य।	
	संन्यासः	सम् + नि + अस् (असु क्षेपणे) + घञ्।	
	मोहात्	मुह् (मुह वैचित्ये) + घञ्, तस्मात्।	
	परित्यागः	परि + त्यज् (त्यज हानौ) + घञ्।	
	परिकीर्तितः	परि + कृ (कॄ विक्षेपे) + क्तिन् + तसिल्।	
(ग) तद्धितान्तः	तामसः	तमस् + अण् (तमसः आगतः तामसः)।	

भावस्पष्टीकरणम् -

न उपपद्यते।	
कः न उपपद्यते ?	**संन्यासः** न उपपद्यते।
कस्य संन्यासः न उपपद्यते ?	**कर्मणः** तु संन्यासः न उपपद्यते।
कीदृशस्य कर्मणः तु संन्यासः न उपपद्यते ?	**नियतस्य** कर्मणः तु संन्यासः न उपपद्यते।
नियतस्य कर्मणः तु संन्यासः न उपपद्यते **(अतः)** किम् ?	नियतस्य कर्मणः तु संन्यासः न उपपद्यते, **(अतः)** परिकीर्तितः।

नियतस्य कर्मणः तु संन्यासः न उपपद्यते, **कः** परिकीर्तितः ?	नियतस्य कर्मणः तु संन्यासः न उपपद्यते, **तामसः** परिकीर्तितः ।
नियतस्य कर्मणः तु संन्यासः न उपपद्यते, **पुनः कः** तामसः परिकीर्तितः ?	नियतस्य कर्मणः तु संन्यासः न उपपद्यते, **परित्यागः** तामसः परिकीर्तितः ।
नियतस्य कर्मणः तु संन्यासः न उपपद्यते, **कस्य** परित्यागः तामसः परिकीर्तितः ?	नियतस्य कर्मणः तु संन्यासः न उपपद्यते, **तस्य** परित्यागः तामसः परिकीर्तितः ।

तात्पर्यम् - काम्यं नित्यं चेति यत् द्विविधं कर्म वर्तते तत्र नित्यस्य कर्मणः त्यागः सर्वथा न युज्यते । यदि अज्ञानात् तस्य त्यागः क्रियते तर्हि सः त्यागः तमोगुणप्रयुक्तः इति निश्चीयते ।

दुःखमित्येव यत्कर्म कायक्लेशभयात्त्यजेत् ।
स कृत्वा राजसं त्यागं नैव त्यागफलं लभेत् ॥१८.८॥

पदच्छेदः - दुःखम्, इति, एव, यत्, कर्म, कायक्लेशभयात्, त्यजेत् ।
सः, कृत्वा, राजसम्, त्यागम्, न, एव, त्यागफलम्, लभेत् ॥

अन्वयः - कायक्लेशभयात् दुःखम् इति एव यत् कर्म त्यजेत् । सः राजसं त्यागं कृत्वा त्यागफलं न एव लभेत् ।

पदार्थः - कायक्लेशभयात् = शरीरदुःखभीत्या, दुःखम् इति एव = कष्टम् इति एव, यत् कर्म = यां क्रियाम्, त्यजेत् = वर्जयेत्, सः = तादृशः मानवः, राजसम् = रजस्सम्बन्धिनम्, त्यागम् = परित्यागम्, कृत्वा = विधाय, त्यागफलम् = त्यागप्रयोजनम्, न एव लभेत् = नैव लभेत ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
कायक्लेशभयात्	अ. नपुं. पं. एक.	दुःखम्	अ. नपुं. प्र. एक. (विशेषणम्)
इति	अव्ययम्	एव	अव्ययम्
यत्	यद् - द. सर्व. नपुं. द्वि. एक. (विशेषणम्)	कर्म	कर्मन् - न. नपुं. द्वि. एक. (विशेष्यम्)
त्यजेत्	त्यज् (त्यज हानौ) पर. कर्तरि विधिलिङ् प्रपु. एक.	सः	तद् - द. सर्व. पुं. प्र. एक. (विशेषणम्)

राजसम्	अ. पुं. द्वि. एक. (विशेषणम्)	त्यागम्	अ. पुं. द्वि. एक. (विशेष्यम्)
कृत्वा	क्त्वान्तम् अव्ययम्	त्यागफलम्	अ. नपुं. द्वि. एक.
न	अव्ययम्	लभेत् (लभेत)	लभ् (डुलभष् प्राप्तौ) आत्म. कर्तरि विधिलिङ्. प्रपु. एक.

व्याकरणम् -

(क) सन्धिः	इत्येव	इति + एव	यण्सन्धिः ।
	स कृत्वा	सः + कृत्वा	विसर्गसन्धिः (लोपः) ।
	नैव	न + एव	वृद्धिसन्धिः ।
(ख) समासः	कायक्लेशभयात्	कायस्य क्लेशः कायक्लेशः - षष्ठीतत्पुरुषः । कायक्लेशात् भयं कायक्लेशभयम्, तस्मात् - पञ्चमीतत्पुरुषः ।	
	त्यागफलम्	त्यागस्य फलं त्यागफलम् - षष्ठीतत्पुरुषः ।	
(ग) कृदन्तः	भयात्	भी (ञिभी भये) + अच् (अपादाने), तस्मात् ।	
	कृत्वा	कृ (डुकृञ् करणे) + क्त्वा ।	
	त्यागम्	त्यज् (त्यज हानौ) + घञ्, तम् ।	
	फलम्	फल् (फल निष्पत्तौ) + अच् ।	
(घ) तद्धितान्तः	राजसम्	रजस् + अण् (रजसः आगतम् राजसम्) ।	

भावस्पष्टीकरणम् -

त्यजेत् ।	
किं त्यजेत् ?	**कर्म** त्यजेत् ।
किं कर्म त्यजेत् ?	**यत्** कर्म त्यजेत् ।
कीदृशं यत् कर्म त्यजेत् ?	**दुःखम् इति एव** यत् कर्म त्यजेत् ।
कस्मात् दुःखम् इति एव यत् कर्म त्यजेत् ?	**कायक्लेशभयात्** दुःखम् इति एव यत् कर्म त्यजेत् ।
(यः) कायक्लेशभयात् दुःखम् इति एव यत् कर्म त्यजेत् **सः किम्** ?	(यः) कायक्लेशभयात् दुःखम् इति एव यत् कर्म त्यजेत् **सः न एव लभेत्** ।
कायक्लेशभयात् दुःखम् इति एव यत् कर्म त्यजेत् सः किं न एव लभेत् ?	कायक्लेशभयात् दुःखम् इति एव यत् कर्म त्यजेत् सः **त्यागफलं** न एव लभेत् ।

कायक्लेशभयात् दुःखम् इति एव यत् कर्म त्यजेत् सः **किं कृत्वा** त्यागफलं न एव लभेत् ?	कायक्लेशभयात् दुःखम् इति एव यत् कर्म त्यजेत् सः **त्यागं कृत्वा** त्यागफलं न एव लभेत् ।
कायक्लेशभयात् दुःखम् इति एव यत् कर्म त्यजेत् सः **कीदृशं** त्यागं कृत्वा त्यागफलं न एव लभेत् ?	कायक्लेशभयात् दुःखम् इति एव यत् कर्म त्यजेत् सः **राजसं** त्यागं कृत्वा त्यागफलं न एव लभेत् ।

तात्पर्यम् - यः पुनः शरीरायासभयात् दुःखं भवति इति मत्वा कर्म त्यजति सः त्यागः राजसः इति उच्यते। तस्य च त्यागस्य सात्त्विकत्यागफलं सर्वथा न सम्भवति । तस्मात् तादृशः त्यागः न श्रेयस्करः ।

कार्यमित्येव यत्कर्म नियतं क्रियतेऽर्जुन।
सङ्गं त्यक्त्वा फलं चैव स त्यागः सात्त्विको मतः ॥१८.९॥

पदच्छेदः - कार्यम्, इति, एव, यत्, कर्म, नियतम्, क्रियते, अर्जुन ।
सङ्गम्, त्यक्त्वा, फलम्, च, एव, सः, त्यागः, सात्त्विकः, मतः ॥

अन्वयः - अर्जुन ! सङ्गं फलं च एव त्यक्त्वा कार्यम् इति एव यत् नियतं कर्म क्रियते सः त्यागः सात्त्विकः मतः।

पदार्थः - अर्जुन = हे अर्जुन, सङ्गम् = आसक्तिम्, फलं च एव = प्रयोजनम् अपि, त्यक्त्वा = वर्जयित्वा, कार्यम् इति एव = कर्तव्यम् इति एव, यत् = यत्, नियतम् = नित्यम्, कर्म = क्रिया, क्रियते = आचर्यते, सः त्यागः = तादृशः त्यागः, सात्त्विकः = सत्त्वसम्बन्धी, मतः = इष्टः ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
अर्जुन	अ. पुं. सम्बो. एक.	सङ्गम्	अ. नपुं. द्वि. एक.
फलम्	अ. नपुं. द्वि. एक.	च	अव्ययम्
एव	अव्ययम्	त्यक्त्वा	क्त्वान्तम् अव्ययम्
कार्यम्	अ. नपुं. प्र. एक.	इति	अव्ययम्
यत्	यद् - द. सर्व. नपुं. प्र. एक. (विशेषणम्)	नियतम्	अ नपुं. प्र. एक. (विशेषणम्)
कर्म	कर्मन् - न. नपुं. प्र. एक. (विशेष्यम्)	क्रियते	कृ (डुकृञ् करणे) आत्म. कर्मणि लट्. प्रपु. एक.

सः	तद् - द. सर्व. पुं. प्र. एक. (विशेषणम्)	त्यागः	अ. पुं. प्र. एक. (विशेष्यम्)
सात्त्विकः	अ. पुं. प्र. एक. (विशेषणम्)	मतः	अ. पुं. प्र. एक. (विशेषणम्)

व्याकरणम् -

(क) सन्धिः	इत्येव	इति + एव	यण्सन्धिः ।
	क्रियतेऽर्जुन	क्रियते + अर्जुन	पूर्वरूपसन्धिः ।
	चैव	च + एव	वृद्धिसन्धिः ।
	स त्यागः	सः + त्यागः	विसर्गसन्धिः (लोपः) ।
	सात्त्विको मतः	सात्त्विकः + मतः	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः ।
(ख) कृदन्तः	कार्यम्	कृ (डुकृञ् करणे) + ण्यत् (कर्तव्यम् इत्यर्थः) ।	
	नियतम्	नि + यम् (यम उपरमे) + क्त (कर्मणि) ।	
	सङ्गम्	सञ्ज् (सञ्ज सङ्गे) + घञ् (भावे), तम् ।	
	त्यक्त्वा	त्यज् (त्यज हानौ) + क्त्वा ।	
	फलम्	फल् (फल निष्पत्तौ) + अच् ।	
	त्यागः	त्यज् (त्यज हानौ) + घञ् ।	
	मतः	मन् (मन ज्ञाने) + क्त (कर्मणि) ।	
(ग) तद्धितान्तः	सात्त्विकः	सत्त्व + ठञ् (सत्त्वगुणप्रधानः) ।	

भावस्पष्टीकरणम् -

मतः ।	
कः मतः ?	**त्यागः** मतः ।
त्यागः **कीदृशः** मतः ?	त्यागः **सात्त्विकः** मतः ।
कः त्यागः सात्त्विकः मतः ?	**सः** त्यागः सात्त्विकः मतः ।
कः सः त्यागः सात्त्विकः मतः ?	**(यः) क्रियते** सः त्यागः सात्त्विकः मतः ।
किं क्रियते सः त्यागः सात्त्विकः मतः ?	**कर्म** क्रियते सः त्यागः सात्त्विकः मतः ।
कीदृशं कर्म क्रियते सः त्यागः सात्त्विकः मतः ?	**नियतं** कर्म क्रियते सः त्यागः सात्त्विकः मतः ।
पुनः कीदृशं नियतं कर्म क्रियते सः त्यागः सात्त्विकः मतः ?	**कार्यम् इति एव यत्** नियतं कर्म क्रियते सः त्यागः सात्त्विकः मतः ।

किं कृत्वा कार्यम् इति एव यत् नियतं कर्म क्रियते सः त्यागः सात्त्विकः मतः ?	**त्यक्त्वा** कार्यम् इति एव यत् नियतं कर्म क्रियते सः त्यागः सात्त्विकः मतः ।
किं त्यक्त्वा कार्यम् इति एव यत् नियतं कर्म क्रियते सः त्यागः सात्त्विकः मतः ?	**सङ्गं** त्यक्त्वा कार्यम् इति एव यत् नियतं कर्म क्रियते सः त्यागः सात्त्विकः मतः ।
सङ्गं **पुनः किं** त्यक्त्वा कार्यम् इति एव यत् नियतं कर्म क्रियते सः त्यागः सात्त्विकः मतः ?	सङ्गं **फलं च एव** त्यक्त्वा कार्यम् इति एव यत् नियतं कर्म क्रियते सः त्यागः सात्त्विकः मतः ।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**अर्जुन !**

तात्पर्यम् - हे अर्जुन ! अहं करोमि इति कर्तृत्वाभिनिवेशं विना, फलापेक्षां च विना मया इदम् अवश्यं कर्तव्यम् इति बुद्ध्या यः कर्म करोति तत्र यः कर्तृत्वाभिनिवेशस्य तथा फलस्य त्यागः सः सात्त्विकः त्यागः इत्युच्यते।

न द्वेष्ट्यकुशलं कर्म कुशले नानुषज्जते।
त्यागी सत्त्वसमाविष्टो मेधावी छिन्नसंशयः ॥१८.१०॥

पदच्छेदः - न, द्वेष्टि, अकुशलम्, कर्म, कुशले, न, अनुषज्जते ।
त्यागी, सत्त्वसमाविष्टः, मेधावी, छिन्नसंशयः ॥

अन्वयः - सत्त्वसमाविष्टः छिन्नसंशयः मेधावी त्यागी अकुशलं कर्म न द्वेष्टि । कुशले न अनुषज्जते ।

पदार्थः - सत्त्वसमाविष्टः = सत्त्वोद्रेकसम्पन्नः, छिन्नसंशयः = अपगतसन्देहः, मेधावी = बुद्धिमान्, त्यागी = त्यागयुक्तः, अकुशलम् = अशोभनम्, कर्म = क्रियाम् (क्रियायाम्), न द्वेष्टि = द्वेषं न करोति, कुशले = शोभने, न अनुषज्जते = प्रीतिं न करोति ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
सत्त्वसमाविष्टः	अ. पुं. प्र. एक. (विशेषणम्)	छिन्नसंशयः	अ. पुं. प्र. एक. (विशेषणम्)
मेधावी	मेधाविन् - न. पुं. प्र. एक. (विशेषणम्)	त्यागी	त्यागिन् - न. पुं. प्र. एक. (विशेष्यम्)
अकुशलम्	अ. नपुं. द्वि. एक. (विशेषणम्)	कर्म	कर्मन् - न. नपुं. द्वि. एक. (विशेष्यम्)

न	अव्ययम्	द्वेष्टि	द्विष् (द्विष अप्रीतौ) पर. कर्तरि लट्. प्रपु. एक.
कुशले	अ. नपुं. स. एक.	अनुषज्जते	अनु + सज्ज् (षस्ज गतौ) आत्म. कर्तरि लट्. प्रपु. एक.

व्याकरणम् -

(क) सन्धिः	द्वेष्ट्यकुशलम्	द्वेष्टि + अकुशलम्	यण्सन्धिः।
	नानुषज्जते	न + अनुषज्जते	सवर्णदीर्घसन्धिः।
	सत्त्वसमाविष्टो मेधावी	सत्त्वसमाविष्टः + मेधावी	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः।
(ख) समासः	अकुशलम्	न कुशलम् अकुशलम् - नञ्तत्पुरुषः।	
	सत्त्वसमाविष्टः	सत्त्वेन समाविष्टः सत्त्वसमाविष्टः - तृतीयातत्पुरुषः।	
	छिन्नसंशयः	छिन्नः संशयः यस्य सः छिन्नसंशयः - बहुव्रीहिः।	
(ग) कृदन्तः	समाविष्टः	सम् + आ + विश् (विश प्रवेशने) + क्त (कर्तरि)।	
	छिन्नः	छिद् (छिदिर् द्वैधीकरणे) + क्त (कर्तरि)।	
(घ) तद्धितान्तः	त्यागी	त्यज् (त्यज हानौ) + इनि (त्यागः अस्य अस्मिन् वा अस्ति इत्यर्थः)।	
	मेधावी	मेधा + विनि (मतुबर्थे), मेधा अस्य अस्मिन् वा अस्ति।	

भावस्पष्टीकरणम् -

न द्वेष्टि।	
किं न द्वेष्टि ?	**कर्म** न द्वेष्टि।
कीदृशं कर्म न द्वेष्टि ?	**अकुशलं** कर्म न द्वेष्टि।
कः अकुशलं कर्म न द्वेष्टि ?	**सत्त्वसमाविष्टः** अकुशलं कर्म न द्वेष्टि।
सत्त्वसमाविष्टः **पुनः कः** अकुशलं कर्म न द्वेष्टि ?	सत्त्वसमाविष्टः **छिन्नसंशयः** अकुशलं कर्म न द्वेष्टि।
सत्त्वसमाविष्टः छिन्नसंशयः **पुनः कः** अकुशलं कर्म न द्वेष्टि ?	सत्त्वसमाविष्टः छिन्नसंशयः **मेधावी** अकुशलं कर्म न द्वेष्टि।

सत्त्वसमाविष्टः छिन्नसंशयः मेधावी **पुनः कः** अकुशलं कर्म न द्वेष्टि ?	सत्त्वसमाविष्टः छिन्नसंशयः मेधावी **त्यागी** अकुशलं कर्म न द्वेष्टि।
सत्त्वसमाविष्टः छिन्नसंशयः मेधावी त्यागी अकुशलं कर्म न द्वेष्टि **पुनः किम्** ?	सत्त्वसमाविष्टः छिन्नसंशयः मेधावी त्यागी अकुशलं कर्म न द्वेष्टि **न अनुषज्जते**।
सत्त्वसमाविष्टः छिन्नसंशयः मेधावी त्यागी अकुशलं कर्म न द्वेष्टि **कस्मिन्** न अनुषज्जते ?	सत्त्वसमाविष्टः छिन्नसंशयः मेधावी त्यागी अकुशलं कर्म न द्वेष्टि **कुशले** न अनुषज्जते।

तात्पर्यम् - सत्त्वगुणेन आविष्टः यः पुरुषः सः शैत्यकाले यत् प्रातःस्नानादि क्लेशकरं कर्म वर्तते तत्र न द्वेषं करोति, ग्रीष्मकाले तादृशमेव यत् सुखकरं कर्म वर्तते तत्र न प्रीतिं भजते। सः एव त्यागी, सः एव प्राज्ञः, सः एव च सन्देहरहितः।

न हि देहभृता शक्यं त्यक्तुं कर्माण्यशेषतः।
यस्तु कर्मफलत्यागी स त्यागीत्यभिधीयते॥१८.११॥

पदच्छेदः - न, हि, देहभृता, शक्यम्, त्यक्तुम्, कर्माणि, अशेषतः।
यः, तु, कर्मफलत्यागी, सः, त्यागी, इति, अभिधीयते॥

अन्वयः - देहभृता अशेषतः कर्माणि त्यक्तुं न हि शक्यं, यः तु कर्मफलत्यागी सः त्यागी इति अभिधीयते।

पदार्थः - देहभृता = शरीरधारिणा, अशेषतः = सर्वात्मना, कर्माणि = क्रियाः, त्यक्तुम् = वर्जयितुम्, न हि शक्यम् = अशक्यं खलु, यः तु = यः च, कर्मफलत्यागी = कर्मप्रयोजनत्यागी, सः = सः मानवः, त्यागी इति = त्यागयुक्तः इति, अभिधीयते = कथ्यते।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
देहभृता	देहभृत् - त. पुं. तृ. एक.	अशेषतः	अव्ययम्
कर्माणि	कर्मन् - न. नपुं. द्वि. बहु.	त्यक्तुम्	तुमुनन्तम् अव्ययम्
न	अव्ययम्	हि	अव्ययम्
शक्यम्	अ. पुं. प्र. एक. (विशेषणम्)	यः	यद् - द. सर्व. पुं. प्र. एक. (विशेषणम्)
तु	अव्ययम्	कर्मफलत्यागी	कर्मफलत्यागिन् - न. पुं. प्र. एक. (विशेषणम्)

सः	तद् - द. सर्व. पुं. प्र. एक. (विशेषणम्)	त्यागी	त्यागिन् - न. पुं. प्र. एक. (विशेष्यम्)
इति	अव्ययम्	अभिधीयते	अभि + धा (डुधाञ् धारणपोषणयोः) आत्म. कर्मणि लट्. प्रपु. एक.

व्याकरणम् -

(क) सन्धिः	कर्माण्यशेषतः	कर्माणि + अशेषतः	यण्सन्धिः।
	यस्तु	यः + तु	विसर्गसन्धिः (सकारः)।
	स त्यागी	सः + त्यागी	विसर्गसन्धिः (लोपः)।
	त्यागीति	त्यागी + इति	सवर्णदीर्घसन्धिः।
	इत्यभिधीयते	इति + अभिधीयते	यण्सन्धिः।
(ख) समासः	देहभृता	देहं बिभर्ति इति देहभृत्, तेन - कर्तरि क्विप् उपपदसमासश्च।	
	अशेषः	न शेषः अशेषः - नञ्तत्पुरुषः।	
	कर्मफलत्यागी	कर्मणां फलम् कर्मफलम् - षष्ठीतत्पुरुषः।	
		कर्मफलस्य त्यागी कर्मफलत्यागी - षष्ठीतत्पुरुषः।	
(ग) कृदन्तः	शक्यम्	शक् (शक्लृ शक्तौ) + यत्।	
	त्यक्तुम्	त्यज् (त्यज हानौ) + तुमुन्।	
	फलम्	फल् (फल निष्पत्तौ) + अच्।	
(घ) तद्धितान्तः	अशेषतः	अशेष + तसिल्।	
	त्यागी	त्याग + इनि (मतुबर्थे), त्यागः अस्य अस्मिन् वा अस्ति।	

भावस्पष्टीकरणम् -

न हि शक्यम्।	
किं कर्तुं न हि शक्यम्?	**त्यक्तुं** न हि शक्यम्।
कानि त्यक्तुं न हि शक्यम्?	**कर्माणि** त्यक्तुं न हि शक्यम्।
कस्मात् कर्माणि त्यक्तुं न हि शक्यम्?	**अशेषतः** कर्माणि त्यक्तुं न हि शक्यम्।
केन अशेषतः कर्माणि त्यक्तुं न हि शक्यम्?	**देहभृता** अशेषतः कर्माणि त्यक्तुं न हि शक्यम्।
देहभृता अशेषतः कर्माणि त्यक्तुं न हि शक्यं, **(तस्मात्) किम्**?	देहभृता अशेषतः कर्माणि त्यक्तुं न हि शक्यम्, **(तस्मात्) अभिधीयते**।

देहभृता अशेषतः कर्माणि त्यक्तुं न हि शक्यं, (तस्मात्) **कः** अभिधीयते ?	देहभृता अशेषतः कर्माणि त्यक्तुं न हि शक्यं, (तस्मात्) **त्यागी इति** अभिधीयते ।
देहभृता अशेषतः कर्माणि त्यक्तुं न हि शक्यं, **कः** त्यागी इति अभिधीयते ?	देहभृता अशेषतः कर्माणि त्यक्तुं न हि शक्यं, **सः** त्यागी इति अभिधीयते ।
देहभृता अशेषतः कर्माणि त्यक्तुं न हि शक्यं, **कः** सः त्यागी इति अभिधीयते ?	देहभृता अशेषतः कर्माणि त्यक्तुं न हि शक्यं, **यः** तु **कर्मफलत्यागी** सः त्यागी इति अभिधीयते ।

तात्पर्यम् - न हि केनापि पुरुषेण सर्वाणि कर्माणि त्यक्तुं शक्यन्ते। यदि त्यज्यन्ते तर्हि जीवनमेव दुष्करं भवति। तस्मात् कर्मणां फलं यः त्यजति सः एव त्यागी, नान्यः इति निर्णयः युक्तः ।

अनिष्टमिष्टं मिश्रं च त्रिविधं कर्मणः फलम्।
भवत्यत्यागिनां प्रेत्य न तु संन्यासिनां क्वचित्॥१८.१२॥

पदच्छेदः - अनिष्टम्, इष्टम्, मिश्रम्, च, त्रिविधम्, कर्मणः, फलम् ।
भवति, अत्यागिनाम्, प्रेत्य, न, तु, संन्यासिनाम्, क्वचित् ॥

अन्वयः - अनिष्टम् इष्टं मिश्रं च कर्मणः त्रिविधं फलम् अत्यागिनां प्रेत्य भवति संन्यासिनां तु न क्वचित् ।

पदार्थः - अनिष्टम् = अनभिमतम् (नरकादिकम्), इष्टम् = अभिमतम् (स्वर्गादिकम्), मिश्रं च = सङ्कीर्णम् (मनुष्यरूपम्), कर्मणः = क्रियायाः, त्रिविधम् = त्रिप्रकारकम्, फलम् = प्रयोजनम्, अत्यागिनाम् = त्यागरहितानाम्, प्रेत्य = मरणानन्तरम्, भवति = सम्पद्यते, संन्यासिनां तु = संन्यासवतां तु, न क्वचित् = कदापि न ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
अनिष्टम्	अ. नपुं. प्र. एक.	इष्टम्	अ. नपुं. प्र. एक.
मिश्रम्	अ. नपुं. प्र. एक.	च	अव्ययम्
कर्मणः	कर्मन् - न. नपुं. ष. एक.	त्रिविधम्	अ. नपुं. प्र. एक. (विशेषणम्)
फलम्	अ. नपुं. प्र. एक. (विशेष्यम्)	अत्यागिनाम्	अत्यागिन् - न. पुं. ष. बहु.

प्रेत्य	ल्यबन्तम् अव्ययम्	भवति	भू (भू सत्तायाम्) पर. कर्तरि लट्. प्रपु. एक.
संन्यासिनाम्	संन्यासिन् - न. पुं. ष. बहु.	तु	अव्ययम्
न	अव्ययम्	क्वचित्	अव्ययम्

व्याकरणम् -

(क) सन्धिः भवत्यत्यागिनाम् भवति + अत्यागिनाम् यण्सन्धिः ।

(ख) समासः अनिष्टम् न इष्टम् अनिष्टम् - नञ्तत्पुरुषः ।

त्रिविधम् तिस्रः विधाः यस्य तत् त्रिविधम् - बहुव्रीहिः ।

अत्यागिनाम् न त्यागिनः अत्यागिनः, तेषाम् - नञ्तत्पुरुषः ।

(ग) कृदन्तः इष्टम् इष् (इषु इच्छायाम्) क्त (कर्मणि) ।

फलम् फल् (फल निष्पत्तौ) + अच् ।

प्रेत्य प्र + इ (इण् गतौ) + ल्यप् ।

(घ) तद्धितान्तः संन्यासिनाम् संन्यास + इनि (मतुबर्थे), तेषाम् (संन्यासः अस्य अस्मिन् वा अस्ति) ।

भावस्पष्टीकरणम् -

भवति ।	
किं भवति ?	**फलं** भवति ।
कस्य फलं भवति ?	**कर्मणः** फलं भवति ।
कर्मणः **कतिविधं** फलं भवति ?	कर्मणः **त्रिविधं** फलं भवति ।
कर्मणः **कीदृशं** त्रिविधं फलं भवति ?	कर्मणः **अनिष्टम् इष्टं मिश्रं च** त्रिविधं फलं भवति ।
कर्मणः अनिष्टम् इष्टं मिश्रं च त्रिविधं फलं **केषां** भवति ?	कर्मणः अनिष्टम् इष्टं मिश्रं च त्रिविधं फलम् **अत्यागिनां** भवति ।
कर्मणः अनिष्टम् इष्टं मिश्रं च त्रिविधं फलम् अत्यागिनां **कदा** भवति ?	कर्मणः अनिष्टम् इष्टं मिश्रं च त्रिविधं फलम् अत्यागिनां **प्रेत्य** भवति ।
कर्मणः अनिष्टम् इष्टं मिश्रं च त्रिविधं फलम् अत्यागिनां प्रेत्य भवति, **पुनः संन्यासिनां किम्** ?	कर्मणः अनिष्टम् इष्टं मिश्रं च त्रिविधं फलम् अत्यागिनां प्रेत्य भवति, **संन्यासिनां तु न क्वचित्** ।

तात्पर्यम् - ये तु कर्मफलम् अपेक्ष्य कर्म कुर्वन्ति ते सकामाः। तेषां कर्मफलं यदि पुण्यं तर्हि देवत्वम्, यदि पुनः पापं तर्हि नारकित्वम्, अथ उभयं तर्हि मनुष्यत्वम् इति फलविभागः। ये पुनः फलापेक्षां विना भगवदर्पणबुद्ध्या कर्म कुर्वन्ति ते संन्यासिनः। तेषां तु ईदृशं फलं न सम्भवति एव। तेषां मोक्षः एव फलम्।

पञ्चैतानि महाबाहो कारणानि निबोध मे।
साङ्ख्ये कृतान्ते प्रोक्तानि सिद्धये सर्वकर्मणाम्॥१८.१३॥

पदच्छेदः - पञ्च, एतानि, महाबाहो, कारणानि, निबोध, मे।
साङ्ख्ये, कृतान्ते, प्रोक्तानि, सिद्धये, सर्वकर्मणाम्॥

अन्वयः - महाबाहो ! साङ्ख्ये कृतान्ते सर्वकर्मणां सिद्धये प्रोक्तानि एतानि पञ्च कारणानि मे निबोध।

पदार्थः - महाबाहो = दीर्घबाहो, साङ्ख्ये = वेदान्ते, कृतान्ते = सिद्धान्ते (कर्मसमाप्तिविशिष्टे), सर्वकर्मणाम् = सकलक्रियाणाम्, सिद्धये = प्राप्तये, प्रोक्तानि = निर्दिष्टानि, एतानि = इमानि, पञ्च कारणानि = पञ्च निमित्तानि, मे = मम वचनात्, निबोध = जानीहि।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
महाबाहो	उ. पुं. सम्बो. एक.	साङ्ख्ये	अ. पुं. स. एक. (विशेष्यम्)
कृतान्ते	अ. पुं. स. एक. (विशेषणम्)	सर्वकर्मणाम्	सर्वकर्मन् - न. नपुं. ष. बहु.
सिद्धये	इ. स्त्री. च. एक.	प्रोक्तानि	अ. नपुं. द्वि. बहु. (विशेषणम्)
एतानि	एतद् - द. सर्व. नपुं. द्वि. बहु. (विशेषणम्)	पञ्च	पञ्चन्- न. नपुं. द्वि. बहु. (विशेषणम्)
कारणानि	अ. नपुं. द्वि. बहु. (विशेषणम्)	मे	अस्मद् - द. सर्व. ष. एक.
निबोध	नि + बुध् (बुध अवगमने) पर. कर्तरि लोट्. मपु. एक.		

व्याकरणम् -

(क) सन्धिः पञ्चैतानि — पञ्च + एतानि — वृद्धिसन्धिः।

(ख) समासः महाबाहो — महान्तौ बाहू यस्य सः महाबाहुः, तत्सम्बुद्धौ - बहुव्रीहिः।
कृतान्ते — कृतानाम् (कर्मणाम्) अन्तः समाप्तिः यत्र सः कृतान्तः, तस्मिन् - बहुव्रीहिः।
सर्वकर्मणाम् — सर्वाणि कर्माणि सर्वकर्माणि, तेषाम् - कर्मधारयः।

(ग) कृदन्तः कारणानि — कृ (डुकृञ् करणे) + णिच् + ल्युट्।
प्रोक्तानि — प्र + वच् (वच परिभाषणे) + क्त, तानि (कर्मणि)।
सिद्धये — सिध् (षिधु संराद्धौ) + क्तिन्, तस्यै।

(घ) तद्धितान्तः साङ्ख्ये — सङ्ख्या + अण्, तस्मिन्।

भावस्पष्टीकरणम् -

निबोध।	
कानि निबोध ?	**कारणानि** निबोध।
कति कारणानि निबोध ?	**पञ्च** कारणानि निबोध।
कानि पञ्च कारणानि निबोध ?	**एतानि** पञ्च कारणानि निबोध।
कीदृशानि एतानि पञ्च कारणानि निबोध ?	**प्रोक्तानि** एतानि पञ्च कारणानि निबोध।
किमर्थं प्रोक्तानि एतानि पञ्च कारणानि निबोध ?	**सिद्धये** प्रोक्तानि एतानि पञ्च कारणानि निबोध।
केषां सिद्धये प्रोक्तानि एतानि पञ्च कारणानि निबोध ?	**सर्वकर्मणां** सिद्धये प्रोक्तानि एतानि पञ्च कारणानि निबोध।
कदा सर्वकर्मणां सिद्धये प्रोक्तानि एतानि पञ्च कारणानि निबोध ?	**कृतान्ते** सर्वकर्मणां सिद्धये प्रोक्तानि एतानि पञ्च कारणानि निबोध।
कुत्र कृतान्ते सर्वकर्मणां सिद्धये प्रोक्तानि एतानि पञ्च कारणानि निबोध ?	**साङ्ख्ये** कृतान्ते सर्वकर्मणां सिद्धये प्रोक्तानि एतानि पञ्च कारणानि निबोध।
साङ्ख्ये कृतान्ते सर्वकर्मणां सिद्धये प्रोक्तानि एतानि पञ्च कारणानि **कस्य (वचनात्)** निबोध ?	साङ्ख्ये कृतान्ते सर्वकर्मणां सिद्धये प्रोक्तानि एतानि पञ्च कारणानि **मे (वचनात्)** निबोध।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**महाबाहो !**

तात्पर्यम् - अर्जुन ! सर्वेषां कर्मणां यत्र परिसमाप्तिः भवति तादृशे वेदान्ते सर्वकर्मणां सिद्धये निर्णीतानि पञ्च कारणानि मम वचनात् जानीहि।

अधिष्ठानं तथा कर्ता करणं च पृथग्विधम्।
विविधाश्च पृथक्चेष्टा दैवं चैवात्र पञ्चमम्॥१८.१४॥

पदच्छेदः - अधिष्ठानम्, तथा, कर्ता, करणम्, च, पृथग्विधम्।
विविधाः, च, पृथक्चेष्टाः, दैवम्, च, एव, अत्र, पञ्चमम्॥

अन्वयः - अधिष्ठानं तथा कर्ता पृथग्विधं करणं च विविधाः च पृथक्चेष्टाः अत्र च एव पञ्चमं दैवम्।

पदार्थः - अधिष्ठानम् = शरीरम्, तथा = तेन प्रकारेण, कर्ता = कारकः, पृथग्विधम् = नानाप्रकारकम्, करणं च = इन्द्रियं च, विविधाः च = भिन्नप्रकाराः, पृथक्चेष्टाः = नानाव्यापाराः, अत्र = तेषु, च एव पञ्चमम् = पञ्चमम् एव, दैवम् = दिष्टम् (पूर्वकृतशुभाशुभकर्माणि)।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
अधिष्ठानम्	अ. नपुं. प्र. एक.	तथा	अव्ययम्
कर्ता	ऋ. पुं. प्र. एक.	पृथग्विधम्	अ. नपुं. प्र. एक. (विशेषणम्)
करणम्	अ. नपुं. प्र. एक. (विशेष्यम्)	च	अव्ययम्
विविधाः	आ. स्त्री. प्र. बहु. (विशेषणम्)	पृथक्चेष्टाः	आ. स्त्री. प्र. बहु. (विशेष्यम्)
अत्र	अव्ययम्	एव	अव्ययम्
पञ्चमम्	अ. नपुं. प्र. एक. (विशेषणम्)	दैवम्	अ. नपुं. प्र. एक. (विशेष्यम्)

व्याकरणम् -

(क) सन्धिः	विविधाश्च	विविधाः + च	विसर्गसन्धिः (सकारः) श्चुत्वम्।
	पृथक्चेष्टा दैवम्	पृथक्चेष्टाः + दैवम्	विसर्गसन्धिः (लोपः)।
	चैव	च + एव	वृद्धिसन्धिः।
	एवात्र	एव + अत्र	सवर्णदीर्घसन्धिः।
(ख) समासः	पृथग्विधम्	पृथक् विधा यस्य तत् पृथग्विधम् - बहुव्रीहिः।	
(ग) कृदन्तः	अधिष्ठानम्	अधि + स्था (ष्ठा गतिनिवृत्तौ) + ल्युट्।	
	कर्ता	कृ (डुकृञ् करणे) + तृच्।	
	करणम्	कृ (डुकृञ् करणे) + ल्युट्।	
(घ) तद्धितान्तः	दैवम्	देव + अण् (देवस्य इदम् इत्यर्थे स्वार्थे अण्)।	

भावस्पष्टीकरणम् -

दैवम्।	
किं दैवम् ?	**पञ्चमं दैवम्।**
कुत्र पञ्चमं दैवम् ?	**अत्र च एव पञ्चमं दैवम्।**

पुनः कुत्र अत्र च एव पञ्चमं दैवम् ?	**अधिष्ठानं तथा कर्ता पृथग्विधं करणं च विविधाः च पृथक्चेष्टाः** इति अत्र च एव पञ्चमं दैवम् ।

तात्पर्यम् - शरीरम्, अहङ्कारः, नेत्रश्रोत्रादीनि ज्ञानसम्बन्धीनि, वाक्पादादीनि कर्मसम्बन्धीनि, मनश्च इति एकादश इन्द्रियाणि, कार्यतः स्वरूपतश्च भिन्नरूपाः प्राणापानादीनां व्यापाराः तथा एतेषां प्रेरकं दैवम् इति एतानि पञ्च सर्वेषां कर्मणां सिद्धौ कारणानि ।

शरीरवाङ्मनोभिर्यत्कर्म प्रारभते नरः ।
न्याय्यं वा विपरीतं वा पञ्चैते तस्य हेतवः ॥१८.१५॥

पदच्छेदः - शरीरवाङ्मनोभिः, यत्, कर्म, प्रारभते, नरः ।
न्याय्यम्, वा, विपरीतम्, वा, पञ्च, एते, तस्य, हेतवः ॥

अन्वयः - नरः शरीरवाङ्मनोभिः न्याय्यं वा विपरीतं वा यत् कर्म प्रारभते तस्य एते पञ्च हेतवः ।

पदार्थः - नरः = मानवः, शरीरवाङ्मनोभिः = कायवाक्चित्तैः, न्याय्यं वा = धर्म्यं वा, विपरीतं वा = अधर्म्यं वा, यत् कर्म = यां क्रियां प्रारभते = करोति, तस्य = तस्य कर्मणः, एते पञ्च = इमे पञ्च, हेतवः = कारणभूताः ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
नरः	अ. पुं. प्र. एक.	शरीरवाङ्मनोभिः	शरीरवाङ्मनस् - स. नपुं. तृ. बहु.
न्याय्यम्	अ. नपुं. द्वि. एक. (विशेषणम्)	वा	अव्ययम्
विपरीतम्	अ. नपुं. द्वि. एक. (विशेषणम्)	यत्	यद् - द. सर्व. नपुं. द्वि. एक. (विशेषणम्)
कर्म	कर्मन् - न. नपुं. द्वि. एक. (विशेष्यम्)	प्रारभते	प्र + आ + रभ् (रभ राभस्ये) आत्म. कर्तरि लट्. प्रपु. एक.
तस्य	तद् - द. सर्व. पुं. ष. एक. (विशेषणम्)	एते	एतद् - द. सर्व. पुं. प्र. बहु. (विशेषणम्)
पञ्च	अव्ययम् (विशेषणम्)	हेतवः	उ. पुं. प्र. बहु. (विशेष्यम्)

व्याकरणम् -

(क) सन्धिः	शरीरवाङ्मनोभिर्यत्	शरीरवाङ्मनोभिः + यत्	विसर्गसन्धिः (रेफः)।
	पञ्चैते	पञ्च + एते	वृद्धिसन्धिः।
(ख) समासः	शरीरवाङ्मनोभिः	शरीरं च वाक् च मनश्च शरीरवाङ्मनांसि, तैः - द्वन्द्वः।	
(ग) कृदन्तः	नरः	नॄ (नॄ नये) + अच्।	
	विपरीतम्	वि + परि + इ (इण् गतौ) + क्त (कर्तरि), तत्।	
(घ) तद्धितान्तः	न्याय्यम्	न्याय + यत्, न्यायात् अनपेतम् न्याय्यम् (अनपेतार्थे यत्, युक्तमिति पर्यवसितोऽर्थः)।	

भावस्पष्टीकरणम् -

हेतवः।	
कति हेतवः ?	**पञ्च** हेतवः।
के पञ्च हेतवः ?	**एते** पञ्च हेतवः।
कस्य एते पञ्च हेतवः ?	**तस्य** एते पञ्च हेतवः।
कस्य तस्य एते पञ्च हेतवः ?	**यत् प्रारभते** तस्य एते पञ्च हेतवः।
यत् **किं** प्रारभते तस्य एते पञ्च हेतवः ?	यत् **कर्म** प्रारभते तस्य एते पञ्च हेतवः।
कीदृशं यत् कर्म प्रारभते तस्य एते पञ्च हेतवः ?	**न्याय्यं वा** यत् कर्म प्रारभते तस्य एते पञ्च हेतवः।
न्याय्यं वा **कीदृशं** यत् कर्म प्रारभते तस्य एते पञ्च हेतवः ?	न्याय्यं वा **विपरीतं वा** यत् कर्म प्रारभते तस्य एते पञ्च हेतवः।
कः न्याय्यं वा विपरीतं वा यत् कर्म प्रारभते तस्य एते पञ्च हेतवः ?	**नरः** न्याय्यं वा विपरीतं वा यत् कर्म प्रारभते तस्य एते पञ्च हेतवः।
नरः **कैः** न्याय्यं वा विपरीतं वा यत् कर्म प्रारभते तस्य एते पञ्च हेतवः ?	नरः **शरीरवाङ्मनोभिः** न्याय्यं वा विपरीतं वा यत् कर्म प्रारभते तस्य एते पञ्च हेतवः।

तात्पर्यम् - सर्वकर्मसिद्धौ पञ्च कारणानि इत्युक्तम्। तैः जायमानानि कर्माणि प्रकारान्तरेण कायिकं वाचिकं मानसिकं चेति त्रिधा विभक्तुं शक्यानि। तच्च त्रिविधं कर्म धर्म्यम् अधर्म्यं वा भवितुम् अर्हति।

तत्रैवं सति कर्तारमात्मानं केवलं तु यः।
पश्यत्यकृतबुद्धित्वान्न स पश्यति दुर्मतिः ॥१८.१६॥

पदच्छेदः - तत्र, एवम्, सति, कर्तारम्, आत्मानम्, केवलम्, तु, यः।
पश्यति, अकृतबुद्धित्वात्, न, सः, पश्यति, दुर्मतिः ॥

अन्वयः - तत्र एवं सति यः अकृतबुद्धित्वात् कर्तारं केवलम् आत्मानं तु पश्यति दुर्मतिः सः न पश्यति।

पदार्थः - तत्र = तस्मिन् प्रसङ्गे, एवम् = इत्थम्, सति = विद्यमाने, यः = यः मानवः, अकृतबुद्धित्वात् = असंस्कृतबुद्धित्वात्, कर्तारम् = आचरितारम्, केवलम् = शुद्धम्, आत्मानम् = स्वम्, तु पश्यति = ईक्षते, दुर्मतिः = दुष्टबुद्धिः, सः = सः मानवः, न पश्यति = न अवलोकते।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
तत्र	अव्ययम्	एवम्	अव्ययम्
सति	सत् - त. पुं. स. एक.	यः	यद् - द. सर्व. पुं. प्र. एक. (विशेषणम्)
अकृतबुद्धित्वात्	अ. पुं. पं. एक.	कर्तारम्	ऋ. पुं. द्वि. एक. (विशेषणम्)
केवलम्	अव्ययम्	आत्मानम्	आत्मन् - न. पुं. द्वि. एक. (विशेष्यम्)
तु	अव्ययम्	पश्यति	पश्य् (दृशिर् प्रेक्षणे) पर. कर्तरि लट्. प्रपु. एक.
दुर्मतिः	इ. स्त्री. प्र. एक. (विशेषणम्)	सः	तद् - द. सर्व. पुं. प्र. एक. (विशेषणम्)
न	अव्ययम्		

व्याकरणम् -

(क) सन्धिः	तत्रैवम्	तत्र + एवम्	वृद्धिसन्धिः।
	पश्यत्यकृतबुद्धित्वात्	पश्यति + अकृतबुद्धित्वात्	यण्सन्धिः।
	अकृतबुद्धित्वान्न	अकृतबुद्धित्वात् + न	अनुनासिकसन्धिः।
	स पश्यति	सः + पश्यति	विसर्गसन्धिः (लोपः)।

(ख) समासः अकृतबुद्धित्वात् — कृता बुद्धिः यस्य सः कृतबुद्धिः - बहुव्रीहिः।
न कृतबुद्धिः अकृतबुद्धिः - नञ्तत्पुरुषः।
अकृतबुद्धेः भावः अकृतबुद्धित्वम्, तस्मात् - भावार्थे त्वप्रत्ययः।

दुर्मतिः — दुष्टा मतिः यस्य सः दुर्मतिः - बहुव्रीहिः।

(ग) कृदन्तः सति — अस् (अस भुवि) + शतृ, तस्मिन्।
कर्तारम् — कृ (डुकृञ् करणे) + तृच्, तम्।
मतिः — मन् (मन ज्ञाने) + क्तिन्।

भावस्पष्टीकरणम् -

पश्यति।	
कं पश्यति ?	**आत्मानं तु** पश्यति।
कम् आत्मानं तु पश्यति ?	**कर्तारं केवलम्** आत्मानं तु पश्यति।
कुतः कर्तारं केवलम् आत्मानं तु पश्यति ?	**अकृतबुद्धित्वात्** कर्तारं केवलम् आत्मानं तु पश्यति।
कः अकृतबुद्धित्वात् कर्तारं केवलम् आत्मानं तु पश्यति ?	**यः** अकृतबुद्धित्वात् कर्तारं केवलम् आत्मानं तु पश्यति।
कुत्र यः अकृतबुद्धित्वात् कर्तारं केवलम् आत्मानं तु पश्यति ?	**तत्र एवं सति** यः अकृतबुद्धित्वात् कर्तारं केवलम् आत्मानं तु पश्यति।
तत्र एवं सति यः अकृतबुद्धित्वात् कर्तारं केवलम् आत्मानं तु पश्यति **सः किम्** ?	तत्र एवं सति यः अकृतबुद्धित्वात् कर्तारं केवलम् आत्मानं तु पश्यति **सः न पश्यति**।
तत्र एवं सति यः अकृतबुद्धित्वात् कर्तारं केवलम् आत्मानं तु पश्यति **कीदृशः** सः न पश्यति ?	तत्र एवं सति यः अकृतबुद्धित्वात् कर्तारं केवलम् आत्मानं तु पश्यति **दुर्मतिः** सः न पश्यति।

तात्पर्यम् - एवं सर्वकर्मसिद्धौ पञ्च कारणानि इति स्थितौ यः पुरुषः सर्वेषां कर्मणां कर्ता अहम् (आत्मा) इति चिन्तयति तस्य शास्त्रोपदेशेन बुद्धिरेव न संस्कृता इति निर्णयः। ततश्च सः जानन्नपि न जानाति इत्येव बोद्धव्यम्।

यस्य नाहङ्कृतो भावो बुद्धिर्यस्य न लिप्यते।
हत्वापि स इमान् लोकान्न हन्ति न निबध्यते ॥१८.१७॥

पदच्छेदः - यस्य, न, अहङ्कृतः, भावः, बुद्धिः, यस्य, न, लिप्यते।
हत्वा, अपि, सः, इमान्, लोकान्, न, हन्ति, न, निबध्यते ॥

अन्वयः - यस्य अहङ्कृतः भावः न, यस्य बुद्धिः न लिप्यते सः इमान् लोकान् हत्वा अपि न हन्ति, न निबध्यते।

पदार्थः - यस्य = यस्य जनस्य, अहङ्कृतः = अहं कर्ता इति, भावः = अभिप्रायः, न = नास्ति, यस्य = यस्य

मानवस्य, बुद्धिः = अन्तःकरणम्, न लिप्यते = न कलुषी भवति, सः = सः जनः, इमान् = एतान्, लोकान् = प्राणिनः, हत्वा अपि = विनाश्य अपि, न हन्ति = न नाशयति, न निबध्यते = न बद्धो भवति।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
यस्य	यद् - द. सर्व. पुं. ष. एक. (विशेषणम्)	अहङ्कृतः	अहङ्कृत् - त. पुं. ष. एक. (विशेषणम्)
भावः	अ. पुं. प्र. एक.	न	अव्ययम्
बुद्धिः	इ. स्त्री. प्र. एक.	लिप्यते	लिप् (लिप उपदेहे) आत्म. कर्मणि लट्. प्रपु. एक.
सः	तद् - द. सर्व. पुं. प्र. एक. (विशेषणम्)	इमान्	इदम् - म. सर्व. पुं. द्वि. बहु. (विशेषणम्)
लोकान्	अ. पुं. द्वि. बहु. (विशेष्यम्)	हत्वा	क्त्वान्तम् अव्ययम्
अपि	अव्ययम्	हन्ति	हन् (हन हिंसागत्योः) पर. कर्तरि लट्. प्रपु. एक.
निबध्यते	नि + बन्ध् (बन्ध बन्धने) पर. कर्मणि लट्. प्रपु. एक.		

व्याकरणम् -

(क) सन्धिः	नाहङ्कृतः	न + अहङ्कृतः	सवर्णदीर्घसन्धिः।
	अहङ्कृतो भावः	अहङ्कृतः + भावः	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः।
	भावो बुद्धिः	भावः + बुद्धिः	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः।
	बुद्धिर्यस्य	बुद्धिः + यस्य	विसर्गसन्धिः (रेफः)।
	हत्वापि	हत्वा + अपि	सवर्णदीर्घसन्धिः।
	स इमान्	सः + इमान्	विसर्गसन्धिः (लोपः)।
(ख) समासः	अहङ्कृतः	अहं करोमि इति अहङ्कृत्, तस्य - कर्तरि क्विप् उपपदसमासश्च।	
(ग) कृदन्तः	भावः	भू (भू सत्तायाम्) + घञ्।	
	बुद्धिः	बुध् (बुध अवगमने) + क्तिन्।	
	हत्वा	हन् (हन हिंसागत्योः) + क्त्वा।	
	लोकान्	लोक् (लोकृ दर्शने) + घञ्, तान्।	

भावस्पष्टीकरणम् -

न हन्ति ।	
कः न हन्ति ?	**सः** न हन्ति ।
कीदृशः सः न हन्ति ?	**यस्य अहङ्कृतः भावः न** सः न हन्ति ।
यस्य अहङ्कृतः भावः न **पुनः कीदृशः** सः न हन्ति ?	यस्य अहङ्कृतः भावः न, **यस्य बुद्धिः न लिप्यते** सः न हन्ति ।
यस्य अहङ्कृतः भावः न, यस्य बुद्धिः न लिप्यते सः **कान्** न हन्ति ?	यस्य अहङ्कृतः भावः न, यस्य बुद्धिः न लिप्यते सः **लोकान्** न हन्ति ।
यस्य अहङ्कृतः भावः न, यस्य बुद्धिः न लिप्यते सः **कान्** लोकान् न हन्ति ?	यस्य अहङ्कृतः भावः न, यस्य बुद्धिः न लिप्यते सः **इमान्** लोकान् न हन्ति ?
यस्य अहङ्कृतः भावः न, यस्य बुद्धिः न लिप्यते सः इमान् लोकान् **किं कृत्वा** न हन्ति ?	यस्य अहङ्कृतः भावः न, यस्य बुद्धिः न लिप्यते सः इमान् लोकान् **हत्वा अपि** न हन्ति ।
यस्य अहङ्कृतः भावः न, यस्य बुद्धिः न लिप्यते सः इमान् लोकान् हत्वा अपि न हन्ति **पुनः किम्** ?	यस्य अहङ्कृतः भावः न, यस्य बुद्धिः न लिप्यते सः इमान् लोकान् हत्वा अपि न हन्ति, **न निबध्यते** ।

तात्पर्यम् - यस्य सर्वेषां कर्मणां कर्ता अहं न इति अभिप्रायो वर्तते, यस्य च अन्तःकरणम् इदम् इष्टम् इदं च अनिष्टमिति विचार्य कर्मसु न प्रवर्तते सः चेतनान् मारयन्नपि न मारणप्रयुक्तं पापं प्राप्नोति । तस्मात् सः कदापि न संसारे बद्धो भवति ।

ज्ञानं ज्ञेयं परिज्ञाता त्रिविधा कर्मचोदना ।
करणं कर्म कर्तेति त्रिविधः कर्मसङ्ग्रहः ॥१८.१८॥

पदच्छेदः - ज्ञानम्, ज्ञेयम्, परिज्ञाता, त्रिविधा, कर्मचोदना ।
करणम्, कर्म, कर्ता, इति, त्रिविधः, कर्मसङ्ग्रहः ॥

अन्वयः - ज्ञानं ज्ञेयं परिज्ञाता इति कर्मचोदना त्रिविधा । करणं कर्म कर्ता इति कर्मसङ्ग्रहः त्रिविधः ।

पदार्थः - ज्ञानम् = सर्वविषयज्ञानम्, ज्ञेयम् = ज्ञातव्यम्, परिज्ञाता इति = वेदिता इति, कर्मचोदना = कर्मप्रवर्तना, त्रिविधा = त्रिप्रकारा, करणम् = साधनम्, कर्म = क्रिया, कर्ता इति = आचरिता इति, कर्मसङ्ग्रहः = कर्मप्रकारः, त्रिविधः = त्रिप्रकारः ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
ज्ञानम्	अ. नपुं. प्र. एक.	ज्ञेयम्	अ. नपुं. प्र. एक.
परिज्ञाता	ऋ. पुं. प्र. एक.	इति	अव्ययम्
कर्मचोदना	आ. स्त्री. प्र. एक. (विशेष्यम्)	त्रिविधा	आ. स्त्री. प्र. एक. (विशेषणम्)
करणम्	अ. नपुं. प्र. एक.	कर्म	कर्मन् - न. नपुं. प्र. एक.
कर्ता	ऋ. पुं. प्र. एक.	कर्मसङ्ग्रहः	अ. पुं. प्र. एक. (विशेष्यम्)
त्रिविधः	अ. पुं. प्र. एक. (विशेषणम्)		

व्याकरणम् -

(क) सन्धिः	कर्तेति	कर्ता + इति	गुणसन्धिः ।
(ख) समासः	त्रिविधा	तिस्रः विधाः यस्याः सा त्रिविधा - बहुव्रीहिः ।	
	कर्मचोदना	कर्मणः चोदना कर्मचोदना - षष्ठीतत्पुरुषः ।	
	कर्मसङ्ग्रहः	सङ्गृह्यते अत्र इति सङ्ग्रहः - अधिकरणे अच् ।	
		कर्मणः सङ्ग्रहः कर्मसङ्ग्रहः - षष्ठीतत्पुरुषः ।	
(ग) कृदन्तः	ज्ञानम्	ज्ञा (ज्ञा अवबोधने) + ल्युट् ।	
	ज्ञेयम्	ज्ञा (ज्ञा अवबोधने) + यत् ।	
	परिज्ञाता	परि + ज्ञा (ज्ञा अवबोधने) + तृच् ।	
	चोदना	चुद् (चुद सञ्चोदने) + ल्युट् + टाप् (स्त्रियाम्) ।	
	करणम्	कृ (डुकृञ् करणे) + ल्युट् ।	
	कर्ता	कृ (डुकृञ् करणे) + तृच् ।	

भावस्पष्टीकरणम् -

कर्मचोदना ।	
कर्मचोदना **कतिविधा** ?	कर्मचोदना **त्रिविधा ।**
कीदृशी कर्मचोदना त्रिविधा ?	**ज्ञानं ज्ञेयं परिज्ञाता इति** कर्मचोदना त्रिविधा ।
ज्ञानं ज्ञेयं परिज्ञाता इति कर्मचोदना त्रिविधा **पुनः कर्मसङ्ग्रहः कतिविधः** ?	ज्ञानं ज्ञेयं परिज्ञाता इति कर्मचोदना त्रिविधा **पुनः कर्मसङ्ग्रहः त्रिविधः ।**

ज्ञानं ज्ञेयं परिज्ञाता इति कर्मचोदना त्रिविधा, **कीदृशः** कर्मसङ्ग्रहः त्रिविधः ?	ज्ञानं ज्ञेयं परिज्ञाता इति कर्मचोदना त्रिविधा, **करणं कर्म कर्ता इति** कर्मसङ्ग्रहः त्रिविधः ।

तात्पर्यम् - ज्ञानं ज्ञेयं ज्ञाता चेति कर्मप्रवर्तकं त्रिविधम् । तत्र करणं स्रुगादि । कर्म ज्योतिष्टोमादि । कर्ता च तन्निर्वर्तकः पुरुषः इति विवेकः ।

ज्ञानं कर्म च कर्ता च त्रिधैव गुणभेदतः ।
प्रोच्यते गुणसङ्ख्याने यथावच्छृणु तान्यपि ॥१८.१९॥

पदच्छेदः - ज्ञानम्, कर्म, च, कर्ता, च, त्रिधा, एव, गुणभेदतः ।
प्रोच्यते, गुणसङ्ख्याने, यथावत्, शृणु, तानि, अपि ॥

अन्वयः - ज्ञानं कर्म च कर्ता च गुणभेदतः त्रिधा एव गुणसङ्ख्याने प्रोच्यते तानि अपि यथावत् शृणु ।

पदार्थः - ज्ञानम् = सर्वविषयज्ञानम्, कर्म च = क्रिया च, कर्ता च = आचरिता च, गुणभेदतः = सत्त्वादिगुणभेदात्, त्रिधा एव = प्रकारत्रयेण एव, गुणसङ्ख्याने = साङ्ख्यशास्त्रे, प्रोच्यते = कथ्यते, तानि अपि = ते प्रकाराः अपि, यथावत् = यथातथम्, शृणु = आकर्णय ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
ज्ञानम्	अ. नपुं. प्र. एक.	कर्म	कर्मन् - न. नपुं. प्र. एक.
च	अव्ययम्	कर्ता	ऋ. पुं. प्र. एक.
गुणभेदतः	अव्ययम्	त्रिधा	अव्ययम्
एव	अव्ययम्	गुणसङ्ख्याने	अ. नपुं. स. एक.
प्रोच्यते	प्र + वच् (वच परिभाषणे) पर. कर्मणि लट्. प्रपु. एक.	तानि	तद् - द. सर्व. नपुं. द्वि. बहु. (विशेषणम्)
अपि	अव्ययम्	यथावत्	अव्ययम्
शृणु	श्रु (श्रु श्रवणे) - पर. कर्तरि लोट्. मपु. एक.		

व्याकरणम् -

(क) सन्धिः त्रिधैव त्रिधा + एव वृद्धिसन्धिः ।

	यथावच्छृणु	यथावत् + शृणु	श्चुत्वसन्धिः छत्वसन्धिश्च ।
	तान्यपि	तानि + अपि	यण्सन्धिः ।
(ख) समासः	गुणभेदतः	गुणानां भेदः गुणभेदः, तेन गुणभेदेन - षष्ठीतत्पुरुषः । ततः स्वार्थे तसिल्प्रत्यये गुणभेदतः इति शब्दः । गुणसङ्ख्याने सङ्ख्यायन्ते (गुणाः) अनेन इति सङ्ख्यानम् - करणे ल्युट् । गुणानां सङ्ख्यानम् गुणसङ्ख्यानम्, तस्मिन् - षष्ठीतत्पुरुषः ।	
(ग) कृदन्तः	ज्ञानम्	ज्ञा (ज्ञा अवबोधने) + ल्युट् ।	
	कर्ता	कृ (डुकृञ् करणे) + तृच् ।	
(घ) तद्धितान्तः	भेदतः	भेद + तसिल् ।	

भावस्पष्टीकरणम् -

प्रोच्यते ।	
कस्मिन् प्रोच्यते ?	**गुणसङ्ख्याने** प्रोच्यते ।
किं गुणसङ्ख्याने प्रोच्यते ?	**त्रिधा एव** गुणसङ्ख्याने प्रोच्यते ।
किं त्रिधा एव गुणसङ्ख्याने प्रोच्यते ?	**ज्ञानं** त्रिधा एव गुणसङ्ख्याने प्रोच्यते ।
ज्ञानं **पुनश्च किं** त्रिधा एव गुणसङ्ख्याने प्रोच्यते ?	ज्ञानं **कर्म च** त्रिधा एव गुणसङ्ख्याने प्रोच्यते ।
ज्ञानं कर्म च **पुनश्च किं** त्रिधा एव गुणसङ्ख्याने प्रोच्यते ?	ज्ञानं कर्म च **कर्ता च** त्रिधा एव गुणसङ्ख्याने प्रोच्यते ।
ज्ञानं कर्म च कर्ता च **कुतः** त्रिधा एव गुणसङ्ख्याने प्रोच्यते ?	ज्ञानं कर्म च कर्ता च **गुणभेदतः** त्रिधा एव गुणसङ्ख्याने प्रोच्यते ।
ज्ञानं कर्म च कर्ता च गुणभेदतः त्रिधा एव गुणसङ्ख्याने प्रोच्यते **तानि किं करोतु** ?	ज्ञानं कर्म च कर्ता च गुणभेदतः त्रिधा एव गुणसङ्ख्याने प्रोच्यते **तानि अपि शृणु** ।
ज्ञानं कर्म च कर्ता च गुणभेदतः त्रिधा एव गुणसङ्ख्याने प्रोच्यते तानि अपि **कथं** शृणु ?	ज्ञानं कर्म च कर्ता च गुणभेदतः त्रिधा एव गुणसङ्ख्याने प्रोच्यते तानि अपि **यथावत्** शृणु ।

तात्पर्यम् - ज्ञानं कर्म कर्ता च सत्त्वादिगुणभेदात् त्रिप्रकारः इति साङ्ख्यशास्त्रे प्रतिपादितम्। तदेव यथावत् निरूपयामि, शृणु ।

सर्वभूतेषु येनैकं भावमव्ययमीक्षते।
अविभक्तं विभक्तेषु तज्ज्ञानं विद्धि सात्त्विकम्॥१८.२०॥

पदच्छेदः - सर्वभूतेषु, येन, एकम्, भावम्, अव्ययम्, ईक्षते।
अविभक्तम्, विभक्तेषु, तत्, ज्ञानम्, विद्धि, सात्त्विकम्॥

अन्वयः - विभक्तेषु सर्वभूतेषु अव्ययम् एकं भावं येन ईक्षते तत् ज्ञानं सात्त्विकं विद्धि।

पदार्थः - विभक्तेषु = पृथक् स्थितेषु, सर्वभूतेषु = सकलभूतेषु, अव्ययम् = अक्षरम्, एकम् = अद्वितीयम्, भावम् = परमात्मतत्त्वम्, येन = येन ज्ञानेन, ईक्षते = पश्यति, तत् ज्ञानम् = तत् सम्यक् ज्ञानम्, सात्त्विकम् = सत्त्वसम्बन्धि, विद्धि = जानीहि।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
विभक्तेषु	अ. नपुं. स. बहु. (विशेषणम्)	सर्वभूतेषु	अ. नपुं. स. बहु. (विशेषणम्)
अव्ययम्	अ. नपुं. द्वि. एक. (विशेषणम्)	एकम्	अ. नपुं. द्वि. एक. (विशेषणम्)
भावम्	अ. पुं. द्वि. एक. (विशेष्यम्)	येन	यद् - द. सर्व. नपुं. तृ. एक. (विशेषणम्)
ईक्षते	ईक्ष् (ईक्ष दर्शने) - आत्म. कर्तरि लट्. प्रपु. एक.	तत्	तद्- द. सर्व. नपुं. द्वि. एक. (विशेषणम्)
ज्ञानम्	अ. नपुं. द्वि. एक. (विशेष्यम्)	सात्त्विकम्	अ. नपुं. द्वि. एक. (विशेषणम्)
विद्धि	विद् (विद ज्ञाने) - पर. कर्तरि लोट्. मपु. एक.		

व्याकरणम् -

(क) सन्धिः येनैकम् — येन + एकम् — वृद्धिसन्धिः।
तज्ज्ञानम् — तत् + ज्ञानम् — श्चुत्वसन्धिः जश्त्वसन्धिश्च।

(ख) समासः सर्वभूतेषु — सर्वाणि भूतानि सर्वभूतानि, तेषु - कर्मधारयः।
अव्ययम् — न व्ययम् अव्ययम् - नञ्तत्पुरुषः।
अविभक्तम् — न विभक्तम् अविभक्तम् - नञ्तत्पुरुषः।

(ग) कृदन्तः भूतेषु — भू (भू सत्तायाम्) + क्त (कर्तरि), तेषु।
भावम् — भू (भू सत्तायाम्) + घञ् (भावे), तम्।

	विभक्तेषु	वि + भज् (भज सेवायाम्) + क्त (कर्मणि), तेषु।
	ज्ञानम्	ज्ञा (ज्ञा अवबोधने) + ल्युट्।
(घ) तद्धितान्तः	सात्त्विकम्	सत्त्व + ठञ् (सत्त्वगुणप्रधानम्)।

भावस्पष्टीकरणम् -

ईक्षते।	
किम् ईक्षते ?	**भावम्** ईक्षते।
कं भावम् ईक्षते ?	**एकं** भावम् ईक्षते।
कीदृशम् एकं भावम् ईक्षते ?	**अव्ययम्** एकं भावम् ईक्षते।
केषु अव्ययम् एकं भावम् ईक्षते ?	**सर्वभूतेषु** अव्ययम् एकं भावम् ईक्षते।
कीदृशेषु सर्वभूतेषु अव्ययम् एकं भावम् ईक्षते ?	**विभक्तेषु** सर्वभूतेषु अव्ययम् एकं भावम् ईक्षते।
विभक्तेषु सर्वभूतेषु अव्ययम् एकं भावं **केन** ईक्षते ?	विभक्तेषु सर्वभूतेषु अव्ययम् एकं भावं **येन** ईक्षते।
विभक्तेषु सर्वभूतेषु अव्ययम् एकं भावं येन ईक्षते, **तत् किम्** ?	विभक्तेषु सर्वभूतेषु अव्ययम् एकं भावं येन ईक्षते, **तत् विद्धि**।
विभक्तेषु सर्वभूतेषु अव्ययम् एकं भावं येन ईक्षते, तत् **किं** विद्धि ?	विभक्तेषु सर्वभूतेषु अव्ययम् एकं भावं येन ईक्षते, तत् **ज्ञानं** विद्धि।
विभक्तेषु सर्वभूतेषु अव्ययम् एकं भावं येन ईक्षते, तत् ज्ञानं **कीदृशं** विद्धि ?	विभक्तेषु सर्वभूतेषु अव्ययम् एकं भावं येन ईक्षते, तत् ज्ञानं **सात्त्विकं** विद्धि।

तात्पर्यम् - अत्र यावन्ति भूतानि सन्ति तानि परस्परं विभिन्नानि। तेषु सर्वत्र स्थितं समानं परमात्मतत्त्वं येन पश्यति तत् ज्ञानं सात्त्विकं जानीहि।

पृथक्त्वेन तु यज्ज्ञानं नानाभावान्पृथग्विधान्।
वेत्ति सर्वेषु भूतेषु तज्ज्ञानं विद्धि राजसम्॥१८.२१॥

पदच्छेदः - पृथक्त्वेन, तु, यत्, ज्ञानम्, नानाभावान्, पृथग्विधान्।
वेत्ति, सर्वेषु, भूतेषु, तत्, ज्ञानम्, विद्धि, राजसम्॥

अन्वयः - सर्वेषु भूतेषु पृथग्विधान् नानाभावान् पृथक्त्वेन तु यत् ज्ञानं वेत्ति तत् ज्ञानं राजसं विद्धि।

पदार्थः - सर्वेषु = सकलेषु, भूतेषु = प्राणिषु, पृथग्विधान् = विविधान्, नानाभावान् = भिन्नान् आत्मनः, पृथक्त्वेन तु = भेदेन च, यत् ज्ञानम् = यत् बोधम्, वेत्ति = जानाति, तत् ज्ञानम् = तत् बोधम्, राजसम् = रजस्सम्बन्धि, विद्धि = जानीहि ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
सर्वेषु	अ. सर्व. नपुं. स. बहु. (विशेषणम्)	भूतेषु	अ. नपुं. स. बहु. (विशेष्यम्)
पृथग्विधान्	अ. पुं. द्वि. बहु. (विशेषणम्)	नानाभावान्	अ. पुं. द्वि. बहु. (विशेष्यम्)
पृथक्त्वेन	अ. नपुं. तृ. एक.	तु	अव्ययम्
यत्	यद् - द. सर्व. नपुं. प्र. एक. (विशेषणम्)	ज्ञानम्	अ. नपुं. प्र. एक. (विशेष्यम्)
वेत्ति	विद् (विद ज्ञाने) - पर. कर्तरि लट्. प्रपु. एक.	तत्	तद् - द. सर्व. नपुं. प्र. एक. (विशेषणम्)
राजसम्	अ. नपुं. प्र. एक.	विद्धि	विद् (विद ज्ञाने) - पर. कर्तरि लोट्. मपु. एक.

व्याकरणम् -

(क) सन्धिः	यज्ज्ञानम्	यत् + ज्ञानम्	श्चुत्वसन्धिः जश्त्वसन्धिश्च ।
	तज्ज्ञानम्	तत् + ज्ञानम्	श्चुत्वसन्धिः जश्त्वसन्धिश्च ।
(ख) समासः	नानाभावान्	नाना भावाः नानाभावाः, तान् - कर्मधारयः ।	
	पृथग्विधान्	पृथक् विधाः येषां ते पृथग्विधाः, तान् - बहुव्रीहिः ।	
(ग) कृदन्तः	ज्ञानम्	ज्ञा (ज्ञा अवबोधने) + ल्युट् ।	
	भावान्	भू (भू सत्तायाम्) + घञ् (भावे), तान् ।	
	भूतेषु	भू (भू सत्तायाम्) + क्त (कर्तरि), तेषु ।	
(घ) तद्धितान्तः	राजसम्	रजस् + अण् (रजसः आगतं राजसम्) ।	

भावस्पष्टीकरणम् -

वेत्ति ।	
किं वेत्ति ?	**ज्ञानं वेत्ति ।**
किं ज्ञानं वेत्ति ?	**यत् ज्ञानं वेत्ति ।**
केन यत् ज्ञानं वेत्ति ?	**पृथक्त्वेन तु यत् ज्ञानं वेत्ति ।**

कान् पृथक्त्वेन तु यत् ज्ञानं वेत्ति ?	**नानाभावान्** पृथक्त्वेन तु यत् ज्ञानं वेत्ति।
कीदृशान् नानाभावान् पृथक्त्वेन तु यत् ज्ञानं वेत्ति ?	**पृथग्विधान्** नानाभावान् पृथक्त्वेन तु यत् ज्ञानं वेत्ति।
केषु पृथग्विधान् नानाभावान् पृथक्त्वेन तु यत् ज्ञानं वेत्ति ?	**भूतेषु** पृथग्विधान् नानाभावान् पृथक्त्वेन तु यत् ज्ञानं वेत्ति।
केषु भूतेषु पृथग्विधान् नानाभावान् पृथक्त्वेन तु यत् ज्ञानं वेत्ति ?	**सर्वेषु** भूतेषु पृथग्विधान् नानाभावान् पृथक्त्वेन तु यत् ज्ञानं वेत्ति।
सर्वेषु भूतेषु पृथग्विधान् नानाभावान् पृथक्त्वेन तु यत् ज्ञानं वेत्ति **तत् किम्** ?	सर्वेषु भूतेषु पृथग्विधान् नानाभावान् पृथक्त्वेन तु यत् ज्ञानं वेत्ति **तत् विद्धि**।
सर्वेषु भूतेषु पृथग्विधान् नानाभावान् पृथक्त्वेन तु यत् ज्ञानं वेत्ति तत् **किं** विद्धि ?	सर्वेषु भूतेषु पृथग्विधान् नानाभावान् पृथक्त्वेन तु यत् ज्ञानं वेत्ति तत् **ज्ञानं** विद्धि।
सर्वेषु भूतेषु पृथग्विधान् नानाभावान् पृथक्त्वेन तु यत् ज्ञानं वेत्ति तत् ज्ञानं **कीदृशं** विद्धि ?	सर्वेषु भूतेषु पृथग्विधान् नानाभावान् पृथक्त्वेन तु यत् ज्ञानं वेत्ति तत् ज्ञानं **राजसं** विद्धि।

तात्पर्यम् - सर्वेषु भूतेषु अयं दुःखी, अयं सुखी इत्यादिरूपेण नाना क्षेत्रज्ञान् येन पश्यति तत् ज्ञानं राजसं भवति।

यत्तु कृत्स्नवदेकस्मिन्कार्ये सक्तमहैतुकम्।
अतत्त्वार्थवदल्पं च तत्तामसमुदाहृतम्॥१८.२२॥

पदच्छेदः - यत्, तु, कृत्स्नवत्, एकस्मिन्, कार्ये, सक्तम्, अहैतुकम्।
अतत्त्वार्थवत्, अल्पम्, च, तत्, तामसम्, उदाहृतम्॥

अन्वयः - यत् तु एकस्मिन् कार्ये कृत्स्नवत् सक्तम् अहैतुकम् अतत्त्वार्थवत् अल्पं च तत् तामसम् उदाहृतम्।

पदार्थः - यत् तु = यत् ज्ञानं तु, एकस्मिन् कार्ये = देहादौ, कृत्स्नवत् = परिपूर्णवत्, सक्तम् = लग्नम्, अहैतुकम् = हेतुशून्यम्, अतत्त्वार्थवत् = परमार्थशून्यम्, अल्पं च = नीचं च, तत् तामसम् = तत् तमस्सम्बन्धि, उदाहृतम् = प्रोक्तम्।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
यत्	यद् - द. सर्व. नपुं. प्र. एक. (विशेषणम्)	तु	अव्ययम्

एकस्मिन्	अ. सर्व. नपुं. स. एक. (विशेषणम्)	कार्ये	अ. नपुं. स. एक. (विशेष्यम्)
कृत्स्नवत्	कृत्स्नवत् - त. नपुं. प्र. एक.	सक्तम्	अ. नपुं. प्र. एक.
अहैतुकम्	अ. नपुं. प्र. एक.	अतत्त्वार्थवत्	अतत्त्वार्थवत् - त. नपुं. प्र. एक.
अल्पम्	अ. नपुं. प्र. एक.	च	अव्ययम्
तत्	तद् - द. सर्व. नपुं. प्र. एक. (विशेषणम्)	तामसम्	अ. नपुं. प्र. एक. (विशेष्यम्)
उदाहृतम्	अ.नपुं. प्र. एक. (विशेषणम्)		

व्याकरणम् -

(क) सन्धिः	कृत्स्नवदेकस्मिन्	कृत्स्नवत् + एकस्मिन्	जश्त्वसन्धिः।
	अतत्त्वार्थवदल्पम्	अतत्त्वार्थवत् + अल्पम्	जश्त्वसन्धिः।
(ख) समासः	अहैतुकम्	न हैतुकम् अहैतुकम् - नञ्तत्पुरुषः।	
	अतत्त्वार्थवत्	तत्त्वार्थः अस्य अस्मिन् वा अस्तीति तत्त्वार्थवत् - मतुप्।	
		न तत्त्वार्थवत् अतत्त्वार्थवत् - नञ्तत्पुरुषः।	
(ग) कृदन्तः	कार्ये	कृ (डुकृञ् करणे) + ण्यत्, तस्मिन् (कर्तव्यम् इत्यर्थः)।	
	सक्तम्	सञ्ज् (सञ्ज सङ्गे) + क्त (कर्मणि)।	
	उदाहृतम्	उद् + आ + हृ (हृञ् हरणे) + क्त (कर्मणि)।	
(घ) तद्धितान्तः	कृत्स्नवत्	कृत्स्नेन तुल्यम् कृत्स्नवत् (तुल्यार्थे वतिप्रत्ययः)।	
	तामसम्	तमस् + अण् (तमसः आगतं तामसम्)।	

भावस्पष्टीकरणम् -

उदाहृतम्।	
किम् उदाहृतम्?	**तामसम्** उदाहृतम्।
किं तामसम् उदाहृतम्?	**तत्** तामसम् उदाहृतम्।
कीदृशं तत् तामसम् उदाहृतम्?	**अल्पं** तत् तामसम् उदाहृतम्।
पुनश्च कीदृशम् अल्पं तत् तामसम् उदाहृतम्?	**अतत्त्वार्थवत्** अल्पं च तत् तामसम् उदाहृतम्।

पुनश्च कीदृशम् अतत्त्वार्थवत् अल्पं च तत् तामसम् उदाहृतम् ?	**अहैतुकम्** अतत्त्वार्थवत् अल्पं च तत् तामसम् उदाहृतम् ।
पुनश्च कीदृशम् अहैतुकम् अतत्त्वार्थवत् अल्पं च तत् तामसम् उदाहृतम् ?	**सक्तम्** अहैतुकम् अतत्त्वार्थवत् अल्पं च तत् तामसम् उदाहृतम् ।
कथं सक्तम् अहैतुकम् अतत्त्वार्थवत् अल्पं च तत् तामसम् उदाहृतम् ?	**कृत्स्नवत्** सक्तम् अहैतुकम् अतत्त्वार्थवत् अल्पं च तत् तामसम् उदाहृतम् ।
कुत्र कृत्स्नवत् सक्तम् अहैतुकम् अतत्त्वार्थवत् अल्पं च तत् तामसम् उदाहृतम् ?	**कार्ये** कृत्स्नवत् सक्तम् अहैतुकम् अतत्त्वार्थवत् अल्पं च तत् तामसम् उदाहृतम् ।
कस्मिन् कार्ये कृत्स्नवत् सक्तम् अहैतुकम् अतत्त्वार्थवत् अल्पं च तत् तामसम् उदाहृतम् ?	**यत् तु एकस्मिन्** कार्ये कृत्स्नवत् सक्तम् अहैतुकम् अतत्त्वार्थवत् अल्पं च तत् तामसम् उदाहृतम् ।

तात्पर्यम् - एकस्मिन् देहे प्रतिमादौ वा परिपूर्णवत् एतावानेव ईश्वरः इत्यभिप्रायेण सक्तम्, कारणविहीनं परमार्थावलम्बनशून्यं तुच्छं च तत् ज्ञानं तामसमिति कथ्यते ।

नियतं सङ्गरहितमरागद्वेषतः कृतम् ।
अफलप्रेप्सुना कर्म यत्तत्सात्त्विकमुच्यते ॥१८.२३॥

पदच्छेदः - नियतम्, सङ्गरहितम्, अरागद्वेषतः, कृतम् ।
अफलप्रेप्सुना, कर्म, यत्, तत्, सात्त्विकम्, उच्यते ॥

अन्वयः - अफलप्रेप्सुना अरागद्वेषतः नियतं सङ्गरहितं यत् कर्म कृतं तत् सात्त्विकम् उच्यते ।

पदार्थः - अफलप्रेप्सुना = अफलाकाङ्क्षिणा, अरागद्वेषतः = रागद्वेषराहित्येन, नियतम् = नित्यम्, सङ्गरहितम् = आसक्तिवर्जितम्, यत् कर्म = यत् कार्यम्, कृतम् = आचरितम्, तत् = तत् कार्यम्, सात्त्विकम् = सत्त्वयुक्तम्, उच्यते = कथ्यते ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
अफलप्रेप्सुना	उ. पुं. तृ. एक.	अरागद्वेषतः	अव्ययम्
नियतम्	अ. नपुं. प्र. एक. (विशेषणम्)	सङ्गरहितम्	अ. नपुं. प्र. एक. (विशेषणम्)

यत्	यद् - द. सर्व. नपुं. प्र. एक. (विशेषणम्)	कर्म	कर्मन् - न. नपुं. प्र. एक. (विशेष्यम्)
कृतम्	अ. नपुं. प्र. एक. (विशेषणम्)	तत्	तद् - द. सर्व. नपुं. प्र. एक. (विशेषणम्)
सात्त्विकम्	अ. नपुं. प्र. एक. (विशेषणम्)	उच्यते	वच् (वच परिभाषणे) पर. कर्मणि लट्. प्रपु. एक.

व्याकरणम् -

(क) समासः	सङ्गरहितम्	सङ्गेन रहितं सङ्गरहितम् - तृतीयातत्पुरुषः ।
	अरागद्वेषतः	रागश्च द्वेषश्च रागद्वेषौ - द्वन्द्वः ।
		न रागद्वेषौ अरागद्वेषौ, ताभ्याम् अरागद्वेषाभ्याम् - नञ्तत्पुरुषः ।
		ततः स्वार्थे तसिल्, अरागद्वेषतः ।
	अफलप्रेप्सुना	फलं प्रेप्सुः फलप्रेप्सुः - द्वितीयातत्पुरुषः ।
		न फलप्रेप्सुः अफलप्रेप्सुः, तेन - नञ्तत्पुरुषः ।
(ख) कृदन्तः	नियतम्	नि + यम् (यम उपरमे) + क्त (कर्मणि) ।
	सङ्गः	सञ्ज् (षञ्ज सङ्गे) + घञ् (भावे) ।
	रहितम्	रह् (रह त्यागे) + क्त (कर्मणि) ।
	कृतम्	कृ (डुकृञ् करणे) + क्त (कर्मणि) ।
	फलम्	फल् (फल निष्पत्तौ) + अच् ।
(ग) तद्धितान्तः	सात्त्विकम्	सत्त्व + ठञ् (सत्त्वगुणप्रधानम्) ।

भावस्पष्टीकरणम् -

उच्यते ।	
किम् उच्यते?	**सात्त्विकम्** उच्यते ।
किं सात्त्विकम् उच्यते ?	**तत्** सात्त्विकम् उच्यते ।
किं तत् सात्त्विकम् उच्यते ?	**यत् कर्म कृतं** तत् सात्त्विकम् उच्यते ।
कथं यत् कर्म कृतं तत् सात्त्विकम् उच्यते ?	**सङ्गरहितं** यत् कर्म कृतं तत् सात्त्विकम् उच्यते ।
कीदृशं सङ्गरहितं यत् कर्म कृतं तत् सात्त्विकम् उच्यते ?	**नियतं** सङ्गरहितं यत् कर्म कृतं तत् सात्त्विकम् उच्यते ।

कुतः नियतं सङ्गरहितं यत् कर्म कृतं तत् सात्त्विकम् उच्यते ?	**अरागद्वेषतः** नियतं सङ्गरहितं यत् कर्म कृतं तत् सात्त्विकम् उच्यते ।
केन अरागद्वेषतः नियतं सङ्गरहितं यत् कर्म कृतं तत् सात्त्विकम् उच्यते ?	**अफलप्रेप्सुना** अरागद्वेषतः नियतं सङ्गरहितं यत् कर्म कृतं तत् सात्त्विकम् उच्यते ।

तात्पर्यम् - नित्यत्वेन विहितम्, अहम् अस्य कर्ता इत्यभिनिवेशशून्यं, रागद्वेषराहित्येन च फलनिरपेक्षेण पुरुषेण कृतं यत् कर्म तत् सात्त्विकम् इति उच्यते ।

यत्तु कामेप्सुना कर्म साहङ्कारेण वा पुनः ।
क्रियते बहुलायासं तद्राजसमुदाहृतम् ॥१८.२४॥

पदच्छेदः - यत्, तु, कामेप्सुना, कर्म, साहङ्कारेण, वा, पुनः ।
क्रियते, बहुलायासम्, तत्, राजसम्, उदाहृतम् ॥

अन्वयः - कामेप्सुना साहङ्कारेण वा पुनः बहुलायासं तु यत् कर्म क्रियते तत् राजसम् उदाहृतम् ।

पदार्थः - कामेप्सुना = फलाभिलाषयुक्तेन, साहङ्कारेण वा = अहङ्कारसहितेन वा, पुनः = भूयः, बहुलायासं तु = अधिकायासं तु, यत् कर्म = या क्रिया, क्रियते = निर्वर्त्यते, तत् = सा क्रिया, राजसम् = राजसयुक्ता, उदाहृतम् = प्रोक्ता ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
कामेप्सुना	उ. पुं. तृ. एक.	साहङ्कारेण	अ. पुं. तृ. एक.
वा	अव्ययम्	पुनः	अव्ययम्
बहुलायासम्	अ. नपुं. प्र. एक.	तु	अव्ययम्
यत्	यद् - द. सर्व. नपुं. प्र. एक. (विशेषणम्)	कर्म	कर्मन् - न. नपुं. प्र. एक. (विशेष्यम्)
क्रियते	कृ (डुकृञ् करणे) आत्म. कर्मणि लट्. प्रपु. एक.	तत्	तद् - द. सर्व. नपुं. प्र. एक. (विशेषणम्)
राजसम्	अ. नपुं. प्र. एक. (विशेषणम्)	उदाहृतम्	अ. नपुं. प्र. एक. (विशेषणम्)

व्याकरणम् -

(क) सन्धिः	तद्राजसम्	तत् + राजसम्	जश्त्वसन्धिः ।
(ख) समासः	कामेप्सुना	कामम् ईप्सुः कामेप्सुः, तेन - द्वितीयातत्पुरुषः ।	
	साहङ्कारेण	अहङ्कारेण सहितः साहङ्कारः, तेन - बहुव्रीहिः ।	
	बहुलायासम्	बहुलः आयासः यस्मिन् तत् बहुलायासम् - बहुव्रीहिः ।	
(ग) कृदन्तः	उदाहृतम्	उद् + आ + हृ (हृञ् हरणे) + क्त (कर्मणि) ।	
(घ) तद्धितान्तः	राजसम्	रजस् + अण् (रजसः आगतं राजसम्) ।	

भावस्पष्टीकरणम् -

उदाहृतम् ।	
किम् उदाहृतम् ?	**राजसम्** उदाहृतम् ।
किं राजसम् उदाहृतम् ?	**तत्** राजसम् उदाहृतम् ।
किं तत् राजसम् उदाहृतम् ?	**यत् कर्म क्रियते** तत् राजसम् उदाहृतम् ।
कथं यत् कर्म क्रियते तत् राजसम् उदाहृतम् ?	**पुनः बहुलायासं तु** यत् कर्म क्रियते तत् राजसम् उदाहृतम् ।
केन वा पुनः बहुलायासं तु यत् कर्म क्रियते तत् राजसम् उदाहृतम् ?	**साहङ्कारेण वा** पुनः बहुलायासं तु यत् कर्म क्रियते तत् राजसम् उदाहृतम् ।
केन साहङ्कारेण वा पुनः बहुलायासं तु यत् कर्म क्रियते तत् राजसम् उदाहृतम् ?	**कामेप्सुना** साहङ्कारेण वा पुनः बहुलायासं तु यत् कर्म क्रियते तत् राजसम् उदाहृतम् ।

तात्पर्यम् - फलापेक्षया अहङ्कारेण च यत् श्रमसाध्यं कर्म क्रियते तत् राजसम् इति उच्यते ।

अनुबन्धं क्षयं हिंसामनवेक्ष्य च पौरुषम् ।
मोहादारभ्यते कर्म यत्तत्तामसमुच्यते ॥१८.२५॥

पदच्छेदः - अनुबन्धम्, क्षयम्, हिंसाम्, अनवेक्ष्य, च, पौरुषम् ।
मोहात्, आरभ्यते, कर्म, यत्, तत्, तामसम्, उच्यते ॥

अन्वयः - अनुबन्धं क्षयं हिंसां पौरुषं च अनवेक्ष्य मोहात् यत् कर्म आरभ्यते तत् तामसम् उच्यते ।

पदार्थः - अनुबन्धम् = पश्चात् भाविनम् अर्थम्, क्षयम् = शरीरश्रमादेः नाशनम्, हिंसाम् = प्राणिपीडनम्, पौरुषं च =

सामर्थ्यं च, अनवेक्ष्य = अविगणय्य, मोहात् = अविवेकात्, यत् कर्म = या क्रिया, आरभ्यते = क्रियते, तत् = सा क्रिया, तामसम् = तमस्सम्बन्धिनी, उच्यते = कथ्यते।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
अनुबन्धम्	अ. नपुं. द्वि. एक.	क्षयम्	अ. नपुं. द्वि. एक.
हिंसाम्	आ. स्त्री. द्वि. एक.	पौरुषम्	अ. नपुं. द्वि. एक.
च	अव्ययम्	अनवेक्ष्य	ल्यबन्तम् अव्ययम्
मोहात्	अ. पुं. पं. एक.	यत्	यद् - द. सर्व. नपुं. प्र. एक. (विशेषणम्)
कर्म	कर्मन् - न. नपुं. प्र. एक. (विशेष्यम्)	आरभ्यते	आ + रभ् (रभ राभस्ये) आत्म. कर्मणि लट्. प्रपु. एक.
तत्	तद् - द. सर्व. नपुं. प्र. एक. (विशेषणम्)	तामसम्	अ. नपुं. प्र. एक. (विशेषणम्)
उच्यते	वच् (वच परिभाषणे) पर. कर्मणि लट्. प्रपु. एक.		

व्याकरणम् -

(क) सन्धिः	मोहादारभ्यते	मोहात् + आरभ्यते	जश्त्वसन्धिः।
(ख) समासः	अनवेक्ष्य	न अवेक्ष्य अनवेक्ष्य - नञ्तत्पुरुषः।	
(ग) कृदन्तः	अनुबन्धम्	अनु + बन्ध् (बन्ध बन्धने) + घञ् (भावे)।	
	क्षयम्	क्षि (क्षि क्षये) + अच् (भावे)।	
	अवेक्ष्य	अव + ईक्ष् (ईक्ष दर्शने) + ल्यप्।	
	मोहात्	मुह् (मुह वैचित्ये) + घञ्, तस्मात्।	
(घ) तद्धितान्तः	पौरुषम्	पुरुष + अण् (पुरुषस्य इदम् पौरुषम्)।	
	तामसम्	तमस् + अण् (तमसः आगतं तामसम्)।	

भावस्पष्टीकरणम् -

उच्यते।	
किम् उच्यते ?	**तामसम् उच्यते।**
किं तामसम् उच्यते ?	**तत् तामसम् उच्यते।**
किं तत् तामसम् उच्यते ?	**यत् कर्म आरभ्यते तत् तामसम् उच्यते।**

कस्मात् यत् कर्म आरभ्यते तत् तामसम् उदाहृतम् ?	**मोहात्** यत् कर्म आरभ्यते तत् तामसम् उच्यते।
किं कृत्वा मोहात् यत् कर्म आरभ्यते तत् तामसम् उच्यते ?	**अनवेक्ष्य** मोहात् यत् कर्म आरभ्यते तत् तामसम् उच्यते।
किम् अनवेक्ष्य मोहात् यत् कर्म आरभ्यते तत् तामसम् उच्यते ?	**अनुबन्धम्** अनवेक्ष्य मोहात् यत् कर्म आरभ्यते तत् तामसम् उच्यते।
अनुबन्धं **पुनः किम्** अनवेक्ष्य मोहात् यत् कर्म आरभ्यते तत् तामसम् उच्यते ?	अनुबन्धं **क्षयम्** अनवेक्ष्य मोहात् यत् कर्म आरभ्यते तत् तामसम् उच्यते।
अनुबन्धं क्षयं **पुनः काम्** अनवेक्ष्य मोहात् यत् कर्म आरभ्यते तत् तामसम् उच्यते ?	अनुबन्धं क्षयं **हिंसाम्** अनवेक्ष्य मोहात् यत् कर्म आरभ्यते तत् तामसम् उच्यते।
अनुबन्धं क्षयं हिंसां **पुनः किम्** अनवेक्ष्य मोहात् यत् कर्म आरभ्यते तत् तामसम् उच्यते ?	अनुबन्धं क्षयं हिंसां **पौरुषं च** अनवेक्ष्य मोहात् यत् कर्म आरभ्यते तत् तामसम् उच्यते।

तात्पर्यम् - पश्चात् भाविनम् अनर्थम्, शरीरसामर्थ्यस्य धनादेश्च नाशम्, प्राणिपीडनम्, आत्मसामर्थ्यं च अविचार्य अविवेकेनैव यत् कर्म क्रियते तत् तामसम् इति अभिधीयते।

मुक्तसङ्गोऽनहंवादी धृत्युत्साहसमन्वितः।
सिद्ध्यसिद्ध्योर्निर्विकारः कर्ता सात्त्विक उच्यते॥१८.२६॥

पदच्छेदः - मुक्तसङ्गः, अनहंवादी, धृत्युत्साहसमन्वितः।
सिद्ध्यसिद्ध्योः, निर्विकारः, कर्ता, सात्त्विकः, उच्यते॥

अन्वयः - मुक्तसङ्गः धृत्युत्साहसमन्वितः अनहंवादी सिद्ध्यसिद्ध्योः निर्विकारः कर्ता सात्त्विकः उच्यते।

पदार्थः - मुक्तसङ्गः = फलाभिलाषरहितः, धृत्युत्साहसमन्वितः = धैर्यसन्तोषसहितः, अनहंवादी = अहङ्कारशून्यः, सिद्ध्यसिद्ध्योः = लाभालाभयोः, निर्विकारः = विकारशून्यः, कर्ता = आचरिता, सात्त्विकः = सत्त्ववान्, उच्यते = कथ्यते।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
मुक्तसङ्गः	अ. पुं. प्र. एक. (विशेषणम्)	धृत्युत्साहसमन्वितः	अ. पुं. प्र. एक. (विशेषणम्)
अनहंवादी	अनहंवादिन् - न. पुं. प्र. एक. (विशेषणम्)	सिद्ध्यसिद्ध्योः	इ. स्त्री. ष. द्वि.

निर्विकारः	अ. पुं. प्र. एक. (विशेषणम्)	कर्ता	ऋ. पुं. प्र. एक. (विशेष्यम्)
सात्त्विकः	अ. पुं. प्र. एक. (विशेषणम्)	उच्यते	वच् (वच परिभाषणे) पर. कर्मणि लट्. प्रपु. एक.

व्याकरणम् -

(क) सन्धिः	मुक्तसङ्गोऽनहंवादी	मुक्तसङ्गः + अनहंवादी	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः पूर्वरूपं च।
	सिद्ध्यसिद्ध्योर्निर्विकारः	सिद्ध्यसिद्ध्योः + निर्विकारः	विसर्गसन्धिः (रेफः)।
	सात्त्विक उच्यते	सात्त्विकः + उच्यते	विसर्गसन्धिः (लोपः)।

(ख) समासः	मुक्तसङ्गः	मुक्तः सङ्गः येन सः मुक्तसङ्गः - बहुव्रीहिः।
	अनहंवादी	न अहंवादी अनहंवादी - नञ्तत्पुरुषः।
	धृत्युत्साहसमन्वितः	धृतिश्च उत्साहश्च धृत्युत्साहौ - द्वन्द्वः।
		धृत्युत्साहाभ्यां समन्वितः धृत्युत्साहसमन्वितः - तृतीयातत्पुरुषः।
	सिद्ध्यसिद्ध्योः	सिद्धिश्च असिद्धिश्च सिद्ध्यसिद्धी, तयोः - द्वन्द्वः।
	निर्विकारः	निर्गतः विकारः यस्मात् सः निर्विकारः - बहुव्रीहिः।
(ग) कृदन्तः	मुक्तः	मुच् (मुच्लृ मोक्षणे) + क्त (कर्मणि)।
	सङ्गः	सञ्ज् (षञ्ज सङ्गे) + घञ् (भावे)8।
	समन्वितः	सम् + अनु + इ (इण् गतौ) + क्त (कर्मणि)।
	सिद्धिः	सिध् (षिधु संराद्धौ) + क्तिन्।
	विकारः	वि + कृ (डुकृञ् करणे) + घञ्।
	कर्ता	कृ (डुकृञ् करणे) + तृच्।
(घ) तद्धितान्तः	सात्त्विकः	सत्त्व + ठन्, सत्त्वम् अस्य अस्मिन् वा अस्ति इति सात्त्विकः (मतुबर्थे ठन्)।

भावस्पष्टीकरणम् -

उच्यते।	
कः उच्यते ?	**कर्ता** उच्यते।
कर्ता **कीदृशः** उच्यते ?	कर्ता **सात्त्विकः** उच्यते।
पुनश्च कीदृशः कर्ता सात्त्विकः उच्यते ?	**निर्विकारः** कर्ता सात्त्विकः उच्यते।
कयोः निर्विकारः कर्ता सात्त्विकः उच्यते ?	**सिद्ध्यसिद्ध्योः** निर्विकारः कर्ता सात्त्विकः उच्यते।

पुनश्च कीदृशः सिद्ध्यसिद्ध्योः निर्विकारः कर्ता सात्त्विकः उच्यते ?	**अनहंवादी** सिद्ध्यसिद्ध्योः निर्विकारः कर्ता सात्त्विकः उच्यते।
पुनश्च कीदृशः अनहंवादी सिद्ध्यसिद्ध्योः निर्विकारः कर्ता सात्त्विकः उच्यते ?	**धृत्युत्साहसमन्वितः** अनहंवादी सिद्ध्यसिद्ध्योः निर्विकारः कर्ता सात्त्विकः उच्यते।
पुनश्च कीदृशः धृत्युत्साहसमन्वितः अनहंवादी सिद्ध्यसिद्ध्योः निर्विकारः कर्ता सात्त्विकः उच्यते ?	**मुक्तसङ्गः** धृत्युत्साहसमन्वितः अनहंवादी सिद्ध्यसिद्ध्योः निर्विकारः कर्ता सात्त्विकः उच्यते।

तात्पर्यम् - यः तावत् फलापेक्षाम् अकुर्वन्, अहं करोमि इति अवदन्, धैर्येण औत्सुक्येन युक्तः, कर्मणि सिद्धे असिद्धे च समानचित्तः सन् कर्म करोति सः सात्त्विकः इति उच्यते।

रागी कर्मफलप्रेप्सुर्लुब्धो हिंसात्मकोऽशुचिः।
हर्षशोकान्वितः कर्ता राजसः परिकीर्तितः ॥१८.२७॥

पदच्छेदः - रागी, कर्मफलप्रेप्सुः, लुब्धः, हिंसात्मकः, अशुचिः।
हर्षशोकान्वितः, कर्ता, राजसः, परिकीर्तितः ॥

अन्वयः - रागी कर्मफलप्रेप्सुः लुब्धः हिंसात्मकः अशुचिः हर्षशोकान्वितः कर्ता राजसः परिकीर्तितः।

पदार्थः - रागी = रागवान्, कर्मफलप्रेप्सुः = कर्मफलार्थी, लुब्धः = लोभी, हिंसात्मकः = पीडास्वभावः, अशुचिः = अशुद्धः, हर्षशोकान्वितः = सुखदुःखसहितः, कर्ता = आचरिता, राजसः = रजोगुणयुक्तः, परिकीर्तितः = ख्यातः।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
रागी	रागिन् - न. पुं. प्र. एक. (विशेषणम्)	कर्मफलप्रेप्सुः	उ. पुं. प्र. एक. (विशेषणम्)
लुब्धः	अ. पुं. प्र. एक. (विशेषणम्)	हिंसात्मकः	अ. पुं. प्र. एक. (विशेषणम्)
अशुचिः	इ. स्त्री. प्र. एक. (विशेषणम्)	हर्षशोकान्वितः	अ. पुं. प्र. एक. (विशेषणम्)
कर्ता	ऋ. पुं. प्र. एक. (विशेष्यम्)	राजसः	अ. पुं. प्र. एक. (विशेषणम्)
परिकीर्तितः	अ. पुं. प्र. एक. (विशेषणम्)		

व्याकरणम् -

(क) सन्धिः कर्मफलप्रेप्सुर्लुब्धः कर्मफलप्रेप्सुः + लुब्धः विसर्गसन्धिः (रेफः)।

	लुब्धो हिंसात्मकः	लुब्धः + हिंसात्मकः	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः ।
	हिंसात्मकोऽशुचिः	हिंसात्मकः + अशुचिः	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः पूर्वरूपं च ।
(ख) समासः	कर्मफलप्रेप्सुः	कर्मणः फलं कर्मफलम् - षष्ठीतत्पुरुषः ।	
		कर्मफलस्य प्रेप्सुः कर्मफलप्रेप्सुः - षष्ठीतत्पुरुषः ।	
	हिंसात्मकः	हिंसा आत्मा यस्य सः हिंसात्मकः - बहुव्रीहिः ।	
	अशुचिः	न शुचिः अशुचिः - नञ्तत्पुरुषः ।	
	हर्षशोकान्वितः	हर्षश्च शोकश्च हर्षशोकौ - द्वन्द्वः ।	
		हर्षशोकाभ्याम् अन्वितः हर्षशोकान्वितः - तृतीयातत्पुरुषः ।	
(ग) कृदन्तः	फलम्	फल् (फल निष्पत्तौ) + अच् ।	
	लुब्धः	लुभ् (लुभ विमोहने) + क्त (कर्मणि) ।	
	शोकः	शुच् (शुच शोके) + घञ् ।	
	अन्वितः	इ (इण् गतौ) + क्त (कर्मणि) ।	
	कर्ता	कृ (डुकृञ् करणे) + तृच् ।	
	परिकीर्तितः	परि + कॄ (कॄत संशब्दने) + क्त (कर्मणि) ।	
(घ) तद्धितान्तः	रागी	राग + इनि (रागः अस्य अस्मिन् वा अस्ति इत्यर्थः) ।	
	राजसः	रजस् + अण् (रजसः आगतः राजसः) ।	

भावस्पष्टीकरणम् -

परिकीर्तितः ।	
कः परिकीर्तितः ?	**कर्ता** परिकीर्तितः ।
कर्ता **कीदृशः** परिकीर्तितः ?	कर्ता **राजसः** परिकीर्तितः ।
पुनः कीदृशः कर्ता राजसः परिकीर्तितः ?	**रागी** कर्ता राजसः परिकीर्तितः ।
रागी **पुनः कीदृशः** कर्ता राजसः परिकीर्तितः ?	रागी **कर्मफलप्रेप्सुः** कर्ता राजसः परिकीर्तितः ।
रागी कर्मफलप्रेप्सुः **पुनः कीदृशः** कर्ता राजसः परिकीर्तितः ?	रागी कर्मफलप्रेप्सुः **लुब्धः** कर्ता राजसः परिकीर्तितः ।
रागी कर्मफलप्रेप्सुः लुब्धः **पुनः कीदृशः** कर्ता राजसः परिकीर्तितः ?	रागी कर्मफलप्रेप्सुः लुब्धः **हिंसात्मकः** कर्ता राजसः परिकीर्तितः ।

रागी कर्मफलप्रेप्सुः लुब्धः हिंसात्मकः **पुनः कीदृशः** कर्ता राजसः परिकीर्तितः ?	रागी कर्मफलप्रेप्सुः लुब्धः हिंसात्मकः **अशुचिः** कर्ता राजसः परिकीर्तितः ।
रागी कर्मफलप्रेप्सुः लुब्धः हिंसात्मकः अशुचिः **पुनः कीदृशः** कर्ता राजसः परिकीर्तितः ?	रागी कर्मफलप्रेप्सुः लुब्धः हिंसात्मकः अशुचिः **हर्षशोकान्वितः** कर्ता राजसः परिकीर्तितः ।

तात्पर्यम् - यः भार्यापुत्रादिषु प्रीतिमान्, कर्मफलापेक्षी, कृपणः, हिंसाप्रियः, कर्मापेक्षितशुद्धिरहितः, कर्मफलसिद्धौ च सन्तुष्टः असिद्धौ च दुःखितः भवति सः कर्ता राजसः इत्युच्यते ।

अयुक्तः प्राकृतः स्तब्धः शठो नैष्कृतिकोऽलसः ।
विषादी दीर्घसूत्री च कर्ता तामस उच्यते ॥१८.२८॥

पदच्छेदः - अयुक्तः, प्राकृतः, स्तब्धः, शठः, नैष्कृतिकः, अलसः ।
विषादी, दीर्घसूत्री, च, कर्ता, तामसः, उच्यते ॥

अन्वयः - अयुक्तः प्राकृतः स्तब्धः शठः नैष्कृतिकः अलसः विषादी दीर्घसूत्री च कर्ता तामसः उच्यते ।

पदार्थः - अयुक्तः = अवधानाभावात् अयोग्यः, प्राकृतः = असंस्कृतबुद्धिः, स्तब्धः = अविनीतः, शठः = वञ्चनापरः, नैष्कृतिकः = परावमानी, अलसः = मन्दः, विषादी = शोकवान्, दीर्घसूत्री च = मन्दकारी च, कर्ता = आचरिता, तामसः = तमोगुणयुक्तः, उच्यते = कथ्यते ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
अयुक्तः	अ. पुं. प्र. एक. (विशेषणम्)	प्राकृतः	अ. पुं. प्र. एक. (विशेषणम्)
स्तब्धः	अ. पुं. प्र. एक. (विशेषणम्)	शठः	अ. पुं. प्र. एक. (विशेषणम्)
नैष्कृतिकः	अ. पुं. प्र. एक. (विशेषणम्)	अलसः	अ. पुं. प्र. एक. (विशेषणम्)
विषादी	विषादिन् - न. पुं. प्र. एक. (विशेषणम्)	दीर्घसूत्री	दीर्घसूत्रिन् - न. पुं. प्र. एक. (विशेषणम्)
च	अव्ययम्	कर्ता	ऋ. पुं. प्र. एक. (विशेष्यम्)
तामसः	अ. पुं. प्र. एक. (विशेषणम्)	उच्यते	वच् (वच परिभाषणे) पर. कर्मणि लट्. प्रपु. एक.

व्याकरणम् -

(क) सन्धिः शठो नैष्कृतिकः शठः + नैष्कृतिकः विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः ।

नैष्कृतिकोऽलसः	नैष्कृतिकः + अलसः	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः पूर्वरूपं च।
तामस उच्यते	तामसः + उच्यते	विसर्गसन्धिः (लोपः)।

(ख) समासः अयुक्तः — न युक्तः अयुक्तः - नञ्तत्पुरुषः।

दीर्घसूत्री — दीर्घं सूत्रं दीर्घसूत्रम् - कर्मधारयः।
दीर्घसूत्रम् अस्य अस्मिन् वा अस्ति इति दीर्घसूत्री (मतुबर्थे इनिः)।

(ग) कृदन्तः युक्तः — युज् (युजिर् योगे) + क्त (कर्मणि)।

प्राकृतः — प्र + आ + कृ (डुकृञ् करणे) + क्त (कर्मणि)।

स्तब्धः — स्तम्भ् (स्तम्भु प्रतिघाते) + क्त (कर्मणि)।

कर्ता — कृ (डुकृञ् करणे) + तृच्।

(घ) तद्धितान्तः विषादी — विषादः अस्य अस्मिन् वा अस्ति इति विषादी (मतुबर्थे इनिः)।

तामसः — तमस् + अण् (तमसः आगतः तामसः)।

भावस्पष्टीकरणम् -

उच्यते।	
कः उच्यते ?	**कर्ता** उच्यते।
कर्ता **कीदृशः** उच्यते ?	कर्ता **तामसः** उच्यते।
पुनः कीदृशः कर्ता तामसः उच्यते ?	**अयुक्तः** कर्ता तामसः उच्यते।
अयुक्तः **पुनः कीदृशः** कर्ता तामसः उच्यते ?	अयुक्तः **प्राकृतः** कर्ता तामसः उच्यते।
अयुक्तः प्राकृतः **पुनः कीदृशः** कर्ता तामसः उच्यते ?	अयुक्तः प्राकृतः **स्तब्धः** कर्ता तामसः उच्यते।
अयुक्तः प्राकृतः स्तब्धः **पुनः कीदृशः** कर्ता तामसः उच्यते ?	अयुक्तः प्राकृतः स्तब्धः **शठः** कर्ता तामसः उच्यते।
अयुक्तः प्राकृतः स्तब्धः शठः **पुनः कीदृशः** कर्ता तामसः उच्यते ?	अयुक्तः प्राकृतः स्तब्धः शठः **नैष्कृतिकः** कर्ता तामसः उच्यते।
अयुक्तः प्राकृतः स्तब्धः शठः नैष्कृतिकः **पुनः कीदृशः** कर्ता तामसः उच्यते ?	अयुक्तः प्राकृतः स्तब्धः शठः नैष्कृतिकः **अलसः** कर्ता तामसः उच्यते।
अयुक्तः प्राकृतः स्तब्धः शठः नैष्कृतिकः अलसः **पुनः कीदृशः** कर्ता तामसः उच्यते ?	अयुक्तः प्राकृतः स्तब्धः शठः नैष्कृतिकः अलसः **विषादी** कर्ता तामसः उच्यते।

अयुक्तः प्राकृतः स्तब्धः शठः नैष्कृतिकः अलसः विषादी **पुनः कीदृशः** कर्ता तामसः उच्यते ?	अयुक्तः प्राकृतः स्तब्धः शठः नैष्कृतिकः अलसः विषादी **दीर्घसूत्री च** कर्ता तामसः उच्यते ।

तात्पर्यम् - यः अवधानाभावात् कर्मणि अयोग्यः, असंस्कृतबुद्धिः, उद्धतः, वञ्चनापरः, अन्येषां तिरस्कारकः, आलस्यशीलः, शोचनस्वभावः मन्दकारी च वर्तते सः तामसः कर्ता उच्यते ।

बुद्धेर्भेदं धृतेश्चैव गुणतस्त्रिविधं शृणु ।
प्रोच्यमानमशेषेण पृथक्त्वेन धनञ्जय ॥१८.२९॥

पदच्छेदः - बुद्धेः, भेदम्, धृतेः, च, एव, गुणतः, त्रिविधम्, शृणु ।
प्रोच्यमानम्, अशेषेण, पृथक्त्वेन, धनञ्जय ॥

अन्वयः - धनञ्जय ! गुणतः त्रिविधं बुद्धेः धृतेः च एव भेदं पृथक्त्वेन अशेषेण प्रोच्यमानं शृणु ।

पदार्थः - धनञ्जय = अर्जुन, गुणतः = गुणानुसारेण, त्रिविधम् = त्रिभेदम्, बुद्धेः = धियः, धृतेः च एव = धैर्यस्य अपि, भेदम् = विभागम्, पृथक्त्वेन = विभागेन, अशेषेण = समग्रम्, प्रोच्यमानम् = कथ्यमानम्, शृणु = आकर्णय ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
धनञ्जय	अ. पुं. सम्बो. एक.	गुणतः	अव्ययम्
त्रिविधम्	अ. पुं. द्वि. एक.	बुद्धेः	इ. स्त्री. ष. एक.
धृतेः	इ. स्त्री. ष. एक.	च	अव्ययम्
एव	अव्ययम्	भेदम्	अ. पुं. द्वि. एक.
पृथक्त्वेन	अ. नपुं. तृ. एक.	अशेषेण	अ. पुं. तृ. एक.
प्रोच्यमानम्	अ. नपुं. द्वि. एक.	शृणु	श्रु (श्रु श्रवणे) पर. कर्तरि लोट्. मपु. एक.

व्याकरणम् -

(क) सन्धिः	बुद्धेर्भेदम्	बुद्धेः + भेदम्	विसर्गसन्धिः (रेफः) ।
	धृतेश्च	धृतेः + च	विसर्गसन्धिः (सकारः) श्चुत्वम् ।
	चैव	च + एव	वृद्धिसन्धिः ।
	गुणतस्त्रिविधम्	गुणतः + त्रिविधम्	विसर्गसन्धिः (सकारः) ।

(ख) समासः	त्रिविधम्	तिस्रः विधाः यस्य सः त्रिविधः, तम् - बहुव्रीहिः।
	अशेषेण	न शेषेण अशेषेण - नञ्तत्पुरुषः।
	धनञ्जय	धनं जयति इति धनञ्जयः, तत्सम्बुद्धौ - कर्तरि खश् उपपदसमासश्च।
(ग) कृदन्तः	बुद्धेः	बुध् (बुध अवगमने) + क्तिन्, तस्याः।
	भेदम्	भिद् (भिदिर् विदारणे) + घञ्, तम्।
	धृतेः	धृ (धृञ् धारणे) + क्तिन्, तस्याः।
	प्रोच्यमानम्	प्र + वच् (वच परिभाषणे) + शानच् (कर्मणि)।
(घ) तद्धितान्तः	गुणतः	गुणेन इति तृतीयाविभक्त्यन्तात् स्वार्थे तसिल्, गुणत इति शब्दः।

भावस्पष्टीकरणम् -

शृणु।	
किं शृणु ?	**भेदं** शृणु।
भेदं **कीदृशं** शृणु ?	भेदं **प्रोच्यमानं** शृणु।
भेदं **केन** प्रोच्यमानं शृणु ?	भेदम् **अशेषेण** प्रोच्यमानं शृणु।
भेदं **पुनः केन** अशेषेण प्रोच्यमानं शृणु ?	भेदं **पृथक्त्वेन** अशेषेण प्रोच्यमानं शृणु।
कस्याः भेदं पृथक्त्वेन अशेषेण प्रोच्यमानं शृणु ?	**बुद्धेः** भेदं पृथक्त्वेन अशेषेण प्रोच्यमानं शृणु।
बुद्धेः **पुनः कस्याः** भेदं पृथक्त्वेन अशेषेण प्रोच्यमानं शृणु ?	बुद्धेः **धृतेः च एव** भेदं पृथक्त्वेन अशेषेण प्रोच्यमानं शृणु।
कतिविधं बुद्धेः धृतेः च एव भेदं पृथक्त्वेन अशेषेण प्रोच्यमानं शृणु ?	**त्रिविधं** बुद्धेः धृतेः च एव भेदं पृथक्त्वेन अशेषेण प्रोच्यमानं शृणु।
कुतः त्रिविधं बुद्धेः धृतेः च एव भेदं पृथक्त्वेन अशेषेण प्रोच्यमानं शृणु ?	**गुणतः** त्रिविधं बुद्धेः धृतेः च एव भेदं पृथक्त्वेन अशेषेण प्रोच्यमानं शृणु।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**धनञ्जय** !

तात्पर्यम् - अर्जुन ! एवं ज्ञानकर्मकर्तॄणां त्रैविध्यं प्रदर्शितम्। अधुना बुद्धेः धृतेश्च तत्कृतं भेदम् अशेषं गुणदोषनिरूपणसहितं विवृणोमि। तत् आकर्णय।

प्रवृत्तिं च निवृत्तिं च कार्याकार्ये भयाभये।
बन्धं मोक्षं च या वेत्ति बुद्धिः सा पार्थ सात्त्विकी ॥१८.३०॥

पदच्छेदः - प्रवृत्तिम्, च, निवृत्तिम्, च, कार्याकार्ये, भयाभये।
बन्धम्, मोक्षम्, च, या, वेत्ति, बुद्धिः, सा, पार्थ, सात्त्विकी ॥

अन्वयः - पार्थ ! प्रवृत्तिं च निवृत्तिं च कार्याकार्ये भयाभये बन्धं मोक्षं च या वेत्ति सा बुद्धिः सात्त्विकी।

पदार्थः - पार्थ = अर्जुन, प्रवृत्तिं च = प्रवर्तनं च, निवृत्तिं च = निवर्तनं च, कार्याकार्ये = विहितं निषिद्धं च कर्म, भयाभये = भीतिम् अभीतिं च, बन्धम् = बन्धनम्, मोक्षं च = मुक्तिं च, या = या मतिः, वेत्ति = जानाति, सा बुद्धिः = सा मतिः, सात्त्विकी = सत्त्वसम्पन्ना।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
पार्थ	अ. पुं. सम्बो. एक.	प्रवृत्तिम्	इ. स्त्री. द्वि. एक.
च	अव्ययम्	निवृत्तिम्	इ. स्त्री. द्वि. एक.
कार्याकार्ये	अ. नपुं. द्वि. द्वि.	भयाभये	अ. नपुं. द्वि. द्वि.
बन्धम्	अ. नपुं. द्वि. एक.	मोक्षम्	अ. नपुं. द्वि. एक.
या	यद् - द. सर्व. स्त्री. प्र. एक. (विशेषणम्)	वेत्ति	विद् (विद ज्ञाने) पर. कर्तरि लट्. प्रपु. एक.
सा	तद् - द. सर्व. स्त्री. प्र. एक. (विशेषणम्)	बुद्धिः	इ. स्त्री. प्र. एक. (विशेष्यम्)
सात्त्विकी	ई. स्त्री. प्र. एक. (विशेषणम्)		

व्याकरणम् -

(क) समासः कार्याकार्ये — कार्यं च अकार्यं च कार्याकार्ये - द्वन्द्वः।
भयाभये — भयं च अभयं च भयाभये - द्वन्द्वः।

(ख) कृदन्तः प्रवृत्तिम् — प्र + वृत् (वृतु वर्तने) + क्तिन्, ताम्।
निवृत्तिम् — नि + वृत् (वृतु वर्तने) + क्तिन्, ताम्।
कार्यम् — कृ (डुकृञ् करणे) + ण्यत् (कर्तव्यम् इत्यर्थः)।
भयम् — भी (ञिभी भये) + अच् (अपादाने)।
बन्धम् — बन्ध् (बन्ध बन्धने) + घञ्।
मोक्षम् — मोक्ष् (मोक्ष क्षेपे) + घञ्।

	बुद्धिः	बुध् (बुध अवगमने) + क्तिन् ।
(ग) तद्धितान्तः	पार्थ	पृथा + अण्, (अपत्यम्) पृथायाः अपत्यं पुमान्, तत्सम्बुद्धौ ।
	सात्त्विकी	सत्त्व + ठक्, सत्त्वात् आगता सात्त्विकी (स्त्रीत्वे ङीप्) ।

भावस्पष्टीकरणम् -

सात्त्विकी ।	
का सात्त्विकी ?	**बुद्धिः** सात्त्विकी ।
का बुद्धिः सात्त्विकी ?	**सा** बुद्धिः सात्त्विकी ।
कीदृशी सा बुद्धिः सात्त्विकी ?	**या वेत्ति** सा बुद्धिः सात्त्विकी ।
कां या वेत्ति सा बुद्धिः सात्त्विकी ?	**प्रवृत्तिं च** या वेत्ति सा बुद्धिः सात्त्विकी ।
प्रवृत्तिं च **पुनः कां** या वेत्ति सा बुद्धिः सात्त्विकी ?	प्रवृत्तिं च **निवृत्तिं च** या वेत्ति सा बुद्धिः सात्त्विकी ।
प्रवृत्तिं च निवृत्तिं च **पुनः के** या वेत्ति सा बुद्धिः सात्त्विकी ?	प्रवृत्तिं च निवृत्तिं च **कार्याकार्ये** या वेत्ति सा बुद्धिः सात्त्विकी ।
प्रवृत्तिं च निवृत्तिं च कार्याकार्ये **पुनः के** या वेत्ति सा बुद्धिः सात्त्विकी ?	प्रवृत्तिं च निवृत्तिं च कार्याकार्ये **भयाभये** या वेत्ति सा बुद्धिः सात्त्विकी ।
प्रवृत्तिं च निवृत्तिं च कार्याकार्ये भयाभये **पुनः किं** या वेत्ति सा बुद्धिः सात्त्विकी ?	प्रवृत्तिं च निवृत्तिं च कार्याकार्ये भयाभये **बन्धं** या वेत्ति सा बुद्धिः सात्त्विकी ।
प्रवृत्तिं च निवृत्तिं च कार्याकार्ये भयाभये बन्धं **पुनः किं** या वेत्ति सा बुद्धिः सात्त्विकी ?	प्रवृत्तिं च निवृत्तिं च कार्याकार्ये भयाभये बन्धं **मोक्षं च** या वेत्ति सा बुद्धिः सात्त्विकी ।
अस्मिन् श्लोके अस्मिन् सम्बोधनपदं किम् ?	**पार्थ** !

तात्पर्यम् - अर्जुन ! यः धर्मे प्रवृत्तिम् अधर्मात् च निवृत्तिं, देशकालादिविशेषेण कर्तव्यम् अकर्तव्यं च, कथं बन्धः, कथं च मोक्षः इत्येतत् या बुद्धिः जानाति सा बुद्धिः सात्त्विकी इति कथ्यते ।

यया धर्ममधर्मं च कार्यं चाकार्यमेव च ।
अयथावत्प्रजानाति बुद्धिः सा पार्थ राजसी ॥ १८.३१ ॥

पदच्छेदः - यया, धर्मम्, अधर्मम्, च, कार्यम्, च, अकार्यम्, एव, च ।
अयथावत्, प्रजानाति, बुद्धिः, सा, पार्थ, राजसी ॥

अन्वयः - पार्थ ! यया धर्मम् अधर्मं च कार्यं च अकार्यम् एव च अयथावत् प्रजानाति सा बुद्धिः राजसी ।

पदार्थः - पार्थ = अर्जुन !, यया = यया बुद्ध्या, धर्मम् = शास्त्रविहितम्, अधर्मं च = शास्त्रनिषिद्धं च, कार्यं च = कर्तव्यं च, अकार्यम् एव च = अकर्तव्यम् अपि, अयथावत् = अयाथार्थ्येन, प्रजानाति = वेत्ति, सा बुद्धिः = सा मतिः, राजसी = रजोगुणयुक्ता ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
पार्थ	अ. पुं. सम्बो. एक.	यया	यद् - द. सर्व. स्त्री. तृ. एक. (विशेषणम्)
धर्मम्	अ. पुं. द्वि. एक.	अधर्मम्	अ. पुं. द्वि. एक.
च	अव्ययम्	कार्यम्	अ. नपुं. द्वि. एक.
अकार्यम्	अ. नपुं. द्वि. एक.	एव	अव्ययम्
अयथावत्	अव्ययम्	प्रजानाति	प्र + ज्ञा (ज्ञा अवबोधने) पर. कर्तरि लट्. प्रपु. एक.
सा	तद् - द. सर्व. स्त्री. प्र. एक. (विशेषणम्)	बुद्धिः	इ. स्त्री. प्र. एक. (विशेष्यम्)
राजसी	ई. स्त्री. प्र. एक. (विशेषणम्)		

व्याकरणम् -

(क) सन्धिः चाकार्यम् — च + अकार्यम् — सवर्णदीर्घसन्धिः ।

(ख) समासः अधर्मम् — न धर्मः अधर्मः, तम् - नञ्तत्पुरुषः ।
अकार्यम् — न कार्यम् अकार्यम् - नञ्तत्पुरुषः ।
अयथावत् — न यथावत् अयथावत् - नञ्तत्पुरुषः ।

(ग) कृदन्तः कार्यम् — कृ (डुकृञ् करणे) + ण्यत् ।
बुद्धिः — बुध् (बुध अवगमने) + क्तिन् ।

(घ) तद्धितान्तः पार्थ — पृथा + अण्, (अपत्यार्थे)पृथायाः अपत्यं पुमान्, तत्सम्बुद्धौ ।
राजसी — रजस् + अण्, (आगता इत्यर्थे) रजसः आगता राजसी स्त्रीत्वे ङीप्) ।

भावस्पष्टीकरणम् -

प्रजानाति ।	
कं प्रजानाति ?	धर्मं प्रजानाति ।

धर्मं **पुनश्च कं** प्रजानाति ?	धर्मम् **अधर्मं** च प्रजानाति।
धर्मम् अधर्मं च **पुनश्च किं** प्रजानाति ?	धर्मम् अधर्मं च **कार्यं च** प्रजानाति।
धर्मम् अधर्मं च कार्यं च **पुनश्च किं** प्रजानाति ?	धर्मम् अधर्मं च कार्यं च **अकार्यम् एव च** प्रजानाति।
धर्मम् अधर्मं च कार्यं च अकार्यम् एव च **कथं** प्रजानाति ?	धर्मम् अधर्मं च कार्यं च अकार्यम् एव च **अयथावत्** प्रजानाति।
कया धर्मम् अधर्मं च कार्यं च अकार्यम् एव च अयथावत् प्रजानाति ?	**यया** धर्मम् अधर्मं च कार्यं च अकार्यम् एव च अयथावत् प्रजानाति।
यया धर्मम् अधर्मं च कार्यं च अकार्यम् एव च अयथावत् प्रजानाति **सा का** ?	यया धर्मम् अधर्मं च कार्यं च अकार्यम् एव च अयथावत् प्रजानाति **सा बुद्धिः**।
यया धर्मम् अधर्मं च कार्यं च अकार्यम् एव च अयथावत् प्रजानाति सा बुद्धिः **कीदृशी** ?	यया धर्मम् अधर्मं च कार्यं च अकार्यम् एव च अयथावत् प्रजानाति सा बुद्धिः **राजसी**।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**पार्थ** !

तात्पर्यम् - अर्जुन ! यया धर्मस्य अधर्मस्य शास्त्रसम्मतस्य कार्यस्य तदसम्मतस्य च अकार्यस्य यथावत् ज्ञानं न भवति सा बुद्धिः राजसी इति कथ्यते।

अधर्मं धर्ममिति या मन्यते तमसावृता।
सर्वार्थान्विपरीतांश्च बुद्धिः सा पार्थ तामसी॥१८.३२॥

पदच्छेदः - अधर्मम्, धर्मम्, इति, या, मन्यते, तमसा, आवृता।
सर्वार्थान्, विपरीतान्, च, बुद्धिः, सा, पार्थ, तामसी॥

अन्वयः - पार्थ ! तमसा आवृता या बुद्धिः अधर्मं धर्मम् इति सर्वार्थान् विपरीतान् च मन्यते सा तामसी।

पदार्थः - पार्थ = अर्जुन, तमसा = तमोगुणेन, आवृता = आच्छादिता, या बुद्धिः = या मतिः, अधर्मम् = शास्त्रनिषिद्धम्, धर्मम् इति = शास्त्रविहितम् इति, सर्वार्थान् = सकलविषयान्, विपरीतान् च = विरुद्धान् अपि, मन्यते = चिन्तयति, सा तामसी = सा तमोगुणसहिता।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
पार्थ	अ. पुं. सम्बो. एक.	तमसा	तमस् - सका. नपुं. तृ. एक.

आवृता	आ. स्त्री. प्र. एक. (विशेषणम्)	या	तद् - द. सर्व. स्त्री. प्र. एक. (विशेषणम्)
बुद्धिः	इ. स्त्री. प्र. एक. (विशेषणम्)	अधर्मम्	अ. पुं. द्वि. एक.
धर्मम्	अ. पुं. द्वि. एक.	इति	अव्ययम्
सर्वार्थान्	अ. पुं. द्वि. बहु. (विशेष्यम्)	विपरीतान्	अ. पुं. द्वि. बहु. (विशेषणम्)
च	अव्ययम्	मन्यते	मन् (मन ज्ञाने) आत्म. कर्तरि लट्. प्रपु. एक.
सा	तद्-द.सर्व.स्त्री.प्र.एक.(विशेषणम्)	तामसी	ई. स्त्री. प्र. एक. (विशेषणम्)

व्याकरणम् -

(क) सन्धिः	तमसावृता	तमसा + आवृता	सवर्णदीर्घसन्धिः ।
	विपरीतांश्च	विपरीतान् + च	सत्वसन्धिः रुत्वम्, अनुस्वारागमः, विसर्गः, सत्वम्, श्चुत्वम् ।
(ख) समासः	अधर्मम्	न धर्मः अधर्मः, तम् - नञ्तत्पुरुषः ।	
	सर्वार्थान्	सर्वे अर्थाः सर्वार्थाः, तान् - कर्मधारयः ।	
(ग) कृदन्तः	आवृता	आ + वृत् (वृतु वर्तने) + क्त (कर्मणि) + टाप् ।	
	विपरीतान्	वि + परि + इ (इण् गतौ) + क्त (कर्मणि), तान् ।	
	बुद्धिः	बुध् (बुध अवगमने) + क्तिन् ।	
(घ) तद्धितान्तः	पार्थ	पृथा + अण् (अपत्यार्थे) पृथायाः अपत्यं पुमान्, तत्सम्बुद्धौ ।	
	तामसी	तमस् + अण्, (आगता इत्यर्थे) तमसः आगता, स्त्रीत्वे ङीप्) ।	

भावस्पष्टीकरणम् -

मन्यते ।	
का मन्यते ?	**बुद्धिः** मन्यते ।
का बुद्धिः मन्यते ?	**या** बुद्धिः मन्यते ।
कीदृशी या बुद्धिः मन्यते ?	**आवृता** या बुद्धिः मन्यते ।
केन आवृता या बुद्धिः मन्यते ?	**तमसा** आवृता या बुद्धिः मन्यते ।
तमसा आवृता या बुद्धिः **कान्** मन्यते ?	तमसा आवृता या बुद्धिः **सर्वार्थान्** मन्यते ।

तमसा आवृता या बुद्धिः सर्वार्थान् **कीदृशान्** मन्यते ?	तमसा आवृता या बुद्धिः सर्वार्थान् **विपरीतान्** मन्यते।
तमसा आवृता या बुद्धिः **कान्** सर्वार्थान् विपरीतान् मन्यते ?	तमसा आवृता या बुद्धिः **अधर्मं धर्मम् इति** सर्वार्थान् विपरीतान् च मन्यते।
तमसा आवृता या बुद्धिः अधर्मं धर्मम् इति सर्वार्थान् विपरीतान् च मन्यते **सा का** ?	तमसा आवृता या बुद्धिः अधर्मं धर्मम् इति सर्वार्थान् विपरीतान् च मन्यते **सा तामसी**।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**पार्थ** !

तात्पर्यम् - पार्थ ! या बुद्धिः तमोगुणेन आवृता अधर्मं धर्मम् इति जानाति, सर्वान् अपि अर्थान् विपरीतान् एव जानाति सा बुद्धिः तामसी इति कथ्यते।

धृत्या यया धारयते मनःप्राणेन्द्रियक्रियाः।
योगेनाव्यभिचारिण्या धृतिः सा पार्थ सात्त्विकी ॥१८.३३॥

पदच्छेदः - धृत्या, यया, धारयते, मनःप्राणेन्द्रियक्रियाः।
योगेन, अव्यभिचारिण्या, धृतिः, सा, पार्थ, सात्त्विकी ॥

अन्वयः - पार्थ ! योगेन अव्यभिचारिण्या यया धृत्या मनःप्राणेन्द्रियक्रियाः धारयते सा धृतिः सात्त्विकी।

पदार्थः - पार्थ = अर्जुन, योगेन = समाधिना, अव्यभिचारिण्या = अविनाभूतेन, यया धृत्या = येन प्रयत्नेन, मनःप्राणेन्द्रियक्रियाः = चित्तप्राणेन्द्रियव्यापारान्, धारयते = धरति, सा धृतिः = सः प्रयत्नः, सात्त्विकी = सत्त्वगुणयुक्ता।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
पार्थ	अ. पुं. सम्बो. एक.	योगेन	अ. पुं. तृ. एक.
अव्यभिचारिण्या	ई. स्त्री. तृ. एक. (विशेषणम्)	यया	यद् - द. सर्व. स्त्री. तृ. एक. (विशेषणम्)
धृत्या	इ. स्त्री. तृ. एक. (विशेष्यम्)	मनःप्राणेन्द्रियक्रियाः	आ. स्त्री. प्र. बहु.
धारयते	धृ (धृञ् धारणे) आत्म. कर्तरि णिच्. लट्. प्रपु. एक.	सा	तद् - द. सर्व. स्त्री. प्र. एक. (विशेषणम्)
धृतिः	इ. स्त्री. प्र. एक. (विशेष्यम्)	सात्त्विकी	ई. स्त्री. प्र. एक. (विशेषणम्)

व्याकरणम् -

(क) सन्धिः	योगेनाव्यभिचारिण्या	योगेन + अव्यभिचारिण्या	सवर्णदीर्घसन्धिः ।

(ख) समासः	मनःप्राणेन्द्रियक्रियाः	मनश्च प्राणश्च इन्द्रियाणि च मनःप्राणेन्द्रियाणि - द्वन्द्वः ।
		मनःप्राणेन्द्रियाणां क्रियाः मनःप्राणेन्द्रियक्रियाः, ताः - षष्ठीतत्पुरुषः ।
	अव्यभिचारिण्या	न व्यभिचारिणी अव्यभिचारिणी, तया - नञ्तत्पुरुषः ।
(ग) कृदन्तः	धृत्या	धृ (धृञ् धारणे) + क्तिन्, तया ।
	योगेन	युज् (युजिर् योगे) + घञ्, तेन ।
(घ) तद्धितान्तः	पार्थ	पृथा + अण् (पृथायाः अपत्यं पुमान्) ।
	सात्त्विकी	सत्त्व + ठक्, (आगता इत्यर्थे) सत्त्वात् आगता, स्त्रीत्वे ङीप्) ।

भावस्पष्टीकरणम् -

धारयते ।	
काः धारयते ?	**मनःप्राणेन्द्रियक्रियाः** धारयते ।
कया मनःप्राणेन्द्रियक्रियाः धारयते ?	**धृत्या** मनःप्राणेन्द्रियक्रियाः धारयते ।
कया धृत्या मनःप्राणेन्द्रियक्रियाः धारयते ?	**यया** धृत्या मनःप्राणेन्द्रियक्रियाः धारयते ।
कीदृश्या यया धृत्या मनःप्राणेन्द्रियक्रियाः धारयते ?	**अव्यभिचारिण्या** यया धृत्या मनःप्राणेन्द्रियक्रियाः धारयते ।
केन अव्यभिचारिण्या यया धृत्या मनःप्राणेन्द्रिय-क्रियाः धारयते ?	**योगेन** अव्यभिचारिण्या यया धृत्या मनःप्राणेन्द्रियक्रियाः धारयते ।
योगेन अव्यभिचारिण्या यया धृत्या मनःप्राणेन्द्रियक्रियाः धारयते **सा का** ?	योगेन अव्यभिचारिण्या यया धृत्या मनःप्राणेन्द्रियक्रियाः धारयते **सा धृतिः** ।
योगेन अव्यभिचारिण्या यया धृत्या मनःप्राणेन्द्रियक्रियाः धारयते सा धृतिः **कीदृशी** ?	योगेन अव्यभिचारिण्या यया धृत्या मनःप्राणेन्द्रियक्रियाः धारयते सा धृतिः **सात्त्विकी** ।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**पार्थ** !

तात्पर्यम् - अर्जुन ! फलनिरपेक्षः पुरुषः समाधिना सहैव वर्तमानया यया बुद्ध्या मनसः प्राणानाम् इन्द्रियाणां च व्यापारान् धारयति तस्य पुरुषस्य सा धृतिः सात्त्विकी इत्युच्यते ।

यया तु धर्मकामार्थान्धृत्या धारयतेऽर्जुन।
प्रसङ्गेन फलाकाङ्क्षी धृतिः सा पार्थ राजसी ॥१८.३४॥

पदच्छेदः - यया, तु, धर्मकामार्थान्, धृत्या, धारयते, अर्जुन।
प्रसङ्गेन, फलाकाङ्क्षी, धृतिः, सा, पार्थ, राजसी ॥

अन्वयः - अर्जुन ! प्रसङ्गेन फलाकाङ्क्षी तु यया धृत्या धर्मकामार्थान् धारयते सा धृतिः राजसी।

पदार्थः - अर्जुन = अर्जुन, प्रसङ्गेन = कर्तृत्वाभिमानेन, फलाकाङ्क्षी तु = फलाभिलाषी, यया धृत्या = येन प्रयत्नेन, धर्मकामार्थान् = पुरुषार्थान्, धारयते = धरति, सा धृतिः = सः प्रयत्नः, राजसी = रजोगुणयुक्ता।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
अर्जुन	अ. पुं. सम्बो. एक.	प्रसङ्गेन	अ. पुं. तृ. एक.
फलाकाङ्क्षी	फलाकाङ्क्षिन् - न. पुं. प्र. एक. (विशेषणम्)	तु	अव्ययम्
यया	यद् - द. सर्व. स्त्री. तृ. एक. (विशेषणम्)	धृत्या	इ. स्त्री. तृ. एक. (विशेष्यम्)
धर्मकामार्थान्	अ. पुं. द्वि. बहु.	धारयते	धृ (धृञ् धारणे) आत्म. कर्तरि णिच्. लट्. प्रपु. एक.
सा	तद् - द. सर्व. स्त्री. प्र. एक. (विशेषणम्)	धृतिः	इ. स्त्री. प्र. एक. (विशेष्यम्)
राजसी	ई. स्त्री. प्र. एक. (विशेषणम्)		

व्याकरणम् -

(क) सन्धिः धारयतेऽर्जुन — धारयते + अर्जुन — पूर्वरूपसन्धिः।

(ख) समासः धर्मकामार्थान् — धर्मश्च कामश्च अर्थश्च धर्मकामार्थाः, तान् - द्वन्द्वः।
फलाकाङ्क्षी — फलस्य आकाङ्क्षी फलाकाङ्क्षी - षष्ठीतत्पुरुषः।

(ग) कृदन्तः धृत्या — धृ (धृञ् धारणे) + क्तिन्, तया।
प्रसङ्गेन — सञ्ज् (सञ्ज सङ्गे) + घञ् (भावे), तेन।

(घ) तद्धितान्तः आकाङ्क्षी — आकाङ्क्षा + इनि, (मतुबर्थे,) आकाङ्क्षा अस्य अस्मिन् वा अस्ति)।
पार्थ — पृथा + अण्, (अपत्यार्थे) पृथायाः अपत्यं पुमान्, तत्सम्बुद्धौ।
राजसी — रजस् + अण्, (आगता इत्यर्थे) रजसः आगता, स्त्रीत्वे ङीप्)।

भावस्पष्टीकरणम् -

धारयते ।	
कान् धारयते ?	**धर्मकामार्थान्** धारयते ।
कया धर्मकामार्थान् धारयते ?	**धृत्या** धर्मकामार्थान् धारयते ।
कया धृत्या धर्मकामार्थान् धारयते ?	**यया** धृत्या धर्मकामार्थान् धारयते ।
कः यया धृत्या धर्मकामार्थान् धारयते ?	**फलाकाङ्क्षी तु** यया धृत्या धर्मकामार्थान् धारयते ।
केन फलाकाङ्क्षी तु यया धृत्या धर्मकामार्थान् धारयते ?	**प्रसङ्गेन** फलाकाङ्क्षी तु यया धृत्या धर्मकामार्थान् धारयते ।
प्रसङ्गेन फलाकाङ्क्षी तु यया धृत्या धर्मकामार्थान् धारयते **सा का ?**	प्रसङ्गेन फलाकाङ्क्षी तु यया धृत्या धर्मकामार्थान् धारयते **सा धृतिः** ।
प्रसङ्गेन फलाकाङ्क्षी तु यया धृत्या धर्मकामार्थान् धारयते सा धृतिः **कीदृशी** ?	प्रसङ्गेन फलाकाङ्क्षी तु यया धृत्या धर्मकामार्थान् धारयते सा धृतिः **राजसी** ।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**अर्जुन** !

तात्पर्यम् - अर्जुन ! कर्तृत्वाभिमानेन फलापेक्षः सन् यया धृत्या धर्मार्थकामान् पुरुषार्थान् धारयति सा धृतिः राजसी इति कथ्यते ।

यया स्वप्नं भयं शोकं विषादं मदमेव च ।
न विमुञ्चति दुर्मेधा धृतिः सा पार्थ तामसी ॥१८.३५॥

पदच्छेदः - यया, स्वप्नम्, भयम्, शोकम्, विषादम्, मदम्, एव, च ।
न, विमुञ्चति, दुर्मेधाः, धृतिः, सा, पार्थ, तामसी ॥

अन्वयः - पार्थ ! दुर्मेधाः यया स्वप्नं भयं शोकं विषादं मदम् एव च न विमुञ्चति सा धृतिः तामसी ।

पदार्थः - पार्थ = अर्जुन, दुर्मेधाः = कुत्सितबुद्धिः, यया = येन प्रयत्नेन, स्वप्नम् = निद्राम्, भयम् = भीतिम्, शोकम् = दुःखम्, विषादम् = ग्लानिम्, मदम् एव च = गर्वम् अपि च, न विमुञ्चति = न त्यजति, सा धृतिः = सः प्रयत्नः, तामसी = तमोगुणयुक्ता ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
पार्थ	अ. पुं. सम्बो. एक.	दुर्मेधाः	दुर्मेधस् - सका. पुं. प्र. एक.
यया	यद् - द. सर्व. स्त्री. तृ. एक. (विशेषणम्)	स्वप्नम्	अ. पुं. द्वि. एक.
भयम्	अ. नपुं. द्वि. एक.	शोकम्	अ. पुं. द्वि. एक.
विषादम्	अ. पुं. द्वि. एक.	मदम्	अ. पुं. द्वि. एक.
एव	अव्ययम्	च	अव्ययम्
न	अव्ययम्	विमुञ्चति	वि + मुच् (मुच्लृ मोक्षणे) पर. कर्तरि लट्. प्रपु. एक.
सा	तद् - द. सर्व. स्त्री. प्र. एक. (विशेषणम्)	धृतिः	इ. स्त्री. प्र. एक. (विशेष्यम्)
तामसी	ई. स्त्री. प्र. एक. (विशेषणम्)		

व्याकरणम् -

(क) सन्धिः दुर्मेधा धृतिः — दुर्मेधाः + धृतिः — विसर्गसन्धिः (लोपः)।

(ख) समासः दुर्मेधाः — दुष्टा मेधा यस्य सः दुर्मेधाः - बहुव्रीहिः (दुर्मेधस् इति शब्दः, समासान्तः स्वार्थे असिच्प्रत्ययः)।

(ग) कृदन्तः
- भयम् — भी (ञिभी भये) + अच्।
- शोकम् — शुच् (शुच शोके) + घञ्।
- विषादम् — सद् (षदलृ विशरणगत्यवसादनेषु) + घञ्।
- मदम् — मद् (मदी हर्षग्लेपनयोः) + घञ्।
- धृतिः — धृ (धृञ् धारणे) + क्तिन्।

(घ) तद्धितान्तः
- पार्थ — पृथा + अण् (पृथायाः अपत्यं पुमान्)।
- तामसी — तमसः आगता तामसी (आगता इत्यर्थे अण् स्त्रीत्वे च ङीप्)।

भावस्पष्टीकरणम् -

न विमुञ्चति।	
कः न विमुञ्चति ?	**दुर्मेधाः** न विमुञ्चति।
दुर्मेधाः **कया** न विमुञ्चति ?	दुर्मेधाः **यया** न विमुञ्चति।

दुर्मेधाः यया **कं** न विमुञ्चति ?	दुर्मेधाः यया **स्वप्नं** न विमुञ्चति ।
दुर्मेधाः यया स्वप्नं **पुनश्च किं** न विमुञ्चति ?	दुर्मेधाः यया स्वप्नं **भयं** न विमुञ्चति ।
दुर्मेधाः यया स्वप्नं भयं **पुनश्च कं** न विमुञ्चति ?	दुर्मेधाः यया स्वप्नं भयं **शोकं** न विमुञ्चति ।
दुर्मेधाः यया स्वप्नं भयं शोकं **पुनश्च कं** न विमुञ्चति ?	दुर्मेधाः यया स्वप्नं भयं शोकं **विषादं** न विमुञ्चति ।
दुर्मेधाः यया स्वप्नं भयं शोकं विषादं **पुनश्च किं** न विमुञ्चति ?	दुर्मेधाः यया स्वप्नं भयं शोकं विषादं **मदम् एव च** न विमुञ्चति ।
दुर्मेधाः यया स्वप्नं भयं शोकं विषादं मदम् एव च न विमुञ्चति **सा का** ?	दुर्मेधाः यया स्वप्नं भयं शोकं विषादं मदम् एव च न विमुञ्चति **सा धृतिः** ।
दुर्मेधाः यया स्वप्नं भयं शोकं विषादं मदम् एव च न विमुञ्चति सा धृतिः **कीदृशी** ?	दुर्मेधाः यया स्वप्नं भयं शोकं विषादं मदम् एव च न विमुञ्चति सा धृतिः **तामसी** ।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**पार्थ** !

तात्पर्यम् - अर्जुन ! कुत्सितबुद्धिः यया धृत्या निद्रां त्रासं दुःखं ग्लानिं गर्वमपि न त्यजति सा धृतिः तामसी इति उच्यते ।

सुखं त्विदानीं त्रिविधं शृणु मे भरतर्षभ ।
अभ्यासाद्रमते यत्र दुःखान्तं च निगच्छति ॥१८.३६॥

पदच्छेदः - सुखम्, तु, इदानीम्, त्रिविधम्, शृणु, मे, भरतर्षभ ।
अभ्यासात्, रमते, यत्र, दुःखान्तम्, च, निगच्छति ॥

अन्वयः - भरतर्षभ ! इदानीं मे (वचनात्) त्रिविधं सुखं तु शृणु यत्र अभ्यासात् रमते दुःखान्तं च निगच्छति ।

पदार्थः - भरतर्षभ = अर्जुन, इदानीम् = अधुना, मे = मम, त्रिविधम् = त्रिप्रकारकम्, सुखं तु = आनन्दम् अपि, शृणु = आकर्णय, यत्र = यस्मिन्, अभ्यासात् = परिचयात्, रमते = सन्तुष्टिं प्राप्नोति, दुःखान्तं च = दुःखोपशमं च, निगच्छति = प्राप्नोति ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
भरतर्षभ	अ. पुं. सम्बो. एक.	इदानीम्	अव्ययम्

मे	अस्मद् - द. सर्व. ष. एक.	त्रिविधम्	अ. नपुं. द्वि. एक. (विशेषणम्)
सुखम्	अ. नपुं. द्वि. एक. (विशेष्यम्)	तु	अव्ययम्
श्रृणु	श्रु (श्रु श्रवणे) पर. कर्तरि लोट्. मपु. एक.	यत्र	अव्ययम्
अभ्यासात्	अ. पुं. पं. एक.	रमते	रम् (रमु क्रीडायाम्) आत्म. कर्तरि लट्. प्रपु. एक.
दुःखान्तम्	अ. नपुं. द्वि. एक.	च	अव्ययम्
निगच्छति	नि + गम् (गम्लृ गतौ) पर. कर्तरि लट्. प्रपु. एक.		

व्याकरणम् -

(क) सन्धिः	त्विदानीम्	तु + इदानीम्	यण्सन्धिः।
	अभ्यासाद्रमते	अभ्यासात् + रमते	जश्त्वसन्धिः।
(ख) समासः	त्रिविधम्	तिस्रः विधाः यस्य तत् त्रिविधम् - बहुव्रीहिः।	
	भरतर्षभ	भरतानाम् ऋषभः भरतर्षभः तत्सम्बुद्धौ - षष्ठीतत्पुरुषः।	
	दुःखान्तम्	दुःखस्य अन्तः दुःखान्तः, तम् - षष्ठीतत्पुरुषः।	
(ग) कृदन्तः	सुखम्	सुख् (सुख तत्क्रियायाम्) + अच्।	

भावस्पष्टीकरणम् -

शृणु।	
किं शृणु ?	**सुखं तु** शृणु।
कतिविधं सुखं तु शृणु ?	**त्रिविधं** सुखं तु शृणु।
कस्य त्रिविधं सुखं तु शृणु ?	**मे (वचनात्)** त्रिविधं सुखं तु शृणु।
कदा मे (वचनात्) त्रिविधं सुखं तु शृणु ?	**इदानीं** मे (वचनात्) त्रिविधं सुखं तु शृणु।
इदानीं मे (वचनात्) त्रिविधं सुखं तु शृणु **कुत्र** ?	इदानीं मे (वचनात्) त्रिविधं सुखं तु शृणु **यत्र**।
इदानीं मे (वचनात्) त्रिविधं सुखं तु शृणु यत्र **किं भवति** ?	इदानीं मे (वचनात्) त्रिविधं सुखं तु शृणु यत्र **रमते**।
इदानीं मे (वचनात्) त्रिविधं सुखं तु शृणु यत्र **कस्मात्** रमते ?	इदानीं मे (वचनात्) त्रिविधं सुखं तु शृणु यत्र **अभ्यासात्** रमते।

इदानीं मे (वचनात्) त्रिविधं सुखं तु शृणु यत्र अभ्यासात् रमते **पुनः किं भवति ?**	इदानीं मे (वचनात्) त्रिविधं सुखं तु शृणु यत्र अभ्यासात् रमते **निगच्छति।**
इदानीं मे (वचनात्) त्रिविधं सुखं तु शृणु यत्र अभ्यासात् रमते **किं** निगच्छति ?	इदानीं मे (वचनात्) त्रिविधं सुखं तु शृणु यत्र अभ्यासात् रमते **दुःखान्तं च** निगच्छति।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**भरतर्षभ !**

तात्पर्यम् - भरतश्रेष्ठ ! यथा क्रियाणां कर्तृकर्मकरणानां च गुणभेदात् त्रिविधत्वं तथा तत्फलस्य सुखस्यापि तत् त्रिविधत्वं सम्भवति। तच्च सुखं तादृशं भवति यत्र पुरुषः समाधिवशात् अधिकां प्रीतिं प्राप्नोति, दुःखस्य अवसानं च। तदिदं कथयामि आकर्णय।

यत्तदग्रे विषमिव परिणामेऽमृतोपमम्।
तत्सुखं सात्त्विकं प्रोक्तमात्मबुद्धिप्रसादजम्॥१८.३७॥

पदच्छेदः - यत्, तत्, अग्रे, विषम्, इव, परिणामे, अमृतोपमम्।
तत्, सुखम्, सात्त्विकम्, प्रोक्तम्, आत्मबुद्धिप्रसादजम्॥

अन्वयः - यत् तत् अग्रे विषम् इव परिणामे अमृतोपमम् आत्मबुद्धिप्रसादजं तत् सुखं सात्त्विकं प्रोक्तम्।

पदार्थः - यत् तत् = यत् सुखम्, अग्रे = पूर्वम्, विषम् इव = विषवत्, परिणामे = परिपाके, अमृतोपमम् = अमृतसदृशम्, आत्मबुद्धिप्रसादजम् = स्वमतिनैर्मल्यसञ्जातम्, तत् सुखम् = तत् सुखम्, सात्त्विकम् = सत्त्वसम्बन्धि, प्रोक्तम् = कथितम्।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
यत्	यद् - द. सर्व. नपुं. प्र. एक. (विशेषणम्)	तत्	तद् - द. सर्व. नपुं. प्र. एक. (विशेषणम्)
अग्रे	अ. नपुं. स. एक.	विषम्	अ. नपुं. प्र. एक.
इव	अव्ययम्	परिणामे	अ. पुं. स. एक.
अमृतोपमम्	अ. नपुं. प्र. एक. (विशेषणम्)	आत्मबुद्धिप्रसादजम्	अ. नपुं. प्र. एक. (विशेषणम्)

सुखम्	अ. नपुं. प्र. एक. (विशेष्यम्)	सात्त्विकम्	अ. नपुं. प्र. एक. (विशेषणम्)
प्रोक्तम्	अ. नपुं. प्र. एक. (विशेषणम्)		

व्याकरणम् -

(क) सन्धिः परिणामेऽमृतोपमम् परिणामे + अमृतोपमम् पूर्वरूपसन्धिः।

(ख) समासः अमृतोपमम् अमृतेन उपमम् अमृतोपमम् - तृतीयातत्पुरुषः।

आत्मबुद्धिप्रसादजम् आत्मनः बुद्धिः आत्मबुद्धिः - षष्ठीतत्पुरुषः।

आत्मबुद्धेः प्रसादः आत्मबुद्धिप्रसादः - षष्ठीतत्पुरुषः।

आत्मबुद्धिप्रसादात् जायते इति आत्मबुद्धिप्रसादजम् - कर्तरि डप्रत्ययः उपपदसमासश्च।

(ग) कृदन्तः परिणामे परि + नम् (णम प्रह्वत्वे शब्दे च) + घञ्, तस्मिन्।

सुखम् सुख् (सुख तत्क्रियायाम्) + अच्।

प्रोक्तम् प्र + वच् (वच परिभाषणे) + क्त (कर्मणि)।

बुद्धिः बुध् (बुध अवगमने) + क्तिन्।

प्रसादः प्र + सद् (षदलृ विशरणगत्यवसादनेषु) + घञ्।

(घ) तद्धितान्तः सात्त्विकम् सत्त्व + ठञ् (सत्त्वगुणप्रधानम्)।

भावस्पष्टीकरणम् -

प्रोक्तम्।	
किं प्रोक्तम्?	**सुखं प्रोक्तम्।**
किं सुखं प्रोक्तम्?	**तत्** सुखं प्रोक्तम्।
तत् सुखं **कीदृशं** प्रोक्तम्?	तत् सुखं **सात्त्विकं** प्रोक्तम्।
कीदृशं तत् सुखं सात्त्विकं प्रोक्तम्?	**आत्मबुद्धिप्रसादजं** तत् सुखं सात्त्विकं प्रोक्तम्।
पुनः कीदृशम् आत्मबुद्धिप्रसादजं तत् सुखं सात्त्विकं प्रोक्तम्?	**यत् तत् अग्रे विषम् इव परिणामे अमृतोपमम्** आत्मबुद्धिप्रसादजं तत् सुखं सात्त्विकं प्रोक्तम्।

तात्पर्यम् - यत् सुखं पूर्वं विषवत् परिपाके अमृतसदृशं स्वमतिनैर्मल्यसञ्जातं तत् सुखं सात्त्विकं कथितम्।

विषयेन्द्रियसंयोगाद्यत्तदग्रेऽमृतोपमम् ।
परिणामे विषमिव तत्सुखं राजसं स्मृतम् ॥१८.३८॥

पदच्छेदः - विषयेन्द्रियसंयोगात्, यत्, तत्, अग्रे, अमृतोपमम् ।
परिणामे, विषम्, इव, तत्, सुखम्, राजसम्, स्मृतम् ॥

अन्वयः - यत् तत् विषयेन्द्रियसंयोगात् अग्रे अमृतोपमं परिणामे विषम् इव तत् सुखं राजसं स्मृतम् ।

पदार्थः - यत् तत् = यत् सुखम्, विषयेन्द्रियसंयोगात् = विषयेन्द्रियसम्बन्धात्, अग्रे = आदौ, अमृतोपमम् = अमृतसदृशम्, परिणामे = अन्ते, विषम् इव = विषवत्, तत् सुखम् = तत् सुखम्, राजसम् = रजस्सम्बन्धि, स्मृतम् = अभिहितम् ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
यत्	यद् - द. सर्व. नपुं. प्र. एक. (विशेषणम्)	तत्	तद् - द. सर्व. नपुं. प्र. एक. (विशेषणम्)
विषयेन्द्रिय-संयोगात्	अ. पुं. पं. एक.	अग्रे	अ. नपुं. स. एक.
अमृतोपमम्	अ. नपुं. प्र. एक. (विशेषणम्)	परिणामे	अ. पुं. स. एक.
विषम्	अ. नपुं. प्र. एक. (विशेषणम्)	इव	अव्ययम्
सुखम्	अ. नपुं. प्र. एक. (विशेष्यम्)	राजसम्	अ. नपुं. प्र. एक. (विशेषणम्)
स्मृतम्	अ. नपुं. प्र. एक. (विशेषणम्)		

व्याकरणम् -

(क) सन्धिः	विषयेन्द्रियसंयोगाद्यत्	विषयेन्द्रियसंयोगात् + यत्	जश्त्वसन्धिः ।
	तदग्रे	तत् + अग्रे	जश्त्वसन्धिः ।
	अग्रेऽमृतोपमम्	अग्रे + अमृतोपमम्	पूर्वरूपसन्धिः ।
(ख) समासः	विषयेन्द्रियसंयोगात्	विषयाश्च इन्द्रियाणि च विषयेन्द्रियाणि - द्वन्द्वः ।	
		विषयेन्द्रियाणां संयोगः विषयेन्द्रियसंयोगः, तस्मात् - षष्ठीतत्पुरुषः ।	
	अमृतोपमम्	अमृतेन उपमम् अमृतोपमम् - तृतीयातत्पुरुषः ।	
(ग) कृदन्तः	विषयः	वि + षि (षिञ् बन्धने) + अच् ।	
	संयोगात्	सम् + युज् (युजिर् योगे) + घञ्, तस्मात् ।	
	परिणामे	परि + नम् (णम प्रह्वत्वे शब्दे च) + घञ्, तस्मिन् ।	

	सुखम्	सुख् (सुख तत्क्रियायाम्) + अच्।
	स्मृतम्	स्मृ (स्मृ चिन्तायाम्) + क्त (कर्मणि)।
(घ) तद्धितान्तः	राजसम्	रजस् + अण् (रजसः आगतं राजसम्)।

भावस्पष्टीकरणम् -

स्मृतम्।	
किं स्मृतम् ?	**सुखं** स्मृतम्।
किं सुखं स्मृतम् ?	**तत्** सुखं स्मृतम्।
तत् सुखं **कीदृशं** स्मृतम् ?	तत् सुखं **राजसं** स्मृतम्।
कीदृशं तत् सुखं राजसं स्मृतम् ?	**यत् तत् अग्रे अमृतोपमं परिणामे विषम् इव** तत् सुखं राजसं स्मृतम्।
यत् तत् **कस्मात्** अग्रे अमृतोपमं परिणामे विषम् इव तत् सुखं राजसं स्मृतम् ?	यत् तत् **विषयेन्द्रियसंयोगात्** अग्रे अमृतोपमं परिणामे विषम् इव तत् सुखं राजसं स्मृतम्।

तात्पर्यम् - विषयेन्द्रियसम्बन्धात् जातं यत् सुखं तत् आदौ अमृतसदृशम् अन्ते विषसदृशं च भवति। तत् सुखं राजसम् अभिहितम्।

यदग्रे चानुबन्धे च सुखं मोहनमात्मनः।
निद्रालस्यप्रमादोत्थं तत्तामसमुदाहृतम् ॥१८.३९॥

पदच्छेदः - यत्, अग्रे, च, अनुबन्धे, च, सुखम्, मोहनम्, आत्मनः।
निद्रालस्यप्रमादोत्थम्, तत्, तामसम्, उदाहृतम् ॥

अन्वयः - यत् सुखम् अग्रे च अनुबन्धे च आत्मनः मोहनं निद्रालस्यप्रमादोत्थं तत् तामसम् उदाहृतम्।

पदार्थः - यत् सुखम् = यत् सुखम्, अग्रे च = आदौ च, अनुबन्धे च = उत्तरकाले च, आत्मनः = स्वस्य, मोहनम् = अज्ञानकरम्, निद्रालस्यप्रमादोत्थम् = निद्रा-आलस्य-प्रमादेभ्यः उत्पन्नम्, तत् = तत् सुखम्, तामसम् = तमस्सम्बन्धि, उदाहृतम् = वर्णितम्।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
यत्	यद् - द. सर्व. नपुं. प्र. एक. (विशेषणम्)	सुखम्	अ. नपुं. प्र. एक. (विशेष्यम्)

अग्रे	अ. नपुं. स. एक.	च	अव्ययम्
अनुबन्धे	अ. पुं. स. एक.	आत्मनः	आत्मन् - न. पुं. ष. एक.
मोहनम्	अ. नपुं. प्र. एक.	निद्रालस्य-प्रमादोत्थम्	अ. नपुं. प्र. एक. (विशेषणम्)
तत्	तद् - द. सर्व. नपुं. प्र. एक. (विशेषणम्)	तामसम्	अ. नपुं. प्र. एक. (विशेषणम्)
उदाहृतम्	अ. नपुं. प्र. एक. (विशेषणम्)		

व्याकरणम् -

(क) सन्धिः	यदग्रे	यत् + अग्रे	जश्त्वसन्धिः ।
	चानुबन्धे	च + अनुबन्धे	सवर्णदीर्घसन्धिः ।
(ख) समासः	निद्रालस्यप्रमादोत्थम्	निद्रा च आलस्यं च प्रमादश्च निद्रालस्यप्रमादाः - द्वन्द्वः । निद्रालस्यप्रमादेभ्यः उत्तिष्ठति इति निद्रालस्यप्रमादोत्थम् - कर्तरि कप्रत्ययः उपपदसमासश्च ।	
(ग) कृदन्तः	अनुबन्धे	अनु + बन्ध् (बन्ध बन्धने) + घञ् (यथायथं भावादौ), तस्मिन् ।	
	सुखम्	सुख् (सुख तत्क्रियायाम्) + अच् ।	
	मोहनम्	मुह् (मुह वैचित्ये) + ल्युट् ।	
	उदाहृतम्	उद् + आ + हृ (हृञ् हरणे) + क्त (कर्मणि) ।	
(घ) तद्धितान्तः	तामसम्	तमस् + अण् (तमसः आगतं तामसम्) ।	

भावस्पष्टीकरणम् -

उदाहृतम् ।	
किम् उदाहृतम् ?	**तत्** उदाहृतम् ।
तत् **कीदृशम्** उदाहृतम् ?	तत् **तामसम्** उदाहृतम् ।
किं तत् तामसम् उदाहृतम् ?	**सुखं** तत् तामसम् उदाहृतम् ।
कीदृशं सुखं तत् तामसम् उदाहृतम् ?	**यत् सुखम् अग्रे च अनुबन्धे च आत्मनः मोहनं** तत् तामसम् उदाहृतम् ।
यत् सुखम् अग्रे च अनुबन्धे च आत्मनः मोहनं **पुनः कीदृशं** तत् तामसम् उदाहृतम् ?	यत् सुखम् अग्रे च अनुबन्धे च आत्मनः मोहनं **निद्रालस्यप्रमादोत्थं** तत् तामसम् उदाहृतम् ।

तात्पर्यम् - निद्रा आलस्यम् अनवधानं चेति एतैः कारणैः जातं यत् सुखं तत् आदौ अन्ते च आत्मनः मोहकरं भवति। तत् तामसम् इत्युक्तम्।

न तदस्ति पृथिव्यां वा दिवि देवेषु वा पुनः।
सत्त्वं प्रकृतिजैर्मुक्तं यदेभिः स्यात् त्रिभिर्गुणैः ॥१८.४०॥

पदच्छेदः - न, तत्, अस्ति, पृथिव्याम्, वा, दिवि, देवेषु, वा, पुनः।
सत्त्वम्, प्रकृतिजैः, मुक्तम्, यत्, एभिः, स्यात्, त्रिभिः, गुणैः ॥

अन्वयः - प्रकृतिजैः एभिः त्रिभिः गुणैः यत् मुक्तं स्यात् तत् सत्त्वं पृथिव्यां वा दिवि देवेषु वा पुनः न अस्ति।

पदार्थः - प्रकृतिजैः = प्रकृतिस्वभावैः, एभिः = एतैः, त्रिभिः = त्रिसङ्ख्याकैः, गुणैः = गुणैः, यत् मुक्तम् = यत् त्यक्तम्, स्यात् = भवेत्, तत् सत्त्वम् = तत् प्राणिजातम्, पृथिव्यां वा = भूमौ वा, दिवि = द्युलोके, देवेषु वा पुनः = देवेषु अपि, न अस्ति = न विद्यते।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
प्रकृतिजैः	अ. पुं. तृ. बहु. (विशेषणम्)	एभिः	इदम् - म. सर्व. पुं. तृ. बहु. (विशेषणम्)
त्रिभिः	त्रि - इ. सर्व. पुं. तृ. बहु. (विशेषणम्)	गुणैः	अ. पुं. तृ. बहु. (विशेषणम्)
यत्	यद् - द. सर्व. नपुं. प्र. एक. (विशेषणम्)	मुक्तम्	अ. नपुं. प्र. एक. (विशेषणम्)
स्यात्	अस् (अस भुवि) पर. कर्तरि विधिलिङ्. प्रपु. एक.	तत्	तद् - द. सर्व. नपुं. प्र. एक. (विशेषणम्)
सत्त्वम्	अ. नपुं. प्र. एक. (विशेष्यम्)	पृथिव्याम्	ई. स्त्री. स. एक.
वा	अव्ययम्	दिवि	दिव् - व. स्त्री. स. एक.
देवेषु	अ. पुं. स. एक.	पुनः	अव्ययम्
न	अव्ययम्	अस्ति	अस् (अस भुवि) पर. कर्तरि लट्. प्रपु. एक.

व्याकरणम् -

(क) सन्धिः	तदस्ति	तत् + अस्ति	जश्त्वसन्धिः।
	प्रकृतिजैर्मुक्तम्	प्रकृतिजैः + मुक्तम्	विसर्गसन्धिः (रेफः)।
	यदेभिः	यत् + एभिः	जश्त्वसन्धिः।
	त्रिभिर्गुणैः	त्रिभिः + गुणैः	विसर्गसन्धिः रेफः।
(ख) समासः	प्रकृतिजैः	प्रकृतेः जाताः प्रकृतिजाः, तैः - कर्तरि डप्रत्ययः उपपदसमासश्च।	
(ग) कृदन्तः	देवेषु	दिव् (दिवु क्रीडा-विजिगीषा-व्यवहार-द्युति-स्तुति-मोद-मद-स्वप्न-कान्ति-गतिषु) + घञ्, तेषु।	
	मुक्तम्	मुच् (मुच्लृ मोचने) + क्त (कर्मणि)।	

भावस्पष्टीकरणम् -

न अस्ति।	
किं न अस्ति ?	**सत्त्वं** न अस्ति।
किं सत्त्वं न अस्ति ?	**तत्** सत्त्वं न अस्ति।
कीदृशं तत् सत्त्वं न अस्ति ?	**यत् मुक्तं स्यात्** तत् सत्त्वं न अस्ति।
कैः यत् मुक्तं स्यात् तत् सत्त्वं न अस्ति ?	**गुणैः** यत् मुक्तं स्यात् तत् सत्त्वं न अस्ति।
कतिभिः गुणैः यत् मुक्तं स्यात् तत् सत्त्वं न अस्ति ?	**त्रिभिः** गुणैः यत् मुक्तं स्यात् तत् सत्त्वं न अस्ति।
पुनः कैः त्रिभिः गुणैः यत् मुक्तं स्यात् तत् सत्त्वं न अस्ति ?	**एभिः** त्रिभिः गुणैः यत् मुक्तं स्यात् तत् सत्त्वं न अस्ति।
कीदृशैः एभिः त्रिभिः गुणैः यत् मुक्तं स्यात् तत् सत्त्वं न अस्ति ?	**प्रकृतिजैः** एभिः त्रिभिः गुणैः यत् मुक्तं स्यात् तत् सत्त्वं न अस्ति।
प्रकृतिजैः एभिः त्रिभिः गुणैः यत् मुक्तं स्यात् तत् सत्त्वं **कस्यां** न अस्ति ?	प्रकृतिजैः एभिः त्रिभिः गुणैः यत् मुक्तं स्यात् तत् सत्त्वं **पृथिव्यां** न अस्ति।
प्रकृतिजैः एभिः त्रिभिः गुणैः यत् मुक्तं स्यात् तत् सत्त्वं पृथिव्यां **पुनः कुत्र** वा न अस्ति ?	प्रकृतिजैः एभिः त्रिभिः गुणैः यत् मुक्तं स्यात् तत् सत्त्वं पृथिव्यां **दिवि वा** न अस्ति।
प्रकृतिजैः एभिः त्रिभिः गुणैः यत् मुक्तं स्यात् तत् सत्त्वं पृथिव्यां दिवि वा **पुनः कुत्र वा** न अस्ति ?	प्रकृतिजैः एभिः त्रिभिः गुणैः यत् मुक्तं स्यात् तत् सत्त्वं पृथिव्यां वा दिवि **देवेषु वा पुनः** न अस्ति।

तात्पर्यम् - प्रकृतिस्थितैः सत्त्वादिभिः त्रिभिः गुणैः निर्मुक्तः तादृशः प्राणी भूलोके नास्ति देवलोकेऽपि नास्ति।

ब्राह्मणक्षत्रियविशां शूद्राणां च परन्तप।
कर्माणि प्रविभक्तानि स्वभावप्रभवैर्गुणैः ॥१८.४१॥

पदच्छेदः - ब्राह्मणक्षत्रियविशाम्, शूद्राणाम्, च, परन्तप।
कर्माणि, प्रविभक्तानि, स्वभावप्रभवैः, गुणैः ॥

अन्वयः - परन्तप ! ब्राह्मणक्षत्रियविशां शूद्राणां च स्वभावप्रभवैः गुणैः कर्माणि प्रविभक्तानि।

पदार्थः - परन्तप = अर्जुन, ब्राह्मणक्षत्रियविशाम् = ब्राह्मणराजन्यवैश्यानाम्, शूद्राणां च = शूद्राणां च, स्वभावप्रभवैः = प्रकृत्या जातैः, गुणैः = सत्त्वरजस्तमोभिः, कर्माणि = शमादीनि कर्माणि, प्रविभक्तानि = विभक्तानि।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
परन्तप	अ. पुं. सम्बो. एक.	ब्राह्मणक्षत्रियविशाम्	ब्राह्मणक्षत्रियविश् - श. पुं. ष. बहु.
शूद्राणाम्	अ. पुं. ष. बहु.	च	अव्ययम्
स्वभावप्रभवैः	अ. पुं. तृ. बहु. (विशेषणम्)	गुणैः	अ. पुं. तृ. बहु. (विशेष्यम्)
कर्माणि	कर्मन् - न. नपुं. प्र. बहु. (विशेष्यम्)	प्रविभक्तानि	अ. नपुं. प्र. बहु. (विशेषणम्)

व्याकरणम् -

(क) सन्धिः	स्वभावप्रभवैर्गुणैः	स्वभावप्रभवैः + गुणैः	विसर्गसन्धिः (रेफः)।
(ख) समासः	ब्राह्मणक्षत्रियविशाम्	ब्राह्मणाश्च क्षत्रियाश्च विशश्च ब्राह्मणक्षत्रियविशः, तेषाम् - द्वन्द्वः।	
	परन्तप	परान् तापयति इति परन्तप - द्वितीयातत्पुरुषः।	
	स्वभावप्रभवैः	स्वभावात् प्रभवाः स्वभावप्रभवाः, तैः - पञ्चमीतत्पुरुषः।	
(ग) कृदन्तः	प्रविभक्तानि	प्र + वि + भज् (भज सेवायाम्) + क्त (कर्मणि)।	
(घ) तद्धितान्तः	ब्राह्मणः	ब्रह्मन् + अण् (ब्रह्मणः इदम्)।	
(ङ) अजन्तः	विशः	शकारान्तपुँल्लिङ्गविट्शब्दस्य बहुवचनम्।	

भावस्पष्टीकरणम् -

प्रविभक्तानि।	
कानि प्रविभक्तानि ?	**कर्माणि** प्रविभक्तानि।

कैः कर्माणि प्रविभक्तानि ?	**गुणैः** कर्माणि प्रविभक्तानि ।
कीदृशैः गुणैः कर्माणि प्रविभक्तानि ?	**स्वभावप्रभवैः** गुणैः कर्माणि प्रविभक्तानि ।
केषां स्वभावप्रभवैः गुणैः कर्माणि प्रविभक्तानि ?	**ब्राह्मणक्षत्रियविशां** स्वभावप्रभवैः गुणैः कर्माणि प्रविभक्तानि ।
ब्राह्मणक्षत्रियविशां **पुनः केषां** स्वभावप्रभवैः गुणैः कर्माणि प्रविभक्तानि ?	ब्राह्मणक्षत्रियविशां **शूद्राणां च** स्वभावप्रभवैः गुणैः कर्माणि प्रविभक्तानि ।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**परन्तप !**

तात्पर्यम् - अर्जुन ! ये ब्राह्मणाः क्षत्रियाः वैश्याः शूद्राश्च सन्ति तेषां तत्तद्गुणवशात् कर्माणि विभक्तानि सन्ति ।

शमो दमस्तपः शौचं क्षान्तिरार्जवमेव च ।
ज्ञानं विज्ञानमास्तिक्यं ब्रह्मकर्म स्वभावजम् ॥१८.४२॥

पदच्छेदः - शमः, दमः, तपः, शौचम्, क्षान्तिः, आर्जवम्, एव, च ।
ज्ञानम्, विज्ञानम्, आस्तिक्यम्, ब्रह्मकर्म, स्वभावजम् ॥

अन्वयः - शमः दमः तपः शौचं क्षान्तिः आर्जवम् एव च ज्ञानं विज्ञानम् आस्तिक्यं स्वभावजं ब्रह्मकर्म ।

पदार्थः - शमः = मनोनिग्रहः, दमः = बाह्येन्द्रियनिग्रहः, तपः = विविधं व्रतम्, शौचम् = शुचित्वम्, क्षान्तिः = क्षमा, आर्जवम् एव च = अवक्रता अपि, ज्ञानम् = बोधः, विज्ञानम् = शास्त्रानुभवः, आस्तिक्यम् = आस्तिकभावः, स्वभावजम् = स्वभावजातम्, ब्रह्मकर्म = ब्राह्मणकृत्यम् ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
शमः	अ. पुं. प्र. एक.	दमः	अ. पुं. प्र. एक.
तपः	तपस् - सका. नपुं. प्र. एक.	शौचम्	अ. नपुं. प्र. एक.
क्षान्तिः	इ. स्त्री. प्र. एक.	आर्जवम्	अ. नपुं. प्र. एक.
एव	अव्ययम्	च	अव्ययम्
ज्ञानम्	अ. नपुं. प्र. एक.	विज्ञानम्	अ. नपुं. प्र. एक.

आस्तिक्यम्	अ. नपुं. प्र. एक.	स्वभावजम्	अ. नपुं. प्र. एक. (विशेषणम्)
ब्रह्मकर्म	ब्रह्मकर्मन्- न. नपुं. प्र. एक. (विशेष्यम्)		

व्याकरणम् -

(क) सन्धिः	शमो दमः	शमः + दमः	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः।
	दमस्तपः	दमः + तपः	विसर्गसन्धिः (सकारः)।
	क्षान्तिरार्जवम्	क्षान्तिः + आर्जवम्	विसर्गसन्धिः (रेफः)।
(ख) समासः	ब्रह्मकर्म	ब्रह्मणः कर्म ब्रह्मकर्म - षष्ठीतत्पुरुषः।	
	स्वभावजम्	स्वभावात् जातं स्वभावजम् - कर्तरि डप्रत्ययः उपपदसमासश्च।	
(ग) कृदन्तः	शमः	शम् (शमु उपशमने) + घञ्।	
	दमः	दम् (दमु उपशमे) + घञ्।	
	क्षान्तिः	क्षम् (क्षमू सहने) + क्तिन्।	
	ज्ञानम्	ज्ञा (ज्ञा अवबोधने) + ल्युट्।	
(घ) तद्धितान्तः	शौचम्	शुचि + अण् (शुचेः भावः)।	
	आर्जवम्	ऋजु + अण् (ऋजोः भावः)।	
	आस्तिक्यम्	आस्तिकः + ष्यञ् (भावे) अस्ति परलोकादिः इति मतिः यस्य सः आस्तिकः। आस्तिकस्य भावः आस्तिक्यम्।	

भावस्पष्टीकरणम् -

ब्रह्मकर्म।	
कीदृशं ब्रह्मकर्म ?	**स्वभावजं ब्रह्मकर्म।**
किं किं स्वभावजं ब्रह्मकर्म ?	**शमः दमः तपः शौचं क्षान्तिः आर्जवम् एव च ज्ञानं विज्ञानम् आस्तिक्यं स्वभावजं ब्रह्मकर्म।**

तात्पर्यम् - तत्र मनोनिग्रहः, बाह्येन्द्रियनिग्रहः, विविधं व्रतं, शुचित्वं, क्षमा, अवक्रता, ज्ञानं, शास्त्रानुभवः, आस्तिकभावः च ब्राह्मणानां स्वभावात् जातं कर्म भवति।

शौर्यं तेजो धृतिर्दाक्ष्यं युद्धे चाप्यपलायनम्।
दानमीश्वरभावश्च क्षात्रं कर्म स्वभावजम्॥१८.४३॥

पदच्छेदः - शौर्यम्, तेजः, धृतिः, दाक्ष्यम्, युद्धे, च, अपि, अपलायनम्।
दानम्, ईश्वरभावः, च, क्षात्रम्, कर्म, स्वभावजम्॥

अन्वयः - शौर्यं तेजः धृतिः दाक्ष्यं युद्धे च अपि अपलायनं दानम् ईश्वरभावः च स्वभावजं क्षात्रं कर्म।

पदार्थः - शौर्यम् = विक्रमः, तेजः = प्रागल्भ्यम्, धृतिः = अग्लानिः, दाक्ष्यम् = सामर्थ्यम्, युद्धे च अपि = आयोधने अपि, अपलायनम् = अपराङ्मुखीभावः, दानम् = वितरणम्, ईश्वरभावः च = प्रभुत्वं च, स्वभावजम् = स्वभावात् जातम्, क्षात्रम् = क्षत्रियसम्बन्धि, कर्म = कर्तव्यम्।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
शौर्यम्	अ. नपुं. प्र. एक.	तेजः	तेजस् - स. नपुं. प्र. एक.
धृतिः	इ. स्त्री. प्र. एक.	दाक्ष्यम्	अ. नपुं. प्र. एक.
युद्धे	अ. नपुं. स. एक.	च	अव्ययम्
अपि	अव्ययम्	अपलायनम्	अ. नपुं. प्र. एक.
दानम्	अ. नपुं. प्र. एक.	ईश्वरभावः	अ. पुं. प्र. एक.
स्वभावजम्	अ. नपुं. प्र. एक. (विशेषणम्)	क्षात्रम्	अ. नपुं. प्र. एक. (विशेषणम्)
कर्म	कर्मन् - न. नपुं. प्र. एक. (विशेष्यम्)		

व्याकरणम् -

(क) सन्धिः	तेजो धृतिः	तेजः + धृतिः	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः।
	धृतिर्दाक्ष्यम्	धृतिः + दाक्ष्यम्	विसर्गसन्धिः रेफः।
	चापि	च + अपि	सवर्णदीर्घसन्धिः।
	अप्यपलायनम्	अपि + अपलायनम्	यण्सन्धिः।
	ईश्वरभावश्च	ईश्वरभावः + च	विसर्गसन्धिः (सकारः) श्चुत्वम्।
(ख) समासः	अपलायनम्	न पलायनम् अपलायनम् - नञ्तत्पुरुषः।	
	ईश्वरभावः	ईश्वरस्य भावः ईश्वरभावः - षष्ठीतत्पुरुषः।	
	स्वभावजम्	स्वभावात् जातं स्वभावजम् - कर्तरि डप्रत्ययः उपपदसमासश्च।	
(ग) कृदन्तः	धृतिः	धृ (धृञ् धारणे) + क्तिन्।	

	पलायनम्	परा + अय् (अय गतौ) + ल्युट्।
	दानम्	दा (डुदाञ् दाने) + ल्युट्।
(घ) तद्धितान्तः	शौर्यम्	शूर + ष्यञ् (शूरस्य भावः)।
	दाक्ष्यम्	दक्ष + ष्यञ् (दक्षस्य भावः)।
	क्षात्रम्	क्षत्र + अण् (क्षत्रस्य भावः)।

भावस्पष्टीकरणम् -

कर्म।	
किं कर्म ?	**क्षात्रं कर्म।**
कीदृशं क्षात्रं कर्म ?	**स्वभावजं क्षात्रं कर्म।**
किं किं स्वभावजं क्षात्रं कर्म ?	**शौर्यं तेजः धृतिः दाक्ष्यं युद्धे च अपि अपलायनं दानम् ईश्वरभावः च स्वभावजं क्षात्रं कर्म।**

तात्पर्यम् - विक्रमः, आत्मविश्वासः, धैर्यं, सामर्थ्यं, युद्धे अपराङ्मुखीभावः, दानं प्रभुत्वं च क्षत्रियाणां स्वभावात् जातं कर्म भवति।

कृषिगौरक्ष्यवाणिज्यं वैश्यकर्म स्वभावजम्।
परिचर्यात्मकं कर्म शूद्रस्यापि स्वभावजम्॥१८.४४॥

पदच्छेदः - कृषिगौरक्ष्यवाणिज्यम्, वैश्यकर्म, स्वभावजम्।
परिचर्यात्मकम्, कर्म, शूद्रस्य, अपि, स्वभावजम्॥

अन्वयः - कृषिगौरक्ष्यवाणिज्यं स्वभावजं वैश्यकर्म। शूद्रस्य अपि परिचर्यात्मकं स्वभावजं कर्म।

पदार्थः - कृषिगौरक्ष्यवाणिज्यम् = भूकर्षणम्, पशुपाल्यं क्रयविक्रयः च, स्वभावजम् = प्रकृतिसम्भवम्, वैश्यकर्म = वैश्यानां कर्म, शूद्रस्य अपि = शूद्राणां च, परिचर्यात्मकम् = शूश्रूषात्मकम्, स्वभावजम् = स्वभावजातम्, कर्म = कर्तव्यम्।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
कृषिगौरक्ष्य-वाणिज्यम्	अ. नपुं. प्र. एक. (विशेषणम्)	स्वभावजम्	अ. नपुं. प्र. एक. (विशेषणम्)

वैश्यकर्म	वैश्यकर्मन् - न. नपुं. प्र. एक. (विशेष्यम्)	शूद्रस्य	अ. पुं. ष. एक.
अपि	अव्ययम्	परिचर्यात्मकम्	अ. नपुं. प्र. एक. (विशेषणम्)
कर्म	कर्मन् - न. नपुं. प्र. एक. (विशेष्यम्)		

व्याकरणम् -

(क) सन्धिः शूद्रस्यापि — शूद्रस्य + अपि — सवर्णदीर्घसन्धिः।

(ख) समासः कृषिगौरक्ष्यवाणिज्यम् — कृषिश्च गौरक्ष्यं च वाणिज्यं च एतेषां समाहारः कृषिगौरक्ष्यवाणिज्यम् - द्वन्द्वः।

वैश्यकर्म — वैश्यस्य कर्म वैश्यकर्म - षष्ठीतत्पुरुषः।

स्वभावजम् — स्वभावात् जातं स्वभावजम् - कर्तरि डप्रत्ययः उपपदसमासश्च।

परिचर्यात्मकम् — परिचर्या आत्मा यस्य तत् परिचर्यात्मकम् - बहुव्रीहिः।

(ग) तद्धितान्तः गौरक्ष्यम् — गोरक्ष + ष्यञ्, (भावे) गां रक्षतीति गोरक्षः, गोरक्षस्य भावः गौरक्ष्यम्।

भावस्पष्टीकरणम् -

वैश्यकर्म।	
कीदृशं वैश्यकर्म ?	**स्वभावजं** वैश्यकर्म।
किं स्वभावजं वैश्यकर्म ?	**कृषिगौरक्ष्यवाणिज्यं** स्वभावजं वैश्यकर्म।
कर्म।	
कीदृशं कर्म ?	**स्वभावजं** कर्म।
किं स्वभावजं कर्म ?	**परिचर्यात्मकं** स्वभावजं कर्म।
कस्य परिचर्यात्मकं स्वभावजं कर्म ?	**शूद्रस्य अपि** परिचर्यात्मकं स्वभावजं कर्म।

तात्पर्यम् - कृषिः, गवादिरक्षणं क्रयविक्रयश्च वैश्यानां स्वभावात् जातं कर्म भवति। एतेषां त्रयाणाम् अपि साहाय्याचरणं शूद्रस्य स्वभावात् जातं कर्म भवति।

स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते नरः।
स्वकर्मनिरतः सिद्धिं यथा विन्दति तच्छृणु॥१८.४५॥

पदच्छेदः - स्वे, स्वे, कर्मणि, अभिरतः, संसिद्धिम्, लभते, नरः।
स्वकर्मनिरतः, सिद्धिम्, यथा, विन्दति, तत्, शृणु॥

अन्वयः - नरः स्वे स्वे कर्मणि अभिरतः संसिद्धिं लभते। स्वकर्मनिरतः सिद्धिं यथा विन्दति तत् शृणु।

पदार्थः - नरः = मानवः, स्वे स्वे = स्वस्मिन् स्वस्मिन्, कर्मणि = कर्तव्ये, अभिरतः = आसक्तः, संसिद्धिम् = अभ्युदयम्, लभते = प्राप्नोति, स्वकर्मनिरतः = स्वकर्मानुष्ठाता, सिद्धिम् = फलम्, यथा = येन प्रकारेण, विन्दति = लभते, तत् शृणु = तत् आकर्णय।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
नरः	अ. पुं. प्र. एक. (विशेष्यम्)	स्वे	अ. पुं. स. एक.
कर्मणि	कर्मन् - न. नपुं. स. एक.	अभिरतः	अ. पुं. प्र. एक. (विशेषणम्)
संसिद्धिम्	इ. स्त्री. द्वि. एक.	लभते	लभ् (डुलभष् प्राप्तौ) आत्म. कर्तरि लट्. प्रपु. एक.
स्वकर्मनिरतः	अ. पुं. प्र. एक. (विशेषणम्)	सिद्धिम्	इ. स्त्री. द्वि. एक.
यथा	अव्ययम्	विन्दति	विद् (विद्लृ लाभे) पर. कर्तरि लट्. प्रपु. एक.
तत्	तद् - द. सर्व. नपुं. द्वि. एक.	शृणु	श्रु (श्रु श्रवणे) पर. कर्तरि लोट्. मपु. एक.

व्याकरणम् -

(क) सन्धिः	कर्मण्यभिरतः	कर्मणि + अभिरतः	यण्सन्धिः।
	तच्छृणु	तत् + शृणु	श्चुत्वसन्धिः, छत्वसन्धिः।
(ख) समासः	स्वकर्मनिरतः	स्वस्य कर्म स्वकर्म - षष्ठीतत्पुरुषः।	
		स्वकर्मणि निरतः स्वकर्मनिरतः - सप्तमीतत्पुरुषः।	
(ग) कृदन्तः	अभिरतः	अभि + रम् (रमु क्रीडायाम्) + क्त (कर्तरि)।	
	सिद्धिम्	सिध् (षिधु संराद्धौ) + क्तिन्, ताम्।	
	नरः	नॄ (नॄ नये) + अप्।	

भावस्पष्टीकरणम् -

लभते।	
कां लभते ?	संसिद्धिं लभते।
कः संसिद्धिं लभते ?	नरः संसिद्धिं लभते।

कीदृशः नरः संसिद्धिं लभते ?	**अभिरतः** नरः संसिद्धिं लभते ।
कस्मिन् अभिरतः नरः संसिद्धिं लभते ?	**कर्मणि** अभिरतः नरः संसिद्धिं लभते ।
कस्मिन् कर्मणि अभिरतः नरः संसिद्धिं लभते ?	**स्वे स्वे** कर्मणि अभिरतः नरः संसिद्धिं लभते ।

तात्पर्यम् - मानवः स्वस्मिन् स्वस्मिन् कर्तव्ये आसक्तः अभ्युदयं प्राप्नोति । स्वकर्म आचरन् फलं यथा लभते तं प्रकारं शृणु ।

यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततम् ।
स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः ॥१८.४६॥

पदच्छेदः - यतः, प्रवृत्तिः, भूतानाम्, येन, सर्वम्, इदम्, ततम् ।
स्वकर्मणा, तम्, अभ्यर्च्य, सिद्धिम्, विन्दति, मानवः ॥

अन्वयः - मानवः यतः भूतानां प्रवृत्तिः, येन इदं सर्वं ततं तं स्वकर्मणा अभ्यर्च्य सिद्धिं विन्दति ।

पदार्थः - मानवः = मनुष्यः, यतः = यस्मात्, भूतानाम् = प्राणिनाम्, प्रवृत्तिः = उत्पत्तिः, येन = ईश्वरेण, इदम् = एतत्, सर्वम् = सकलम्, ततम् = परिव्याप्तम्, तम् = ईश्वरम्, स्वकर्मणा = स्वकर्तव्येन, अभ्यर्च्य = आराध्य, सिद्धिम् = अभ्युदयम्, विन्दति = लभते ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
मानवः	अ. पुं. प्र. एक.	यतः	अव्ययम्
भूतानाम्	अ. नपुं. ष. बहु.	प्रवृत्तिः	इ. स्त्री. प्र. एक.
येन	यद् - द. सर्व. पुं. तृ. एक. (विशेषणम्)	इदम्	इदम् - म. सर्व. नपुं. द्वि. एक. (विशेषणम्)
सर्वम्	अ. सर्व. नपुं. द्वि. एक. (विशेषणम्)	ततम्	अ. नपुं. द्वि. एक. (विशेषणम्)
तम्	तद् - द. सर्व. पुं. द्वि. एक. (विशेषणम्)	स्वकर्मणा	स्वकर्मन् - न. नपुं. तृ. एक.
अभ्यर्च्य	ल्यबन्तम् अव्ययम्	सिद्धिम्	इ. स्त्री. द्वि. एक.
विन्दति	विद् (विदलृ लाभे) पर. कर्तरि लट्. प्रपु. एक.		

व्याकरणम् -

(क) सन्धिः	प्रवृत्तिर्भूतानाम्	प्रवृत्तिः + भूतानाम्	विसर्गसन्धिः (रेफः)।
(ख) समासः	स्वकर्मणा	स्वस्य कर्म स्वकर्म, तेन - षष्ठीतत्पुरुषः।	
(ग) कृदन्तः	प्रवृत्तिः	प्र + वृत् (वृतु वर्तने) + क्तिन्।	
	भूतानाम्	भू (भू सत्तायाम्) + क्त (कर्तरि), तेषाम्।	
	ततम्	तन् (तनु विस्तारे) + क्त (कर्मणि)।	
	अभ्यर्च्य	अभि + अर्च् (अर्च पूजायाम्) + ल्यप्।	
	सिद्धिम्	सिध् (षिधु संराद्धौ) + क्तिन्, ताम्।	
(घ) तद्धितान्तः	मानवः	मनु + अण् (मनोः अपत्यं पुमान्)।	

भावस्पष्टीकरणम् -

विन्दति।	
कः विन्दति ?	**मानवः** विन्दति।
मानवः **कां** विन्दति ?	मानवः **सिद्धिं** विन्दति।
मानवः **किं कृत्वा** सिद्धिं विन्दति ?	मानवः **अभ्यर्च्य** सिद्धिं विन्दति।
मानवः **केन** अभ्यर्च्य सिद्धिं विन्दति ?	मानवः **स्वकर्मणा** अभ्यर्च्य सिद्धिं विन्दति।
मानवः **कं** स्वकर्मणा अभ्यर्च्य सिद्धिं विन्दति ?	मानवः **तं** स्वकर्मणा अभ्यर्च्य सिद्धिं विन्दति।
मानवः **कीदृशं** तं स्वकर्मणा अभ्यर्च्य सिद्धिं विन्दति ?	मानवः **यतः प्रवृत्तिः** तं स्वकर्मणा अभ्यर्च्य सिद्धिं विन्दति।
मानवः यतः **केषां** प्रवृत्तिः तं स्वकर्मणा अभ्यर्च्य सिद्धिं विन्दति ?	मानवः यतः **भूतानां** प्रवृत्तिः, तं स्वकर्मणा अभ्यर्च्य सिद्धिं विन्दति।
मानवः यतः भूतानां प्रवृत्तिः, **पुनश्च कीदृशं** तं स्वकर्मणा अभ्यर्च्य सिद्धिं विन्दति ?	मानवः यतः भूतानां प्रवृत्तिः, **येन इदं सर्वं ततं** तं स्वकर्मणा अभ्यर्च्य सिद्धिं विन्दति।

तात्पर्यम् - सर्वेषां प्राणिनाम् उत्पत्तिः यस्मात् भवति, यः इदं समग्रं विश्वं व्याप्य तिष्ठति तादृशं परमात्मानम् एते सर्वेऽपि पुरुषाः आराध्य अभ्युदयं प्राप्नुवन्ति।

श्रेयान्स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात् ।
स्वभावनियतं कर्म कुर्वन्नाप्नोति किल्बिषम् ॥१८.४७॥

पदच्छेदः - श्रेयान्, स्वधर्मः, विगुणः, परधर्मात्, स्वनुष्ठितात् ।
स्वभावनियतम्, कर्म, कुर्वन्, न, आप्नोति, किल्बिषम् ॥

अन्वयः - विगुणः स्वधर्मः स्वनुष्ठितात् परधर्मात् श्रेयान्, स्वभावनियतं कर्म कुर्वन् किल्बिषं न आप्नोति ।

पदार्थः - विगुणः = विकृतः, स्वधर्मः = आत्मधर्मः, स्वनुष्ठितात् = सुष्ठु कृतात्, परधर्मात् = इतरधर्मात्, श्रेयान् = श्रेयस्करः, स्वभावनियतम् = स्वभावलब्धम्, कर्म = कर्तव्यम्, कुर्वन् = आचरन्, किल्बिषम् = पापम्, न आप्नोति = न अधिगच्छति ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
विगुणः	अ. पुं. प्र. एक. (विशेषणम्)	स्वधर्मः	अ. पुं. प्र. एक. (विशेष्यम्)
स्वनुष्ठितात्	अ. पुं. पं. एक. (विशेषणम्)	परधर्मात्	अ. पुं. पं. एक. (विशेष्यम्)
श्रेयान्	श्रेयस् - स. पुं. प्र. एक. (विशेषणम्)	स्वभावनियतम्	अ. नपुं. द्वि. एक. (विशेषणम्)
कर्म	कर्मन् - न. नपुं. द्वि. एक. (विशेष्यम्)	कुर्वन्	कुर्वत् - त. पुं. प्र. एक. (विशेषणम्)
किल्बिषम्	अ. नपुं. द्वि. एक.	न	अव्ययम्
आप्नोति	आप् (आप्लृ व्याप्तौ) पर. कर्तरि लट्. प्रपु. एक.		

व्याकरणम् -

(क) सन्धिः
स्वधर्मो विगुणः — स्वधर्मः + विगुणः — विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः ।
नाप्नोति — न + आप्नोति — सवर्णदीर्घसन्धिः ।

(ख) समासः
स्वधर्मः — स्वस्य धर्मः स्वधर्मः - षष्ठीतत्पुरुषः ।
विगुणः — विगतः गुणः यस्मात् सः विगुणः - बहुव्रीहिः ।
परधर्मात् — परस्य धर्मः परधर्मः, तस्मात् - षष्ठीतत्पुरुषः ।
स्वभावनियतम् — स्वभावेन नि यतम् स्वभावनियतम् - तृतीयातत्पुरुषः ।

(ग) कृदन्तः
स्वनुष्ठितात् — सु + अनु + स्था (ष्ठा गतिनिवृत्तौ) + क्त (कर्मणि) ।
कुर्वन् — कृ (डुकृञ् करणे) + शतृ ।

भावस्पष्टीकरणम् -

न आप्नोति ।	
किं न आप्नोति ?	**किल्बिषं** न आप्नोति ।
किं कुर्वन् किल्बिषं न आप्नोति ?	**कर्म** कुर्वन् किल्बिषं न आप्नोति ।
कीदृशं कर्म कुर्वन् किल्बिषं न आप्नोति ?	**स्वभावनियतं** कर्म कुर्वन् किल्बिषं न आप्नोति ।
किमर्थं स्वभावनियतं कर्म कुर्वन् किल्बिषं न आप्नोति ?	**विगुणः स्वधर्मः स्वनुष्ठितात् परधर्मात् श्रेयान्** **(अतः)** स्वभावनियतं कर्म कुर्वन् किल्बिषं न आप्नोति ।

तात्पर्यम् - साधु आचरितात् परधर्मादपि किञ्चिदङ्गेन विकलः स्वधर्मः एव श्रेयस्करः । प्रकृतिवशात् यत् कर्म निर्णीतं तत् कर्म कुर्वन् पुरुषः पापं न प्राप्नोति ।

सहजं कर्म कौन्तेय सदोषमपि न त्यजेत् ।
सर्वारम्भा हि दोषेण धूमेनाग्निरिवावृताः ॥१८.४८॥

पदच्छेदः - सहजम्, कर्म, कौन्तेय, सदोषम्, अपि, न, त्यजेत् ।
सर्वारम्भाः, हि, दोषेण, धूमेन, अग्निः, इव, आवृताः ॥

अन्वयः - कौन्तेय ! सदोषम् अपि सहजं कर्म न त्यजेत् । धूमेन हि अग्निः इव सर्वारम्भाः दोषेण आवृताः ।

पदार्थः - कौन्तेय = अर्जुन, सदोषम् अपि = दोषयुक्तम् अपि, सहजम् = स्वभावजम्, कर्म = कर्तव्यम्, न त्यजेत् = न वर्जयेत्, धूमेन हि = धूमेन खलु, अग्निः इव = वह्निः इव, सर्वारम्भाः = सर्वकर्माणि, दोषेण = दोषेण, आवृताः = आच्छादितानि ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
कौन्तेय	अ. पुं. सम्बो. एक.	सदोषम्	अ. नपुं. द्वि. एक. (विशेषणम्)
अपि	अव्ययम्	सहजम्	अ. नपुं. द्वि. एक. (विशेषणम्)
कर्म	कर्मन् - न. नपुं. द्वि. एक. (विशेष्यम्)	न	अव्ययम्
त्यजेत्	त्यज् (त्यज हानौ) पर. कर्तरि विधिलिङ्. प्रपु. एक.	धूमेन	अ. पुं. तृ. एक.

हि	अव्ययम्	अग्निः	इ. पुं. प्र. एक.
इव	अव्ययम्	सर्वारम्भाः	अ. पुं. प्र. बहु. (विशेष्यम्)
दोषेण	अ. पुं. तृ. एक.	आवृताः	अ. पुं. प्र. बहु. (विशेषणम्)

व्याकरणम् -

(क) सन्धिः	धूमेनाग्निः	धूमेन + अग्निः	सवर्णदीर्घसन्धिः ।
	अग्निरिव	अग्निः + इव	विसर्गसन्धिः (रेफः) ।
	इवावृताः	इव + आवृताः	सवर्णदीर्घसन्धिः ।
(ख) समासः	सदोषम्	दोषेण सह वर्तते सदोषम् - बहुव्रीहिः ।	
	सर्वारम्भाः	सर्वे आरम्भाः सर्वारम्भाः - कर्मधारयः ।	
(ग) कृदन्तः	आवृताः	आ + वृ (वृञ् वरणे) + क्त (कर्मणि) ।	
(घ) तद्धितान्तः	कौन्तेय	कुन्ती + ढक्, (अपत्यार्थे) कुन्त्याः अपत्यं पुमान्, तत्सम्बुद्धौ ।	

भावस्पष्टीकरणम् -

आवृताः ।	
के आवृताः ?	**सर्वारम्भाः** आवृताः ।
सर्वारम्भाः **केन** आवृताः ?	सर्वारम्भाः **दोषेण** आवृताः ।
कथं सर्वारम्भाः दोषेण आवृताः ?	**धूमेन हि अग्निः इव** सर्वारम्भाः दोषेण आवृताः ।
धूमेन हि अग्निः इव सर्वारम्भाः दोषेण आवृताः, **अतः किम्** ?	धूमेन हि अग्निः इव सर्वारम्भाः दोषेण आवृताः, अतः **न त्यजेत्** ।
धूमेन हि अग्निः इव सर्वारम्भाः दोषेण आवृताः, अतः **किं** न त्यजेत् ?	धूमेन हि अग्निः इव सर्वारम्भाः दोषेण आवृताः, अतः **कर्म** न त्यजेत् ।
धूमेन हि अग्निः इव सर्वारम्भाः दोषेण आवृताः, अतः **कीदृशं** कर्म न त्यजेत् ?	धूमेन हि अग्निः इव सर्वारम्भाः दोषेण आवृताः, अतः **सहजं** कर्म न त्यजेत् ।
धूमेन हि अग्निः इव सर्वारम्भाः दोषेण आवृताः, अतः **पुनः** कीदृशं सहजं कर्म न त्यजेत् ?	धूमेन हि अग्निः इव सर्वारम्भाः दोषेण आवृताः, अतः **सदोषम् अपि** सहजं कर्म न त्यजेत् ।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**कौन्तेय !**

तात्पर्यम् - अर्जुन ! दोषयुक्तम् अपि स्वभावजं कर्तव्यं न त्यजेत्। धूमेन अग्निः इव सर्वाण्यपि कर्माणि दोषेण आवृतान्येव भवन्ति।

असक्तबुद्धिः सर्वत्र जितात्मा विगतस्पृहः।
नैष्कर्म्यसिद्धिं परमां संन्यासेनाधिगच्छति ॥१८.४९॥

पदच्छेदः - असक्तबुद्धिः, सर्वत्र, जितात्मा, विगतस्पृहः।
नैष्कर्म्यसिद्धिम्, परमाम्, संन्यासेन, अधिगच्छति ॥

अन्वयः - सर्वत्र असक्तबुद्धिः जितात्मा विगतस्पृहः संन्यासेन परमां नैष्कर्म्यसिद्धिम् अधिगच्छति।

पदार्थः - सर्वत्र = सकलविषयेषु, असक्तबुद्धिः = असङ्गमतिः, जितात्मा = विहितमनस्कः, विगतस्पृहः = अपगताशः, संन्यासेन = सम्यक् दर्शनेन, परमाम् = उत्कृष्टाम्, नैष्कर्म्यसिद्धिम् = परमात्मज्ञानयोग्यताम्, अधिगच्छति = प्राप्नोति।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
सर्वत्र	अव्ययम्	असक्तबुद्धिः	इ. स्त्री. प्र. एक. (विशेषणम्)
जितात्मा	जितात्मन् - न. पुं. प्र. एक. (विशेषणम्)	विगतस्पृहः	अ. पुं. प्र. एक. (विशेषणम्)
संन्यासेन	अ. पुं. तृ. एक.	परमाम्	आ. स्त्री. द्वि. एक. (विशेषणम्)
नैष्कर्म्यसिद्धिम्	इ. स्त्री. द्वि. एक. (विशेष्यम्)	अधिगच्छति	अधि + गम् (गम्लृ गतौ) पर. कर्तरि लट्. प्रपु. एक.

व्याकरणम् -

(क) सन्धिः संन्यासेनाधिगच्छति — संन्यासेन + अधिगच्छति — सवर्णदीर्घसन्धिः।

(ख) समासः
असक्तबुद्धिः — न सक्ता असक्ता - नञ्तत्पुरुषः।
असक्ता बुद्धिः यस्य सः असक्तबुद्धिः - बहुव्रीहिः।
जितात्मा — जितः आत्मा येन सः जितात्मा - बहुव्रीहिः।
विगतस्पृहः — विगता स्पृहा यस्मात् सः विगतस्पृहः - बहुव्रीहिः।
नैष्कर्म्यसिद्धिम् — नैष्कर्म्यस्य सिद्धिः नैष्कर्म्यसिद्धिः, ताम् - षष्ठीतत्पुरुषः।

(ग) कृदन्तः
बुद्धिः — बुध् (बुध अवगमने) + क्तिन्।
सिद्धिम् — सिध् (षिधु संराद्धौ) + क्तिन्, ताम्।

भावस्पष्टीकरणम् -

अधिगच्छति ।	
काम् अधिगच्छति ?	**नैष्कर्म्यसिद्धिम्** अधिगच्छति ।
कीदृशीं नैष्कर्म्यसिद्धिम् अधिगच्छति ?	**परमां** नैष्कर्म्यसिद्धिम् अधिगच्छति ।
केन परमां नैष्कर्म्यसिद्धिम् अधिगच्छति ?	**संन्यासेन** परमां नैष्कर्म्यसिद्धिम् अधिगच्छति ।
कः संन्यासेन परमां नैष्कर्म्यसिद्धिम् अधिगच्छति ?	**असक्तबुद्धिः** संन्यासेन परमां नैष्कर्म्यसिद्धिम् अधिगच्छति ।
कुत्र असक्तबुद्धिः संन्यासेन परमां नैष्कर्म्यसिद्धिम् अधिगच्छति ?	**सर्वत्र** असक्तबुद्धिः संन्यासेन परमां नैष्कर्म्यसिद्धिम् अधिगच्छति ।
सर्वत्र असक्तबुद्धिः **पुनः कः** संन्यासेन परमां नैष्कर्म्यसिद्धिम् अधिगच्छति ?	सर्वत्र असक्तबुद्धिः **जितात्मा** संन्यासेन परमां नैष्कर्म्यसिद्धिम् अधिगच्छति ।
सर्वत्र असक्तबुद्धिः जितात्मा **पुनः कः** संन्यासेन परमां नैष्कर्म्यसिद्धिम् अधिगच्छति ?	सर्वत्र असक्तबुद्धिः जितात्मा **विगतस्पृहः** संन्यासेन परमां नैष्कर्म्यसिद्धिम् अधिगच्छति ।

तात्पर्यम् - यः पुरुषः सर्वेषु अपि विषयेषु अनास्थः, जितमनस्कः, आशाविहीनः च वर्तते सः ज्ञानयोगेन सर्वकर्मनिवृत्तिरूपां सिद्धिं प्राप्नोति ।

सिद्धिं प्राप्तो यथा ब्रह्म तथाप्नोति निबोध मे।
समासेनैव कौन्तेय निष्ठा ज्ञानस्य या परा ॥१८.५०॥

पदच्छेदः - सिद्धिम्, प्राप्तः, यथा, ब्रह्म, तथा, आप्नोति, निबोध, मे ।
समासेन, एव, कौन्तेय, निष्ठा, ज्ञानस्य, या, परा ॥

अन्वयः - कौन्तेय ! सिद्धिं प्राप्तः ब्रह्म यथा आप्नोति तथा मे (वचनात्) निबोध या ज्ञानस्य परा निष्ठा समासेन एव ।

पदार्थः - कौन्तेय = अर्जुन, सिद्धिम् = योग्यताम्, प्राप्तः = लब्धः, ब्रह्म = परमात्मानम्, यथा = येन प्रकारेण, आप्नोति = लभते, तथा = तेन प्रकारेण, मे = मम, निबोध = शृणु, या = या, ज्ञानस्य = ब्रह्मज्ञानस्य, परा = उत्तमा, निष्ठा = स्थितिः, समासेन एव = सङ्ग्रहेण एव ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
कौन्तेय	अ. पुं. सम्बो. एक.	सिद्धिम्	इ. स्त्री. द्वि. एक.
प्राप्तः	अ. पुं. प्र. एक. (विशेषणम्)	ब्रह्म	ब्रह्मन् - न. नपुं. प्र. एक.
यथा	अव्ययम्	आप्नोति	आप् (आप्लृ व्याप्तौ) पर. कर्तरि लट्. प्रपु. एक.
तथा	अव्ययम्	मे	अस्मद् - द. सर्व. ष. एक.
निबोध	नि + बुध् (बुध अवगमने) पर. कर्तरि लोट्. मपु. एक.	या	यद् - द. सर्व. स्त्री. प्र. एक.
ज्ञानस्य	अ. पुं. ष. एक.	परा	आ. स्त्री. प्र. एक. (विशेषणम्)
निष्ठा	आ. स्त्री. प्र. एक. (विशेष्यम्)	समासेन	अ. पुं. तृ. एक.
एव	अव्ययम्		

व्याकरणम् -

(क) सन्धिः	प्राप्तो यथा	प्राप्तः + यथा	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः ।
	तथाप्नोति	तथा + आप्नोति	सवर्णदीर्घसन्धिः ।
	समासेनैव	समासेन + एव	वृद्धिसन्धिः ।
(ख) कृदन्तः	सिद्धिम्	सिध् (षिधु संराद्धौ) + क्तिन्, ताम् ।	
	प्राप्तः	प्र + आप् (आप्लृ व्याप्तौ) + क्त (कर्तरि) ।	
	ज्ञानस्य	ज्ञा (ज्ञा अवबोधने) + ल्युट्, तस्य ।	
(ग) तद्धितान्तः	कौन्तेय	कुन्ती + ढक् (अपत्यार्थे), कुन्त्याः अपत्यं पुमान्, तत्सम्बुद्धौ ।	

भावस्पष्टीकरणम् -

आप्नोति ।	
कथम् आप्नोति ?	**यथा** आप्नोति ।
किं यथा आप्नोति ?	**ब्रह्म** यथा आप्नोति ।
कः ब्रह्म यथा आप्नोति ?	**प्राप्तः** ब्रह्म यथा आप्नोति ।

कां प्राप्तः ब्रह्म यथा आप्नोति ?	**सिद्धिं** प्राप्तः ब्रह्म यथा आप्नोति ।
सिद्धिं प्राप्तः ब्रह्म यथा आप्नोति **तथा किम्** ?	सिद्धिं प्राप्तः ब्रह्म यथा आप्नोति **तथा निबोध** ।
सिद्धिं प्राप्तः ब्रह्म यथा आप्नोति तथा **कस्य** निबोध ?	सिद्धिं प्राप्तः ब्रह्म यथा आप्नोति तथा **मे** निबोध ।
कथं निबोध ?	**समासेन** निबोध ।
कां निबोध ?	**ज्ञानस्य या परा निष्ठा तां** निबोध ।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**कौन्तेय** !

तात्पर्यम् - अर्जुन ! एवं सर्वकर्मनिवृत्तिरूपां सिद्धिं प्राप्तः पुरुषः येन प्रकारेण परमात्मानं प्राप्नोति तं प्रकारं शृणु। तत्परमात्मनः प्राप्तिः नाम ज्ञानस्य परिसमाप्तिः इति जानीहि ।

बुद्ध्या विशुद्धया युक्तो धृत्यात्मानं नियम्य च।
शब्दादीन्विषयांस्त्यक्त्वा रागद्वेषौ व्युदस्य च ॥१८.५१॥
विविक्तसेवी लघ्वाशी यतवाक्कायमानसः ।
ध्यानयोगपरो नित्यं वैराग्यं समुपाश्रितः ॥१८.५२॥
अहङ्कारं बलं दर्पं कामं क्रोधं परिग्रहम् ।
विमुच्य निर्ममः शान्तो ब्रह्मभूयाय कल्पते ॥१८.५३॥

पदच्छेदः -
बुद्ध्या, विशुद्धया, युक्तः, धृत्या, आत्मानम्, नियम्य, च ।
शब्दादीन्, विषयान्, त्यक्त्वा, रागद्वेषौ, व्युदस्य, च ॥
विविक्तसेवी, लघ्वाशी, यतवाक्कायमानसः ।
ध्यानयोगपरः, नित्यम्, वैराग्यम्, समुपाश्रितः ॥
अहङ्कारम्, बलम्, दर्पम्, कामम्, क्रोधम्, परिग्रहम् ।
विमुच्य, निर्ममः, शान्तः, ब्रह्मभूयाय, कल्पते ॥

अन्वयः - विशुद्धया बुद्ध्या युक्तः धृत्या आत्मानं नियम्य च शब्दादीन् विषयान् त्यक्त्वा रागद्वेषौ व्युदस्य च विविक्तसेवी लघ्वाशी यतवाक्कायमानसः नित्यं ध्यानयोगपरः वैराग्यं समुपाश्रितः अहङ्कारं बलं दर्पं कामं क्रोधं परिग्रहं विमुच्य शान्तः निर्ममः ब्रह्मभूयाय कल्पते ।

पदार्थः - विशुद्धया = सात्त्विक्या, बुद्ध्या = मत्या, युक्तः = सहितः, धृत्या = धैर्येण, आत्मानम् = स्वम्, नियम्य च = वशीकृत्य च, शब्दादीन् = शब्दप्रभृतीन्, विषयान् = इन्द्रियार्थान्, त्यक्त्वा = वर्जयित्वा, रागद्वेषौ=आसक्तिविद्वेषौ, व्युदस्य च=अपहाय च, विविक्तसेवी=एकान्तसेवी, लघ्वाशी=अल्पभोजनः,

यतवाक्कायमानसः = नियतवाग्देहचित्तः, नित्यम् = सदा, ध्यानयोगपरः = आत्मचिन्तनपरः, वैराग्यम् = वितृष्णाम्, समुपाश्रितः = अवलम्बितः, अहङ्कारम् = अहम्भावम्, बलम् = दार्ढ्यम्, दर्पम् = गर्वम्, कामम् = वाञ्छाम्, क्रोधम् = कोपम्, परिग्रहम् = स्वीकारम्, विमुच्य = त्यक्त्वा, शान्तः = निर्ममः = ममताशून्यः, ब्रह्मभूयाय = ब्रह्मभावाय, कल्पते = शक्नोति ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
विशुद्धया	इ. स्त्री. तृ. एक. (विशेषणम्)	बुद्ध्या	इ. स्त्री. तृ. एक. (विशेष्यम्)
युक्तः	अ. पुं. प्र. एक. (विशेषणम्)	धृत्या	इ. स्त्री. तृ. एक.
आत्मानम्	आत्मन् - न. पुं. द्वि. एक.	नियम्य	ल्यबन्तम् अव्ययम्
च	अव्ययम्	शब्दादीन्	इ. पुं. द्वि. बहु. (विशेषणम्)
विषयान्	अ. पुं. द्वि. एक. (विशेष्यम्)	त्यक्त्वा	क्त्वान्तम् अव्ययम्
रागद्वेषौ	अ. पुं. द्वि. बहु.	व्युदस्य	ल्यबन्तम् अव्ययम्
विविक्तसेवी	विविक्तसेविन् - न. पुं. प्र. एक. (विशेषणम्)	लघ्वाशी	लघ्वाशिन् - न. पुं. प्र. एक. (विशेषणम्)
यतवाक्कायमानसः	अ. पुं. प्र. एक. (विशेषणम्)	नित्यम्	अ. नपुं. द्वि. एक. क्रियावि.
ध्यानयोगपरः	अ. पुं. प्र. एक. (विशेषणम्)	वैराग्यम्	अ. नपुं. द्वि. एक.
समुपाश्रितः	अ. पुं. प्र. एक. (विशेषणम्)	अहङ्कारम्	अ. नपुं. द्वि. एक.
बलम्	अ. नपुं. द्वि. एक.	दर्पम्	अ. नपुं. द्वि. एक.
कामम्	अ. पुं. द्वि. एक.	क्रोधम्	अ. पुं. द्वि. एक.
परिग्रहम्	अ. पुं. द्वि. एक.	विमुच्य	ल्यबन्तम् अव्ययम्
शान्तः	अ. पुं. प्र. एक. (विशेषणम्)	ब्रह्मभूयाय	अ. नपुं. च. एक.
कल्पते	कृप् (कृपू सामर्थ्ये) आत्म. कर्तरि लट्. प्र. पु. एक.		

व्याकरणम् -

(क) सन्धिः	युक्तो धृत्या	युक्तः + धृत्या	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः ।
	धृत्यात्मानम्	धृत्या + आत्मानम्	सवर्णदीर्घसन्धिः ।

	विषयांस्त्यक्त्वा	विषयान् + त्यक्त्वा	सत्वसन्धिः रुत्वम्, अनुस्वारागमः, विसर्गः, सत्वम्, श्चुत्वम्।
	ध्यानयोगपरो नित्यम्	ध्यानयोगपरः + नित्यम्	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः।
	शान्तो ब्रह्मभूयाय	शान्तः + ब्रह्मभूयाय	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः।

(ख) समासः	शब्दादीन्	शब्दः आदिः येषां ते शब्दादयः, तान् - बहुव्रीहिः।
	विविक्तसेवी	विविक्तं सेवते तच्छीलः विविक्तसेवी - ताच्छीलिके कर्तरि णिनिप्रत्ययः उपपदसमासश्च।
	लघ्वाशी	लघु अश्नाति इति लघ्वाशी - ताच्छीलिके कर्तरि णिनिप्रत्ययः उपपदसमासश्च।
	यतवाक्कायमानसः	वाक् च कायश्च मानसं च वाक्कायमानसानि - द्वन्द्वः। यतानि वाक्कायमानसानि येन सः यतवाक्कायमानसः - बहुव्रीहिः।
	ध्यानयोगपरः	ध्याने योगः ध्यानयोगः - सप्तमीतत्पुरुषः। ध्यानयोगः परः यस्य सः ध्यानयोगपरः - बहुव्रीहिः।
	निर्ममः	निर्गतं मम (ममता) यस्य सः निर्ममः - बहुव्रीहिः।
	ब्रह्मभूयाय	ब्रह्मणः भावः ब्रह्मभूयम्, तस्मै - भावार्थे क्यप् उपपदसमासश्च।
(ग) कृदन्तः	बुद्ध्या	बुध् (बुध अवगमने) + क्तिन्, तया।
	विशुद्धया	वि + शुध् (शुध शौचे) + क्तिन्, तया।
	युक्तः	युज् (युजिर् योगे) + क्त (कर्तरि)।
	धृत्या	धृ (धृञ् धारणे) + क्तिन्, तया।
	नियम्य	नि + यम् (यम उपरमे) + ल्यप्।
	त्यक्त्वा	त्यज् (त्यज हानौ) + क्त्वा।
	व्युदस्य	वि + उद् + अस् (असु क्षेपणे) + ल्यप्।
	ध्यानम्	ध्यै (ध्यै चिन्तायाम्) + ल्युट्।
	योगः	युज् (युजिर् योगे) + घञ्।
	समुपाश्रितः	सम् + उप + आ + श्रि (श्रिञ् सेवायाम्) + क्त (कर्तरि)।
	बलम्	बल् (बल प्राणने धान्यावरोधने च) + अच्।
	दर्पम्	दृप् (दृप उत्क्लेशे) + अच् (कर्तरि), तम्।
	कामम्	कम् (कमु कान्तौ) + घञ्, तम्।
	क्रोधम्	क्रुध् (क्रुध क्रोधे) + घञ्, तम्।
	परिग्रहम्	परि + ग्रह् (ग्रह उपादाने) + क्त (कर्तरि)।
	विमुच्य	वि + मुच् (मुच्लृ मोक्षणे) + ल्यप्।

भावस्पष्टीकरणम् -

कल्पते ।	
कस्मै कल्पते ?	**ब्रह्मभूयाय** कल्पते ।
कः ब्रह्मभूयाय कल्पते ?	**युक्तः** ब्रह्मभूयाय कल्पते ।
कया युक्तः ब्रह्मभूयाय कल्पते ?	**बुद्ध्या** युक्तः ब्रह्मभूयाय कल्पते ।
कीदृश्या बुद्ध्या युक्तः ब्रह्मभूयाय कल्पते ?	**विशुद्धया** बुद्ध्या युक्तः ब्रह्मभूयाय कल्पते ।
विशुद्धया बुद्ध्या युक्तः **किं कृत्वा** ब्रह्मभूयाय कल्पते ?	विशुद्धया बुद्ध्या युक्तः **नियम्य** ब्रह्मभूयाय कल्पते ।
विशुद्धया बुद्ध्या युक्तः **कं** नियम्य ब्रह्मभूयाय कल्पते ?	विशुद्धया बुद्ध्या युक्तः **आत्मानं** नियम्य ब्रह्मभूयाय कल्पते ।
विशुद्धया बुद्ध्या युक्तः **कया** आत्मानं नियम्य ब्रह्मभूयाय कल्पते ?	विशुद्धया बुद्ध्या युक्तः **धृत्या** आत्मानं नियम्य ब्रह्मभूयाय कल्पते ।
विशुद्धया बुद्ध्या युक्तः धृत्या आत्मानं नियम्य **पुनः किं कृत्वा** ब्रह्मभूयाय कल्पते ?	विशुद्धया बुद्ध्या युक्तः धृत्या आत्मानं नियम्य **त्यक्त्वा** ब्रह्मभूयाय कल्पते ।
विशुद्धया बुद्ध्या युक्तः धृत्या आत्मानं नियम्य **कान्** त्यक्त्वा ब्रह्मभूयाय कल्पते ?	विशुद्धया बुद्ध्या युक्तः धृत्या आत्मानं नियम्य च **शब्दादीन् विषयान्** त्यक्त्वा ब्रह्मभूयाय कल्पते ।
विशुद्धया बुद्ध्या युक्तः धृत्या आत्मानं नियम्य च शब्दादीन् विषयान् त्यक्त्वा **पुनः किं कृत्वा** ब्रह्मभूयाय कल्पते ?	विशुद्धया बुद्ध्या युक्तः धृत्या आत्मानं नियम्य च शब्दादीन् विषयान् त्यक्त्वा **व्युदस्य च** ब्रह्मभूयाय कल्पते ।
विशुद्धया बुद्ध्या युक्तः धृत्या आत्मानं नियम्य च शब्दादीन् विषयान् त्यक्त्वा **कौ** व्युदस्य च ब्रह्मभूयाय कल्पते ?	विशुद्धया बुद्ध्या युक्तः धृत्या आत्मानं नियम्य च शब्दादीन् विषयान् त्यक्त्वा **रागद्वेषौ** व्युदस्य च ब्रह्मभूयाय कल्पते ।
विशुद्धया बुद्ध्या युक्तः धृत्या आत्मानं नियम्य च शब्दादीन् विषयान् त्यक्त्वा रागद्वेषौ व्युदस्य च **कः** ब्रह्मभूयाय कल्पते ?	विशुद्धया बुद्ध्या युक्तः धृत्या आत्मानं नियम्य च शब्दादीन् विषयान् त्यक्त्वा रागद्वेषौ व्युदस्य च **विविक्तसेवी** ब्रह्मभूयाय कल्पते ।

विशुद्धया बुद्ध्या युक्तः धृत्या आत्मानं नियम्य च शब्दादीन् विषयान् त्यक्त्वा रागद्वेषौ व्युदस्य च विविक्तसेवी **पुनः कः** ब्रह्मभूयाय कल्पते ?	विशुद्धया बुद्ध्या युक्तः धृत्या आत्मानं नियम्य च शब्दादीन् विषयान् त्यक्त्वा रागद्वेषौ व्युदस्य च विविक्तसेवी **लघ्वाशी** ब्रह्मभूयाय कल्पते ।
विशुद्धया बुद्ध्या युक्तः धृत्या आत्मानं नियम्य च शब्दादीन् विषयान् त्यक्त्वा रागद्वेषौ व्युदस्य च विविक्तसेवी लघ्वाशी **पुनः कः** ब्रह्मभूयाय कल्पते ?	विशुद्धया बुद्ध्या युक्तः धृत्या आत्मानं नियम्य च शब्दादीन् विषयान् त्यक्त्वा रागद्वेषौ व्युदस्य च विविक्तसेवी लघ्वाशी **यतवाक्कायमानसः** ब्रह्मभूयाय कल्पते ।
विशुद्धया बुद्ध्या युक्तः धृत्या आत्मानं नियम्य च शब्दादीन् विषयान् त्यक्त्वा रागद्वेषौ व्युदस्य च विविक्तसेवी लघ्वाशी यतवाक्कायमानसः **पुनः कः** ब्रह्मभूयाय कल्पते ?	विशुद्धया बुद्ध्या युक्तः धृत्या आत्मानं नियम्य च शब्दादीन् विषयान् त्यक्त्वा रागद्वेषौ व्युदस्य च विविक्तसेवी लघ्वाशी यतवाक्कायमानसः **नित्यं ध्यानयोगपरः** ब्रह्मभूयाय कल्पते ।
विशुद्धया बुद्ध्या युक्तः धृत्या आत्मानं नियम्य च शब्दादीन् विषयान् त्यक्त्वा रागद्वेषौ व्युदस्य च विविक्तसेवी लघ्वाशी यतवाक्कायमानसः नित्यं ध्यानयोगपरः **पुनः कः** ब्रह्मभूयाय कल्पते ?	विशुद्धया बुद्ध्या युक्तः धृत्या आत्मानं नियम्य च शब्दादीन् विषयान् त्यक्त्वा रागद्वेषौ व्युदस्य च विविक्तसेवी लघ्वाशी यतवाक्कायमानसः नित्यं ध्यानयोगपरः **समुपाश्रितः** ब्रह्मभूयाय कल्पते ।
विशुद्धया बुद्ध्या युक्तः धृत्या आत्मानं नियम्य च शब्दादीन् विषयान् त्यक्त्वा रागद्वेषौ व्युदस्य च विविक्तसेवी लघ्वाशी यतवाक्कायमानसः नित्यं ध्यानयोगपरः **कं** समुपाश्रितः ब्रह्मभूयाय कल्पते ?	विशुद्धया बुद्ध्या युक्तः धृत्या आत्मानं नियम्य च शब्दादीन् विषयान् त्यक्त्वा रागद्वेषौ व्युदस्य च विविक्तसेवी लघ्वाशी यतवाक्कायमानसः नित्यं ध्यानयोगपरः **वैराग्यं** समुपाश्रितः ब्रह्मभूयाय कल्पते ।
विशुद्धया बुद्ध्या युक्तः धृत्या आत्मानं नियम्य च शब्दादीन् विषयान् त्यक्त्वा रागद्वेषौ व्युदस्य च विविक्तसेवी लघ्वाशी यतवाक्कायमानसः नित्यं ध्यानयोगपरः वैराग्यं समुपाश्रितः **पुनः किं कृत्वा** ब्रह्मभूयाय कल्पते ?	विशुद्धया बुद्ध्या युक्तः धृत्या आत्मानं नियम्य च शब्दादीन् विषयान् त्यक्त्वा रागद्वेषौ व्युदस्य च विविक्तसेवी लघ्वाशी यतवाक्कायमानसः नित्यं ध्यानयोगपरः वैराग्यं समुपाश्रितः **विमुच्य** ब्रह्मभूयाय कल्पते ।

विशुद्धया बुद्ध्या युक्तः धृत्या आत्मानं नियम्य च शब्दादीन् विषयान् त्यक्त्वा रागद्वेषौ व्युदस्य च विविक्तसेवी लघ्वाशी यतवाक्कायमानसः नित्यं ध्यानयोगपरः वैराग्यं समुपाश्रितः **किं किं** विमुच्य ब्रह्मभूयाय कल्पते ?	विशुद्धया बुद्ध्या युक्तः धृत्या आत्मानं नियम्य च शब्दादीन् विषयान् त्यक्त्वा रागद्वेषौ व्युदस्य च विविक्तसेवी लघ्वाशी यतवाक्कायमानसः नित्यं ध्यानयोगपरः वैराग्यं समुपाश्रितः **अहङ्कारं बलं दर्पं कामं क्रोधं परिग्रहं** विमुच्य ब्रह्मभूयाय कल्पते ।
विशुद्धया बुद्ध्या युक्तः धृत्या आत्मानं नियम्य च शब्दादीन् विषयान् त्यक्त्वा रागद्वेषौ व्युदस्य च विविक्तसेवी लघ्वाशी यतवाक्कायमानसः नित्यं ध्यानयोगपरः वैराग्यं समुपाश्रितः अहङ्कारं बलं दर्पं कामं क्रोधं परिग्रहं विमुच्य **कः** ब्रह्मभूयाय कल्पते ?	विशुद्धया बुद्ध्या युक्तः धृत्या आत्मानं नियम्य च शब्दादीन् विषयान् त्यक्त्वा रागद्वेषौ व्युदस्य च विविक्तसेवी लघ्वाशी यतवाक्कायमानसः नित्यं ध्यानयोगपरः वैराग्यं समुपाश्रितः अहङ्कारं बलं दर्पं कामं क्रोधं परिग्रहं विमुच्य **शान्तः** ब्रह्मभूयाय कल्पते ।
विशुद्धया बुद्ध्या युक्तः धृत्या आत्मानं नियम्य च शब्दादीन् विषयान् त्यक्त्वा रागद्वेषौ व्युदस्य च विविक्तसेवी लघ्वाशी यतवाक्कायमानसः नित्यं ध्यानयोगपरः वैराग्यं समुपाश्रितः अहङ्कारं बलं दर्पं कामं क्रोधं परिग्रहं विमुच्य शान्तः **पुनः कः** ब्रह्मभूयाय कल्पते ?	विशुद्धया बुद्ध्या युक्तः धृत्या आत्मानं नियम्य च शब्दादीन् विषयान् त्यक्त्वा रागद्वेषौ व्युदस्य च विविक्तसेवी लघ्वाशी यतवाक्कायमानसः नित्यं ध्यानयोगपरः वैराग्यं समुपाश्रितः अहङ्कारं बलं दर्पं कामं क्रोधं परिग्रहं विमुच्य शान्तः **निर्ममः** ब्रह्मभूयाय कल्पते ।

तात्पर्यम् - यः सात्त्विकबुद्ध्या युक्तः भवति, धृतिमान् भवति, चित्तं नियमयति, शब्दादीन् विषयान् त्यजति, रागद्वेषौ दूरीकरोति, निर्जने प्रदेशे वसति, मितं भुङ्क्ते, शरीरेन्द्रियमनांसि नियच्छति, सततं ध्यायन् वैराग्यं प्राप्नोति, अहङ्कारादिं दोषं च विमुञ्चति सः शान्तः ममताशून्यश्च ब्रह्मत्वं प्रतिपद्यते ।

ब्रह्मभूतः प्रसन्नात्मा न शोचति न काङ्क्षति ।
समः सर्वेषु भूतेषु मद्भक्तिं लभते पराम् ॥१८.५४॥

पदच्छेदः - ब्रह्मभूतः, प्रसन्नात्मा, न, शोचति, न, काङ्क्षति ।
समः, सर्वेषु, भूतेषु, मद्भक्तिम्, लभते, पराम् ॥

अन्वयः - ब्रह्मभूतः प्रसन्नात्मा न शोचति न काङ्क्षति । सर्वेषु भूतेषु समः परां मद्भक्तिं लभते ।

पदार्थः - ब्रह्मभूतः = ब्रह्मैव सन्, प्रसन्नात्मा = प्राप्तप्रसादः, न शोचति = न विषीदति, न काङ्क्षति = न अभिलषति, सर्वेषु = सकलेषु, भूतेषु = प्राणिषु, समः = समानः, पराम् = प्रकृष्टाम्, मद्भक्तिम् = परमेश्वरभक्तिम्, लभते = प्राप्नोति ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
ब्रह्मभूतः	अ. पुं. प्र. एक. (विशेषणम्)	प्रसन्नात्मा	प्रसन्नात्मन् - न. पुं. प्र. एक. (विशेषणम्)
न	अव्ययम्	शोचति	शुच् (शुच शोके) पर. कर्तरि लट्. प्रपु. एक.
काङ्क्षति	काङ्क्ष् (काक्षि काङ्क्षायाम्) पर. कर्तरि लट्. प्रपु. एक.	सर्वेषु	अ. सर्व. पुं. स. बहु. (विशेषणम्)
भूतेषु	अ. नपुं. स. बहु. (विशेष्यम्)	समः	अ. पुं. प्र. एक.
पराम्	आ. स्त्री. द्वि. एक. (विशेषणम्)	मद्भक्तिम्	इ. स्त्री. द्वि. एक. (विशेष्यम्)
लभते	लभ् (डुलभष् प्राप्तौ) आत्म. कर्तरि लट्. प्रपु. एक.		

व्याकरणम् -

(क) समासः	ब्रह्मभूतः	ब्रह्म भूतः ब्रह्मभूतः - द्वितीयातत्पुरुषः ।
	प्रसन्नात्मा	प्रसन्नः आत्मा यस्य सः प्रसन्नात्मा - बहुव्रीहिः ।
	मद्भक्तिम्	मयि भक्तिः मद्भक्तिः, ताम् - सप्तमीतत्पुरुषः ।
(ख) कृदन्तः	भूतेषु	भू (भू सत्तायाम्) + क्त, तेषु (कर्तरि) ।
	भक्तिम्	भज् (भज सेवायाम्) + क्तिन्, ताम् ।

भावस्पष्टीकरणम् -

न शोचति ।	
कः न शोचति ?	**प्रसन्नात्मा** न शोचति ।
कीदृशः प्रसन्नात्मा न शोचति ?	**ब्रह्मभूतः** प्रसन्नात्मा न शोचति ।
ब्रह्मभूतः प्रसन्नात्मा न शोचति **पुनः किं न करोति ?**	ब्रह्मभूतः प्रसन्नात्मा न शोचति **न काङ्क्षति ।**
लभते ।	
कीदृशः लभते ?	**समः** लभते ।
केषु समः लभते ?	**भूतेषु** समः लभते ।
केषु भूतेषु समः लभते ?	**सर्वेषु** भूतेषु समः लभते ।

सर्वेषु भूतेषु समः **कां** लभते ?	सर्वेषु भूतेषु समः **मद्भक्तिं** लभते।
सर्वेषु भूतेषु समः **कीदृशीं** मद्भक्तिं लभते ?	सर्वेषु भूतेषु समः **परां** मद्भक्तिं लभते।

तात्पर्यम् - यदा पुरुषः ब्रह्मभूतः भवति ततः परं तस्य शोकः न सम्भवति, नापि विषयाभिलाषः। सः सर्वेषु प्राणिषु समानः सन् अतिशयितां मद्भक्तिं प्राप्नोति।

भक्त्या मामभिजानाति यावान्यश्चास्मि तत्त्वतः।
ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम्॥१८.५५॥

पदच्छेदः - भक्त्या, माम्, अभिजानाति, यावान्, यः, च, अस्मि, तत्त्वतः।
ततः, माम्, तत्त्वतः, ज्ञात्वा, विशते, तदनन्तरम्॥

अन्वयः - भक्त्या तत्त्वतः यावान् यः च अस्मि (तादृशं) माम् अभिजानाति ततः मां तत्त्वतः ज्ञात्वा तदनन्तरं विशते।

पदार्थः - भक्त्या = भक्तियोगेन, तत्त्वतः = परमार्थतः, यावान् = यादृशपरिमाणविशिष्टः, यः च अस्मि = यादृक्स्वरूपविशिष्टः च अस्मि, माम् = मा, अभिजानाति = सम्यक् वेत्ति, ततः = अनन्तरम्, माम् = मा, तत्त्वतः = वस्तुतः, ज्ञात्वा = विज्ञाय, तदनन्तरम् = अनन्तरस्थितिम्, विशते = प्रविशति।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
भक्त्या	इ. स्त्री. तृ. एक.	तत्त्वतः	अव्ययम्
यावान्	यावत् - त. पुं. प्र. एक. (विशेषणम्)	यः	यद् - द. सर्व. पुं. प्र. एक. (विशेषणम्)
च	अव्ययम्	अस्मि	अस् (अस भुवि) पर. कर्तरि लट्. उपु. एक.
माम्	अस्मद् - द. सर्व. द्वि. एक.	अभिजानाति	अभि + ज्ञा (ज्ञा अवबोधने) पर. कर्तरि लट्. प्रपु. एक.
ततः	अव्ययम्	ज्ञात्वा	क्त्वान्तम् अव्ययम्
तदनन्तरम्	अव्ययम्	विशते (विशति)	विश् (विश प्रवेशने)[1] पर. कर्तरि लट्. प्रपु. एक.

1. अत्र 'विशते' इति आत्मनेपदित्वेन आर्षप्रयोगः।

व्याकरणम् -

(क) सन्धिः	यश्च	यः + च	विसर्गसन्धिः (सकारः) श्चुत्वम्।
	चास्मि	च + अस्मि	सवर्णदीर्घसन्धिः।
	ततो माम्	ततः + माम्	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः।
	तत्त्वतो ज्ञात्वा	तत्त्वतः + ज्ञात्वा	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः।
(ख) कृदन्तः	भक्त्या	भज् (भज सेवायाम्) + क्तिन्, ।	
	ज्ञात्वा	ज्ञा (ज्ञा अवबोधने) + क्त्वा।	
(ग) तद्धितान्तः	तत्त्वतः	तत्त्व + तसिल्।	

भावस्पष्टीकरणम् -

अभिजानाति।	
कम् अभिजानाति ?	**माम्** अभिजानाति।
कीदृशं माम् अभिजानाति ?	**भक्त्या तत्त्वतः यावान् यः च अस्मि (तादृशं)** माम् अभिजानाति।
भक्त्या तत्त्वतः यावान् यः च अस्मि (तादृशं) माम् अभिजानाति **ततः किम्** ?	भक्त्या तत्त्वतः यावान् यः च अस्मि (तादृशं) माम् अभिजानाति **ततः विशते**।
भक्त्या तत्त्वतः यावान् यः च अस्मि (तादृशं) माम् अभिजानाति ततः **किं कृत्वा** विशते ?	भक्त्या तत्त्वतः यावान् यः च अस्मि (तादृशं) माम् अभिजानाति ततः **ज्ञात्वा** विशते।
भक्त्या तत्त्वतः यावान् यः च अस्मि (तादृशं) माम् अभिजानाति ततः **कुतः** ज्ञात्वा विशते ?	भक्त्या तत्त्वतः यावान् यः च अस्मि (तादृशं) माम् अभिजानाति ततः **तत्त्वतः** ज्ञात्वा विशते।
भक्त्या तत्त्वतः यावान् यः च अस्मि (तादृशं) माम् अभिजानाति ततः **कं** तत्त्वतः ज्ञात्वा विशते ?	भक्त्या तत्त्वतः यावान् यः च अस्मि (तादृशं) माम् अभिजानाति ततः **मां** तत्त्वतः ज्ञात्वा विशते।
भक्त्या तत्त्वतः यावान् यः च अस्मि (तादृशं) माम् अभिजानाति ततः मां तत्त्वतः ज्ञात्वा **कदा** विशते ?	भक्त्या तत्त्वतः यावान् यः च अस्मि (तादृशं) माम् अभिजानाति ततः मां तत्त्वतः ज्ञात्वा **तदनन्तरं** विशते।

तात्पर्यम् - सः भक्त्या प्रथमं सर्वत्र व्याप्तं सच्चिदानन्दस्वरूपं च मां जानाति ततः मामेव प्रविशति, अर्थात् मय्येव लीनः भवति।

सर्वकर्माण्यपि सदा कुर्वाणो मद्व्यपाश्रयः।
मत्प्रसादादवाप्नोति शाश्वतं पदमव्ययम्॥१८.५६॥

पदच्छेदः - सर्वकर्माणि, अपि, सदा, कुर्वाणः, मद्व्यपाश्रयः।
मत्प्रसादात्, अवाप्नोति, शाश्वतम्, पदम्, अव्ययम्॥

अन्वयः - सर्वकर्माणि अपि मद्व्यपाश्रयः सदा कुर्वाणः मत्प्रसादात् अव्ययं शाश्वतं पदम् अवाप्नोति।

पदार्थः - सर्वकर्माणि अपि = निखिलकर्तव्यानि अपि, मद्व्यपाश्रयः = मदाश्रयः, सदा = सततम्, कुर्वाणः = आचरन्, मत्प्रसादात् = मदनुग्रहात्, अव्ययम् = अविनाशि, शाश्वतम् = नित्यम्, पदम् = स्थानम्, अवाप्नोति = लभते।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
सर्वकर्माणि	सर्वकर्मन् - न. नपुं. द्वि. एक.	अपि	अव्ययम्
मद्व्यपाश्रयः	अ. पुं. प्र. एक. (विशेषणम्)	सदा	अव्ययम्
कुर्वाणः	अ. पुं. प्र. एक. (विशेषणम्)	मत्प्रसादात्	अ. पुं. पं. एक.
अव्ययम्	अ. नपुं. द्वि. एक. (विशेषणम्)	शाश्वतम्	अ. नपुं. द्वि. एक. (विशेषणम्)
पदम्	अ. नपुं. द्वि. एक. (विशेष्यम्)	अवाप्नोति	अव + आप् (आप्लृ व्याप्तौ) पर. कर्तरि लट्. प्रपु. एक.

व्याकरणम् -

(क) सन्धिः
सर्वकर्माण्यपि — सर्वकर्माणि + अपि — यण्सन्धिः।
कुर्वाणो मद्व्यपाश्रयः — कुर्वाणः + मद्व्यपाश्रयः — विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः।

(ख) समासः
सर्वकर्माणि — सर्वाणि कर्माणि सर्वकर्माणि - कर्मधारयः।
मद्व्यपाश्रयः — अहं व्यपाश्रयः यस्य सः मद्व्यपाश्रयः - बहुव्रीहिः।
मत्प्रसादात् — मम प्रसादः मत्प्रसादः, तस्मात् - षष्ठीतत्पुरुषः।
अव्ययम् — न व्ययम् अव्ययम् - नञ्तत्पुरुषः।

(ग) कृदन्तः
कुर्वाणः — कृ (डुकृञ् करणे) + शानच्।
आश्रयः — श्रि (श्रिञ् सेवायाम्) + अच्।
प्रसादात् — प्र + सद् (षदलृ विशरणगत्यवसादनेषु) + घञ्, तस्मात्।
पदम् — पद् (पद गतौ) + अच्।

भावस्पष्टीकरणम् -

अवाप्नोति ।	
कम् अवाप्नोति ?	**पदम्** अवाप्नोति ।
कीदृशं पदम् अवाप्नोति ?	**शाश्वतं** पदम् अवाप्नोति ।
पुनः कीदृशं शाश्वतं पदम् अवाप्नोति ?	**अव्ययं** शाश्वतं पदम् अवाप्नोति ।
कस्मात् अव्ययं शाश्वतं पदम् अवाप्नोति	**मत्प्रसादात्** अव्ययं शाश्वतं पदम् अवाप्नोति ।
कीदृशः मत्प्रसादात् अव्ययं शाश्वतं पदम् अवाप्नोति ?	**कुर्वाणः** मत्प्रसादात् अव्ययं शाश्वतं पदम् अवाप्नोति ।
कदा कुर्वाणः मत्प्रसादात् अव्ययं शाश्वतं पदम् अवाप्नोति ?	**सदा** कुर्वाणः मत्प्रसादात् अव्ययं शाश्वतं पदम् अवाप्नोति ।
किं सदा कुर्वाणः मत्प्रसादात् अव्ययं शाश्वतं पदम् अवाप्नोति ?	**सर्वकर्माणि अपि** सदा कुर्वाणः मत्प्रसादात् अव्ययं शाश्वतं पदम् अवाप्नोति ।
सर्वकर्माणि अपि सदा कुर्वाणः **पुनश्च कीदृशः** मत्प्रसादात् अव्ययं शाश्वतं पदम् अवाप्नोति ?	सर्वकर्माणि अपि सदा कुर्वाणः **मद्व्यपाश्रयः** मत्प्रसादात् अव्ययं शाश्वतं पदम् अवाप्नोति ।

तात्पर्यम् - सः नित्यनैमित्तिकानि सर्वाण्यपि कर्माणि कुर्वन् मामेव आश्रयं मन्यमानः क्रमेण मदनुग्रहादेव मम अनश्वरं पदं प्राप्नोति ।

चेतसा सर्वकर्माणि मयि संन्यस्य मत्परः ।
बुद्धियोगमुपाश्रित्य मच्चित्तः सततं भव ॥१८.५७॥

पदच्छेदः - चेतसा, सर्वकर्माणि, मयि, संन्यस्य, मत्परः ।
बुद्धियोगम्, उपाश्रित्य, मच्चित्तः, सततम्, भव ॥

अन्वयः - सर्वकर्माणि चेतसा मयि संन्यस्य मत्परः बुद्धियोगम् उपाश्रित्य सततं मच्चित्तः भव ।

पदार्थः - सर्वकर्माणि = निखिलकर्तव्यानि, चेतसा = मनसा, मयि = परमेश्वरे, संन्यस्य = समर्प्य, मत्परः = मदासक्तः, बुद्धियोगम् = समाहितचित्तत्वम्, उपाश्रित्य = अवलम्ब्य, सततम् = सदा, मच्चित्तः = मन्मनाः, भव = वर्तस्व ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
सर्वकर्माणि	सर्वकर्मन् - न. नपुं. द्वि. एक.	चेतसा	चेतस् - सका. नपुं. तृ. एक.
मयि	अस्मद् - द. सर्व. स. एक.	संन्यस्य	ल्यबन्तम् अव्ययम्
मत्परः	अ. पुं. प्र. एक. (विशेषणम्)	बुद्धियोगम्	अ. पुं. द्वि. एक.
उपाश्रित्य	ल्यबन्तम् अव्ययम्	सततम्	अव्ययम्
मच्चित्तः	अ. पुं. प्र. एक. (विशेषणम्)	भव	भू (भू सत्तायाम्) पर. कर्तरि लोट्. मपु. एक.

व्याकरणम् -

(क) समासः	सर्वकर्माणि	सर्वाणि कर्माणि सर्वकर्माणि - कर्मधारयः।
	मत्परः	अहम् एव परः यस्य सः मत्परः - बहुव्रीहिः।
	बुद्धियोगम्	बुद्धेः योगः बुद्धियोगः, तम् - षष्ठीतत्पुरुषः।
	मच्चित्तः	मयि चित्तं यस्य सः मच्चित्तः - बहुव्रीहिः।
(ख) कृदन्तः	संन्यस्य	सम् + नि + अस् (असु क्षेपणे) + ल्यप्।
	बुद्धिः	बुध् (बुंध अवगमने) + क्तिन्।
	योगम्	युज् (युजिर् योगे) + घञ्, तम्।
	उपाश्रित्य	उप + आ + श्रि (श्रिञ् सेवायाम्) + ल्यप्।

भावस्पष्टीकरणम् -

भव।	
कीदृशः भव ?	**मत्परः** भव।
किं कृत्वा मत्परः भव ?	**संन्यस्य** मत्परः भव।
कानि संन्यस्य मत्परः भव ?	**सर्वकर्माणि** संन्यस्य मत्परः भव।
सर्वकर्माणि **केन** संन्यस्य मत्परः भव ?	सर्वकर्माणि **चेतसा** संन्यस्य मत्परः भव।
सर्वकर्माणि चेतसा **कुत्र** संन्यस्य मत्परः भव ?	सर्वकर्माणि चेतसा **मयि** संन्यस्य मत्परः भव।
सर्वकर्माणि चेतसा मयि संन्यस्य मत्परः **पुनः किं कृत्वा** भव ?	सर्वकर्माणि चेतसा मयि संन्यस्य मत्परः **उपाश्रित्य** भव।

सर्वकर्माणि चेतसा मयि संन्यस्य मत्परः उपाश्रित्य **कीदृशः** भव ?	सर्वकर्माणि चेतसा मयि संन्यस्य मत्परः उपाश्रित्य **मच्चित्तः** भव।
सर्वकर्माणि चेतसा मयि संन्यस्य मत्परः **कम्** उपाश्रित्य मच्चित्तः भव ?	सर्वकर्माणि चेतसा मयि संन्यस्य मत्परः **बुद्धियोगम्** उपाश्रित्य मच्चित्तः भव।
सर्वकर्माणि चेतसा मयि संन्यस्य मत्परः बुद्धियोगम् उपाश्रित्य **कथं** मच्चित्तः भव ?	सर्वकर्माणि चेतसा मयि संन्यस्य मत्परः बुद्धियोगम् उपाश्रित्य **सततं** मच्चित्तः भव।

तात्पर्यम् - सर्वाण्यपि कर्माणि मयि विन्यस्य अहमेव परः पुरुषार्थः इति मन्यमानः समाहितचित्तः सर्वदा मय्येव मनः स्थापय।

मच्चित्तः सर्वदुर्गाणि मत्प्रसादात्तरिष्यसि।
अथ चेत्त्वमहङ्कारान्न श्रोष्यसि विनङ्क्ष्यसि ॥१८.५८॥

पदच्छेदः - मच्चित्तः, सर्वदुर्गाणि, मत्प्रसादात्, तरिष्यसि।
अथ, चेत्, त्वम्, अहङ्कारात्, न, श्रोष्यसि, विनङ्क्ष्यसि ॥

अन्वयः - मच्चित्तः मत्प्रसादात् सर्वदुर्गाणि तरिष्यसि। अथ त्वम् अहङ्कारात् न श्रोष्यसि चेत् विनङ्क्ष्यसि।

पदार्थः - मच्चित्तः = मदन्तःकरणः, मत्प्रसादात् = मदनुग्रहात्, सर्वदुर्गाणि = सकलदुःखानि, तरिष्यसि = अतिक्रमिष्यसि, अथ = यदि, त्वम् = भवान्, अहङ्कारात् = अहम्भावात्, न श्रोष्यसि = न अवधारयसि, चेत् = तर्हि, विनङ्क्ष्यसि = विनाशं गमिष्यसि।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
मच्चित्तः	अ. पुं. प्र. एक. (विशेषणम्)	मत्प्रसादात्	अ. पुं. पं. एक.
सर्वदुर्गाणि	अ. नपुं. द्वि. बहु.	तरिष्यसि	तृ (तॄ प्लवनतरणयोः) पर. कर्तरि लृट्. मपु. एक.
अथ	अव्ययम्	त्वम्	युष्मद् - द. सर्व. प्र. एक.
अहङ्कारात्	अ. पुं. पं. एक.	न	अव्ययम्

श्रोष्यसि	श्रु (श्रु श्रवणे) पर. कर्तरि लृट्. मपु. एक.	चेत्	अव्ययम्
विनङ्क्ष्यसि	वि + नश् (णश अदर्शने) पर. कर्तरि लृट्. मपु. एक.		

व्याकरणम् -

(क) सन्धिः	अहङ्कारान्न	अहङ्कारात् + न	अनुनासिकसन्धिः ।
(ख) समासः	मच्चित्तः	मयि चित्तं यस्य सः मच्चित्तः - बहुव्रीहिः ।	
	सर्वदुर्गाणि	सर्वाणि दुर्गाणि सर्वदुर्गाणि - कर्मधारयः ।	
	मत्प्रसादात्	मम प्रसादः मत्प्रसादः, तस्मात् - षष्ठीतत्पुरुषः ।	
(ग) कृदन्तः	प्रसादात्	प्र + सद् (षदलृ विशरणगत्यवसादनेषु) + घञ्, तस्मात् ।	

भावस्पष्टीकरणम् -

तरिष्यसि ।	
कः तरिष्यसि ?	**मच्चित्तः** तरिष्यसि ।
मच्चित्तः **कानि** तरिष्यसि ?	मच्चित्तः **सर्वदुर्गाणि** तरिष्यसि ।
मच्चित्तः **कस्मात्** सर्वदुर्गाणि तरिष्यसि ?	मच्चित्तः **मत्प्रसादात्** सर्वदुर्गाणि तरिष्यसि ।
मच्चित्तः मत्प्रसादात् सर्वदुर्गाणि तरिष्यसि, **अथ किम्** ?	मच्चित्तः मत्प्रसादात् सर्वदुर्गाणि तरिष्यसि, **अथ विनङ्क्ष्यसि** ।
मच्चित्तः मत्प्रसादात् सर्वदुर्गाणि तरिष्यसि, अथ **कदा** विनङ्क्ष्यसि ?	मच्चित्तः मत्प्रसादात् सर्वदुर्गाणि तरिष्यसि, अथ **न श्रोष्यसि चेत्** विनङ्क्ष्यसि ।
मच्चित्तः मत्प्रसादात् सर्वदुर्गाणि तरिष्यसि, अथ **कस्मात्** न श्रोष्यसि चेत् विनङ्क्ष्यसि ?	मच्चित्तः मत्प्रसादात् सर्वदुर्गाणि तरिष्यसि, अथ **अहङ्कारात्** न श्रोष्यसि चेत् विनङ्क्ष्यसि ?
मच्चित्तः मत्प्रसादात् सर्वदुर्गाणि तरिष्यसि, अथ **कः** अहङ्कारात् न श्रोष्यसि चेत् विनङ्क्ष्यसि ?	मच्चित्तः मत्प्रसादात् सर्वदुर्गाणि तरिष्यसि, अथ **त्वम्** अहङ्कारात् न श्रोष्यसि चेत् विनङ्क्ष्यसि ।

तात्पर्यम् - यदि मयि एव मनः स्थापयसि तर्हि सर्वाण्यपि दुःखानि अतिक्रमितुं शक्नोषि । अथ अहमपि ज्ञानी इति अहङ्कारात् मदुक्तं न शृणोषि तर्हि अवश्यमेव अधःपतनं प्राप्नोषि ।

यद्यहङ्कारमाश्रित्य न योत्स्य इति मन्यसे।
मिथ्यैष व्यवसायस्ते प्रकृतिस्त्वां नियोक्ष्यति ॥१८.५९॥

पदच्छेदः - यदि, अहङ्कारम्, आश्रित्य, न, योत्स्ये, इति, मन्यसे।
मिथ्या, एषः, व्यवसायः, ते, प्रकृतिः, त्वाम्, नियोक्ष्यति ॥

अन्वयः - यदि अहङ्कारम् आश्रित्य न योत्स्ये इति मन्यसे (तर्हि) एषः ते व्यवसायः मिथ्या। प्रकृतिः त्वां नियोक्ष्यति।

पदार्थः - यदि = यदि, अहङ्कारम् = अहम्भावम्, आश्रित्य = स्वीकृत्य, न योत्स्ये इति = युद्धं न करिष्ये इति, मन्यसे = चिन्तयसि, एषः = अयम्, ते = तव, व्यवसायः = निश्चयः, मिथ्या = विपरीतः, प्रकृतिः = क्षत्रियहेतुभूता प्रकृतिः, त्वाम् = त्वा, नियोक्ष्यति = अवश्यं प्रवर्तयति।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
यदि	अव्ययम्	अहङ्कारम्	अ. पुं. द्वि. एक.
आश्रित्य	ल्यबन्तम् अव्ययम्	न	अव्ययम्
योत्स्ये	युध् (युध सम्प्रहारे) आत्म. कर्तरि लृट्. उपु. एक.	इति	अव्ययम्
मन्यसे	मन् (मन ज्ञाने) आत्म. कर्तरि लृट्. मपु. एक.	एषः	एतद् - द. सर्व. पुं. प्र. एक. (विशेषणम्)
ते	युष्मद् - द. सर्व. ष. एक.	व्यवसायः	अ. पुं. प्र. एक. (विशेष्यम्)
मिथ्या	अव्ययम्	प्रकृतिः	इ. स्त्री. प्र. एक.
त्वाम्	युष्मद् - द. सर्व. द्वि. एक.	नियोक्ष्यति	नि + युज् (युजिर् योगे) पर. कर्तरि लृट्. प्रपु. एक.

व्याकरणम् -

(क) सन्धिः	यद्यहङ्कारम्	यदि + अहङ्कारम्	यणसन्धिः।
	मिथ्यैष	मिथ्या + एषः	वृद्धिसन्धिः।
	व्यवसायस्ते	व्यवसायः + ते	विसर्गसन्धिः (सकारः)।
	प्रकृतिस्त्वाम्	प्रकृतिः + त्वाम्	विसर्गसन्धिः (सकारः)।

(ख) कृदन्तः आश्रित्य आ + श्रि (श्रिञ् सेवायाम्) + ल्यप्।
प्रकृतिः प्र + कृ (डुकृञ् करणे) + क्तिन्।

भावस्पष्टीकरणम् -

मन्यसे।	
किं मन्यसे ?	**न योत्स्ये इति** मन्यसे।
किं कृत्वा न योत्स्ये इति मन्यसे ?	**आश्रित्य** न योत्स्ये इति मन्यसे।
कम् आश्रित्य न योत्स्ये इति मन्यसे ?	**अहङ्कारम्** आश्रित्य न योत्स्ये इति मन्यसे।
यदि अहङ्कारम् आश्रित्य न योत्स्ये इति मन्यसे **(तर्हि) किम्** ?	यदि अहङ्कारम् आश्रित्य न योत्स्ये इति मन्यसे **(तर्हि) मिथ्या।**
यदि अहङ्कारम् आश्रित्य न योत्स्ये इति मन्यसे (तर्हि) **कः** मिथ्या ?	यदि अहङ्कारम् आश्रित्य न योत्स्ये इति मन्यसे (तर्हि) **व्यवसायः** मिथ्या।
यदि अहङ्कारम् आश्रित्य न योत्स्ये इति मन्यसे (तर्हि) **कः** व्यवसायः मिथ्या ?	यदि अहङ्कारम् आश्रित्य न योत्स्ये इति मन्यसे (तर्हि) **एषः** व्यवसायः मिथ्या।
यदि अहङ्कारम् आश्रित्य न योत्स्ये इति मन्यसे (तर्हि) एषः **कस्य** व्यवसायः मिथ्या ?	यदि अहङ्कारम् आश्रित्य न योत्स्ये इति मन्यसे (तर्हि) एषः **ते** व्यवसायः मिथ्या।
नियोक्ष्यति।	
का नियोक्ष्यति ?	**प्रकृतिः** नियोक्ष्यति।
प्रकृतिः **कं** नियोक्ष्यति ?	प्रकृतिः **त्वां** नियोक्ष्यति।

तात्पर्यम् - यदि त्वम् अहङ्कारम् आश्रित्य अहं युद्धं न करोमि इति निर्णयसि तदापि तव निर्णयः निष्फलः भवति। यतः क्षत्रियत्वकारणीभूता या प्रकृतिः सा प्रवृद्धरजोगुणा सती त्वाम् अवश्यं युद्धे प्रवर्तयिष्यति। अतः पूर्वमेव मदुक्तस्य अनुसरणं तव अत्यन्तं श्रेयस्करम्।

स्वभावजेन कौन्तेय निबद्धः स्वेन कर्मणा।
कर्तुं नेच्छसि यन्मोहात्करिष्यस्यवशोऽपि तत्॥१८.६०॥

पदच्छेदः - स्वभावजेन, कौन्तेय, निबद्धः, स्वेन, कर्मणा।
कर्तुम्, न, इच्छसि, यत्, मोहात्, करिष्यसि, अवशः, अपि, तत्॥

अन्वयः - कौन्तेय ! स्वभावजेन स्वेन कर्मणा निबद्धः यत् कर्तुं न इच्छसि तत् मोहात् अवशः अपि करिष्यसि ।

पदार्थः - कौन्तेय = अर्जुन, स्वभावजेन = नैसर्गिकेण, स्वेन = स्वीयेन, कर्मणा = कर्तव्येन, निबद्धः = नियतः, यत् = यत् कर्म, कर्तुम् = आचरितुम्, न इच्छसि = न अभिलषसि, तत् = तत् कर्म, मोहात् = अविवेकात्, अवशः अपि = परवशः एव, करिष्यसि = आचरिष्यसि ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
कौन्तेय	अ. पुं. सम्बो. एक.	स्वभावजेन	अ. पुं. तृ. एक. (विशेषणम्)
स्वेन	अ. पुं. तृ. एक. (विशेषणम्)	कर्मणा	कर्मन् - न. नपुं. तृ. एक. (विशेष्यम्)
निबद्धः	अ. पुं. प्र. एक.	यत्	यद् - द. सर्व. नपुं. द्वि. एक. (विशेषणम्)
कर्तुम्	तुमुन् अव्ययम्	न	अव्ययम्
इच्छसि	इष् (इषु इच्छायाम्) पर. कर्तरि लट्. मपु. एक.	तत्	तद् - द. सर्व. नपुं. द्वि. एक. (विशेषणम्)
मोहात्	अ. पुं. पं. एक.	अवशः	अ. पुं. प्र. एक.
अपि	अव्ययम्	करिष्यसि	कृ (डुकृञ् करणे) पर. कर्तरि लृट्. मपु. एक.

व्याकरणम् -

(क) सन्धिः
- नेच्छसि — न + इच्छसि — गुणसन्धिः ।
- यन्मोहात् — यत् + मोहात् — अनुनासिकसन्धिः ।
- करिष्यस्यवशः — करिष्यसि + अवशः — यण्सन्धिः ।
- अवशोऽपि — अवशः + अपि — विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः पूर्वरूपं च ।

(ख) समासः
- स्वभावजेन — स्वभावात् जातः स्वभावजः, तेन - कर्तरि डप्रत्ययः उपपदसमासश्च ।
- अवशः — न वशः अवशः - नञ्तत्पुरुषः ।

(ग) कृदन्तः
- निबद्धः — नि + बन्ध् (बन्ध बन्धने) + क्त (कर्मणि) ।
- कर्तुम् — कृ (डुकृञ् करणे) + तुमुन् ।
- मोहात् — मुह् (मुह वैचित्ये) + घञ्, तस्मात् ।

(घ) तद्धितान्तः
- कौन्तेय — कुन्ती + ढक् (कुन्त्याः अपत्यं पुमान्) ।

भावस्पष्टीकरणम् -

न इच्छसि ।	
किं कर्तुं न इच्छसि ?	**यत् कर्तुं** न इच्छसि ।
कथम्भूतः यत् कर्तुं न इच्छसि ?	**निबद्धः** यत् कर्तुं न इच्छसि ।
केन निबद्धः यत् कर्तुं न इच्छसि ?	**कर्मणा** निबद्धः यत् कर्तुं न इच्छसि ।
केन कर्मणा निबद्धः यत् कर्तुं न इच्छसि ?	**स्वेन** कर्मणा निबद्धः यत् कर्तुं न इच्छसि ।
कीदृशेन स्वेन कर्मणा निबद्धः यत् कर्तुं न इच्छसि ?	**स्वभावजेन** स्वेन कर्मणा निबद्धः यत् कर्तुं न इच्छसि ।
स्वभावजेन स्वेन कर्मणा निबद्धः यत् कर्तुं न इच्छसि तत् किम् ?	स्वभावजेन स्वेन कर्मणा निबद्धः यत् कर्तुं न इच्छसि **तत् अपि करिष्यसि ।**
स्वभावजेन स्वेन कर्मणा निबद्धः यत् कर्तुं न इच्छसि तत् **कथम्** अपि करिष्यसि ?	स्वभावजेन स्वेन कर्मणा निबद्धः यत् कर्तुं न इच्छसि तत् **अवशः** अपि करिष्यसि ।
स्वभावजेन स्वेन कर्मणा निबद्धः यत् कर्तुं न इच्छसि तत् **कस्मात्** अवशः अपि करिष्यसि ?	स्वभावजेन स्वेन कर्मणा निबद्धः यत् कर्तुं न इच्छसि तत् **मोहात्** अवशः अपि करिष्यसि ।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**कौन्तेय** !

तात्पर्यम् - अर्जुन ! यदि त्वम् अविवेकेन युद्धं न करोषि तर्हि पूर्वकर्मसंस्कारानुगुणस्य स्वभावस्य यदनुरूपं युद्धादिकर्म तेन नियन्त्रणात् परवशः सन् अवश्यं युद्धं करिष्यसि ।

ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति ।
भ्रामयन्सर्वभूतानि यन्त्रारूढानि मायया ॥१८.६१॥

पदच्छेदः - ईश्वरः, सर्वभूतानाम्, हृद्देशे, अर्जुन, तिष्ठति ।
भ्रामयन्, सर्वभूतानि, यन्त्रारूढानि, मायया ॥

अन्वयः - अर्जुन ! ईश्वरः सर्वभूतानि यन्त्रारूढानि मायया भ्रामयन् सर्वभूतानां हृद्देशे तिष्ठति ।

पदार्थः - अर्जुन = अर्जुन, ईश्वरः = नारायणः, सर्वभूतानि = सकलप्राणिनः, यन्त्रारूढानि = यन्त्राधिष्ठितानि, मायया = प्रकृत्या, भ्रामयन् = चालयन्, सर्वभूतानाम् = सकलप्राणिनाम्, हृद्देशे = हृदयप्रदेशे, तिष्ठति = वर्तते ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
अर्जुन	अ. पुं. सम्बो. एक.	ईश्वरः	अ. पुं. प्र. एक. (विशेष्यम्)
सर्वभूतानि	अ. नपुं. द्वि. बहु.	यन्त्रारूढानि	अ. नपुं. द्वि. बहु.
मायया	आ. स्त्री. तृ. एक.	भ्रामयन्	भ्रामयत् - त. पुं. प्र. एक. (विशेषणम्)
सर्वभूतानाम्	अ. नपुं. ष. बहु.	हृद्देशे	अ. पुं. स. एक.
तिष्ठति	स्था (ष्ठा गतिनिवृत्तौ) पर. कर्तरि लट्. प्रपु. एक.		

व्याकरणम् -

(क) सन्धिः	हृद्देशेऽर्जुन	हृद्देशे + अर्जुन	पूर्वरूपसन्धिः ।
(ख) समासः	सर्वभूतानाम्	सर्वाणि भूतानि सर्वभूतानि, तेषाम् - कर्मधारयः ।	
	हृद्देशे	हृद् एव देशः हृद्देशः, तस्मिन् - कर्मधारयः ।	
	यन्त्रारूढानि	यन्त्रे आरूढानि यन्त्रारूढानि - सप्तमीतत्पुरुषः ।	
(ग) कृदन्तः	भ्रामयन्	भ्रम् (भ्रमु चलने) + णिच् + शतृ ।	

भावस्पष्टीकरणम् -

तिष्ठति ।	
कः तिष्ठति ?	**ईश्वरः** तिष्ठति ।
ईश्वरः **कुत्र** तिष्ठति ?	ईश्वरः **हृद्देशे** तिष्ठति ।
ईश्वरः **केषां** हृद्देशे तिष्ठति ?	ईश्वरः **सर्वभूतानां** हृद्देशे तिष्ठति ।
ईश्वरः **कथं** सर्वभूतानां हृद्देशे तिष्ठति ?	ईश्वरः **भ्रामयन्** सर्वभूतानां हृद्देशे तिष्ठति ।
ईश्वरः **कानि** भ्रामयन् सर्वभूतानां हृद्देशे तिष्ठति ?	ईश्वरः **सर्वभूतानि** भ्रामयन् सर्वभूतानां हृद्देशे तिष्ठति ।
ईश्वरः सर्वभूतानि **कीदृशानि** भ्रामयन् सर्वभूतानां हृद्देशे तिष्ठति ?	ईश्वरः सर्वभूतानि **यन्त्रारूढानि** भ्रामयन् सर्वभूतानां हृद्देशे तिष्ठति ।
ईश्वरः सर्वभूतानि यन्त्रारूढानि **कया** भ्रामयन् सर्वभूतानां हृद्देशे तिष्ठति ?	ईश्वरः सर्वभूतानि यन्त्रारूढानि **मायया** भ्रामयन् सर्वभूतानां हृद्देशे तिष्ठति ।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**अर्जुन !**

तात्पर्यम् - अर्जुन ! सर्वेषामपि प्राणिनां हृदये ईश्वरः वर्तते। सः तानि सर्वाणि भूतानि यन्त्रारूढानि इव सम्यक् भ्रामयति। अतः त्वं न स्वतन्त्रः। युद्धं न करोमि इति कृतनिर्णयः अपि अन्ते युद्धं करिष्यस्येव। तस्मात् इदानीमेव मम वचनं पालय।

तमेव शरणं गच्छ सर्वभावेन भारत।
तत्प्रसादात्परां शान्तिं स्थानं प्राप्स्यसि शाश्वतम्॥१८.६२॥

पदच्छेदः - तम्, एव, शरणम्, गच्छ, सर्वभावेन, भारत।
तत्प्रसादात्, पराम्, शान्तिम्, स्थानम्, प्राप्स्यसि, शाश्वतम्॥

अन्वयः - भारत ! सर्वभावेन तम् एव शरणं गच्छ तत्प्रसादात् परां शान्तिं शाश्वतं स्थानं प्राप्स्यसि।

पदार्थः - भारत = अर्जुन, सर्वभावेन = सर्वात्मना, तम् एव = ईश्वरम् एव, शरणम् = आश्रयम्, गच्छ = प्राप्नुहि, तत्प्रसादात् = ईश्वरानुग्रहात्, पराम् = उत्कृष्टाम्, शान्तिम् = उपरतिम्, शाश्वतम् = नित्यम्, स्थानम् = पदम्, प्राप्स्यसि = लप्स्यसे।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
भारत	अ. पुं. सम्बो. एक.	सर्वभावेन	अ. पुं. तृ. एक.
तम्	तद् - द. सर्व. पुं. द्वि. एक. (विशेषणम्)	एव	अव्ययम्
शरणम्	अ. नपुं. द्वि. एक. (विशेषणम्)	गच्छ	गम् (गम्लृ गतौ) पर. कर्तरि लोट्. मपु. एक.
तत्प्रसादात्	अ. पुं. पं. एक.	पराम्	आ. स्त्री. द्वि. एक. (विशेषणम्)
शान्तिम्	इ. स्त्री. द्वि. एक. (विशेष्यम्)	शाश्वतम्	अ. नपुं. द्वि. एक. (विशेषणम्)
स्थानम्	अ. नपुं. द्वि. एक. (विशेष्यम्)	प्राप्स्यसि	प्र + आप् (आप्लृ व्याप्तौ) पर. कर्तरि लृट्. मपु. एक.

व्याकरणम् -

(क) समासः सर्वभावेन — सर्वः भावः सर्वभावः, तेन - कर्मधारयः।
तत्प्रसादात् — तस्य प्रसादः तत्प्रसादः, तस्मात् - षष्ठीतत्पुरुषः।

(ख) कृदन्तः शरणम् — श्रि (श्रिञ् सेवायाम्) + ल्युट्।

	शान्तिम्	शम् (शमु उपशमने) + क्तिन्, ताम्।
	स्थानम्	स्था (ष्ठा गतिनिवृत्तौ) + ल्युट्।
(ग) तद्धितान्तः	भारत	भरत + अण्, (अपत्यार्थे) भरतस्य अपत्यं पुमान्, तत्सम्बुद्धौ।

भावस्पष्टीकरणम् -

गच्छ।	
कुत्र गच्छ ?	**शरणं** गच्छ।
कं शरणं गच्छ ?	**तम् एव** शरणं गच्छ।
केन तम् एव शरणं गच्छ ?	**सर्वभावेन** तम् एव शरणं गच्छ।
सर्वभावेन तम् एव शरणं गच्छ **तत्प्रसादात् किं भविष्यति** ?	सर्वभावेन तम् एव शरणं गच्छ **तत्प्रसादात् प्राप्स्यसि**।
सर्वभावेन तम् एव शरणं गच्छ तत्प्रसादात् **कां** प्राप्स्यसि ?	सर्वभावेन तम् एव शरणं गच्छ तत्प्रसादात् **शान्तिं** प्राप्स्यसि।
सर्वभावेन तम् एव शरणं गच्छ तत्प्रसादात् **कीदृशीं** शान्तिं प्राप्स्यसि ?	सर्वभावेन तम् एव शरणं गच्छ तत्प्रसादात् **परां** शान्तिं प्राप्स्यसि।
सर्वभावेन तम् एव शरणं गच्छ तत्प्रसादात् परां शान्तिं **पुनः किं** प्राप्स्यसि ?	सर्वभावेन तम् एव शरणं गच्छ तत्प्रसादात् परां शान्तिं **स्थानं** प्राप्स्यसि।
सर्वभावेन तम् एव शरणं गच्छ तत्प्रसादात् परां शान्तिं **कीदृशं** स्थानं प्राप्स्यसि ?	सर्वभावेन तम् एव शरणं गच्छ तत्प्रसादात् परां शान्तिं **शाश्वतं** स्थानं प्राप्स्यसि।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**भारत** !

तात्पर्यम् - अर्जुन ! तस्मात् त्वं सर्वात्मना तमेव ईश्वरं शरणं गच्छ, यस्यानुग्रहात् परमां शान्तिं प्राप्नुवन् शाश्वतं स्थानम् अवाप्स्यसि।

इति ते ज्ञानमाख्यातं गुह्याद् गुह्यतरं मया।
विमृश्यैतदशेषेण यथेच्छसि तथा कुरु॥१८.६३॥

पदच्छेदः - इति, ते, ज्ञानम्, आख्यातम्, गुह्यात्, गुह्यतरम्, मया।
विमृश्य, एतत्, अशेषेण, यथा, इच्छसि, तथा, कुरु॥

अन्वयः - मया गुह्यात् गुह्यतरं ज्ञानम् इति ते आख्यातम् एतत् अशेषेण विमृश्य यथा इच्छसि तथा कुरु।

पदार्थः - मया = परमेश्वरेण, गुह्यात् = गोप्यात्, गुह्यतरम् = अतिशयेन गोप्यम्, ज्ञानम् इति = तत्त्वम् इति, ते = तुभ्यम्, आख्यातम् = कथितम्, एतत् = इदम्, अशेषेण = सकलम्, विमृश्य = आलोच्य, यथा = यत्, इच्छसि = अभिलषसि, तथा = तत्, कुरु = आचर।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
मया	अस्मद् - द. सर्व. तृ. एक.	गुह्यात्	अ. पुं. पं. एक.
गुह्यतरम्	अ. नपुं. प्र. एक.	ज्ञानम्	अ. नपुं. प्र. एक.
इति	अव्ययम्	ते	युष्मद् - द. सर्व. च. एक.
आख्यातम्	अ. नपुं. द्वि. एक. (विशेषणम्)	एतत्	अ. नपुं. द्वि. एक. (विशेषणम्)
अशेषेण	अ. पुं. तृ. एक.	विमृश्य	ल्यबन्तम् अव्ययम्
यथा	अव्ययम्	इच्छसि	इष् (इषु इच्छायाम्) पर. कर्तरि लट्. मपु. एक.
तथा	अव्ययम्	कुरु	कृ (डुकृञ् करणे) पर. कर्तरि लोट्. मपु. एक.

व्याकरणम् -

(क) सन्धिः
विमृश्यैतत् — विमृश्य + एतत् — वृद्धिसन्धिः।
एतदशेषेण — एतत् + अशेषेण — जश्त्वसन्धिः।
यथेच्छसि — यथा + इच्छसि — गुणसन्धिः।

(ख) समासः
अशेषेण — न विद्यते शेषः यस्य सः, तेन - बहुव्रीहिः।

(ग) कृदन्तः
ज्ञानम् — ज्ञा (ज्ञा अवबोधने) + ल्युट्।
आख्यातम् — आ + ख्या (चक्षिङ् व्यक्तायां वाचि) + क्त (कर्मणि)।
गुह्यात् — गुह् (गुहू संवरणे) + क्यप्।
विमृश्य — वि + मृश् (मृश आमर्शने) + ल्यप्।

(घ) तद्धितान्तः
गुह्यतरम् — अतिशयेन गुह्यं गुह्यतरम् (द्वयोः अन्यतरस्मिन् अतिशये तरप्)।

भावस्पष्टीकरणम् -

कुरु ।	
कथं कुरु ?	**यथा इच्छसि तथा** कुरु ।
किं कृत्वा यथा इच्छसि तथा कुरु ?	**विमृश्य** यथा इच्छसि तथा कुरु ।
केन विमृश्य यथा इच्छसि तथा कुरु ?	**अशेषेण** विमृश्य यथा इच्छसि तथा कुरु ।
किम् अशेषेण विमृश्य यथा इच्छसि तथा कुरु ?	**एतत्** अशेषेण विमृश्य यथा इच्छसि तथा कुरु ।
किम् एतत् अशेषेण विमृश्य यथा इच्छसि तथा कुरु ?	**आख्यातम्** एतत् अशेषेण विमृश्य यथा इच्छसि तथा कुरु ।
किम् आख्यातम् एतत् अशेषेण विमृश्य यथा इच्छसि तथा कुरु ?	**गुह्यात् गुह्यतरं ज्ञानम् इति** आख्यातम् एतत् अशेषेण विमृश्य यथा इच्छसि तथा कुरु ।
गुह्यात् गुह्यतरं ज्ञानम् इति **कस्मै** आख्यातम् एतत् अशेषेण विमृश्य यथा इच्छसि तथा कुरु ?	गुह्यात् गुह्यतरं ज्ञानम् इति **ते** आख्यातम् एतत् अशेषेण विमृश्य यथा इच्छसि तथा कुरु ।
केन गुह्यात् गुह्यतरं ज्ञानम् इति ते आख्यातम् एतत् अशेषेण विमृश्य यथा इच्छसि तथा कुरु ?	**मया** गुह्यात् गुह्यतरं ज्ञानम् इति ते आख्यातम् एतत् अशेषेण विमृश्य यथा इच्छसि तथा कुरु ।

तात्पर्यम् - मया एतावन्तं कालम् अत्यन्तं रहस्यं तत्त्वं विशदीकृतम् । एतत् सर्वं सम्यक् ज्ञात्वा यत् कर्तुम् इच्छसि तत् कुरु ।

सर्वगुह्यतमं भूयः शृणु मे परमं वचः ।
इष्टोऽसि मे दृढमिति ततो वक्ष्यामि ते हितम् ॥१८.६४॥

पदच्छेदः - सर्वगुह्यतमम्, भूयः, शृणु, मे, परमम्, वचः ।
इष्टः, असि, मे, दृढम्, इति, ततः, वक्ष्यामि, ते, हितम् ॥

अन्वयः - दृढं मे इष्टः असि इति सर्वगुह्यतमं मे परमं वचः भूयः शृणु । ततः ते हितं वक्ष्यामि ।

पदार्थः - दृढम् = निश्चयेन, मे = मम, इष्टः = अभिमतः, असि = भवसि, इति = एवम्, सर्वगुह्यतमम् = अत्यन्तगोपनीयम्, मे = मम, परमम् = प्रकृष्टम्, वचः = वाक्यम्, भूयः = पुनः, शृणु = आकर्णय, ततः = तस्मात्, ते = तुभ्यम्, हितम् = श्रेयस्करम्, वक्ष्यामि = वदिष्यामि ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
दृढम्	अ. नपुं. द्वि. एक.	मे	अस्मद् - द. सर्व. ष. एक.
इष्टः	अ. पुं. प्र. एक. (विशेषणम्)	असि	अस् (अस भुवि) पर. कर्तरि लट्. मपु. एक.
इति	अव्ययम्	सर्वगुह्यतमम्	अ. नपुं. द्वि. एक. (विशेषणम्)
परमम्	अ. नपुं. द्वि. एक. (विशेषणम्)	वचः	वचस् - सका. नपुं. द्वि. एक. (विशेष्यम्)
भूयः	अव्ययम्	शृणु	श्रु (श्रुश्रवणे) पर. कर्तरि लोट्. मपु. एक.
ततः	अव्ययम्	ते	युष्मद् - द. सर्व. च. एक.
हितम्	अ. नपुं. द्वि. एक.	वक्ष्यामि	वच् (वच परिभाषणे) पर. कर्तरि लृट्. उपु. एक.

व्याकरणम् -

(क) सन्धिः	इष्टोऽसि	इष्टः + असि	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः पूर्वरूपं च।
	ततो वक्ष्यामि	ततः + वक्ष्यामि	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः।
(ख) कृदन्तः	इष्टः	इष् (इषु इच्छायाम्) + क्त (कर्मणि)।	
	दृढम्	दृह् (दृह वृद्धौ) + क्त (कर्तरि)।	
	गुह्यम्	गुह् (गुहू संवरणे) + क्यप्।	
	हितम्	हि (हि गतौ वृद्धौ च) + क्त (कर्तरि)।	
(ग) तद्धितान्तः	गुह्यतमम्	अतिशयेन गुह्यं गुह्यतमम् (बहुषु अन्यतमस्मिन् अतिशये तमप्)।	

भावस्पष्टीकरणम् -

शृणु।	
कथं शृणु ?	**भूयः शृणु।**

किं भूयः शृणु ?	**वचः** भूयः शृणु ।
. **कीदृशं** वचः भूयः शृणु ?	**परमं** वचः भूयः शृणु ।
कस्य परमं वचः भूयः शृणु ?	**मे** परमं वचः भूयः शृणु ।
किं मे परमं वचः भूयः श्रृणु ?	**सर्वगुह्यतमं** मे परमं वचः भूयः श्रृणु ।
किं सर्वगुह्यतमं मे परमं वचः भूयः शृणु ?	**दृढं मे इष्टः असि इति** सर्वगुह्यतमं मे परमं वचः भूयः शृणु ।
दृढं मे इष्टः असि इति सर्वगुह्यतमं मे परमं वचः भूयः शृणु **ततः किम्** ?	दृढं मे इष्टः असि इति सर्वगुह्यतमं मे परमं वचः भूयः शृणु **ततः वक्ष्यामि** ।
दृढं मे इष्टः असि इति सर्वगुह्यतमं मे परमं वचः भूयः शृणु ततः **किं** वक्ष्यामि ?	दृढं मे इष्टः असि इति सर्वगुह्यतमं मे परमं वचः भूयः शृणु ततः **हितं** वक्ष्यामि ।
दृढं मे इष्टः असि इति सर्वगुह्यतमं मे परमं वचः भूयः शृणु ततः **कस्य** हितं वक्ष्यामि ?	दृढं मे इष्टः असि इति सर्वगुह्यतमं मे परमं वचः भूयः शृणु ततः **ते** हितं वक्ष्यामि ।

तात्पर्यम् - अत्यन्तं गोपनीयं मम प्रकृष्टं वचनं पुनः शृणु । त्वं मम अत्यन्तम् इष्टः असि । तस्मात् तव यत् श्रेयस्करं तत् वदिष्यामि ।

मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु।
मामेवैष्यसि सत्यं ते प्रतिजाने प्रियोऽसि मे ॥१८.६५ ॥

पदच्छेदः - मन्मनाः, भव, मद्भक्तः, मद्याजी, माम्, नमस्कुरु ।
माम्, एव, एष्यसि, सत्यम्, ते, प्रतिजाने, प्रियः, असि, मे ॥

अन्वयः - मन्मनाः भव । मद्भक्तः मद्याजी मां नमस्कुरु । माम् एव एष्यसि । ते सत्यं प्रतिजाने । मे प्रियः असि ।

पदार्थः - मन्मनाः = मन्मनस्कः, भव = वर्तस्व, मद्भक्तः = मदाराधकः, मद्याजी = मत्पूजकः, माम् = मा, नमस्कुरु = प्रणम, माम् एव = मा एव, एष्यसि = गमिष्यसि, ते = तव, सत्यम् = वास्तवम्, प्रतिजाने = प्रतिशृणोमि, मे = मम, प्रियः = इष्टः, असि = भवसि ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
मन्मनाः	मन्मनस् - सका. पुं. प्र. एक. (विशेषणम्)	भव	भू (भू सत्तायाम्) पर. कर्तरि लोट्. मपु. एक.
मद्भक्तः	अ. पुं. प्र. एक. (विशेषणम्)	मद्याजी	मद्याजिन् - न. पुं. प्र. एक.
माम्	अस्मद् - द. सर्व. द्वि. एक.	नमस्कुरु	नमस् + कृ (डुकृञ् करणे) पर. कर्तरि लोट्. मपु. एक.
एव	अव्ययम्	एष्यसि	इ (इण् गतौ) पर. कर्तरि लृट्. मपु. एक.
ते	युष्मद् - द. सर्व. ष. एक.	सत्यम्	अ. नपुं. द्वि. एक.
प्रतिजाने	प्रति + ज्ञा (ज्ञा अवबोधने) आत्म. कर्तरि लट्. उपु. एक.	मे	अस्मद् - द. सर्व. ष. एक.
प्रियः	अ. पुं. प्र. एक. (विशेषणम्)	असि	अस् (अस भुवि) पर. कर्तरि लट्. मपु. एक.

व्याकरणम् -

(क) सन्धिः	मद्भक्तो मद्याजी	मद्भक्तः + मद्याजी	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः।
	एवैष्यसि	एव + एष्यसि	वृद्धिसन्धिः।
	प्रियोऽसि	प्रियः + असि	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः पूर्वरूपं च।
(ख) समासः	मन्मनाः	मयि मनः यस्य सः मन्मनाः - बहुव्रीहिः।	
	मद्भक्तः	मम भक्तः मद्भक्तः - षष्ठीतत्पुरुषः।	
	मद्याजी	मां यजते इति मद्याजी - ताच्छीलिके कर्तरि णिनि उपपदसमासश्च।	
(ग) तद्धितान्तः	सत्यम्	सत् + यत् (सत्सु भवम्)।	

भावस्पष्टीकरणम् -

भव।	
कीदृशः भव ?	**मन्मनाः भव।**
नमस्कुरु।	

कथम्भूतः नमस्कुरु ?	**मद्भक्तः** नमस्कुरु ।
मद्भक्तः **कीदृशः** नमस्कुरु ?	मद्भक्तः **मद्याजी** नमस्कुरु ।
मद्भक्तः मद्याजी **कं** नमस्कुरु ?	मद्भक्तः मद्याजी **मां** नमस्कुरु ।
एष्यसि ।	
कम् एष्यसि ?	**माम्** एव एष्यसि ।
प्रतिजाने ।	
किं प्रतिजाने ?	**सत्यं** प्रतिजाने ।
कस्य सत्यं प्रतिजाने ?	**ते** सत्यं प्रतिजाने ।
असि ।	
कीदृशः असि ?	**प्रियः** असि ।
कस्य प्रियः असि ?	**मे** प्रियः असि ।

तात्पर्यम् - मय्येव चित्तं स्थापय । मद्भक्तः भव । माम् एव पूजय । माम् एव नमस्कुरु । अन्ते माम् एव प्राप्स्यसि । दृढमहं कथयामि यत् त्वं मम अत्यन्तं प्रियः । अतः यत् ते श्रेयस्करं तदेव कथयामि । तद् एव अनुतिष्ठ ।

सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज ।
अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः ॥१८.६६॥

पदच्छेदः - सर्वधर्मान्, परित्यज्य, माम्, एकम्, शरणम्, व्रज ।
अहम्, त्वा, सर्वपापेभ्यः, मोक्षयिष्यामि, मा, शुचः ॥

अन्वयः - सर्वधर्मान् परित्यज्य माम् एकं शरणं व्रज । अहं त्वा सर्वपापेभ्यः मोक्षयिष्यामि मा शुचः ।

पदार्थः - सर्वधर्मान् = सकलकर्माणि, परित्यज्य = विसृज्य, माम् = मा, एकम् = मुख्यम्, शरणम् = आश्रयम्, व्रज = गच्छ, अहम् = परमेश्वरः, त्वा = त्वाम्, सर्वपापेभ्यः = सकलकिल्बिषेभ्यः, मोक्षयिष्यामि = विमोचयिष्यामि, मा शुचः = दुःखं मा कुरु ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
सर्वधर्मान्	अ. पुं. द्वि. बहु.	परित्यज्य	ल्यबन्तम् अव्ययम्

माम्	अस्मद् - द. सर्व. द्वि. एक. (विशेष्यम्)	एकम्	अ. नपुं. द्वि. एक. (विशेषणम्)
शरणम्	अ. नपुं. द्वि. एक. (विशेषणम्)	व्रज	व्रज् (व्रज गतौ) पर. कर्तरि लोट्. मपु. एक.
अहम्	अस्मद् - द. सर्व. प्र. एक.	त्वा	युष्मद् - द. सर्व. द्वि. एक.
सर्वपापेभ्यः	अ. नपुं. पं. बहु.	मोक्षयिष्यामि	मोक्षि इति नामधातुः - पर. कर्तरि लृट्. उपु. एक.
मा	अव्ययम्	अशुचः(अशोचीः)	शुच् (शुच शोके) पर. कर्तरि लुङ्. मपु. एक.

व्याकरणम् -

(क) सन्धिः सर्वपापेभ्यो मोक्षयिष्यामि

सर्वपापेभ्यः + मोक्षयिष्यामि

विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः ।

(ख) समासः सर्वधर्मान् — सर्वे धर्माः सर्वधर्माः, तान् - कर्मधारयः ।

सर्वपापेभ्यः — सर्वाणि पापानि सर्वपापानि, तेभ्यः - कर्मधारयः ।

(ग) कृदन्तः परित्यज्य — परि + त्यज् (त्यज हानौ) + ल्यप् ।

शरणम् — श्रि (श्रिञ् सेवायाम्) + ल्युट् ।

भावस्पष्टीकरणम् -

व्रज ।	
कं व्रज ?	**मां** व्रज ।
मां **कीदृशं** व्रज ?	माम् **एकं** व्रज ।
माम् एकं **कं** व्रज ?	माम् एकं **शरणं** व्रज ।
किं कृत्वा माम् एकं शरणं व्रज ?	**परित्यज्य** माम् एकं शरणं व्रज ।
कान् परित्यज्य माम् एकं शरणं व्रज ?	**सर्वधर्मान्** परित्यज्य माम् एकं शरणं व्रज ।
सर्वधर्मान् परित्यज्य माम् एकं शरणं व्रज, **तेन किम्** ?	सर्वधर्मान् परित्यज्य माम् एकं शरणं व्रज, **मोक्षयिष्यामि** ।

सर्वधर्मान् परित्यज्य माम् एकं शरणं व्रज, **कः** मोक्षयिष्यामि ?	सर्वधर्मान् परित्यज्य माम् एकं शरणं व्रज, **अहं** मोक्षयिष्यामि।
सर्वधर्मान् परित्यज्य माम् एकं शरणं व्रज, अहं **कं** मोक्षयिष्यामि ?	सर्वधर्मान् परित्यज्य माम् एकं शरणं व्रज, अहं **त्वा** मोक्षयिष्यामि।
सर्वधर्मान् परित्यज्य माम् एकं शरणं व्रज, अहं त्वा **केभ्यः** मोक्षयिष्यामि ?	सर्वधर्मान् परित्यज्य माम् एकं शरणं व्रज, अहं त्वा **सर्वपापेभ्यः** मोक्षयिष्यामि।
सर्वधर्मान् परित्यज्य माम् एकं शरणं व्रज, अहं त्वा सर्वपापेभ्यः मोक्षयिष्यामि, **अतः किम्** ?	सर्वधर्मान् परित्यज्य माम् एकं शरणं व्रज, अहं त्वा सर्वपापेभ्यः मोक्षयिष्यामि **मा शुचः** ।

तात्पर्यम् - तस्मात् त्वं सर्वाणि कर्माणि परित्यज्य मां शरणं प्राप्नुहि। अहं त्वां कर्मत्यागजन्यात् सर्वस्मात् अपि पापात् विमोचयिष्यामि। शोकं मा कुरु।

इदं ते नातपस्काय नाभक्ताय कदाचन।
न चाशुश्रूषवे वाच्यं न च मां योऽभ्यसूयति॥१८.६७॥

पदच्छेदः - इदम्, ते, न, अतपस्काय, न, अभक्ताय, कदाचन।
न, च, अशुश्रूषवे, वाच्यम्, न, च, माम्, यः, अभ्यसूयति॥

अन्वयः - ते इदं कदाचन अतपस्काय न वाच्यम् अभक्ताय न, न च अशुश्रूषवे, न च मां यः अभ्यसूयति।

पदार्थः - ते = तव, इदम् = एतत्, कदाचन = कदापि, अतपस्काय = तपोविहीनाय, न वाच्यम् = न कथनीयम्, अभक्ताय न = भक्तिहीनाय न, न च अशुश्रूषवे = असेविने अपि न, न च = नापि, माम् = मा, यः = यः मानवः, अभ्यसूयति = न सहते।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
ते	युष्मद् - द. सर्व. ष. एक.	इदम्	इदम् - म. सर्व. नपुं. प्र. एक. (विशेषणम्)
कदाचन	अव्ययम्	अतपस्काय	अ. पुं. च. एक. (विशेषणम्)
न	अव्ययम्	वाच्यम्	अ. नपुं. प्र. एक.

अभक्ताय	अ. पुं. च. एक. (विशेषणम्)	च	अव्ययम्
अशुश्रूषवे	उ. पुं. च. एक. (विशेषणम्)	माम्	अस्मद् - द. सर्व. द्वि. एक.
यः	यद् - द. सर्व. पुं. प्र. एक. (विशेषणम्)	अभ्यसूयति	अभि + असू (असूञ् उपतापे) पर. कर्तरि लट्. प्रपु. एक.

व्याकरणम् -

(क) सन्धिः

नातपस्काय	न + अतपस्काय	सवर्णदीर्घसन्धिः।
नाभक्ताय	न + अभक्ताय	सवर्णदीर्घसन्धिः।
चाशुश्रूषवे	च + अशुश्रूषवे	सवर्णदीर्घसन्धिः।
योऽभ्यसूयति	यः + अभ्यसूयति	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः पूर्वरूपं च।

(ख) समासः

अतपस्काय	न विद्यते तपः यस्मिन् सः अतपस्कः, तस्मै - नञ्बहुव्रीहिः।
अभक्ताय	न भक्तः अभक्तः, तस्मै - नञ्तत्पुरुषः।
अशुश्रूषवे	न शुश्रूषुः अशुश्रूषुः, तस्मै - नञ्तत्पुरुषः।
भक्ताय	भज् (भज सेवायाम्) + क्त (कर्तरि), तस्मै।

(ग) कृदन्तः

शुश्रूषवे	श्रु (श्रु श्रवणे) + सन् + उ, तस्मै।
वाच्यम्	वच् (वच परिभाषणे) + ण्यत् (कर्मणि)।

भावस्पष्टीकरणम् -

न वाच्यम्।	
कस्मै न वाच्यम् ?	**अतपस्काय** न वाच्यम्।
कदा अतपस्काय न वाच्यम् ?	**कदाचन** अतपस्काय न वाच्यम्।
किं कदाचन अतपस्काय न वाच्यम् ?	**इदं** कदाचन अतपस्काय न वाच्यम्।
कस्य इदं कदाचन अतपस्काय न वाच्यम् ?	**ते** इदं कदाचन अतपस्काय न वाच्यम्।
ते इदं कदाचन अतपस्काय न वाच्यम्, **पुनः कस्मै न** ?	ते इदं कदाचन अतपस्काय न वाच्यम्, **अभक्ताय न**।
ते इदं कदाचन अतपस्काय न वाच्यम्, अभक्ताय न, **पुनः कस्मै न** ?	ते इदं कदाचन अतपस्काय न वाच्यम्, अभक्ताय न, **न च अशुश्रूषवे** ?

ते इदं कदाचन अतपस्काय न वाच्यम् अभक्ताय न, न च अशुश्रूषवे **पुनः कस्मै न ?**	ते इदं कदाचन अतपस्काय न वाच्यम् अभक्ताय न, न च अशुश्रूषवे, **न च यः अभ्यसूयति ।**
ते इदं कदाचन अतपस्काय न वाच्यम्, अभक्ताय न, न च अशुश्रूषवे, न च **कं** यः अभ्यसूयति ?	ते इदं कदाचन अतपस्काय न वाच्यम् अभक्ताय न, न च अशुश्रूषवे, न च **मां** यः अभ्यसूयति ।

तात्पर्यम् - एतावन्तं कालं यदुक्तं गीतार्थतत्त्वं तत् त्वया तपोविहीनाय न वाच्यम् । भक्तिहीनाय न वाच्यम् । असेविने न वाच्यम् । मां यः न सहते तस्मै अपि न वाच्यम् ।

य इदं परमं गुह्यं मद्भक्तेष्वभिधास्यति ।
भक्तिं मयि परां कृत्वा मामेवैष्यत्यसंशयः ॥१८.६८॥

पदच्छेदः - यः, इदम्, परमम्, गुह्यम्, मद्भक्तेषु, अभिधास्यति ।
भक्तिम्, मयि, पराम्, कृत्वा, माम्, एव, एष्यति, असंशयः ॥

अन्वयः - यः परमं गुह्यम् इदं मद्भक्तेषु अभिधास्यति, मयि परां भक्तिं कृत्वा माम् एव एष्यति असंशयः ।

पदार्थः - यः = यः मानवः, परमम् = प्रकृष्टम्, गुह्यम् = रहस्यम्, इदम् = एतत्, मद्भक्तेषु = मदाराधकेषु, अभिधास्यति = वदिष्यति, मयि = परमेश्वरे, पराम् = उत्तमाम्, भक्तिम् = विश्वासम्, कृत्वा = विधाय, माम् एव = मा एव, एष्यति = अधिगच्छति, असंशयः = न सन्देहः ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
यः	यद् - द. सर्व. पुं. प्र. एक. (विशेषणम्)	परमम्	अ. नपुं. द्वि. एक. (विशेषणम्)
गुह्यम्	अ. नपुं. द्वि. एक. (विशेष्यम्)	इदम् .	इदम् - म. सर्व. नपुं. प्र. एक. (विशेषणम्)
मद्भक्तेषु	अ. पुं. स. बहु.	अभिधास्यति	अभि + धा (डुधाञ् धारणपोषणयोः) पर. कर्तरि लृट्. प्रपु. एक.
मयि	अस्मद् - द. सर्व. स. एक.	पराम्	आ. स्त्री. द्वि. एक. (विशेषणम्)
भक्तिम्	इ. स्त्री. द्वि. एक. (विशेष्यम्)	कृत्वा	क्त्वान्तम् अव्ययम्

माम्	अस्मद् - द. सर्व. द्वि. एक.	एव	अव्ययम्
एष्यति	इ (इण् गतौ) पर. कर्तरि लृट्. प्रपु. एक.	असंशयः	अ. पुं. प्र. एक.

व्याकरणम् -

(क) सन्धिः	य इदम्	यः + इदम्	विसर्गसन्धिः (लोपः)।
	मद्भक्तेष्वभिधास्यति	मद्भक्तेषु + अभिधास्यति	यण्सन्धिः।
	एवैष्यसि	एव + एष्यसि	वृद्धिसन्धिः।
	एष्यत्यसंशयः	एष्यति + असंशयः	यण्सन्धिः।
(ख) समासः	मद्भक्तेषु	मम भक्ताः मद्भक्ताः, तेषु - षष्ठीतत्पुरुषः।	
	असंशयः	न संशयः असंशयः - नञ्तत्पुरुषः।	
(ग) कृदन्तः	गुह्यम्	गुह् (गुहू संवरणे) + ण्यत्।	
	भक्तिम्	भज् (भज सेवायाम्) + क्तिन्, ताम्।	
	कृत्वा	कृ (डुकृञ् करणे) + क्त्वा।	

भावस्पष्टीकरणम् -

अभिधास्यति।	
कः अभिधास्यति ?	**यः** अभिधास्यति।
यः **केषु** अभिधास्यति ?	यः **मद्भक्तेषु** अभिधास्यति।
यः **किं** मद्भक्तेषु अभिधास्यति ?	यः **गुह्यं** मद्भक्तेषु अभिधास्यति।
यः **किं** गुह्यं मद्भक्तेषु अभिधास्यति ?	यः **इदं** गुह्यं मद्भक्तेषु अभिधास्यति।
यः इदं **कीदृशं** गुह्यं मद्भक्तेषु अभिधास्यति ?	यः इदं **परमं** गुह्यं मद्भक्तेषु अभिधास्यति।
यः इदं परमं गुह्यं मद्भक्तेषु अभिधास्यति **(सः) किम्** ?	यः इदं परमं गुह्यं मद्भक्तेषु अभिधास्यति **(सः) एष्यति**।
यः इदं परमं गुह्यं मद्भक्तेषु अभिधास्यति (सः) **कम्** एष्यति ?	यः इदं परमं गुह्यं मद्भक्तेषु अभिधास्यति (सः) **माम्** एव एष्यति।
यः इदं परमं गुह्यं मद्भक्तेषु अभिधास्यति (सः) **किं कृत्वा** माम् एव एष्यति ?	यः इदं परमं गुह्यं मद्भक्तेषु अभिधास्यति (सः) **भक्तिं कृत्वा** माम् एव एष्यति।
यः इदं परमं गुह्यं मद्भक्तेषु अभिधास्यति (सः) **कीदृशीं** भक्तिं कृत्वा माम् एव एष्यति ?	यः इदं परमं गुह्यं मद्भक्तेषु अभिधास्यति (सः) **परां** भक्तिं कृत्वा माम् एव एष्यति।

यः इदं परमं गुह्यं मद्भक्तेषु अभिधास्यति (सः) **कस्मिन्** परां भक्तिं कृत्वा माम् एव एष्यति ?	यः इदं परमं गुह्यं मद्भक्तेषु अभिधास्यति, **मयि** परां भक्तिं कृत्वा माम् एव एष्यति ।
यः इदं परमं गुह्यं मद्भक्तेषु अभिधास्यति, मयि परां भक्तिं कृत्वा माम् एव एष्यति, **कथम्** ?	यः इदं परमं गुह्यं मद्भक्तेषु अभिधास्यति, मयि परां भक्तिं कृत्वा माम् एव एष्यति, **असंशयः** ।

तात्पर्यम् - यः पुरुषः प्रकृष्टं रहस्यम् इदं मदाराधकेषु वदिष्यति सः मयि परमेश्वरे श्रद्धां कुर्वन् माम् एव अधिगच्छति । अत्र सन्देहः नास्ति ।

न च तस्मान्मनुष्येषु कश्चिन्मे प्रियकृत्तमः ।
भविता न च मे तस्मादन्यः प्रियतरो भुवि ॥१८.६९॥

पदच्छेदः - न, च, तस्मात्, मनुष्येषु, कश्चित्, मे, प्रियकृत्तमः ।
भविता, न, च, मे, तस्मात्, अन्यः, प्रियतरः, भुवि ॥

अन्वयः - मनुष्येषु च तस्मात् कश्चित् मे न प्रियकृत्तमः । तस्मात् अन्यः प्रियतरः भुवि न च भविता ।

पदार्थः - मनुष्येषु च = मानवेषु च, तस्मात् = तस्मात् मानवात्, कश्चित् = कोऽपि, मे = मम, न प्रियकृत्तमः = न अत्यन्तं प्रियकरः, तस्मात् = तस्मात् मानवात्, अन्यः = इतरः, प्रियतरः = इष्टतरः, भुवि = भूमौ, न च = न अपि, भविता = भविष्यति ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
मनुष्येषु	अ. पुं. स. बहु.	च	अव्ययम्
तस्मात्	तद् - द. सर्व. पुं. पं. एक. (विशेषणम्)	कश्चित्	अव्ययम्
मे	अस्मद् - द. सर्व. ष. एक.	न	अव्ययम्
प्रियकृत्तमः	अ. पुं. प्र. एक. (विशेषणम्)	अन्यः	अ. पुं. प्र. एक. (विशेषणम्)
प्रियतरः	अ. पुं. प्र. एक. (विशेषणम्)	भुवि	ऊ. स्त्री. स. एक.
भविता	भू (भू सत्तायाम्) पर. कर्तरि लुट्. प्रपु. एक.		

व्याकरणम् -

(क) सन्धिः तस्मान्मनुष्येषु तस्मात् + मनुष्येषु अनुनासिकसन्धिः ।

कश्चिन्मे	कश्चित् + मे	अनुनासिकसन्धिः।
तस्मादन्यः	तस्मात् + अन्यः	जश्त्वसन्धिः।
प्रियतरो भुवि	प्रियतरः + भुवि	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः।

(ख) तद्धितान्तः प्रियकृत्तमः — प्रियकृत् + तमप्, अतिशयेन प्रियकृत् प्रियकृत्तमः (बहुषु अन्यतमस्मिन् अतिशये तमप्)।

प्रियतरः — प्रिय+ तरप्, अतिशयेन प्रियः प्रियतरः (द्वयोः अन्यतरस्मिन् अतिशये तरप्)।

भावस्पष्टीकरणम् -

न प्रियकृत्तमः।	
कः न प्रियकृत्तमः ?	**कश्चित्** न प्रियकृत्तमः।
कश्चित् **कस्य** न प्रियकृत्तमः ?	कश्चित् **मे** न प्रियकृत्तमः।
कस्मात् कश्चित् मे न प्रियकृत्तमः ?	**तस्मात्** कश्चित् मे न प्रियकृत्तमः।
केषु तस्मात् कश्चित् मे न प्रियकृत्तमः ?	**मनुष्येषु** च तस्मात् कश्चित् मे न प्रियकृत्तमः।
मनुष्येषु च तस्मात् कश्चित् मे न प्रियकृत्तमः, **तस्मात् किम्** ?	मनुष्येषु च तस्मात् कश्चित् मे न प्रियकृत्तमः, **तस्मात् न च भविता**।
मनुष्येषु च तस्मात् कश्चित् मे न प्रियकृत्तमः, तस्मात् **कः** न च भविता ?	मनुष्येषु च तस्मात् कश्चित् मे न प्रियकृत्तमः, तस्मात् **प्रियतरः** न च भविता।
मनुष्येषु च तस्मात् कश्चित् मे न प्रियकृत्तमः, तस्मात् **कः** प्रियतरः न च भविता ?	मनुष्येषु च तस्मात् कश्चित् मे न प्रियकृत्तमः, तस्मात् **अन्यः** प्रियतरः न च भविता।
मनुष्येषु च तस्मात् कश्चित् मे न प्रियकृत्तमः, तस्मात् अन्यः प्रियतरः **कुत्र** न च भविता ?	मनुष्येषु च तस्मात् कश्चित् मे न प्रियकृत्तमः, तस्मात् अन्यः प्रियतरः **भुवि** न च भविता।

तात्पर्यम् - मनुष्येषु तस्मात् प्रियकारी अपरः कोऽपि नास्ति। तस्मात् अन्यः मम प्रियः नापि भविष्यति। सः एव प्रियकारी, सः एव च मम अत्यन्तं प्रियः इति जानीहि।

अध्येष्यते च य इमं धर्म्यं संवादमावयोः।
ज्ञानयज्ञेन तेनाहमिष्टः स्यामिति मे मतिः ॥१८.७०॥

पदच्छेदः - अध्येष्यते, च, यः, इमम्, धर्म्यम्, संवादम्, आवयोः।
ज्ञानयज्ञेन, तेन, अहम्, इष्टः, स्याम्, इति, मे, मतिः ॥

अन्वयः - यः च धर्म्यम् आवयोः इमं संवादम् अध्येष्यते तेन ज्ञानयज्ञेन अहम् इष्टः स्याम् इति मे मतिः ।

पदार्थः - यः च = यः च मानवः, धर्म्यम् = धर्मयुक्तम्, आवयोः = कृष्णार्जुनयोः, इमम् = एतम्, संवादम् = सम्भाषणम्, अध्येष्यते = पठिष्यति, तेन = तेन मानवेन, ज्ञानयज्ञेन = ज्ञानरूपयागेन, अहम् = परमेश्वरः, इष्टः = पूजितः, स्याम् = भवेयम्, इति = एवम्, मे = मम, मतिः = बुद्धिः ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
यः	यद् - द. सर्व. पुं. प्र. एक. (विशेषणम्)	च	अव्ययम्
धर्म्यम्	अ. नपुं. द्वि. एक. (विशेषणम्)	आवयोः	अस्मद् - द. सर्व. ष. द्वि.
इमम्	इदम् - म. सर्व. पुं. द्वि. एक. (विशेषणम्)	संवादम्	अ. पुं. द्वि. एक. (विशेष्यम्)
अध्येष्यते	अधि + इ (इङ् अध्ययने) आत्म. कर्तरि लृट्. प्रपु. एक.	तेन	तद् - द. सर्व. पुं. तृ. एक. (विशेषणम्)
ज्ञानयज्ञेन	अ. पुं. तृ. एक. (विशेष्यम्)	अहम्	अस्मद् - द. सर्व. प्र. एक. (विशेष्यम्)
इष्टः	अ. पुं. प्र. एक. (विशेषणम्)	स्याम्	अस् (अस भुवि) पर. कर्तरि विधिलिङ्. उपु. एक.
इति	अव्ययम्	मे	अस्मद् - द. सर्व. ष. एक.
मतिः	इ. स्त्री. प्र. एक.		

व्याकरणम् -

(क) सन्धिः य इमम् — यः + इमम् — विसर्गसन्धिः (लोपः) ।

तेनाहम् — तेन + अहम् — सवर्णदीर्घसन्धिः ।

(ख) समासः ज्ञानयज्ञेन — ज्ञानमेव यज्ञः ज्ञानयज्ञः, तेन - कर्मधारयः ।

(ग) कृदन्तः संवादम् — सम् + वद् (वद व्यक्तायां वाचि) + घञ् ।

ज्ञानम् — ज्ञा (ज्ञा अवबोधने) + ल्युट् ।

इष्टः — इष् (इषु इच्छायाम्) + क्त (कर्तरि) ।

मतिः — मन् (मन ज्ञाने अवबोधने च) + क्तिन् ।

(घ) तद्धितान्तः धर्म्यम् — धर्म + यत् (धर्मात् अनपेतम् इत्यर्थः ।)

भावस्पष्टीकरणम् -

अध्येष्यते।	
कः अध्येष्यते ?	**यः** अध्येष्यते।
यः **कम्** अध्येष्यते ?	यः **संवादम्** अध्येष्यते ?
यः **कं** संवादम् अध्येष्यते ?	यः **इमं** संवादम् अध्येष्यते।
यः **कीदृशम्** इमं संवादम् अध्येष्यते ?	यः **धर्म्यं** च इमं संवादम् अध्येष्यते।
यः धर्म्यं च **कयोः** इमं संवादम् अध्येष्यते ?	यः धर्म्यं च **आवयोः** इमं संवादम् अध्येष्यते।
यः धर्म्यं च आवयोः इमं संवादम् अध्येष्यते **तेन किम्** ?	यः धर्म्यं च आवयोः इमं संवादम् अध्येष्यते **तेन अहम् इष्टः स्याम्।**
यः धर्म्यं च आवयोः इमं संवादम् अध्येष्यते तेन **केन** अहम् इष्टः स्याम् ?	यः धर्म्यं च आवयोः इमं संवादम् अध्येष्यते तेन **ज्ञानयज्ञेन** स्याम्।
यः धर्म्यं च आवयोः इमं संवादम् अध्येष्यते तेन ज्ञानयज्ञेन अहम् इष्टः स्याम् **इति का** ?	यः धर्म्यं च आवयोः इमं संवादम् अध्येष्यते तेन ज्ञानयज्ञेन अहम् इष्टः स्याम् **इति मतिः।**
यः धर्म्यं च आवयोः इमं संवादम् अध्येष्यते तेन ज्ञानयज्ञेन अहम् इष्टः स्याम् इति **कस्य** मतिः ?	यः धर्म्यं च आवयोः इमं संवादम् अध्येष्यते तेन ज्ञानयज्ञेन अहम् इष्टः स्याम् इति **मे** मतिः।

तात्पर्यम् - यः मनुष्यः आवयोः इदं सम्भाषणं सम्यक् पठिष्यति सः ज्ञानयज्ञेन मां यजति इत्येव मम मतम्।

श्रद्धावाननसूयश्च शृणुयादपि यो नरः।
सोऽपि मुक्तः शुभाँल्लोकान्प्राप्नुयात्पुण्यकर्मणाम् ॥१८.७१॥

पदच्छेदः - श्रद्धावान्, अनसूयः, च, शृणुयात्, अपि, यः, नरः।
सः, अपि, मुक्तः, शुभान्, लोकान्, प्राप्नुयात्, पुण्यकर्मणाम् ॥

अन्वयः - श्रद्धावान् अनसूयः च यः नरः श्रृणुयात् अपि सः अपि मुक्तः पुण्यकर्मणां शुभान् लोकान् प्राप्नुयात्।

पदार्थः - श्रद्धावान् = श्रद्धधानः, अनसूयः च = ईर्ष्यारहितः च, यः नरः = यः मानवः, शृणुयात् अपि = आकर्णयेत् अपि, सः अपि = सः मानवः अपि, मुक्तः = विमुक्तः, पुण्यकर्मणाम् = पवित्रकर्मणाम्, शुभान् = प्रशस्तान्, लोकान् = भुवनानि, प्राप्नुयात् = गच्छेत्।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
श्रद्धावान्	श्रद्धावत् - त. पुं. प्र. एक. (विशेषणम्)	अनसूयः	अ. पुं. प्र. एक. (विशेषणम्)
च	अव्ययम्	यः	यद् - द. सर्व. पुं. प्र. एक.
नरः	अ. पुं. प्र. एक. (विशेष्यम्)	शृणुयात्	श्रु (श्रु श्रवणे) पर. कर्तरि विधिलिङ्. प्रपु. एक.
अपि	अव्ययम्	सः	तद् - द. सर्व. पुं. प्र. एक. (विशेषणम्)
मुक्तः	अ. पुं. प्र. एक. (विशेषणम्)	पुण्यकर्मणाम्	पुण्यकर्मन् - न. नपुं. ष. बहु.
शुभान्	अ. पुं. द्वि. बहु. (विशेषणम्)	लोकान्	अ. पुं. द्वि. बहु. (विशेष्यम्)
प्राप्नुयात्	प्र + आप् (आप्लृ व्याप्तौ) पर. कर्तरि विधिलिङ्. प्रपु. एक.		

व्याकरणम् -

(क) सन्धिः	अनसूयश्च	अनसूयः + च	विसर्गसन्धिः (सकारः) श्चुत्वम्।
	शृणुयादपि	शृणुयात् + अपि	जश्त्वसन्धिः।
	यो नरः	यः + नरः	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः।
	सोऽपि	सः + अपि	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः पूर्वरूपं च।
	शुभाँल्लोकान्	शुभान् + लोकान्	परसवर्णसन्धिः।

(ख) समासः	अनसूयः	न विद्यते असूया यस्मिन् सः अनसूयः - नञ्बहुव्रीहिः।
	पुण्यकर्मणाम्	पुण्यं कर्म येषां ते पुण्यकर्माणः, तेषाम् - बहुव्रीहिः।
(ग) कृदन्तः	नरः	नॄ (नॄ नये) + अच्।
	मुक्तः	मुच् (मुच्लृ मोक्षणे) + क्त (कर्मणि)।
	लोकान्	लोक् (लोकृ दर्शने) + घञ् (भावे), तान्।
(घ) तद्धितान्तः	श्रद्धावान्	श्रद्धा + मतुप् (श्रद्धा अस्य अस्मिन् वा अस्ति)।

भावस्पष्टीकरणम् -

प्राप्नुयात् ।	
कः प्राप्नुयात् ?	**मुक्तः** प्राप्नुयात् ।
कः मुक्तः प्राप्नुयात् ?	**श्रद्धावान्** मुक्तः प्राप्नुयात् ।
श्रद्धावान् **पुनः कः** मुक्तः प्राप्नुयात् ?	श्रद्धावान् **अनसूयः च** मुक्तः प्राप्नुयात् ।
श्रद्धावान् अनसूयः च **पुनः कः** मुक्तः प्राप्नुयात् ?	श्रद्धावान् अनसूयः च **यः नरः शृणुयात् अपि सः अपि** मुक्तः प्राप्नुयात् ।
श्रद्धावान् अनसूयः च यः नरः शृणुयात् अपि सः अपि मुक्तः **कान्** प्राप्नुयात् ?	श्रद्धावान् अनसूयः च यः नरः शृणुयात् अपि सः अपि मुक्तः **लोकान्** प्राप्नुयात् ।
श्रद्धावान् अनसूयः च यः नरः शृणुयात् अपि सः अपि मुक्तः **कीदृशान्** लोकान् प्राप्नुयात् ?	श्रद्धावान् अनसूयः च यः नरः शृणुयात् अपि सः अपि मुक्तः **शुभान्** लोकान् प्राप्नुयात् ।
श्रद्धावान् अनसूयः च यः नरः शृणुयात् अपि सः अपि मुक्तः **केषां** शुभान् लोकान् प्राप्नुयात् ?	श्रद्धावान् अनसूयः च यः नरः शृणुयात् अपि सः अपि मुक्तः **पुण्यकर्मणां** शुभान् लोकान् प्राप्नुयात् ।

तात्पर्यम् - यः पुरुषः श्रद्धावान् ईर्ष्यारहितश्च सन् इदं सम्भाषणं श्रृणोति सोऽपि सर्वेभ्यः पापेभ्यः मुक्तः पुण्यशालिनां शुभं लोकं प्राप्स्यति ।

कच्चिदेतच्छ्रुतं पार्थ त्वयैकाग्रेण चेतसा ।
कच्चिदज्ञानसम्मोहः प्रणष्टस्ते धनञ्जय ॥१८.७२॥

पदच्छेदः - कच्चित्, एतत्, श्रुतम्, पार्थ, त्वया, एकाग्रेण, चेतसा ।
कच्चित्, अज्ञानसम्मोहः, प्रणष्टः, ते, धनञ्जय ॥

अन्वयः - पार्थ ! त्वया एकाग्रेण चेतसा एतत् श्रुतं कच्चित् । धनञ्जय ! ते अज्ञानसम्मोहः प्रणष्टः कच्चित् ।

पदार्थः - पार्थ = अर्जुन, त्वया = त्वया, एकाग्रेण = अवहितेन, चेतसा = चित्तेन, एतत् = इदम्, श्रुतं कच्चित् = आकर्णितं किम्, धनञ्जय = अर्जुन, ते = तव, अज्ञानसम्मोहः = अज्ञानजन्यः विपर्ययः, प्रणष्टः कच्चित् = अपगतः किम् ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
पार्थ	अ. पुं. सम्बो. एक.	त्वया	युष्मद् - द. सर्व. तृ. एक.
एकाग्रेण	अ. नपुं. तृ. एक. (विशेषणम्)	चेतसा	चेतस् - सका. नपुं. तृ. एक. (विशेष्यम्)
एतत्	एतद् - द. सर्व. नपुं. प्र. एक. (विशेषणम्)	श्रुतम्	अ. नपुं. प्र. एक. (विशेषणम्)
कच्चित्	अव्ययम्	धनञ्जय	अ. पुं. सम्बो. एक.
ते	युष्मद् - द. सर्व. ष. एक.	अज्ञानसम्मोहः	अ. पुं. प्र. एक. (विशेष्यम्)
प्रणष्टः	अ. पुं. प्र. एक. (विशेषणम्)		

व्याकरणम् -

(क) सन्धिः	एतच्छ्रुतम्	एतत् + श्रुतम्	श्चुत्वसन्धिः, छत्वसन्धिः ।
	त्वयैकाग्रेण	त्वया + एकाग्रेण	वृद्धिसन्धिः ।
	कच्चिदज्ञानसम्मोहः	कच्चित् + अज्ञानसम्मोहः	जश्त्वसन्धिः ।
	प्रणष्टस्ते	प्रणष्टः + ते	विसर्गसन्धिः (सकारः) ।
(ख) समासः	अज्ञानसम्मोहः	अज्ञानात् सम्मोहः अज्ञानसम्मोहः - पञ्चमीतत्पुरुषः ।	
	धनञ्जय	धनं जयति इति धनञ्जयः, तत्सम्बुद्धौ धनञ्जय - कर्तरि खश् उपपदसमासश्च ।	
(ग) कृदन्तः	श्रुतम्	श्रु (श्रु श्रवणे) + क्त (कर्मणि) ।	
	ज्ञानम्	ज्ञा (ज्ञा अवबोधने) + ल्युट् ।	
	सम्मोहः	सम् + मुह् (मुह वैचित्ये) + घञ् ।	
	प्रणष्टः	प्र + नश् (णश अदर्शने) + क्त (कर्तरि) ।	
(घ) तद्धितान्तः	पार्थ	पृथा + अण्, (अपत्यार्थे) पृथायाः अपत्यं पुमान्, तत्सम्बुद्धौ ।	

भावस्पष्टीकरणम् -

श्रुतं कच्चित् ।	
किं श्रुतं कच्चित् ?	**एतत्** श्रुतं कच्चित् ।
केन एतत् श्रुतं कच्चित् ?	**त्वया** एतत् श्रुतं कच्चित् ।
त्वया **केन** एतत् श्रुतं कच्चित् ?	त्वया **चेतसा** एतत् श्रुतं कच्चित् ।

त्वया **कीदृशेन** चेतसा एतत् श्रुतं कच्चित् ?	त्वया **एकाग्रेण चेतसा** एतत् श्रुतं कच्चित् ।
प्रणष्टः कच्चित् ।	
कः प्रणष्टः कच्चित् ?	**अज्ञानसम्मोहः** प्रणष्टः कच्चित् ।
कस्य अज्ञानसम्मोहः प्रणष्टः कच्चित् ?	**ते** अज्ञानसम्मोहः प्रणष्टः कच्चित् ।
अस्मिन् श्लोके सम्बोधनपदे के ?	**पार्थ, धनञ्जय !**

तात्पर्यम् - अर्जुन ! त्वया अवहितेन चित्तेन इदं श्रुतं किम् ? अर्जुन ! तव अविवेकः अपगतः किम् ?

अर्जुन उवाच - **नष्टो मोहः स्मृतिर्लब्धा त्वत्प्रसादात् मयाच्युत ।**
स्थितोऽस्मि गतसन्देहः करिष्ये वचनं तव ॥१८.७३॥

पदच्छेदः -

अर्जुनः, उवाच - नष्टः, मोहः, स्मृतिः, लब्धा, त्वत्प्रसादात्, मया, अच्युत ।
स्थितः, अस्मि, गतसन्देहः, करिष्ये, वचनम्, तव ॥

अन्वयः - अच्युत ! त्वत्प्रसादात् मोहः नष्टः, स्मृतिः मया लब्धा, गतसन्देहः स्थितः अस्मि । तव वचनं करिष्ये ।

पदार्थः - अच्युत = श्रीकृष्ण, त्वत्प्रसादात् = भवदनुग्रहात्, मोहः = अविवेकः, नष्टः = अपगतः, स्मृतिः = स्मरणम्, मया = मया, लब्धा = प्राप्तम्, गतसन्देहः = विगतसंशयः, स्थितः = भूतः, अस्मि = भवामि, तव = ते, वचनम् = वाक्यम्, करिष्ये = आचरिष्यामि ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
अच्युत	अ. पुं. सम्बो. एक.	त्वत्प्रसादात्	अ. पुं. पं. एक.
मोहः	अ. पुं. प्र. एक. (विशेष्यम्)	नष्टः	अ. पुं. प्र. एक. (विशेषणम्)
स्मृतिः	इ. स्त्री. प्र. एक. (विशेष्यम्)	मया	अस्मद् - द. सर्व. तृ. एक.
लब्धा	आ. स्त्री. प्र. एक. (विशेषणम्)	गतसन्देहः	अ. पुं. प्र. एक. (विशेषणम्)
स्थितः	अ. पुं. प्र. एक. (विशेषणम्)	अस्मि	अस् (अस भुवि) पर. कर्तरि लट्. उपु. एक.

तव	युष्मद् - द. सर्व. ष. एक.	वचनम्	अ. नपुं. द्वि. एक.
करिष्ये	कृ (डुकृञ् करणे) आत्म. कर्तरि लृट्. उपु. एक.		

व्याकरणम् -

(क) सन्धिः

नष्टो मोहः	नष्टः + मोहः	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः।
स्मृतिर्लब्धा	स्मृतिः + लब्धा	विसर्गसन्धिः (रेफः)।
मयाच्युत	मया + अच्युत	सवर्णदीर्घसन्धिः।
स्थितोऽस्मि	स्थितः + अस्मि	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः पूर्वरूपं च।

(ख) समासः

त्वत्प्रसादात्	तव प्रसादः त्वत्प्रसादः, तस्मात् - षष्ठीतत्पुरुषः।
गतसन्देहः	गतः सन्देहः यस्मात् सः गतसन्देहः - बहुव्रीहिः।

(ग) कृदन्तः

नष्टः	नश् (णश अदर्शने) + क्त (कर्तरि)।
मोहः	मुह् (मुह वैचित्ये) + घञ्।
स्मृतिः	स्मृ (स्मृ आध्याने) + क्तिन्।
लब्धा	लभ् (डुलभष् प्राप्तौ) + क्त (कर्मणि) + टाप्।
प्रसादात्	प्र + सद् (षदलृ विशरणगत्यवसादनेषु) + घञ्, तस्मात्।
स्थितः	स्था (ष्ठा गतिनिवृत्तौ) + क्त (कर्तरि)।
गतः	गम् (गम्लृ गतौ) + क्त (कर्तरि)।
सन्देहः	सम् + दिह् (दिह उपचये) + घञ्।
वचनम्	वच् (वच परिभाषणे) + ल्युट्।

भावस्पष्टीकरणम् -

अस्मि।	
कथम्भूतः अस्मि ?	**स्थितः** अस्मि।
कीदृशः स्थितः अस्मि ?	**गतसन्देहः** स्थितः अस्मि।
कथं गतसन्देहः स्थितः अस्मि ?	**स्मृतिः मया लब्धा अतः** गतसन्देहः स्थितः अस्मि।

पुनः **कथं** स्मृतिः मया लब्धा, अतः गतसन्देहः स्थितः अस्मि ?	**मोहः नष्टः**, स्मृतिः मया लब्धा, अतः गतसन्देहः स्थितः अस्मि।
कस्मात् मोहः नष्टः, स्मृतिः मया लब्धा, अतः गतसन्देहः स्थितः अस्मि ?	**त्वत्प्रसादात्** मोहः नष्टः, स्मृतिः मया लब्धा, अतः गतसन्देहः स्थितः अस्मि।
त्वत्प्रसादात् मोहः नष्टः, स्मृतिः मया लब्धा, गतसन्देहः स्थितः अस्मि **अतः किं करिष्ये** ?	त्वत्प्रसादात् मोहः नष्टः, स्मृतिः मया लब्धा, गतसन्देहः स्थितः अस्मि **अतः वचनं करिष्ये**।
त्वत्प्रसादात् मोहः नष्टः, स्मृतिः मया लब्धा, गतसन्देहः स्थितः अस्मि अतः **कस्य** वचनं करिष्ये ?	त्वत्प्रसादात् मोहः नष्टः, स्मृतिः मया लब्धा, गतसन्देहः स्थितः अस्मि अतः **तव** वचनं करिष्ये।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**अच्युत** !

तात्पर्यम् - श्रीकृष्ण ! भवदनुग्रहात् अविवेकः अपगतः। कर्तव्यस्मरणं मम जातम्। सन्देहरहितः स्थितः अस्मि। तव वचनम् आचरिष्यामि।

सञ्जय उवाच - **इत्यहं वासुदेवस्य पार्थस्य च महात्मनः।**
संवादमिममश्रौषमद्भुतं रोमहर्षणम् ॥१८.७४॥

पदच्छेदः -

सञ्जयः, उवाच - इति, अहम्, वासुदेवस्य, पार्थस्य, च, महात्मनः।
संवादम्, इमम्, अश्रौषम्, अद्भुतम्, रोमहर्षणम् ॥

अन्वयः - महात्मनः वासुदेवस्य पार्थस्य च रोमहर्षणम् अद्भुतम् इमं संवादम् इति अहम् अश्रौषम्।

पदार्थः - महात्मनः = महानुभावस्य, वासुदेवस्य = नारायणस्य, पार्थस्य च = अर्जुनस्य च, रोमहर्षणम् = रोमाञ्चकरम्, अद्भुतम् = आश्चर्यम्, इमम् = एतम्, संवादम् = सम्भाषणम्, इति = एवम्, अहम् = अहम्, अश्रौषम् = अशृणवम्।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
महात्मनः	महात्मन् - न. पुं. ष. एक. (विशेषणम्)	वासुदेवस्य	अ. पुं. ष. एक. (विशेषणम्)
पार्थस्य	अ. पुं. ष. एक.	च	अव्ययम्
रोमहर्षणम्	अ. पुं. द्वि. एक. (विशेषणम्)	अद्भुतम्	अ. पुं. द्वि. एक. (विशेषणम्)

इमम्	इदम् - म. सर्व. पुं. द्वि. एक. (विशेषणम्)	संवादम्	अ. पुं. द्वि. एक. (विशेषणम्)
इति	अव्ययम्	अहम्	अस्मद् - द. सर्व. प्र. एक.
अश्रौषम्	शृ (श्रु श्रवणे) पर. कर्तरि लुङ्. उपु. एक.		

व्याकरणम् -

(क) सन्धिः	इत्यहम्	इति + अहम् यण्सन्धिः ।
(ख) समासः	महात्मनः	महान् आत्मा यस्य सः महात्मा, तस्य - बहुव्रीहिः ।
	रोमहर्षणम्	रोम्णां हर्षणः रोमहर्षणः, तम् - षष्ठीतत्पुरुषः ।
(ग) तद्धितान्तः	वासुदेवस्य	वसुदेव + अण्, (अपत्यार्थे) वसुदेवस्य अपत्यं पुमान्, तस्य ।
	पार्थस्य	पृथा + अण्, (अपत्यार्थे) पृथायाः अपत्यं पुमान्, तस्य ।

भावस्पष्टीकरणम् -

अश्रौषम् ।	
कः अश्रौषम् ?	**अहम्** अश्रौषम् ।
कम् इति अहम् अश्रौषम् ?	**संवादम्** इति अहम् अश्रौषम् ।
कं संवादम् इति अहम् अश्रौषम् ?	**इमं** संवादम् इति अहम् अश्रौषम् ।
कीदृशम् इमं संवादम् इति अहम् अश्रौषम् ?	**अद्भुतम्** इमं संवादम् इति अहम् अश्रौषम् ।
पुनः कीदृशम् अद्भुतम् इमं संवादम् इति अहम् अश्रौषम् ?	**रोमहर्षणम्** अद्भुतम् इमं संवादम् इति अहम् अश्रौषम् ।
कयोः रोमहर्षणम् अद्भुतम् इमं संवादम् इति अहम् अश्रौषम् ?	**वासुदेवस्य पार्थस्य च** रोमहर्षणम् अद्भुतम् इमं संवादम् इति अहम् अश्रौषम् ।
कीदृशस्य वासुदेवस्य पार्थस्य च रोमहर्षणम् अद्भुतम् इमं संवादम् इति अहम् अश्रौषम् ?	**महात्मनः** वासुदेवस्य पार्थस्य च रोमहर्षणम् अद्भुतम् इमं संवादम् इति अहम् अश्रौषम् ।

तात्पर्यम् - महानुभावस्य नारायणस्य अर्जुनस्य च रोमाञ्चकरम् आश्चर्यम् एनं संवादम् अहम् अशृणवम् ।

व्यासप्रसादाच्छ्रुतवानेतद् गुह्यमहं परम्।
योगं योगेश्वरात्कृष्णात्साक्षात्कथयतः स्वयम्॥१८.७५॥

पदच्छेदः - व्यासप्रसादात्, श्रुतवान्, एतत्, गुह्यम्, अहम्, परम्।
योगम्, योगेश्वरात्, कृष्णात्, साक्षात्, कथयतः, स्वयम्॥

अन्वयः - साक्षात् कथयतः योगेश्वरात् कृष्णात् गुह्यं परम् एतत् योगं व्यासप्रसादात् अहं स्वयं श्रुतवान्।

पदार्थः - साक्षात् = प्रत्यक्षम्, कथयतः = वदतः, योगेश्वरात् = योगप्रभोः, कृष्णात् = वासुदेवात्, गुह्यम् = रहस्यम्, परम् = उत्तमम्, एतत् = इदम्, योगम् = योगग्रन्थम्, व्यासप्रसादात् = व्यासानुग्रहात्, अहम् = सञ्जयः, स्वयम् = आत्मना, श्रुतवान् = आकर्णितवान्।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
साक्षात्	अव्ययम्	कथयतः	कथयत् - त. पुं. पं. एक. (विशेषणम्)
योगेश्वरात्	अ. पुं. पं. एक. (विशेषणम्)	कृष्णात्	अ. पुं. पं. एक. (विशेष्यम्)
गुह्यम्	अ. पुं. द्वि. एक. (विशेषणम्)	परम्	अ. पुं. द्वि. एक. (विशेषणम्)
एतत्	एतद् - द. सर्व. नपुं. द्वि. एक.	योगम्	अ. पुं. द्वि. एक. (विशेष्यम्)
व्यासप्रसादात्	अ. पुं. पं. एक.	अहम्	अस्मद् - द. सर्व. प्र. एक. (विशेष्यम्)
स्वयम्	अव्ययम्	श्रुतवान्	श्रुतवत् - त. पुं. प्र. एक. (विशेषणम्)

व्याकरणम् -

(क) सन्धिः व्यासप्रसादाच्छ्रुतवान् — व्यासप्रसादात् + श्रुतवान् — श्चुत्वसन्धिः, छत्वसन्धिः।

(ख) समासः व्यासप्रसादात् — व्यासस्य प्रसादः व्यासप्रसादः, तस्मात् - षष्ठीतत्पुरुषः।
योगेश्वरात् — योगस्य ईश्वरः योगेश्वरः, तस्मात् - षष्ठीतत्पुरुषः।

(ग) कृदन्तः श्रुतवान् — श्रु (श्रु श्रवणे) + क्तवतु।
गुह्यम् — गुह् (गुहू संवरणे) + ण्यत्।
योगम् — युज् (युजिर् योगे) + घञ्, तम्।
कथयतः — कथ् (कथ वाक्यप्रबन्धे) + शतृ, तस्य।

भावस्पष्टीकरणम् -

श्रुतवान्।	
कः श्रुतवान्?	**अहं स्वयं** श्रुतवान्।
कम् अहं स्वयं श्रुतवान्?	**योगं** अहं स्वयं श्रुतवान्।
कस्मात् योगम् अहं स्वयं श्रुतवान्?	**व्यासप्रसादात्** योगम् अहं स्वयं श्रुतवान्।
व्यासप्रसादात् **कीदृशं** योगम् अहं स्वयं श्रुतवान्?	व्यासप्रसादात् **गुह्यं** योगम् अहं स्वयं श्रुतवान्।
व्यासप्रसादात् **कीदृशं** गुह्यं योगम् अहं स्वयं श्रुतवान्?	व्यासप्रसादात् **परं** गुह्यं योगम् अहं स्वयं श्रुतवान्।
व्यासप्रसादात् **किं** परं गुह्यं योगम् अहं स्वयं श्रुतवान्?	व्यासप्रसादात् **एतत्** परं गुह्यं योगम् अहं स्वयं श्रुतवान्।
व्यासप्रसादात् एतत् परं गुह्यं योगं **कस्मात्** अहं स्वयं श्रुतवान्?	व्यासप्रसादात् एतत् परं गुह्यं **कृष्णात्** योगम् अहं स्वयं श्रुतवान्।
व्यासप्रसादात् **कीदृशात्** कृष्णात् एतत् परं गुह्यं योगम् अहं स्वयं श्रुतवान्?	व्यासप्रसादात् **योगेश्वरात्** कृष्णात् एतत् परं गुह्यं योगम् अहं स्वयं श्रुतवान्।
व्यासप्रसादात् **पुनः कीदृशात्** योगेश्वरात् कृष्णात् एतत् परं गुह्यं योगम् अहं स्वयं श्रुतवान्?	व्यासप्रसादात् **कथयतः** योगेश्वरात् कृष्णात् एतत् परं गुह्यं योगम् अहं स्वयं श्रुतवान्।
व्यासप्रसादात् **कस्मात्** कथयतः योगेश्वरात् कृष्णात् एतत् परं गुह्यं योगम् अहं स्वयं श्रुतवान्?	व्यासप्रसादात् **साक्षात्** कथयतः योगेश्वरात् कृष्णात् एतत् परं गुह्यं योगम् अहं स्वयं श्रुतवान्।

तात्पर्यम् - योगेश्वरः कृष्णः साक्षात् स्वमुखेन यद् इदं गीतार्थतत्त्वम् उक्तवान् तत् अहं व्यासस्य अनुग्रहेण श्रुतवान् अस्मि।

राजन्संस्मृत्य संस्मृत्य संवादमिममद्भुतम्।
केशवार्जुनयोः पुण्यं हृष्यामि च मुहुर्मुहुः ॥१८.७६॥

पदच्छेदः - राजन्, संस्मृत्य, संस्मृत्य, संवादम्, इमम्, अद्भुतम्।
केशवार्जुनयोः, पुण्यम्, हृष्यामि, च, मुहुः, मुहुः ॥

अन्वयः - राजन्! अद्भुतं पुण्यं केशवार्जुनयोः इमं संवादं संस्मृत्य संस्मृत्य मुहुः मुहुः च हृष्यामि।

पदार्थः - राजन् = महाराज, अद्भुतम् = आश्चर्यम्, पुण्यम् = पापहरम्, केशवार्जुनयोः = कृष्णार्जुनयोः, इमम् = एनम्, संवादम् = सम्भाषणम्, संस्मृत्य संस्मृत्य = पुनः पुनः स्मृत्वा, मुहुः मुहुः च = भूयो भूयः, हृष्यामि = तुष्यामि ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
राजन्	राजन् - न. पुं. सम्बो. एक.	अद्भुतम्	अ. पुं. द्वि. एक. (विशेषणम्)
पुण्यम्	अ. पुं. द्वि. एक. (विशेषणम्)	केशवार्जुनयोः	अ. पुं. ष. द्वि.
इमम्	इदम् - म. सर्व. नपुं. द्वि. एक. (विशेषणम्)	संवादम्	अ. नपुं. द्वि. एक. (विशेष्यम्)
संस्मृत्य	ल्यबन्तम् अव्ययम्	मुहुः	अव्ययम्
च	अव्ययम्	हृष्यामि	हृष् (हृष तुष्टौ) पर. कर्तरि लट्. उपु. एक.

व्याकरणम् -

(क) सन्धिः मुहुर्मुहुः मुहुः + मुहुः विसर्गसन्धिः (रेफः) ।

(ख) समासः केशवार्जुनयोः केशवश्च अर्जुनश्च केशवार्जुनौ, तयोः - द्वन्द्वः ।

(ग) कृदन्तः संस्मृत्य सम् + स्मृ (स्मृ चिन्तायाम्) + ल्यप् ।

भावस्पष्टीकरणम् -

हृष्यामि ।	
कथं हृष्यामि ?	**मुहुः मुहुः च** हृष्यामि ।
किं कृत्वा मुहुः मुहुः च हृष्यामि ?	**संस्मृत्य संस्मृत्य** मुहुः मुहुः च हृष्यामि ।
कं संस्मृत्य संस्मृत्य मुहुः मुहुः च हृष्यामि ?	**संवादं** संस्मृत्य संस्मृत्य मुहुः मुहुः च हृष्यामि ।
कं संवादं संस्मृत्य संस्मृत्य मुहुः मुहुः च हृष्यामि ?	**इमं** संवादं संस्मृत्य संस्मृत्य मुहुः मुहुः च हृष्यामि ।
कीदृशम् इमं संवादं संस्मृत्य संस्मृत्य मुहुः मुहुः च हृष्यामि ?	**पुण्यम्** इमं संवादं संस्मृत्य संस्मृत्य मुहुः मुहुः च हृष्यामि ।
कीदृशं पुण्यम् इमं संवादं संस्मृत्य संस्मृत्य मुहुः मुहुः च हृष्यामि ?	**अद्भुतं** पुण्यम् इमं संवादं संस्मृत्य संस्मृत्य मुहुः मुहुः च हृष्यामि ।

कयोः अद्भुतं पुण्यम् इमं संवादं संस्मृत्य संस्मृत्य मुहुः मुहुः च हृष्यामि ?	केशवार्जुनयोः अद्भुतं पुण्यम् इमं संवादं संस्मृत्य संस्मृत्य मुहुः मुहुः च हृष्यामि।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	राजन् !

तात्पर्यम् - राजन् धृतराष्ट्र ! आश्चर्यं पापहरं कृष्णार्जुनयोः एनं संलापं पुनः पुनः स्मृत्वा भूयो भूयः च सन्तुष्यामि।

तच्च संस्मृत्य संस्मृत्य रूपमत्यद्भुतं हरेः।
विस्मयो मे महान् राजन्हृष्यामि च पुनः पुनः ॥१८.७७॥

पदच्छेदः - तत्, च, संस्मृत्य, संस्मृत्य, रूपम्, अत्यद्भुतम्, हरेः।
विस्मयः, मे, महान्, राजन्, हृष्यामि, च, पुनः, पुनः ॥

अन्वयः - राजन् ! हरेः अत्यद्भुतं च तत् रूपं संस्मृत्य संस्मृत्य (स्थितस्य) मे महान् विस्मयः। पुनः पुनः च हृष्यामि।

पदार्थः - राजन् = महाराज, हरेः = विष्णोः, अत्यद्भुतम् च = अति आश्चर्यम् अपि, तत् रूपम् = तत् विश्वरूपम् अपि, संस्मृत्य संस्मृत्य = पुनः पुनः स्मृत्वा, मे = मम, महान् = अत्यधिकम्, विस्मयः = आश्चर्यम्, पुनः पुनः च = प्रतिक्षणम्, हृष्यामि = तुष्यामि।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
राजन्	राजन् - न. पुं. सम्बो. एक.	हरेः	इ. पुं. ष. एक.
अत्यद्भुतम्	अ. नपुं. द्वि. एक. (विशेषणम्)	च	अव्ययम्
तत्	तद् - द. सर्व. नपुं. द्वि. एक. (विशेषणम्)	रूपम्	अ. नपुं. द्वि. एक. (विशेष्यम्)
संस्मृत्य	ल्यबन्तम् अव्ययम्	मे	अस्मद् - द. सर्व. ष. एक.
महान्	महत् - त. पुं. प्र. एक. (विशेषणम्)	विस्मयः	अ. पुं. प्र. एक. (विशेष्यम्)
पुनः	अव्ययम्	हृष्यामि	हृष् (हृष तुष्टौ) पर. कर्तरि लट्. उपु. एक.

व्याकरणम् -

(क) सन्धिः विस्मयो मे विस्मयः + मे विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः ।

(ख) कृदन्तः संस्मृत्य सम् + स्मृ (स्मृ चिन्तायाम्) + ल्यप् ।

विस्मयः वि + स्मि (ष्मिङ् ईषद्धसने) + अच् ।

भावस्पष्टीकरणम् -

विस्मयः ।	
कीदृशः विस्मयः ?	**महान्** विस्मयः ।
कस्य महान् विस्मयः ?	**मे** महान् विस्मयः ।
किं कृत्वा मे महान् विस्मयः ?	**संस्मृत्य संस्मृत्य** मे महान् विस्मयः ।
किं संस्मृत्य संस्मृत्य मे महान् विस्मयः ?	**रूपं** संस्मृत्य संस्मृत्य मे महान् विस्मयः ।
किं रूपं संस्मृत्य संस्मृत्य मे महान् विस्मयः ?	**तत्** रूपं संस्मृत्य संस्मृत्य मे महान् विस्मयः ।
कीदृशं च तत् रूपं संस्मृत्य संस्मृत्य मे महान् विस्मयः ?	**अत्यद्भुतं च** तत् रूपं संस्मृत्य संस्मृत्य मे महान् विस्मयः ।
कस्य अत्यद्भुतं च तत् रूपं संस्मृत्य संस्मृत्य मे महान् विस्मयः ?	**हरेः** अत्यद्भुतं च तत् रूपं संस्मृत्य संस्मृत्य मे महान् विस्मयः ।
हरेः अत्यद्भुतं च तत् रूपं संस्मृत्य संस्मृत्य मे महान् विस्मयः **अतः पुनः किं करोमि ?**	हरेः अत्यद्भुतं च तत् रूपं संस्मृत्य संस्मृत्य मे महान् विस्मयः **अतः पुनः पुनः च हृष्यामि ।**
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**राजन् !**

तात्पर्यम् - राजन् ! हरेः अत्यद्भुतं च तत् रूपं स्मृत्वा स्मृत्वा (स्थितस्य) मम महत् आश्चर्यं भवति। पुनः पुनः सन्तुष्यामि च ।

यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः ।
तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम ॥१८.७८॥

पदच्छेदः - यत्र, योगेश्वरः, कृष्णः, यत्र, पार्थः, धनुर्धरः ।
तत्र, श्रीः, विजयः, भूतिः, ध्रुवा, नीतिः, मतिः, मम ॥

अन्वयः - यत्र योगेश्वरः कृष्णः यत्र पार्थः धनुर्धरः तत्र श्रीः विजयः भूतिः ध्रुवा नीतिः (इति) मम मतिः ।

